JAMNADAS THAKKAR
18, ,269,SION-W
BOMBAY 400 022 INDIA

DEVĪ RAHASYA
WITH
PARIŚISHṬAS

श्रीदेवीरहस्यम्

DEVIRAHASYA.

PREFACE.

The present edition of Devirahasya is based upon the collation of the following Manuscripts:-

क Belongs to His Highness' Private Library. *In the Devanāgarī characters. Fresh. Incomplete* Contains 217 leaves, each page having 13 lines with 20 syllables per line Measures $9\frac{3}{8}$X$9\frac{3}{8}$

ख. Belongs to Pt. Shivnath Sharma of this Department. In the Śārada characters. Complete. Contains 356 leaves. Number of lines per page 15 with 26 syllables per line. Measures 13"X8". Copies in the Vikrama year 1725.

ग Belongs to Pt. Pitamber Ganz of Srinagar. In the Devanāgarī characters Old and decayed. Correct. Contains 289 leaves. Number of lines per page 12 with 31 syllables per line Measures 10„X12". Copied in 1861 A. D.

घ. Belongs to Pt. Shyam Lal Jatu In the Sarada characters Fresh and incomplete. Contains 121 leaves Number of lines per page 18 with 20 syllables per line Measures 14"X6".

ङ Belongs to Pt Visvamber Nath Handu. Complete. In the Śārada characters Contains 173 leaves with 9 lines per page and 36 syllables per line. Measures 6"X10".

DEVIRAHASYA.

INTRODUCTION

In the following pages the Tāntric works called Devīrahasya and Uddhārakośa are presented in a printed form in the Devanāgarī Script The former work that is the *Devīrahasya* (*The* secret worship of the *Devī-Tripurā*) is written in the form of a dialogue between Bhairava and devī It contains three parts the first being named as Pūrvārdha, the second as Uttarārdha and the third as Pariśishta

In the Pūrvārdha there are twentyfive chapters called patalas devoted to the description respectively of (1) Initiation (2) Incantations of Devī (3) Incantations of Śiva (4) Incantation of Vishnu (5) Utkelana or laying open for practice of incantations. (6) Vitalising of mantras (7) Method of removing curses attaching to incantations (8) Mental muttering called Pāráyana (9) How to use, before and after, particular Bijas in the case of particular mantras (10) Preliminary practice of mantras (11) Sacrifice conducted in the preliminary practice of mantras (12) Diagrams (13) How to bear on the body emulets having the diagrams (14) Sage, metre etc, of incantation (15, 16) Worship done at crematoriums (17,18) Purification of the articles of

Worship. (19) Origin of wine. (20) Ceremonious way of taking wine. (21) Peace prayers and hymns of the Śākta heroes (22) Purification of wine. (23) Purification of the maiden. (24) Different kinds of rosary and their purification. (25) Purification etc., of the diagrams

The Uttarārdha otherwise called Rahasyavijaya consists of the thirtyfive chapters embodying the Pañchāṅgas-Patala, Kavacha, Paddhati Sahasranāma and Stotra-of Ganeśa, Sūrya, Lakshmīnārāyaṇa, Śiva and Durgā.

Pariśishṭa or the appendix gives the Pañchāṅgas of Jvālāmukhī, Śārikā, Mahārājñī and Bālā the family goddesses of the Kashmiri pandits.

The Uddhārakośa put in the mouth of the sage Dakshināmūrti is also included in the appendix. It contains seven sections The first section gives the incantations of the goddesses Tripurā, Lakshmī, Sarasvatī, Tārā, Bhuvaneśvarī Mātaṅgī, Śhārikā, Rājñī, Bhīdā and Jvālāmukhī along with the synonyms of some Bījas.

The second section furnishes incantations of the six additional goddesses Bhadrakālī, Turī, Chhinnamastā, Dakshinakālikā, Śyāmā and Kālarātrī

The third section gives the incantations of Vajrayoginī, Vārāhī, Śāradā, Kāmeśvarī, Gaurī, Annapurnā and Kulvāgīśvarī and the seven boys namely Ganeśa, Vatuka, Kumāra, Mrityuñjaya, Kārtavīryārjuna, Sugrīva and Hanumān.

The fourth section discribes the incantations of the nine planets.

The fifth section gives the synonyms of each letter of the Sanskrit alphabet.

The sixth section deals with the incantations of Bhavānī, Bagalāmukhī, Indrākshī and Khecharī.

The seventh section describes the bodily form of each of the goddesses, boys and planets mentioned in the preceding sections.

The Devirahasya is traditionally supposed to form part of the bigger compilation called Rudrayāmala. The *Uddhārakośa*, though written in the form of a dialogue between Dakshinamūrti and his disciple Akshobhya, is a collection of quotations from no less than fortyseven Tāntric works.

Date and author of the composition. The Devīrahasya in all its parts seemes to have been composed by some Kashmirian writer because as already referred to above the goddesses Jvālāmukhī, Sārika Mahārājnī, Śāradā, Bhida and Bālā are popular and have their shrines in the Kashmir Valley.

The word Phirangahā appearing at page 307 and that Safak at 317 of the Devīrahasya clearly show that the composition must have taken place, at last in its present form, long after the advent of the Mohamadans and Europeans into India

Srinagar the
31st March, 1941.

M. S. KAUL.

विषयानुक्रमणिका

विषयः	पृष्ठम्	विषयः	पृष्ठम्
प्रथमः पटलः ।		मातङ्गीमन्त्रोद्धारः	११
ग्रन्थप्रस्तावः	१	भुवनेश्वरीमन्त्रोद्धारः	१२
गुरुशिष्यनिर्णयः	,,	उग्रतारामन्त्रोद्धारः	,,
तत्र दीक्षाग्रहणावश्यता	२	छिन्नमस्तामन्त्रोद्धारः	,,
गुरुपरीक्षा	,,	सुमुखीमन्त्रोद्धारः	,,
शिष्यपरीक्षा	,,	सरस्वतीमन्त्रोद्धारः	,,
गुरोरभावे पुस्तकम्	३	अन्नपूर्णामन्त्रोद्धारः	,,
गुरुसद्भावे पुस्तकगुरुत्वोत्थापः	,,	महालक्ष्मीमन्त्रोद्धारः	१३
विप्रादीनां दीक्षाऽऽवश्यता	,,	शारिकामन्त्रोद्धारः	,,
दीक्षाग्रहणसमयप्रश्नः	,,	शाम्भवीमन्त्रोद्धारः	,,
तत्समयविधेयवचनम्	४	इन्द्राणीमन्त्रोद्धारः	,,
श्रीचक्रविभावना	,,	बगलामुखीमन्त्रोद्धारः	,,
तत्र पूजयेदेवताः	,,	महातुरीमन्त्रोद्धारः	१४
पूजाक्रमः	,,	महाराज्ञीमन्त्रोद्धारः	,,
पूजाङ्गहोमनिरूपणम्	५	ज्वालामुखीमन्त्रोद्धारः	,,
शिष्यस्य संस्कारक्रमः	६	भीमामन्त्रोद्धारः	,,
विद्याविशेषग्रहणनिर्णयः	७	कालरात्रीमन्त्रोद्धारः	,,
दक्षिणादाननिरूपणम्	८	भद्रकालीमन्त्रोद्धारः	१५
द्वितीयः पटलः ।		यक्षयोगिनीमन्त्रोद्धारः	,,
वैदी-वैष्णव-शैव-शाक्त-मन्त्रनिरूपण-प्रस्तावः	९	धूम्रवाराहीमन्त्रोद्धारः	,,
तत्र बालामन्त्रोद्धारः	१०	सिद्धलक्ष्मीमन्त्रोद्धारः	,,
पञ्चदशाक्षरीमन्त्रोद्धारः	,,	कुलदेवीश्वरीमन्त्रोद्धारः	,,
षोडशीमन्त्रोद्धारः	,,	पद्मावतीमन्त्रोद्धारः	,,
त्रिपुरामन्त्रोद्धारः	११	कुब्जिकामन्त्रोद्धारः	१६
विद्याराज्ञी (दक्षकालिका)मन्त्रोद्धारः	,,	गौरीमन्त्रोद्धारः	,,
भद्रकाल्यामन्त्रोद्धारः	,,	त्रैलक्यमन्त्रोद्धारः	,,
		नीलसरस्वतीमन्त्रोद्धारः	,,
		परादूतिमन्त्रोद्धारः	,,

विषयः	पार्श्वम्
तृतीयः पटलः ।	
मृत्युञ्जयमन्त्रः	१७
अमृतेश्वरमन्त्रः	,,
षट्कभैरवमन्त्रः	,,
महेश्वरमन्त्रः	१८
शिवमन्त्रः	,,
स एवापरः	,,
सदाशिवमन्त्रः	,,
रुद्रस्य मन्त्रोद्धारः	,,
महादेवमन्त्रः	,,
करालमन्त्रः	,,
विकरालमन्त्रः	,,
नीलकण्ठमन्त्रः	,,
शर्वस्य मन्त्रः	,,
पशुपतिमन्त्रः	१९
मृडमन्त्रोद्धारः	,,
पिनाकिमन्त्रः	,,
गिरिशस्य मन्त्रोद्धारः	,,
भीमस्य मन्त्रोद्धारः	,,
महागणपतिमन्त्रः	,,
प्रमथाधिपमन्त्रः	,,
कुमारमन्त्रोद्धारः	,,
क्रोधनेशमन्त्रः	,,
ईशस्य मन्त्रोद्धारः	,,
कपालीशमन्त्रोद्धारः	,,
क्रूरभैरवमन्त्रः	,,
संहारभैरवमन्त्रः	,,
ईश्वरमन्त्रोद्धारः	,,
मर्गस्य मन्त्रः	१९
रुरुभैरवमन्त्रः	,,
कालाग्निभैरवमन्त्रः	२०
सद्योजातमन्त्रः	,,
अघोरमन्त्रोद्धारः	,,
महाकालमन्त्रः	,,
कामेश्वरमन्त्रः	,,
चतुर्थः पटलः ।	
लक्ष्मीनारायणमन्त्रः	२१
राधाकृष्णमन्त्रः	,,
विष्णुमन्त्रोद्धारः	,,
लक्ष्मीनृसिंहमन्त्रः	,,
लक्ष्मीवराहमन्त्र	,,
भार्गवराममन्त्रः	२२
सीतारामन्त्रः	,,
जनार्दनमन्त्रः	,,
विश्वक्सेनमन्त्रः	,,
लक्ष्मीवासुदेवमन्त्रः	,,
पञ्चमः पटलः ।	
बालामन्त्रोत्कीलनमन्त्रः	२३
त्रिपुरभैरवीमन्त्रोत्कीलनमन्त्रः	,,
षोडशीमन्त्रोत्कीलनमन्त्रः	,,
भद्रकालीमन्त्रोत्कीलनमन्त्रः	,,
मातङ्गीमन्त्रोत्कीलनमन्त्रः	,,
भुवनेश्वरीमन्त्रोत्कीलनम्	२४
तारामन्त्रोत्कीलनम्	,,
छिन्नमस्तामन्त्रोत्कीलनम्	,,

विषयः	पार्श्वम्	विषयः	पार्श्वम्
सुमुखीमन्त्रोत्कीलनम्	२४	अमृतेश्वरमन्त्रस्योत्कीलनम्	२७
सरस्वतीमन्त्रोत्कीलनम्	,,	बटुकभैरवमन्त्रस्य०	,,
अन्नपूर्णामन्त्रोत्कीलनम्	,,	नीलकण्ठमन्त्रस्य०	,,
महालक्ष्मीमन्त्रोत्कीलनम्	,,	सद्योजातशिवमन्त्रस्य०	,,
शारिकामन्त्रोत्कीलनम्	,,	महागणपतिमन्त्रस्य०	,,
शारदामन्त्रोत्कीलनम्	,,	अघोरभैरवमन्त्रस्य०	,,
इन्द्राक्षीमन्त्रोत्कीलनम्	,,	कामेश्वरमन्त्रस्य०	,,
बगलामुखीमन्त्रोत्कीलनम्	,,	लक्ष्मीनारायणमन्त्रस्य०	,,
तुरीमन्त्रोत्कीलनम्	,,	राधाकृष्णमन्त्रस्य०	,,
महाराज्ञीमन्त्रोत्कीलनम्	२५	विष्णुमन्त्रोत्कीलनम्	२८
ज्वालामुखीमन्त्रोत्कीलनम्	,,	लक्ष्मीनृसिंहमन्त्रस्य०	,,
भीडामन्त्रोत्कीलनम्	,,	लक्ष्मीवराहमन्त्रस्य०	,,
कालरात्रिमन्त्रस्योत्की०	,,	भार्गवरामन्त्रस्य०	,,
भवानीमन्त्रोत्कीलनम्	,,	सीतारामन्त्रस्य०	,,
वज्रयोगिनीमन्त्रस्य०	,,	जनार्दनमन्त्रस्य०	,,
धूम्रवाराहीमन्त्रोत्कीलनम्	,,	विष्वक्सेनमन्त्रस्य०	,,
सिद्धलक्ष्मीमन्त्रोत्कीलनम्	,,	वासुदेवमन्त्रोत्कीलनम्	,,
कुलवागीश्वरीमन्त्रस्य०	,,	**षष्ठः पटलः ।**	
पद्मावतीमन्त्रोत्कीलनम्	,,		
कुब्जिकामन्त्रस्य०	,,	बालामन्त्रसञ्जीवनम्	२९
गौरीमन्त्रस्योत्कीलनम्	,,	त्रिपुरभैरवीमन्त्रस्य०	,,
खेचरीमन्त्रोत्कीलनम्	,,	त्रिकूटामन्त्रस्य०	,,
नीलसरस्वतीमन्त्रस्य०	२६	भद्रकालीमन्त्रसञ्जीवनम्	,,
पराशक्तिमन्त्रस्य०	,,	मातङ्गीमन्त्रसञ्जीवनम्	,,
केचन शैवमन्त्रा अनिष्कीलितास्ते पुरश्चरणेनैव सिद्धा	,,	भुवनेश्वरीमन्त्रसञ्जीवनम्	,,
प्रतिमन्त्र मन्त्रादिबीजत्रिरावृत्या वा उत्कीलिता भवन्ति	,,	उग्रतारामन्त्रस्य०	,,
मृत्युञ्जयमन्त्रोत्कीलनम्	२७	छिन्नमस्तामन्त्रस्य०	३०
		सुमुखीमन्त्रस्य०	,,
		सरस्वतीमन्त्रस्य०	,,

विषयः	पार्श्वम्	विषयः	पार्श्वः
अन्नपूर्णामन्त्रसञ्जीवनम्	३०	महागणपतिमन्त्रसञ्जीवनम्	३२
महालक्ष्मीमन्त्रस्य०	,,	अघोरभैरवमन्त्रस्य०	,,
शारिकामन्त्रस्य०	,,	कामेश्वरमन्त्रसञ्जीवनम्	,,
शारदामन्त्रस्य०	,,	लक्ष्मीनारायणमन्त्रस्य०	३३
इन्द्राक्षीमन्त्रस्य०	,,	राधाकृष्णमन्त्रस्य०	,,
बगलामुखीमन्त्रस्य०	,,	विष्णुमन्त्रसञ्जीवनम्	,,
महात्रिपुरीमन्त्रस्य०	,,	लक्ष्मीनृसिंहमन्त्रस्य०	,,
महाराज्ञीमन्त्रस्य०	,,	लक्ष्मीवराहमन्त्रस्य०	,,
ज्वालामुखीमन्त्रस्य०	,,	भार्गवराममन्त्रस्य०	,,
भैरुण्डामन्त्रसञ्जीवनम्	,,	सीतारामन्त्रस्य०	,,
कालरात्रीमन्त्रस्य०	३१	जनार्दनमन्त्रसञ्जीवनम्	,,
भवानीमन्त्रस्य०	,,	विश्वक्सेनमन्त्रस्य०	,,
षड्योगिनीमन्त्रस्य०	,,	वासुदेवमन्त्रस्य०	,,
धूम्रवाराह्रीमन्त्रस्य०	,,		
सिद्धलक्ष्मीमन्त्रस्य०	,,	सप्तमः पटलः ।	
कुलवागीश्वरीमन्त्रस्य०	,,	बालामन्त्रशापमोचनम्	३४
पद्मावतीमन्त्रस्य०	,,	त्रिपुरभैरवीमन्त्रशापमोचनम्	,,
कुब्जिकामन्त्रस्य०	,,	त्रिकूटामन्त्रशापमोचनम्	,,
गौरीमन्त्रसञ्जीवनम्	,,	दक्षिणकालिकामन्त्रस्य०	,,
खेचरीमन्त्रस्य०	,,	भद्रकालीमन्त्रस्य०	,,
नीलसरस्वतीमन्त्रस्य०	,,	मातङ्गीमन्त्रशापमोचनम्	३५
पराशक्तिमन्त्रस्य०	,,	भुवनेश्वरीमन्त्रस्य०	,,
सर्वशैवमन्त्र-सञ्जीवनमन्त्र	३२	उग्रतारामन्त्रस्य०	,,
मृत्युञ्जयमन्त्रसञ्जीवनम्	,,	छिन्नमस्तामन्त्रस्य०	,,
अमृतेश्वरमन्त्रस्य०	,,	सुमुखीमन्त्रशापमोचनम्	,,
बटुकभैरवमन्त्रस्य०	,,	सरस्वतीमन्त्रशापमोचनम्	,,
नीलकण्ठमन्त्रसञ्जीवनम्	,,	अन्नपूर्णामन्त्रस्य०	,,
सद्योजातमन्त्रस्य०	,,	महालक्ष्मीमन्त्रस्य०	,,

विषयः	पार्श्वम्	विषयः	पार्श्वम्
शारिकामन्त्रशापमोचनम्	३५	महाकालभैरवमन्त्रशापमोचनम्	३८
शारदामन्त्रस्य०	,,	कामेश्वरमन्त्रस्य०	,,
इन्द्राक्षीमन्त्रस्य०	,,	लक्ष्मीनारायणमन्त्रस्य०	,,
बगलामुखीमन्त्रस्य०	,,	राधाकृष्णमन्त्रस्य०	,,
तुर्यामन्त्रस्य०	३६	विष्णुमन्त्रस्य०	,,
महाराज्ञीमन्त्रस्य०	,,	लक्ष्मीनृसिंहमन्त्रस्य०	,,
ज्वालामुखीमन्त्रस्य०	,,	लक्ष्मीवराहमन्त्रस्य०	,,
भीद्रामन्त्रस्य०	,,	भार्गवरामन्त्रस्य०	,,
कालरात्रिमन्त्रस्य०	,,	सीतारामन्त्रस्य०	,,
भद्रानीमन्त्रस्य०	,,	जनार्दनमन्त्रस्य०	,,
वज्रयोगिनीमन्त्रस्य०	,,	विश्वक्सेनमन्त्रस्य०	३९
धूम्रवाराहीमन्त्रस्य०	,,	वासुदेवमन्त्रस्य०	,,
सिद्धलक्ष्मीमन्त्रस्य०	,,	**अष्टमः पटलः ।**	
कुलवागीश्वरीमन्त्रस्य०	,,		
पद्मावतीमन्त्रस्य०	,,	जपसाधनप्रकारः	३९
कुब्जिकामन्त्रस्य०	,,	गुरुपूजामन्त्रः	४०
गौरीमन्त्रस्य०	,,	पारायणजपविधिप्रश्नः	,,
खेचरीमन्त्रस्य०	३७	पारायणजपनिर्णयः	४१
नीलसरस्वतीमन्त्रस्य०	,,	**नवमः पटलः ।**	
पराशक्तिमन्त्रस्य०	,,		
सदाशिवमन्त्रशापमोचनम्	,,	बालामन्त्रसंपुटमन्त्रः	४१
मृत्युञ्जयशापमोचनम्	,,	त्रिकूटामन्त्रसंपुटमन्त्रः	४२
अमृतेश्वरमन्त्रस्य०	,,	त्रिपुरभैरवीमन्त्रस्य०	,,
बटुकभैरवमन्त्रस्य०	,,	भद्रकालीमन्त्रस्य०	४३
नीलकण्ठमन्त्रस्य०	,,	राजमातङ्गीमन्त्रस्य०	,,
सद्योजातमन्त्रस्य०	,,	भुवनेश्वरीमन्त्रस्य०	,,
महागणपतिमन्त्रस्य०	,,	उग्रतारामन्त्रस्य०	,,
स्वच्छन्दनाथमन्त्रस्य०	३८	छिन्नमस्तामन्त्रस्य०	,,

विषयः	पार्श्वम्	विषयः	पार्श्वम्
उच्छिष्टमातङ्गी(सुमुखी)मन्त्रस्य०	४३	नीलकण्ठमन्त्रस्य०	४५
सरस्वतीमन्त्रस्य०	,,	सद्योजातमन्त्रस्य०	,,
अन्नपूर्णामन्त्रस्य०	,,	महागणपतिमन्त्रस्य०	,,
महालक्ष्मीमन्त्रस्य०	,,	अघोरभैरवमन्त्रस्य०	४६
शारिकामन्त्रस्य०	,,	कामश्वेरमन्त्रस्य०	,,
शारदामन्त्रस्य०	,,	लक्ष्मीनारायणमन्त्रस्य०	,,
इन्द्राक्षीमन्त्रस्य०	,,	राधाकृष्णमन्त्रस्य०	,,
बगलामुखीमन्त्रस्य०	४४	विष्णुमन्त्रस्य०	,,
तुर्यामन्त्रसंपुटमन्त्रः	,,	लक्ष्मीनृसिंहमन्त्रस्य०	,,
महाराज्ञीमन्त्रस्य०	,,	लक्ष्मीवराहमन्त्रस्य०	,,
ज्वालामुखीमन्त्रस्य०	,,	भार्गवराममन्त्रस्य०	,,
भीडामन्त्रसंपुटीकरणम्	,,	सीताराममन्त्रस्य०	,,
कालरात्रिमन्त्रस्य०	,,	जनार्दनमन्त्रस्य०	,,
मधानीमन्त्रस्य०	,,	विश्वक्सेनमन्त्रस्य०	४७
सञ्जयोगिनीमन्त्रस्य०	,,	वासुदेवमन्त्रस्य०	,,
धूम्रवाराह्रीमन्त्रस्य०	,,	दशमः पटलः ।	
सिद्धलक्ष्मीमन्त्रस्य०	,,		
कुलवागीश्वरीमन्त्रस्य०	,,	पुरश्चरणसाधनम्	४७
पद्मावतीमन्त्रसंपुटीकरणम्	,,	तत्स्थाननिर्णयः	,,
कुब्जिकामन्त्रस्य०	४५	पुरश्चर्यायन्त्रनिरूपणम्	४८
गौरीमन्त्रसंपुटीकरणमन्त्रः	,,	तत्पूजाप्रकारः	,,
त्रैलोक्येश्वरीमन्त्रस्य०	,,	जपान्ते तर्पणादिविधिः	४९
नीलसरस्वतीमन्त्रस्य०	,,	पुरश्चरणप्रकारान्तराणि	,,
पराशक्तिमन्त्रस्य०	,,	अन्यप्रकारेण पुरश्चर्या	५०
सामान्यशैवमन्त्रसंपुटीकरणमन्त्रः	,,	ग्रहणपुरश्चरणम्	,,
मृत्युञ्जयमन्त्रस्य०	,,	एकादशः पटलः ।	
अमृतेश्वरमन्त्रस्य०	,,		
बटुकभैरवमन्त्रस्य०	,,	पुरश्चरणहोमविधिः	५१

विषयः	पार्श्वम्
तत्र श्रीचक्रपूजा कुण्डपरिमिति तत्पूजा च	५२
अग्निपूजादिहोमनिरूपणम्	५३
कुलसाधकपूजा—तन्निर्णयश्च	५४
तत्फलनिरूपणम्	,,
द्वादशः पटलः ।	
चक्राणामुद्धारः	५५
बालायन्त्रोद्धारः	,,
त्रिपुरभैरवीयन्त्रोद्धारः	,,
त्रिपुरसुन्दरीयन्त्रोद्धारः	५६
श्रीचक्रोद्धारः	,,
कालिकायन्त्रोद्धारः	,,
भद्रकालीयन्त्रोद्धारः	,,
मातङ्गीयन्त्रोद्धारः	,,
भुवनेश्वरीयन्त्रोद्धारः	५७
उग्रतारायन्त्रोद्धारः	,,
छिन्नमस्तायन्त्रोद्धारः	,,
सुमुखीयन्त्रोद्धारः	,,
सरस्वतीयन्त्रोद्धारः	५८
अन्नपूर्णायन्त्रोद्धारः	,,
महालक्ष्मीयन्त्रोद्धारः	,,
शास्किायन्त्रोद्धारः	,,
शारदायन्त्रोद्धारः	५९
इन्द्राक्षीयन्त्रोद्धारः	,,
बगलामुखीयन्त्रोद्धारः	,,
तुर्यायन्त्रोद्धारः	,,
महाराज्ञीयन्त्रोद्धारः	६०
ज्वालामुखीयन्त्रोद्धारः	,,
मीडायन्त्रोद्धारः	६०
कालरात्रीयन्त्रोद्धारः	,,
भद्रानीयन्त्रोद्धारः	६१
वज्रयोगिनीयन्त्रोद्धारः	,,
धूम्रवाराहीयन्त्रोद्धारः	,,
सिद्धलक्ष्मीयन्त्रोद्धारः	,,
कुलवागीश्वरीयन्त्रोद्धारः	,,
पद्मावतीयन्त्रोद्धारः	६२
कुब्जिकायन्त्रोद्धारः	,,
गौरीयन्त्रोद्धारः	,,
खेचरीयन्त्रोद्धारः	,,
नीलसरस्वतीयन्त्रोद्धारः	६३
पराशक्तियन्त्रोद्धारः	,,
शिवस्य साधारणयन्त्रोद्धारः	,,
साधारणवैष्णवयन्त्रोद्धारः	,,
अघोरभैरवयन्त्रोद्धारः	६४
लक्ष्मीनारायणयन्त्रोद्धारः	,,
त्रयोदशः पटलः ।	
यन्त्रधारणविधिः	६५
यन्त्रपूजानिरूपणम्	,,
गन्धाष्टकनिरूपणम्	,,
यन्त्रधारणयन्त्र—तत्पूजाप्रकारः	६६
तद्धारणफलम्	६८
चतुर्दशः पटलः ।	
मन्त्रेषु ऋष्यादिविनिर्णयप्रस्तावः	६८
ऋषिविनिर्णयः	६९
छन्दोविनिर्णय	,,

विषयः	पार्श्वम्
देवताविनिर्णयः	६६
बीजविनिर्णयः	,,
शक्तिविनिर्णयः	,,
कीलकविनिर्णयः	,,
दिग्बन्धनविनिर्णयः	७०
पञ्चदशः पटलः ।	
श्मशानसाधनप्रस्ताव	७०
साधनार्चाक्रमः	७१
श्मशानभैरवस्थितिक्रमः	,,
षोडशः पटलः ।	
श्मशानपूजापद्धतिः	७२
वारक्रमेण भूतभैरवसाधनम्	७३
श्मशानकालिकापूजामन्त्रः	७४
तस्या पूजाक्रमः	,,
सुरापानविधानम्	७६
पूजां विना मद्यक्रसेवने प्रत्यवायः	७७
सप्तदशः पटलः ।	
माषाकृषा कङ्कणशोधनम्	७८
अष्टादशः पटलः ।	
मालादिशोधनपद्धतिः	७९
गव्यादिनिरूपणम्	७९
यन्त्रेश्वरीमन्त्रः	,,
नूदन्तमालाशोधनमन्त्रः	८१
कङ्कणशोधनमन्त्रः	,,
साधकन्यकार्चानिरूपणम्	,,

विषयः	पार्श्वम्
एकोनविंशः पटलः ।	
सुरोत्पत्तिनिरूपणम्	८३
तस्या ध्यानम्	,,
स्तुतितुष्टया तया प्रथमं पात्रं सदाशिवाय दत्तं तद्बिन्दुपातादगुडलताद्युत्पत्तिः	८३
ईश्वरदत्त-द्वितीयपात्रबिन्दुपाताद् द्राक्षादीनामुत्पत्तिः	८४
रुद्रदत्ततृतीयपात्रबिन्दुपाताद् गोधूमाद्युत्पत्तिः	,,
विष्णुदत्तचतुर्थपात्रबिन्दुपातात्संविदुत्पत्तिः	,,
परमेष्ठिदत्तपञ्चमपात्रबिन्दुपातात्पक्वकाद्युत्पत्तिः	८४
इन्द्रदत्तषष्ठपात्रबिन्दुपाताज्जातीफलाद्युत्पत्तिः	,,
गुरुदत्तसप्तमपात्रबिन्दुपाताच्चारिकेलाद्युत्पत्तिः	८५
शुक्रदत्ताष्टमपात्रबिन्दुपातात् खर्जूराद्युत्पत्तिः	,,
सूर्याचन्द्रमसोर्नवमपात्रबिन्दुपातात् ओषध्याद्युत्पत्तिः	,,
देवानां सुरावरदानम्	,,
पूजायां सुरावश्यकता	८६
विंशः पटलः ।	
पात्रवन्दनानिरूपणम्	८६
कौलिकवीरत्वभावः	८६

विषयः	पार्श्वम्
एकविंशः पटलः ।	
शान्तिस्तोत्रम्	९१
वीरवन्दनस्तोत्रम्	९३
स्तोत्रफलप्रशंसा	९७
द्वाविंशः पटलः ।	
सुराशुद्धिविधिनिर्णयः	९८
कलिप्रादुर्भावे कलशस्था सुरा शुक्रेण ब्रह्मर्षिभिश्च शप्ता	,,
उच्छ्रयणाद्दैत्या मुदिता निर्बलान् देवान् स्वर्गाच्चराकुर्वन्	,,
तैराकृतैर्दैवैर्यैश्च शिवादीनामाघातनम्	९९
तत्र गुरु पुरस्कृत्य निर्बलताकारणं सुराशाप. इति निवेदनम्	,,
देवानां शिवस्तुतिक्रिया	,,
आकाशवाणीश्रवणम्	१००
पुन सदाशिवस्तुतिः	,,
महादेवस्य सुराशोधनप्रकारकथनम्	१०१
मण्डलनिर्णयः	,,
मण्डले कलाचां तन्नाममन्त्राश्च	,,
क्षुरिकाविद्या	१०४
तिरस्करिणीध्यानम्	,,
तिरस्करिणीविद्या	१०५
पावमानी ऋक्	,,
कुण्डलिनीध्यानानीतेनामृतेनामृतीकरणम्	,,
अमृतीकरणमन्त्रः	१०५
आनन्दभैरवध्यानम्	१०६
आनन्दभैरवमन्त्रः	,,
सुरादेवीध्यानं तन्मन्त्रः	१०७
कलश अमृततत्त्वध्यानम्	१०८
द्रव्यशोधनप्रस्तावः	,,
शोधनमन्त्रनिरूपणम्	१०९
भैरवयागः	११०
त्रयोविंशः पटलः ।	
शक्तिशोधनप्रस्तावः	१११
शक्तिप्रशंसा	११२
नवकन्यानिरूपणम्	,,
शक्तिशोधनमन्त्रस्तद्भूष्यार्घादि	११३
आसनशोधनान्ते भूतशुद्ध्यादि	,,
श्रीचक्रस्थापनम्	,,
तत्र शक्तिस्थापनम्	११४
शक्तिपवित्रीकरणमन्त्रः	,,
कामिन्यभिषेकान्ते न्यासः	,,
पञ्चबाणमुद्रान्यासः	,,
नटिनीमन्त्रोद्धारः	,,
कापालिनीमन्त्रोद्धारः	११५
वेश्याशोधनमन्त्रोद्धारः	,,
रजकीशोधनमन्त्रोद्धारः	,,
नापितस्त्रीशोधनमन्त्रो०	,,
ब्राह्मणीशोधनमन्त्रोद्धारः	,,
शूद्राणीशोधनमन्त्रोद्धारः	,,
गोपस्त्रीशोधनमन्त्रः	,,

विषयः	पार्श्वम्
मालिनीशोधनमन्त्रः	११५
दीक्षितायां वीरतर्पणम्	११६
चतुर्विंशः पटलः ।	
मालाशोधनप्रस्तावः	११७
मालाया अक्षसंख्या	,,
मालारहस्यनिरूपणम्	११८
मेरुनिरूपणम्	,,
देवविशेषे मालाविशेषः	११९
करमालानिर्णयः	,,
कुलिकत्यागः	१२०
मालाशोधनम्	,,
मालामन्त्रर्ष्यादि	१२१
शंखमालाशोधनमन्त्रः	,,
मुक्तामालाशोधनमन्त्रः	,,
रौद्रमालाशोधनमन्त्रः	,,
स्फाटिकमालाशोधनमन्त्रः	,,
रुद्राक्षमालाशोधनमन्त्रः	१२२
तुलसीमालाशोधनमन्त्रः	,,
मणिमालाशोधनमन्त्रः	,,
सुवर्णमालाशोधनमन्त्रः	,,
पद्माक्षमालाशोधनमन्त्रः	,,
दन्तमाला-मुण्डमालाशोधन०	,,
सर्वमालाशोधनमन्त्रः	,,
अन्यमालाशोधनमन्त्रः	,,
करमालाशोधनमन्त्रः	१२३
पञ्चविंशः पटलः ।	
यन्त्रशोधनप्रस्तावः	१२३

विषयः	पार्श्वम्
अष्टधा धातुयन्त्रोल्लेखनम्	१२३
धातुनिर्मितयन्त्रस्य क्रियत्कालान्तरेण पुनः शोधनम्	१२
यन्त्रशोधनमन्त्रर्ष्यादि	,,
यन्त्रस्थापनं तच्छुद्धिश्च	,,
स्वर्णयन्त्रशोधनमन्त्रः	१२५
रजतयन्त्रशोधनमन्त्रः	,,
ताम्रयन्त्रशोधनमन्त्रः	,,
स्फाटिकयन्त्रशोधनमन्त्रः	,,
रौद्रयन्त्रशोधनमन्त्रः	,,
कपालयन्त्रशोधनमन्त्रः	,,
पाशासयन्त्रशोधनमन्त्रः	,,
वैष्णवशिलायन्त्रशोधनमन्त्रः	,,
निशीथकालनिर्णयः	१२६
महानिशानिरूपणम्	,,
महानिशाजपप्रशंसा	१२७
षड्विंशः पटलः ।	
तन्त्रोत्तरार्धप्रस्तावः	१२८
देवानां भावनैक्यनिरूपणम्	,,
सर्वेषु चक्रेष्वभेदबुद्ध्या सर्वदेवपूजा	१२९
तन्त्रोत्तरार्धे पञ्चाङ्गनिरूपणम्	,,
गणपतिपञ्चाङ्गोद्धारः	,,
महागणपतिमन्त्रोद्धारः	१३१
गणपतियन्त्रोद्धारः	,,
गणपतिध्यानम्	,,
गणपतिलयाङ्गम्	१३२
गणपतिमन्त्रतदृष्यादि	१३३
महागणपतिमन्त्रेण षट्कर्मसाधनं	,,

विषयः	पार्श्वम्	विषयः	पार्श्वम्
सप्तविंशः पटलः ।		त्रयस्त्रिंशः पटलः ।	
महागणपतिपूजापद्धतिः	१३४	सूर्यकवचम्	१७६
अष्टाविंशः पटलः ।		चतुस्त्रिंशः पटलः ।	
महागणपतिकवचम्	१३६	सूर्यसहस्रनामकम्	१८४
एकोनत्रिंशः पटलः ।		पञ्चत्रिंशः पटलः ।	
महागणपतिसहस्रनामकम्	१४२	सूर्यमूलमन्त्रस्तोत्रम्	२००
त्रिंशः पटलः ।		षट्त्रिंशः पटलः ।	
महागणपतिमूलमन्त्रस्तोत्रम्	१५६	लक्ष्मीनारायणपञ्चाङ्गावतारः	२०४
एकत्रिंशः पटलः ।		नारायणमन्त्रसंस्कारादय	२०७
सूर्यपञ्चाङ्गावतारः	१५६	नारायणमन्त्रार्घ्यादिनिरूपणम्	२०८
सूर्यमन्त्रोद्धार	१६१	लक्ष्मीनारायणध्यानम्	,,
ऋष्यादिनिरूपणम्	१६२	लक्ष्मीनारायणयन्त्रम्	,,
उत्कीलनादिमन्त्राः	,,	लक्ष्मीनारायणलयाङ्गम्	,,
सूर्यध्यानम्	१६३	स्तम्भनाद्यष्टौ प्रयोगा	२०९
सूर्ययन्त्रोद्धार	,,	सप्तत्रिंशः पटलः ।	
सूर्यलयाङ्गम्	,,	लक्ष्मीनारायणपूजापद्धतिः	२११
पद्ममुद्रानिर्णयः	१६४	अष्टात्रिंशः पटलः ।	
बिम्बमुद्रानिर्णय	,,	लक्ष्मीनारायणकवचम्	२१६
भास्करीमुद्रानिर्णयः	१६५	एकोनचत्वारिंशः पटलः ।	
यशोल्कामुद्रानिर्णय	,,	लक्ष्मीनारायणसहस्रनामकम्	२२३
वशीकरणाद्यष्टौ प्रयोगाः	,,	चत्वारिंशः पटलः ।	
द्वात्रिंशः पटलः ।		लक्ष्मीनारायणमूलमन्त्रस्तोत्रम्	२३६
सूर्यपूजापद्धतिनिरूपणम्	१६७		

विषयः	पार्श्वम्
एकचत्वारिंशः पटलः ।	
मृत्युञ्जयपञ्चाङ्गावतारः	२४२
मृत्युञ्जयमन्त्रोद्धारः	२४४
मृत्युञ्जयन्त्रोद्धारः	२४५
मृत्युञ्जयलयाङ्गम्	,,
मृत्युञ्जयमन्त्रवर्ण्यादि	,,
मृत्युञ्जयध्यानम्	२४६
मृत्युञ्जयमन्त्रस्याष्टौ प्रयोगाः	,,
द्विचत्वारिंशः पटलः ।	
मृत्युञ्जयपूजापद्धतिः	२४८
त्रयश्चत्वारिंशः पटलः ।	
मृत्युञ्जयकवचम्	२६२
चतुश्चत्वारिंशः पटलः ।	
मृत्युञ्जयसहस्रनामकम्	२६५
पञ्चचत्वारिंशः पटलः ।	
मृत्युञ्जयमूलमन्त्रस्तोत्रम्	२७७
षट्चत्वारिंशः पटलः ।	
दुर्गापञ्चाङ्गावतारः	२८१
दुर्गामन्त्रोद्धारः	२८२
दुर्गामन्त्रवर्ण्यादयः	,,
दुर्गाध्यानम्	२८३
दुर्गायन्त्रम्	,,
दुर्गालयाङ्गनिरूपणम्	,,
दुर्गामन्त्रस्याष्टौ प्रयोगाः	२८४
सप्तचत्वारिंशः पटलः ।	
दुर्गापूजापद्धतिः	२८६
अष्टाचत्वारिंशः पटलः ।	
दुर्गाकवचनिरूपणम्	२९४
एकोनपञ्चाशत्तमः पटलः ।	
दुर्गामन्त्रनामसहस्रकम्	२९८
पञ्चाशत्तमः पटलः ।	
दुर्गामूलमन्त्रस्तोत्रम्	३१०
एकपञ्चाशत्तमः पटलः ।	
दुर्गारहस्यप्रस्तावः	३१५
दुर्गाभुवननिर्णयः	३१६
दुर्गागुप्तविद्यानिर्णयः	३१७
दुर्गाभुवनार्चाप्रशंसा	३१८
द्विपञ्चाशत्तमः पटलः ।	
दुर्गामन्त्रसाधनरहस्यम्	३१९
दुर्गामन्त्रसञ्जीवनम्	,,
दुर्गामन्त्रसंपुटीकरणम्	,,
त्रिपञ्चाशत्तमः पटलः ।	
शिवविद्यानिर्णयः	३२०
कस्या देव्याः कः शिवः	,,
नीलकण्ठमन्त्रवर्ण्यादि	३२१

विषयः	पार्श्वम्	विषयः	पार्श्वम्
लकण्ठध्यानम्	३२१	तत्र रात्रिजपविधिः	३३१
लकण्ठमन्त्रोद्धारः	,,	होमादिदशांशनिर्णयः	,,
चतुष्पञ्चाशत्तमः पटलः ।		होमाशक्तस्य श्मशानसाधनयुक्तिः	३३२
होविधिनिरूपणम्	३२२	श्मशानार्चनम्	,,
होप्रशंसा	३२३	**अष्टपञ्चाशत्तमः पटलः ।**	
होकालनिर्णयः	३२४	चक्रार्चननिरूपणम्	३३४
रोर्दीक्षादानम्	,,	चक्रार्चने साधकनिर्णयः	,,
पञ्चपञ्चाशत्तमः पटलः ।		आसनार्चान्ते कुम्भस्थापनम्	३३५
न्त्रराजपुरश्चरणक्रमः	३२५	तस्यार्चाक्रमः	,,
रश्चरणं गुरुहस्तेन कारयितव्यं	३२६	बलिदानानन्तरं तर्पणम्	३३६
न्त्रदशांशतो होमादीनि	,,	पात्रार्चनम्	,,
रश्चरणस्थानानि	,,	कन्यापूजनम्	,,
रश्चरणप्रकारान्तराणि	३२७	**एकोनषष्टितमः पटलः ।**	
षट्पञ्चाशत्तमः पटलः ।		दुर्गातत्त्वनिरूपणम्	३३७
श्वरेश्वरीविधिनिर्णयः	३२८	दक्षिणाचारनिर्णयः	,,
श्वरेश्वरीविद्याजापेन षर्णल-		वामाचारनिर्णयः	,,
क्षपुरश्चर्याफलम्	३२९	कुलाचारनिर्णयः	३३८
र्गामन्त्रोद्धारः	,,	आचारपरो मुक्तिभाक्	,,
रदामन्त्रोद्धारः	,,	**षष्टितमः पटलः ।**	
रिकामन्त्रोद्धारः	३३०	श्रीदुर्गारहस्यं गुरुपूजनम्	३३९
मुण्डीमन्त्रोद्धारः	,,	गुर्वर्चास्थानानि	,,
गलामन्त्रोद्धारः	,,	गुर्वर्चायन्त्रम्	,,
सप्तपञ्चाशत्तमः पटलः ।		गुर्वर्चायन्त्रे गुरुपूजनम्	,,
होमविधिनिरूपणम्	३३१	गुरुप्रार्थनास्तुतिः	३४०
		देवीरहस्यश्रवणकृतकृत्यम्	३४१

विषयः	पार्श्वम्	विषयः	पार्श्वम्

(परिशिष्टम् ।)

तत्र ज्वालामुखीपञ्चाङ्गम् ।

ज्वालामुखीपटलावतारः ३४३
ज्वालामुखीमन्त्रोद्धारः ३४४
तत्फलनिरूपणम् ,,
ज्वालामुखीयन्त्रोद्धारः ,,
ज्वालामुखीलयाङ्गम् ३४५
ज्वालामुखीध्यानम् ३४६
ज्वालामुखीमन्त्रस्याष्टौ प्रयोगाः ३४७
ज्वालामुखीपूजापद्धतिः ३५१
ज्वालामुखीकवचम् ३८७
ज्वालामुखीसहस्रनामकम् ३९०
ज्वालामुखीमूलमन्त्रस्तोत्रम् ४०३

शारिकापञ्चाङ्गम् ।

पञ्चाङ्गप्रस्तावः ४०७
शारिकामन्त्रोद्धारः ,,
शारिकामन्त्रप्रशंसा ४०८
शारिकामन्त्रर्ष्यादीनि ,,
शारिकाध्यानम् ४०८
शारिकायन्त्रोद्धारः ४०९
शारिकालयाङ्गम् ,,
शारिकामन्त्रस्याष्टौ प्रयोगाः ४१०
शारिकापूजापद्धतिः ४१२
शारिकात्रैलोक्यमोहनकवचम् ४१९
शारिकासहस्रनामकम् ४२४
शारिकामूलमन्त्रस्तोत्रम् ४३९

महाराज्ञीपञ्चाङ्गम् ।

पञ्चाङ्गप्रस्तावः ४४
महाराज्ञीमन्त्रोद्धारः ४५
महाराज्ञीयन्त्रोद्धारः ४५
महाराज्ञीयन्त्रलयाङ्गम्
महाराज्ञीमन्त्रर्ष्यादीनि ४४
महाराज्ञीध्यानम्
महाराज्ञीमन्त्रस्याष्टौ प्रयोगाः
महाराज्ञीपूजापद्धतिः ४४..
महाराज्ञीकवचम् ४५६
महाराज्ञीसहस्रनामकम् ४६०
महाराज्ञीमूलमन्त्रस्तोत्रम् ४७७

बालापञ्चाङ्गम् ।

पञ्चाङ्गप्रस्तावः ४८१
बालामन्त्रोद्धारः ४८२
बालामन्त्रर्ष्यादि ४८२
बालाध्यानम् ४८२
बालायन्त्रोद्धारः ४८३
बालालयाङ्गम् ,,
अस्या मन्त्रस्याष्टौ प्रयोगाः ४८४
बालापूजापद्धतिः ४८६
बालाकवचम् ५००
बालासहस्रनामकम् ५०२
बालास्तोत्रम् ५२०

उद्धारकोशः ।

उद्धारकोशावतारप्रस्तावः ५२२

विषय·	पार्श्वम्	विषय·	पार्श्वम्
दक्षिणामूर्तये त्रिपुराया मन्त्रशिक्षा	५२३	शून्यबीजनामानि	५२९
अक्षोभ्यशिष्यमन्त्रोद्धारकथनम्	५२४	कल्याणबीजनामानि	५३०
त्रिपुरामन्त्रोद्धार	,,	महाराज्ञीमन्त्रोद्धारः	,,
लक्ष्मीबीजनामानि	,,	अग्निबीजनामानि	,,
परावीजनामानि	५२५	भीडामन्त्रोद्धार	,,
मदनबीजनामानि	,,	ज्वालामुखीमन्त्रोद्धारः	,,
वाग्भवबीजनामानि	,,	दशविद्योपासनाफलम्	५३१
शक्तिबीजनामानि	५२६	त्रिपुरापदसर्वानिरूपणम्	५३२
तारबीजनामानि	,,	भद्रकालीमन्त्रोद्धार	,,
दशविद्यानामनिरूपणम्	,,	भद्रिकाबीजनामानि	,,
लक्ष्मीमन्त्रोद्धारः	५२७	तुरीमन्त्रोद्धारः	५३३
मीरबीजनामानि	,,	ताराकाज्योतिस्तारानामानि	,,
सरस्वतीमन्त्रोद्धार	,,	छिन्नमस्तामन्त्रोद्धारौ	,,
नमा बीजनामानि	,,	दक्षिणकालिकामन्त्रोद्धार·	,,
तारामन्त्रोद्धार	,,	श्यामामन्त्रोद्धार	,,
व्योमबीजनामानि	५२८	कालरात्रिमन्त्रोद्धार	,,
कान्ताबीजनामानि	,,	तद्भदा	५३४
कूर्चबीजनामानि	,,	सरस्वतीभेदा	,,
फट्बीजनामानि	,,	तारभेदा	५३५
भुवनश्वरीमन्त्रोद्धार	,,	भुवनेश्वरीभेदाः	,,
मनु (मन्त्र) नामानि	,,	मातङ्गीभदा	,,
मातङ्गीमन्त्रोद्धार	,,	शारिकाभेदद्वयम्	,,
जिह्वाबीजनामानि	५२९	राज्ञीभेदा	,,
घागुराबीजनामानि	,,	भीडा भदविहीनैवेति	,,
चारुकबीजनामानि	,,	ज्वालामुखीभेदा	,,
पद्मबीजनामानि	,,	त्रिपुराभदाः	,,
शारिकामन्त्रोद्धार	,,	तन्मन्त्रनिरूपणम	५३६
सिन्धुरबीजनामानि	,,		

विषयः	पार्श्वम्	विषयः	पार्श्वम्
श्रिया मन्त्रोद्धारः	५३६	शारदामन्त्रोद्धारः	५४२
रुक्मिणीमन्त्रोद्धारः	५३७	कामेश्वरीमन्त्रोद्धारः	,,
वाग्देवतामन्त्रोद्धार	,,	चन्द्रबीजनामानि	,,
वाणीमन्त्रोद्धारः	,,	ऊर्मिबीजनामानि	५४३
सरस्वतीमन्त्रोद्धारः	,,	स्तनबीजनामानि	,,
अनलश्रियामन्त्रोद्धारः	,,	गौरीमन्त्रोद्धारः	,,
तारामन्त्रभेदाः	,,	शिवबीजनामानि	५४३
भुवनेश्वरीमन्त्रभेदाः	,,	अन्नपूर्णामन्त्रोद्धारो	,,
मातङ्गीमन्त्रभेदाः	,,	कुलवागीश्वरीमन्त्रोद्धारः	,,
चक्रिण्या मन्त्रः	५३८	इच्छाबीजनामानि	५४४
कुब्जिकामन्त्रः	,,	नतिकाबीजनामानि	,,
शाम्बरीमन्त्रः	,,	पञ्चकुमारमन्त्रनिरूपणप्रस्तावः	,,
शारिकामन्त्रभेदौ	,,	पञ्चकुमारनामनिर्देशः	५४५
ज्वालामुखीमन्त्रभेदाः	,,	गणेशमन्त्रोद्धारः	,,
भद्रकालीमन्त्रः	,,	कुमारमन्त्रोद्धारः	,,
दक्षिणकालीमन्त्रः	,,	छविबीजनामानि	,,
छिन्नमस्तामन्त्रभेदौ	,,	कार्तवीर्यार्जुनमन्त्रोद्धारः	,,
अक्षोभ्यशिष्याय षोडशीविद्यानिरूपणानन्तरं मन्त्राभिलाषिणामन्यमुनीनामाश्रमागमनम्	५३९	शुक्रबीजनामानि	५४६
मुनीनां प्रार्थना	,,	हनुमत्-मन्त्रोद्धारः	,,
दक्षिणामूर्तिमुपात्सत्तदेवीकथनम्	,,	बटुकभैरवमन्त्रोद्धारः	,,
मुनीनां पुनर्मन्त्रप्रार्थना	५४०	अभ्रबीजनामानि	५४७
वज्रयोगिनीमन्त्रोद्धारः	,,	अन्धबीजनामानि	,,
अस्या मन्त्रोपासाफलम्	५४१	कल्पबीजनामानि	,,
वाराह्रीमन्त्रोद्धारः	,,	शतघ्नीबीजनामानि	,,
वाल्हीकबीजनामानि	५४२	मृत्युञ्जयमन्त्रोद्धारः	,,
तमोबीजनामानि	,,	सुश्रीयमन्त्रोद्धारः	,,
		नवग्रहमन्त्रकथनावतारः	५४८

विषयः	पार्श्वम्	विषयः	पार्श्वम्
आदित्यमन्त्रोद्धारः	५४९	श्रियो ध्यानम्	५६२
अम्बरबीजनामानि	,,	वाग्देवीध्यानम्	५६३
बुधस्य मन्त्रोद्धारः	,,	ताराध्यानम्	,,
षडाननबीजनामानि	,,	भुवनेश्वरीध्यानम्	,,
शुक्रस्य मन्त्रोद्धारः	५५०	मातङ्गीध्यानम्	,,
बृहस्पतिमन्त्रोद्धारः	,,	शारिकाध्यानम्	५६४
चन्द्रमन्त्रोद्धारः	,,	महाराज्ञीध्यानम्	,,
नाट्यबीजनामानि	५५१	भीडाध्यानम्	,,
भौमस्य मन्त्रोद्धारः	,,	ज्वालामुखीध्यानम्	,,
वेधोबीजनामानि	,,	भद्रकालीध्यानम्	५६५
शनेर्मन्त्रोद्धारः	,,	तुरीध्यानम्	,,
राहोर्मन्त्रोद्धारः	,,	छिन्नमस्तकाध्यानम्	,,
गर्जितबीजनामानि	,,	दक्षिणकालिकाध्यानम्	,,
केतुमन्त्रोद्धारः	५५२	श्यामा (काली) ध्यानम्	५६६
वृष्टिबीजनामानि	,,	कालरात्रीध्यानम्	,,

विषयः	पार्श्वम्	विषयः	पार्श्वम्
भैरवस्य ध्यानम्	५६९	केतोर्ध्यानम्	५७२
सूर्यस्य ध्यानम्	५७०	भवानीध्यानम्	,,
बुधस्य ध्यानम्	,,	बगलामुखीध्यानम्	,,
शुक्रस्य ध्यानम्	,,	इन्द्राक्षीध्यानम्	५७३
बृहस्पतेर्ध्यानम्	,,	खेचरीध्यानम्	,,
चन्द्रस्य ध्यानम्	५७१	ऋषीणां स्वस्थानगमनाज्ञा	,,
भौमस्य ध्यानम्	,,	देवीप्रार्थनानन्तरं शिवपार्वतीकैला-	
शनेर्ध्यानम्	,,	सगमनम्	५७४
राहोर्ध्यानम्	,,	उद्धारकोशसमाप्तिः	,,

उद्धारकोशे प्रमाणत्वेनोपवर्णितानां तन्त्राणां नामानि ॥

१	आगमलहरीतन्त्रम्	१२	कामेश्वरतन्त्रम्
२	आगमशिरोमणिः	१३	कालरात्रीकल्पतन्त्रम्
३	आगमसिन्धुः	१४	कालिकासर्वस्वतन्त्रम्
४	आगमामृततन्त्रम्	१५	कालीपटलतन्त्रम्
५	आगमामृतमञ्जरी	१६	कालीरहस्यतन्त्रम्
६	आगमार्णवपीयूषतन्त्रम्	१७	कालीसर्वस्वतन्त्रम्
७	आगमालङ्कारतन्त्रम्	१८	कुब्जाशिरोमणिः
८	आगमालङ्करणम्	१९	कुब्जिकासर्वस्वम्
९	आगमोद्योततन्त्रम्	२०	कुलचूडामणिः
१०	उड्डामरतन्त्रम्	२१	कुलसिद्धसन्तानः
११	कामिनीकल्पतन्त्रम्	२२	कुलिकार्णवः

तन्त्राणां नामानि

२३ छिन्नारहस्यः
२४ छिन्नाशिरोमणिः
२५ ज्वालाशिरोमणिः
२६ तन्त्रमुक्तावली
२७ त्रिपुरसुन्दरीसर्वस्वम्
२८ त्रिपुरार्टीका
२९ त्रिपुरातिलकतन्त्रम्
३० त्रिपुराशिरोमणिः
३१ त्रिपुरासारसर्वस्वम्
३२ भैरवतन्त्रम्
३३ भैरवसर्वस्वम्
३४ मन्त्रसागरः
३५ मुण्डमालातन्त्रम्
३६ रुद्रयामलतन्त्रम्
३७ वामकेश्वरतन्त्रम्
३८ विश्वनाथसारोद्धारः
३९ विश्वयामलतन्त्रम्
४० शारदार्टीका
४१ शारदापटलः
४२ शारदातिलकम्
४३ श्यामातन्त्रम्
४४ श्यामारहस्यम्
४५ सिद्धसारस्वततन्त्रम्
४६ सुन्दर्याशिरोमणिः
४७ सुन्दरीसर्वस्वम्
४८ स्वतन्त्रतन्त्रम्

देवीरहस्ये बीजान्तरपारिभाषिकसूची ॥

अग्निः	रं	कान्तिः	ह, ह्रां
अच्छः	ह्सौ	कालिकं	क्रीं
अन्धिः	स, रू	काली	क्रीं
अभ्र	व, र्वीं	कामः	क्लीं
अश्मरी	नमः	काहला	भ
आपः	स्वाहा	कुचः	ज
इन्दुजा	म्र	कुट	वौषट्
औष्मकं	नमः	कुन्ती	क्रीं
कान्ता	स्त्रीं	कुलिश	म्यो

फूर्चं	हूं	धरणिः	लं
कृपा	ॐ	नलिनी	ठः
केशः	ऊं	निर्जरः	क्ष
कौलः	हं	पयः	स्वाहा
खं	आं	परा	ह्रीं
गौतमः	थ	पङ्कजं	ठः
चन्द्रः	सः, ऐं	पातालं	थं
छविः	द, ह्रां	प्रणवः	ओं
जगत्	नमः	पशुः	ह्रं
जिह्वा	श्रीं	बिलं	थ
जीमूतः	य	भद्रिका	भै
ज्योतिः	त्रौं	भास्वती	भैं
ढद्वयं	स्वाहा	भूः	ल
डिम्भः	ह्रां	भृगुः	स
ढलिः	मां, म	भेकी	मां, म
तटं	ह्रं	मठं	ग्लौं
तमः	लं	मदनः	क्लीं
तमी	त	मन्मथः	क्लीं
तारका	त्रों	मण्डूकः	मां
तारा	त्रों	मत्स्य	प
तारं	ओं	मात्रादि	अ
तुरगं	फट्	मा	श्रीं
दक्षं	ओं	माया	ह्रीं
देवः	व	मारजित्	धो
द्वादशमात्रा	ऐं	मृद्	ह्लीं
धनुर्धरः	रां	मृत्स्ना	ह्लीं

मृद्वीकं	घृं	वीची	घ्लूं
मेघः	घीं व	वेदी	ह्सूरें
मोहः	लं	वेश्या	स्त्रीं
यादः	ग्लौं	व्योषं	ह्रां
रमा	श्रीं	शरत्	सः, सौः
रात्रिः	त	शक्रः	सः सौः
लता	प	शर्म	सौः, शां, आं,
लवणं	म	शर्वः	गीं
लक्ष्मीः	श्रीं	शिरः	क
लज्जा	ह्रीं	शिवः	ह्रां
वधूः	स्त्रीं	शिवं	गं
वनं	स्वाहा	शुभं	श
वज्रं	भ्यो	शोभा	ईं, स्वं
वरुणं	ह्सौः	शङ्का	सः
वह्निः	रां	श्रीः	श्रीः
वह्निजाया	स्वाहा	षडभिज्ञः	घो
वामाक्षि	ईं	सकला	ह्रीं
वायुः	य	सर्पः	द
वारुणं	व	सर्मिरः	य
वारुणी	श्रीं	सिन्धुरं	फ्रां
वाल्मीकं	ग्लौं	सिन्धुः	रु, रू
वायुपूज्या	श्रीं	सूर्यः	ह्रां

पृष्ठ	पंक्ती	अशुद्धम्	शुद्धम्
१५	२३	यीं	खीं
२०	८	सिन्दु	सिन्धु
२७	पर्यांये १	भ्रकुटि	भ्रुकुटि
२६	१०	सिध्यै	सिद्ध्यै
३४	१२	कूटं	कुटं
३५	१	षष्ठः	सप्तमः
३७	१७	परं	परां
५६	४	संमोनं	संमोहनं
६४	१४	मन्त्रोद्धार	यन्त्रोद्धार
८३	१३	रक्तान्नाहुती	रक्ताहुती
१०७	२६	प्रपूज्य	प्रपूज्य
१०६	२०	लाज्येमामर्त्यान्त्र	लाज्येममन्स्यान्तः
११६	१४	शिवामाला	शिवमाला
१४४	८	विश्वमूः	विश्वसूः
१५५	१६	गणेशस्थ	गणेशस्य
१६३	१७	साधरम्	सादरम्
१६६	१२	चक्रायै	चक्राय
१७५	६	कुंकुमांश्चितं	कुंकुमाश्चितं
२००	२०	ध्रुवम्	ध्रुचम्
२१४	३	दशधा	दशधा
२१६	२	वर्षिणि	वर्षिणि
२१६	४	सुधोदेव्यै	सुधादेव्यै
२२१	१२	हितेरत	हित रत
२५६	६	साहस्रमजपा	सहस्रमजपा
२५८	२१	निलनेश्वरी	निलयेश्वरी
२७३	१७	भ्राजमान	भ्राजमाण
२७५	१	न र्शयेत्	न दर्शयेत्
३००	१०	व्यार्त	व्याप्तं

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
३७१	२३	धोत्तोल्प	धोत्तोल्य
३७३	१८	क्रींकम	क्रींकम
३९३	४	योन्मत्ता	योन्मत्ता
४२६	११	दात्त	दत्ता
४४६	१६	योचाटं	योच्चाटं
४४८	१	मक्त्या	मक्ताय
४५३	६	पावमानः	पवमानः
४८६	८	सिद्धिं	सिद्धिं
४९६	२६	पत्रो	पात्रे
५०५	१५	विशुद्धा	विशुद्धा
५०६	१०	मदिरा	मदिरावित्ता
५२६	३	ऐं च्क्रीं	ऐं च्क्रीं
५३०	६	शच	शंच

॥ श्रीः ॥

अथ

श्रीदेवीरहस्यम्

ओं श्रीगणेशाय नमः । नमस्त्रिपुरसुन्दर्यै ।

श्रीभैरव उवाच ।

अधुना देवि वक्ष्यामि रहस्यं परमाद्भुतम् ।
यन्न सर्वेषु तन्त्रेषु यामलादिषु भाषितम् ॥ १ ॥
परादेवीरहस्याख्यं तत्त्वं मन्त्रोक्तविग्रहम् ।
तत्त्वं श्रीषोडशार्णायाः सर्वस्वं मम पार्वति ॥ २ ॥
अप्रकाश्यमदातव्यं परमोक्षफलप्रदम् ।
भोगापवर्गदं लोके साधकानां सुखावहम्[1] ॥ ३ ॥

श्रीदेव्युवाच ।

भगवन् सर्वतत्त्रज्ञ कौलिकेश्वर शङ्कर ।
त्वत्प्रसादान्मया ज्ञातं तत्त्वं देव्याः सुदुर्लभम् ॥ ४ ॥
तत्त्वं मन्त्रात्मकं गुह्यं सूचितं भवता स्वयम् ।
परादेवीरहस्याख्यं दीक्षापूर्वं वदस्व मे ॥ ५ ॥

श्रीभैरव उवाच ।

देवीरहस्यमीशानि शृणु त्वं भक्तिपूर्वकम् ।
येन श्रवणमात्रेण कोटिपूजाफलं लभेत् ॥ ६ ॥
अथाहं निर्णयं वक्ष्ये परमं गुरुशिष्ययोः ।

---

[1] 'शुभावहम्' क पाठः ।

विचार्य विधिवद्धीमान् दीक्षाकर्म समाचरेत् ॥ ७ ॥
ब्रह्मादिकीटपर्यन्तं जगत स्थावरजङ्गमम् ।
परादेव्या पशुत्वेन मोहितं विगतस्पृहम् ॥ ८ ॥
तथापि तत्प्रसादेन सेवया तत्पदाब्जयोः ।
कौलिकः पशुभावेन मुक्तो ज्ञानं भजेत् ततः ॥ ९ ॥
दीक्षां तस्याः शिवे मन्त्री लब्ध्वा गुरुपदार्चनात् ।
दीक्षितः स भवेज्ज्ञानी दीक्षाहीनो भवेत् पशुः ॥ १० ॥
यस्य दीक्षा शिवे नास्ति जीवनं तस्य निष्फलम् ।
स जातु नोत्तरेद् देवि निरयाम्बुनिधेः क्वचित् ॥ ११ ॥
दीक्षाहीनस्य देवेशि पशोः कुत्सितजन्मनः ।
पापौघोऽन्तिकमायाति पुण्यं दूरं पलायते ॥ १२ ॥
तस्माद् यत्नेन दीक्षैषा ग्राह्या कृतिभिरुत्तमा ।
बाल्ये वा यौवने वापि वार्धक्येऽपि सुरेश्वरि ॥ १३ ॥
अन्यथा निरयी पापी पितॄन् स्वान् निरयं नयेत् ।
अतः पशुर्मनुष्यः सन् पशुयोनिं व्रजेच्छिवे ॥ १४ ॥
पूर्वजन्मार्जितां प्राप्य वासनां परमार्थदाम् ।
गुरुमन्वेषयेद् देवि कौलिकाचारदीक्षितम् ॥ १५ ॥
गुरुं कुलीनं तन्त्रज्ञं सर्वाङ्गैः सुमनोहरम् ।
निरामयं च निर्लोभं निःशेषागमपारगम् ॥ १६ ॥
लब्ध्वा भक्त्या प्रणम्यादौ तोषयित्वा विशेषतः ।
सिद्धमाध्यारिनिर्णीतां दीक्षां देव्या यथाविधि ॥ १७ ॥
गृह्णीयात् परया भक्त्या साधको येन जायते ।
गुरुश्च शिष्यं रम्याङ्गं कुलीनं गर्भदीक्षितम् ॥ १८ ॥
गुरुभक्तिरतं बालं युवानं धिषणायुतम् ।

'जीवनान्त च जन्मनः' ख. पाठः ।

देवीभक्तिरतं भक्तं पापभीतं कृतात्मकम् ॥ १९ ॥
दृष्ट्वा दीक्षां परां दद्यात् कृतभागी भवेत् ततः ।

श्रीदेव्युवाच ।

भगवन् करुणाम्भोधे संशयोऽयं महान् मम ।
यस्य चित्ते परा भक्तिर्गुरुर्नास्ति तथाविधः[1] ॥ २० ॥
कुलीनः सर्वतत्त्रज्ञो मन्त्रसाधनकक्षमः ।
भक्त्या परमया युक्तः स किं देव करिष्यति ॥ २१ ॥

श्रीभैरव उवाच ।

अदीक्षित उपाध्यायविहीनः शक्तिभक्तिमान् ।
गुरोरभावे देवेशि पुस्तकं गुरुमाचरेत् ॥ २२ ॥
यदि कश्चिद् भवेद् देवि गुरुस्तत्त्रविचक्षणः ।
दीक्षितः शिवमन्त्रेण वैष्णवः शुभलक्षणः ॥ २३ ॥
तं परित्यज्य यो देवि पराभक्तोऽपि भक्तिमान् ।
पुस्तकं तु गुरुं कुर्यात् स भवेच्छिवघातकः ॥ २४ ॥
गुरुं कुलीनं तत्त्रज्ञं भजेन्मन्त्रस्य सिद्धये ।
मूर्खं लोभात्मकं देवि कुलीनं च परित्यजेत् ॥ २५ ॥
पितुर्दीक्षां न गृह्णीयात् तथा मातामहस्य च ।
सोदरस्य कनिष्ठस्य मातुलस्य विशेषतः ॥ २६ ॥
दम्भं वित्तेच्छया लौल्यं न कुर्यान्मनसापि वा ।
परलोकेच्छया कुर्यात् परलोकभयाय वा ॥ २७ ॥

श्रीदेव्युवाच ।

भगवन् परमेशान साधकानां हितेच्छया ।
कदा दीक्षा परा ग्राह्या साधकैस्तद्वदस्व मे ॥ २८ ॥

श्रीभैरव उवाच ।

---

१ 'तथा विधि-' ख पाठः ।

सुदिने शुभनक्षत्रे संक्रान्तावयनद्वये ।
नवरात्रिदिने पित्रोः श्राद्धे स्वजनिवासरे ॥ २९ ॥
नववर्षदिने देवि चन्द्रसूर्योपरागके ।
तिष्ये स्वजन्मनक्षत्रे दीक्षां दद्याद्विचक्षणः ॥ ३० ॥
तत्रादौ शुभनक्षत्रे स्नात्वा संपूज्य भैरवम् ।
गत्वा नदीतटं दिव्यं लताकुसुमसुन्दरम् ॥ ३१ ॥
द्वीपं वा परमं पुण्यं देवानामपि दुर्लभम् ।
देवतायतनं वापि प्राप्याशु प्रणमेत् ततः ॥ ३२ ॥
विलिप्य[1] विधिवद् देवि गुरुः कुर्यात् कृताह्निकः ।
वेदीमीशानदिग्भागे चतुष्कोणां मनोहराम् ॥ ३३ ॥
तत्र देवि परादेव्याः श्रीचक्रं तु विभावयेत् ।
सिन्दूरेण शिवे यन्त्रं मूलमन्त्रं समुच्चरन् ॥ ३४ ॥
त्रिकोणं विन्दुसंयुक्तं षट्कोणं वृत्तमण्डलम् ।
वसुपत्रं त्रिवृत्ताढ्यं[2] भूगृहेणोपशोभितम्[3] ॥ ३५ ॥
दीक्षायन्त्रमिदं देवि दीक्षाकाले प्रपूजयेत् ।
गणेशधर्मवरुणाः कुबेरसहिताः शिवे ॥ ३६ ॥
विदिक्षु विदिगीशानाः पूजनीया यथाक्रमम् ।
तारमायारमाबीजैर्धूपदीपमक्षतैः ॥ ३७ ॥
मायां च मोहिनीं मेनां मङ्गलां सर्वमङ्गलाम् ।
महाविद्या च देवेशि षट्कोणेषु प्रपूजयेत् ॥ ३८ ॥
तारमायारमाबीजैर्गन्धाक्षतप्रसूनकैः ।
गङ्गां च यमुनां देवि तदग्रेऽपि सरस्वतीम् ॥ ३९ ॥
त्रिकोणे पूजयेद् धीमानीशानाग्नेयपूर्वकम् ।
विन्दौ श्रीमूलमन्त्रेण परादेवीं प्रपूजयेत् ॥ ४० ॥

---

१ 'विलिप्य' क पाठः । २ 'वृत्ताङ्क' ख पाठ । ३ 'गेहेनो' ख पाठः ।

सदाशिवं महारौद्रं कामेशं कामनेश्वरम् ।
गन्धाक्षतप्रसूनाद्यैर्धूपदीपादितर्पणैः ॥ ४१ ॥
नैवेद्याचमनीयाद्यैस्ताम्बूलैश्च सुवासितैः ।
अष्टपत्रेषु देवेशि संपूज्या अष्ट मातरः ॥ ४२ ॥
ब्राह्म्याद्या देवि मन्त्रेण अष्टभैरवपूर्वकम् ।
ब्राह्मी नारायणी चैव कौमारी चापराजिता ॥ ४३ ॥
माहेश्वरी च चामुण्डा वाराही नारसिंहिका ।
वामावर्तक्रमेणैवं पूजनीया विशेषतः ॥ ४४ ॥
तत्रैव पूजयेदष्ट भैरवान् भैरवेश्वरि ।
महाकालं च कालाग्निं करालं विकरालकम् ॥ ४५ ॥
संहारं रुरुमीशानि सुप्तमुन्मत्तभैरवम् ।
संपूज्य विधिवत् तत्र गन्धाक्षतप्रसूनकैः ॥ ४६ ॥
यत्नमभ्यर्च्य देवेशि गुरुं संपूजयेत् ततः ।
पूर्वे ततः खनेत् कुण्डं योनिरूपं त्रिकोणकम् ॥ ४७ ॥
तत्रारणिं प्रपूज्यादौ वह्निमावाहयेच्छिवे ।
तारं वह्नित्रयं चाग्ने वैश्वानरपदं वदेत् ॥ ४८ ॥
प्रज्वलेति युगं प्रोच्येदिहागच्छेति संवदेत् ।
इह सन्निधिमाधत्स्व वरं मे देहि-युग्मकम् ॥ ४९ ॥
फड्वह्निजायां प्रोच्चार्य गन्धेनाभ्यर्चयेत् ततः ।
परादेव्यास्तु मन्त्रेण घृतमाज्यं चरेच्छिवे ॥ ५० ॥
मूलेनाग्नौ शिवे दद्यादाहुतीनां शतं परम् ।
घृतखण्डादिमृद्वीकाखर्जूराम्बुजपायसैः ॥ ५१ ॥
तत्र देवीं समावाह्य परां ध्यात्वा विशेषतः ।
प्राङ्मुखो गुरुरासीन उत्तराभिमुखं शिशुम् ॥ ५२ ॥
संस्थाप्य विधिवद् देवि कृत्वा विघ्नशोधनम् ।

भूतशुद्धिक्रमोपेतं प्राणार्पणविधिं चरेत् ॥ ५३ ॥
प्राणायामत्रयं कृत्वा विधायाचमनत्रयम् ।
तत्र मूलेन देवेशि दिशो बद्ध्वा परां स्मरेत् ॥ ५४ ॥
गुरुः शिष्याय शान्ताय पराप्रीत्यै महेश्वरि ।
बहेः समक्षं यत्राग्रे दीक्षां परमदुर्लभाम् ॥ ५५ ॥
कर्णमूले महाविद्यां श्रीविद्यां साधकेश्वरः ।
आनन्दाप्लुतहृदयः शनैस्त्रिस्त्रिः समर्पयेत् ॥ ५६ ॥
प्रथमं तु गणेशस्य मन्त्रं साङ्गं समर्पयेत् ।
ततो देव्याश्च गायत्रीं ततो मूलं महेश्वरि ॥ ५७ ॥
एवं समर्प्य देवेशि कृत्वा होमं यथाविधि ।
शिष्यो दीक्षां तु संप्राप्य गुरुमभ्यर्च्य शक्तितः ॥ ५८ ॥
तोषयित्वा प्रणामैश्च दक्षिणाभिः शुभाम्बरैः ।
तदाज्ञां सहसादाय जपाय परमेश्वरि ॥ ५९ ॥
यन्त्रं मन्त्रं च मालां च तन्त्रं चैकाक्षमीश्वरि ।
पुनर्जातु शिवे शिष्यो गुरवेऽपि न दर्शयेत् ॥ ६० ॥
ततो होमं च संपाद्य बटुकं योगिनीगणम् ।
भूतान् सन्तर्प्य बलिना देवीं[1] देवं विसर्जयेत् ॥ ६१ ॥

श्रीदेव्युवाच ।

भगवन् देवदेवेश भक्तानुग्रहकारक ।
गणेशं चैव गायत्रीं मूलविद्यां जपेत् परम् ॥ ६२ ॥
शैवं मन्त्रं जपन्[2] वा वैष्णवं साधकेश्वरः ।
का कां विद्यां स गृह्णीयाच्छिन्ध्येतत् संशयं मम ॥ ६३ ॥

श्रीभैरव उवाच ।

प्रथमेऽहनि देवेशि साधको गुरुभक्तितः ।

---

१ 'देवीदेव' ख पाठ । २ 'जपन् यो' ख पाठ ।

गणेशं देवि गायत्रीं मूलविद्यां जपेत् परम् ॥ ६४ ॥
मुहूर्ते शुभदे देवि शैवं मन्त्रं जपेत् ततः ।
गुरोः पादप्रसादेन लब्ध्वा कतिपयैर्दिनैः ॥ ६५ ॥
ततो गुरुं शिवे भक्त्या वन्दनैः पूजनैः सदा ।
प्रार्थनाभिश्च संतोष्य श्रीविद्यां प्रार्थयेत् ततः ॥ ६६ ॥
विना श्रीविद्यया देवि साधकोऽदीक्षितः स्मृतः ।
अदीक्षितः पशुः प्रोक्तः पशुत्वान्निरयी भवेत् ॥ ६७ ॥
स्वजन्मनि शिवे तस्माद् गुरुमभ्यर्च्य भक्तितः ।
श्रीविद्यां प्रार्थयित्वादौ गृह्णीयात् सर्वसिद्धये ॥ ६८ ॥
महात्रिपुरसुन्दर्याः श्रीविद्यां प्राप्य दुर्लभाम् ।
सशिवां गिरिजे साङ्गां प्रार्थयेद् दक्षिणां ततः ॥ ६९ ॥
विना श्यामां न सिद्धिः स्यान्ममापि परमेश्वरि ।
द्वात्रिंशत्यक्षरीं विद्यां प्रजपेत् साधकोत्तमः ॥ ७० ॥
श्यामाविद्याजपेनाशु श्रीविद्या सिद्धिमेष्यति ।
तामसी कालिका प्रोक्ता राजसी षोडशाक्षरी ॥ ७१ ॥
सात्त्विकी च परादेवी महाश्रीषोडशाक्षरी ।
राज्यं देयं शिरो देयं देया सन्ततिरर्थिने ॥ ७२ ॥
वसुपूर्णं गृहं देयं न देया षोडशाक्षरी ।
विद्यां त्रिपुरसुन्दर्या लब्ध्वा गुरुप्रसादतः ॥ ७३ ॥
मनसापीति नो ब्रूयाच्छ्रीविद्योपासकोऽस्म्यहम् ।
श्यामां भजेत् पराविद्यां श्रीविद्याभेदरूपिणीम् ॥ ७४ ॥
तेन सिद्धिर्भवेदाशु देवानामपि दुर्लभा ।
यत्र दृष्ट्वापि वै ब्रूयाद्गुरुस्तत्रं समाचरेत् ॥ ७५ ॥
गुरुरेव परा देवी गुरुरेव परा गतिः ।

---

१ 'तत्र' क पाठ ।

गुरुमुल्लङ्घ्य यः कुर्यात् किञ्चित् स निरयं व्रजेत् ॥ ७६ ॥
एवं देवि पराभक्तो दीक्षितो गुरुपूजकः ।
गुरूपदेशतः कुर्याज् जपं पूजामहर्निशम् ॥ ७७ ॥
स्वयं दीक्षां गुरोर्लब्ध्वा दीक्षितः पुण्यभाजनम्[1] ।
गुरुमभ्यर्च्य संप्रार्थ्य शक्तिदीक्षार्थमीश्वरि ॥ ७८ ॥
दीक्षिता यस्य नो शक्तिस्तस्य दीक्षा तु निष्फला ।
जन्मकोटिषु जप्तापि तस्य विद्या न सिध्यति ॥ ७९ ॥
ततः शिवे गुरुः शिष्यं संपूज्य परमार्थवित् ।
शिष्यस्त्रियं परारूपां देवीरूपां विचिन्तयेत् ॥ ८० ॥
अभ्यर्च्य परमां शक्तिं परावद् वन्दनैः स्तवैः ।
आदृत्य मातृवद् देवि कन्यावद् दीक्षयेत् तदा ॥ ८१ ॥
परावत् पूजयित्वादौ ततो दीक्षां समर्पयेत् ।
उपविश्य गुरुस्तत्र पश्चिमाभिमुखः शिवे ॥ ८२ ॥
दीक्षायै प्राङ्मुखीं कृत्वा पूजयेद् यन्त्रराजवत् ।
ततः संपूज्य देवेशि यन्त्राग्रे देवतागृहे ॥ ८३ ॥
शिवो भूत्वा पराविद्यां कर्णमूले समर्पयेत् ।
संप्राप्य सशिवां विद्यां गुरुं पितृवदर्चयेत् ॥ ८४ ॥
गन्धाक्षतप्रसूनाद्यैर्दक्षिणाम्बरपूर्वकैः ।
तदाज्ञां शिरसादाय जपं कुर्यात्तु सर्वदा ॥ ८५ ॥
शक्तिश्च दीक्षिता भूत्वा दीक्षितोऽपि स्वयं शिवे ।
मर्त्योऽपि सञ्चिन्वे जन्तुरमरत्वमवाप्नुयात् ॥ ८६ ॥
गुरोः पादप्रसादेन श्रीविद्या यदि लभ्यते ।
स श्यामा म शिवा देवि वश्यं तस्य जगत् त्रयम् ॥ ८७ ॥
इदं रहस्यं परमं तव भक्त्या मयेरितम् ।

---

[1] 'भाजनः' क. पाठः ।

दीक्षाविधेर्महादेवि गोपनीयं प्रयत्नतः ॥ ८८ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये दीक्षाविधि-
निरूपणं प्रथमः पटलः ॥ १ ॥

अथ

द्वितीयः पटलः

श्रीभैरव उवाच ।

अधुना कथयिष्यामि मन्त्रान् साङ्गान् महेश्वरि ।
देवीनां वैष्णवान्छाक्तान्छैवांस्त्वं शृणु पार्वति ॥ १ ॥
त्रिपुरा त्र्यक्षरी बाला तथा त्रिपुरभैरवी ।
कालिका भद्रकाली च मातङ्गी भुवनेश्वरी ॥ २ ॥
उग्रतारा छिन्नशीर्षा सुमुखी च सरस्वती ।
अन्नपूर्णा महालक्ष्मीः शारिका शारदा ततः ॥ ३ ॥
इन्द्राक्षी बगला तुर्या राज्ञी ज्वालामुखी तथा ।
भीडा च कालरात्रिश्च भवानी वज्रयोगिनी ॥ ४ ॥
वाराही सिद्धलक्ष्मीश्च कुलवागीश्वरी ततः ।
(पद्मावती कुब्जिका च गौरी श्रीरंचरी ततः ॥ ५ ॥)
नीलसरस्वती देवि पराशक्तिः ततः स्मृता ।
एतासां देवि साङ्गानां शक्तीनां वच्म्यहं मनून् ॥ ६ ॥
शैवान् मन्त्रांस्ततो वक्ष्ये यथावच्छृणु पार्वति ।
मृत्युञ्जयोऽमृतेशानो बटुकोऽपि महेश्वरः ॥ ७ ॥
शिवः सदाशिवो रुद्रो महादेवः करालकः ।

विकरालो नीलकण्ठः शर्वः पशुपतिर्मृडः ॥ ८ ॥
पिनाकी गिरिशो भीमो गणेशः प्रमथाधिपः ।
कुमारः क्रोधनश्चेशः कपाली क्रूरभैरवः ॥ ९ ॥
संहार ईश्वरो भर्गो रुरुः कालाग्निरव्ययः ।
अघोरश्च महाकालः कामेश्वर इति स्मृतः ॥ १० ॥
वैष्णवाञ्छृणु देवेशि मन्त्रांस्तन्त्रेषु गोपितान् ।
येन श्रवणमात्रेण मन्त्री विष्णुपदं व्रजेत् ॥ ११ ॥
लक्ष्मीनारायणो राधाकृष्णो विष्णुर्नृसिंहकः ।
वराहो जामदग्न्यश्च सीतारामो जनार्दनः ॥ १२ ॥
विश्वक्सेनो वासुदेव इत्येवं दश वैष्णवाः ।
मन्त्रा अत्युत्तमा देवि जप्याः साधकसत्तमैः ॥ १३ ॥
एतेषां शाक्तशैवानां वैष्णवानां महेश्वरि ।
उद्धारान् वच्मि मन्त्राणां श्रुत्वा गोपय यत्नतः ॥ १४ ॥

(१) वाग्भवं कामराजश्च शक्तिर्मध्येऽभिधं न्यसेत् ।
नमोऽन्ते देवि बालाया मन्त्रोऽयं चाष्टवर्णकः ॥ १५ ॥

प्रकाशम्—" वें क्लीं सौः बालायै नमः " इति बाला ।

(२) वेधोबीजमधोऽध्यर्णमधो जिष्णुस्तमः परा ।
क्षविः शक्तिः शिरः कान्तिस्तमो माया शरत् शिरः ॥ १६ ।
तमो मायाञ्चले देव्या मन्त्रः पञ्चदशाक्षरः ।

स्पष्टम्—" कएईलह्रीं ह्रसकहलह्रीं सकलह्रीं " इति ।

(३) लक्ष्मीः परा मदनवाग्भवशक्तियुक्ता
तारं च भूतिकमले कथितापि विद्या ।
शक्त्यादिकं तु विपरीततया च प्रोक्तः
श्रीषोडशाक्षरविधिः शिवमंस्तु पूर्णः ॥ १७ ।

---

१ 'वेषां' ख. पाठः । २ 'अभ्युत्तमा.' क. पाठः । ३ 'प्रकाश' ग पाठः । ४ 'शुभदोस्तु' ख. पाठः

स्पष्टम्—"श्रीं ह्रीं क्लीं ऐं सौः ओं ह्रीं श्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं" इति ।

देवि वक्ष्याम्यहं गुह्यं त्रिपुराया रहस्यकम् ।
नित्यायाः शक्तयः पूज्या वाग्भवीकामशक्तयः ॥ १८ ॥
तारमायारमाबीजैर्नाम मध्येऽञ्जलेऽस्मरी ।
मन्त्रोऽयं सर्वशक्तीनां सर्वसाधारणो मतः ॥ १९ ॥
त्रिपुरापूजने देवि पृथग् जाप्ये पृथग्मनुः ।
(४) कालीत्रयं कूर्चयुग्मं लज्जायुग्मं समुच्चरेत् ॥ २० ॥
दक्षिणे कालिके चेति पुनर्बीजानि पूर्ववत् ।
ठद्वयं सान्मनोरन्ते मन्त्रोऽयं भुवनेश्वरः ॥ २१ ॥
द्वाविंशत्यक्षरी विद्या विद्याराज्ञी प्रकीर्तिता ।

स्पष्टम्—"क्रींक्रींक्रीं हूंहूं ह्रींह्रीं दक्षिणे कालिके क्रींक्रींक्रीं हूंहूं ह्रींह्रीं स्वाहा" इति काली ।

काल्याद्याः शक्तयः पूज्याः कालीबीजेन केवलम् ।
अन्यथा सिद्धिहानिः स्यात् कालिकापूजने परम् ॥ २२ ॥
(५) कालीत्रयं कूर्चयुग्मं लज्जायुग्मं च भद्रिकाम् ।
भद्रकालिपदं ब्रूयाद् बीजानि प्रतिलोमतः ॥ २३ ॥
ठद्वयेन समायुक्तो भद्रकाली-महामनुः ।

प्रकाशम्—"क्रींक्रींक्रीं हूंहूं ह्रींह्रीं मे भद्रकालि मे ह्रींह्रीं हूंहूं क्रींक्रींक्रीं स्वाहा" इति भद्रकाली ।

कालीकूर्चपरावीजैः परिवारादिशक्तयः ।
पूजनीया महादेवि भद्रकालीसमर्चने ॥ २४ ॥
(६) तारं परां समुद्धृत्य राजमातङ्गिनीति च ।
मम सर्वार्थसिद्धिं च देहि-युग्मं समुद्धरेत् ॥ २५ ॥
तुरगं ठद्वयं चान्ते मन्त्रोऽयं राजवल्लभः ।

प्रकाशम्—"ओं ह्रीं राजमातङ्गिनि मम सर्वार्थसिद्धिं देहि २ फट् स्वाहा" इति मातङ्गी ।

तारेण पूज्या देवेशि शक्तयः परिवारगाः ।
(७) मायाबीजं नाम मध्ये नमो मन्त्राञ्चले वदेत् ।
एकाक्षरीयं विदिता भुवने भुवनेश्वरी ॥ २७ ॥

प्रकाशम्—"ह्रीं भुवनेश्वर्यै नमः" इति भुवनेश्वरी ।

मायाबीजेन संपूज्याः पूजाकालेऽत्र शक्तयः ।
(८) तारं परां वधूं कूर्चं तुरगं सकलाञ्चले ॥ २८ ॥
सार्धपञ्चाक्षरी तारा भवसागरतारिणी ।

स्पष्टम्—"ॐ ह्रीं स्त्रीं हूं फट्" इत्युग्रतारा ।

तारकान्तातटैः पूज्याः शक्तयश्चक्रमध्यगाः ॥ २९ ॥
(९) लक्ष्मीं लज्जां तथा मायां मात्रां द्वादशिकीमथ ।
वज्रवैरोचनीये द्वे माये फट्स्वाहया युते ॥ ३० ॥

स्पष्टम्—"श्रीं ह्रीं ह्रीं ऐं वज्रवैरोचनीये ह्रींह्रीं फट् स्वाहा" इति छिन्नमस्ता ।

मायायुग्मेन संपूज्याः शक्तयः परिवारगाः ।
(१०) वाग्भवं कामराजं च तथोच्छिष्ट-पदं वदेत् ॥ २१ ॥
चण्डालिनीति प्रोच्चार्य सुमुखीदेवि चोद्धरेत् ।
महापिशाचिनि चेति मायार्णं पङ्कजत्रयम् ॥ ३२ ॥
वह्निजायाञ्चलो मन्त्रो गोपनीयो महेश्वरि ।

स्पष्टम्—"ऐं क्लीं उच्छिष्टचण्डालिनि सुमुखीदेवि महापिशाचिनि ह्रीं ठः ठ ठः स्वाहा" इति सुमुखी ।

वाक्कामबीजैः संपूज्याः शक्तयोऽन्याः परस्परम् ॥ ३३ ॥
(११) तारं माया च वाग्बीजं परा तारं महेश्वरि ।
सरस्वत्यै जगन्मन्त्रः प्रसिद्धोऽयं शिवाक्षरः ॥ ३४ ॥

स्पष्टं यथा—"ॐ ह्रीं ऐं ह्रीं ॐ सरस्वत्यै नमः" इति सरस्वती ।

तारमायाक्षरैः पूज्या देव्यो देवीसमीपगाः ।
(१२) तारं परापि कमला कामं विश्वं ततो वदेत् ॥ ३५ ॥
भगवति माहेश्वरि चान्नपूर्णे च ठद्वयम् ।

स्पष्टम्—"ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा" इति अन्नपूर्णा ।

आदिबीजद्वयेनैव पूज्या देव्याः समीपगाः ॥ ३६ ॥

[*(१३)तारं परां रमां कामं वाग्भवं शक्तिबीजकम् ।
महालक्ष्मि प्रसीदेति युग्मं मा पङ्कजत्रयम् ॥ ३७ ॥
स्वाहान्तोऽयं महामन्त्रो महालक्ष्मीपदप्रदः ।

प्रकाशम्—"ॐ ह्रीं श्रीं क्लीं पें सौः महालक्ष्मि प्रसीद २ श्रीं ठः ठः ठः स्वाहा" इति महालक्ष्मीः ।

आदिबीजत्रयेणैव पूज्याः परमशक्तयः ॥ ३८ ॥]

(१४) तारं मायां श्रियं कूर्चं सिन्धुरं शर्म ओ ऐत ।
नामारभ्यरीं मनोरन्ते मन्त्रोऽयं भुवि दुर्लभः ॥ ३९ ॥

स्पष्टम्—"ॐ ह्रीं श्रीं हूं क्रां आं शां शारिकायै नमः" इति शारिका ।

मायया पूजयेद् देवीः परिवारगताः शिवे ।

(१५) तारं माया स्मरः शक्तिरम्भरी नाम संवदेत् ॥ ४० ॥
भगवत्यै शारदायै मनोरन्ते परा वनम् ।

स्पष्टम्—"ॐ ह्रीं क्लीं सः नमो भगवत्यै शारदायै ह्रीं स्वाहा" इति शारदा ।

तारकाभैः शिवे पूज्याः शक्तयः परमार्थदाः ॥ ४१ ॥

(१६) प्रणवं कमलां मायां वाग्भवं शक्तिमन्मथौ ।
इन्द्राणि वज्रहस्ते च हरमन्तेऽग्निवल्लभा ॥ ४१ ॥

मूलम्—"ॐ श्रीं ह्रीं पें सौः क्लीं इन्द्राणि वज्रहस्ते फट् स्वाहा" इति इन्द्राणी ।

आदिबीजत्रयेणैताः पूज्याः श्रीचक्रदेवताः ।

(१७) तारं मृत्स्नां च देवेशि बगलामुखि सर्व चें ॥ ४२ ॥
दुष्टानां वाचं मुखं पदं स्तम्भय-युग्मकम् ।
जिह्वां कीलय-युग्मं च मृत्तारं ठद्वयं मनुः ॥ ४४ ॥

---

* भ्रुकुटिषन्यान्तर्गतं क. पुस्तके नास्ति । १ 'सर्वदा' ख. ग. पाठः ।

प्रकाशम्—" ॐ ह्रीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय २ जिह्वां कीलय २ ह्रीं ॐ स्वाहा " इति बगलामुखी ।

बीजद्वयेन संपूज्याः परिवारगताः पराः ।

(१८) प्रणवस्तारका ज्योतिस्तारा मध्येऽभिधं न्यसेत् ॥ ४५ ॥

अन्तेऽश्मरी महादेवि मन्त्रोऽयं शत्रुसूदनः ।

प्रकाशम्—" ॐ मुं त्रीं त्रीं महातुर्यै नमः " इति महातुरी ।

प्रणवेनार्चयेद् देवि परिवारान् यथाक्रमम् ॥ ४६ ॥

(१९) तारं परा रमा वह्निः कामः शक्तिः षडक्षरः ।

भगवत्यै च राज्यै च माया ठद्वयमञ्चले ॥ ४७ ॥

प्रकाशम्—"ॐ ह्रीं श्रीं रां क्लीं सौः भगवत्यै राज्यै ह्रीं स्वाहा" इति महाराज्ञी ।

ताराग्निभ्यां शिवे देवीपरिवारान् समर्चयेत् ।

(२०) तारं लज्जां श्रियं चैव ज्वालामुखि ममेति च ॥ ४८ ॥

सर्वशत्रून् भक्षय द्विरन्ते कूर्चं हरं पयः ।

प्रकाशम्—"ॐ ह्रीं श्रीं ज्वालामुखि मम सर्वशत्रून् भक्षय भक्षय हूं फट् स्वाहा " इति ज्वालामुखी ।

तारेण पूजयेद् देवि परिवारगताः पराः ॥ ४९ ॥

(२१) तारं परा रमा वेदी चन्द्रमन्मथशक्तयः ।

भीडाभगवतीत्येवं हंसरूपिणि ठद्वयम् ॥ ५० ॥

स्पष्टं यथा—"ॐ ह्रीं श्रीं ह्स्त्रैं पैं क्लीं सौः भीडाभगवति हंसरूपिणि स्वाहा" इति भीडा ।

परारमार्णेदेवेशि परिवारान् प्रपूजयेत् ।

(२२) प्रणवं वासना माया मन्मथः कमला ततः ॥ ५१ ॥

मध्ये नामाञ्चले सर्वं वश्यं कुरुद्वयं वदेत् ।

वीर्यं देहि पुनर्नाम गणेश्वर्याश्मरी स्मृता ॥ ५२ ॥

प्रकाशम्—" ॐ पैं ह्रीं क्लीं श्रीं कालरात्रि सर्वं वश्यं कुरु २ वीर्यं देहि २ गणेश्वर्यै नमः " इति कालरात्री ।

तारचन्द्रेण संपूज्यं परिवारांस्ततो यजेत् ।
(२३) तारं रमा रमा तारं तारं माया रमा रमा ॥ ५३ ॥
हूंफडन्तः समाख्यातो मन्त्रः सर्वार्थसाधकः ।
प्रकाशम्—"ॐ श्रीं श्रीं ॐ ॐ ह्रीं श्रीं श्रीं हूं फट्" इति भवानी ।
मावीजैः पूजयेद् देवि परिवारगताः पराः ॥ ५४ ॥
(२४) पराणं वज्रयोगिन्यै ठद्वयं प्रणवादितः ।
मन्त्रोऽयं सर्वसिद्धीशः साधकानां जयप्रदः ॥ ५५ ॥
मूलम्—"ॐ ह्रीं वज्रयोगिन्यै स्वाहा" इति वज्रयोगिनी ।
मायाबीजेन देवेशि परिवारान् समर्चयेत् ।
(२५) चन्द्रवाह्नीकमोहार्णचन्द्रा मध्येऽभिधं न्यसेत् ॥ ५६ ॥
चन्द्रो मठं पद्मयुग्मं हरं नीरमयं मनुः ।
वासनामोहबीजेन पूजयेत् परिवारगान् ॥ ५७ ॥
मूलम्—"ऐं ग्लौं लं ऐं नमो भगवति वार्तालि वाराहि देवते वराहमुखि ऐं ग्लौं ठः ठः फट् स्वाहा" इति धूम्रवाराही ।
(२६) तारं रमायुगं माया हरितं चन्द्रमन्मथौ ।
शङ्किनीमारमरीमन्त्रः सिद्धलक्ष्म्या उदाहृतः ॥ ५८ ॥
प्रकाशम्—"ॐ श्रीं श्रीं ह्रीं हसौः ऐं क्रीं सौः सिद्धलक्ष्म्यै नमः" इति सिद्धलक्ष्मीः ।
रमया पूजयेदन्याः परिवारगताः शिवे ।
(२७) तारं कामो डिम्बलक्ष्मीः कूर्चं कांक्षाभिधं ततः ॥ ५९ ॥
चन्द्रः पद्मः स्पृहा पद्मो वेदया पद्मो वनं मनुः ।
प्रकाशम्—"ॐ क्रीं ह्रां श्रीं हूं भं भपद्मस्ते कुलयोगीश्वरि ऐं ठः भं ठः स्त्रीं ठ. स्वाहा" इति कुलयोगीश्वरी ।
कामेन पूजयेद् देवि परिवारान् यथाक्रमम् ॥ ६० ॥
(२८) तारं परा रमा कामा वीची पद्मावतीति च ।

मम वरं देहि–युग्मं हरं नीरमयं मनुः ॥ ६१ ॥
परया पूजयेद् देवीः परिवारगताः पराः ।

प्रकाशम्—"ॐ ह्रीं श्रीं क्लीं ब्लूं पद्मावति मम वरं देहि २ फट् स्वाहा" इति पद्मावती ।

(२९) तारं रमा वागुराणं नाम मध्ये ततः परा ॥ ६२ ॥
पद्मो वनमयं मन्त्रः सर्वसिद्धिफलप्रदः ।
वागुराणेन देवेशि पूजयेत् परिवारगाः ॥ ६३ ॥

प्रकाशम्—"ॐ श्रीं ग्रीं कुब्जिके देवि ह्रीं ठः स्वाहा" इति कुब्जिका ।

(३०) प्रणवं कमला माया वाल्हीकं च शिवं ततः ।
गौरि शर्वो वनं देवि मन्त्रः सर्वार्थसिद्धिदः ॥ ६४ ॥

स्पष्टम्—"ॐ श्रीं ह्रीं ग्लौं गं गौरि गौं स्वाहा" इति गौरी ।

रमया परिवाराश्च पूजयेत् साधकोत्तमः ।

(३१) भेकी तमः परा शक्तिः खेचर्यै चाश्मरी ततः ॥ ६५ ॥
मन्त्रोऽयं खेचरो नाम खेचरत्वप्रदायकः ।
परया पूजयेद् देवीः परिवारगताः प्रिये ॥ ६६ ॥

स्पष्टम्—"मलह्रीं सौः खेचर्यै नमः" इति खेचरी ।

(३२) तारं व्योम वाग्भवं च कूर्चं नीलसरस्वति ।
हरं नीरं मनोरन्ते मन्त्रोऽयं वाक्प्रदायकः ॥ ६७ ॥
व्योमेश पूजयेद् देवि परिवारा यथाविधि ।

प्रकाशम्—"ॐ ह्रां ऐं हूं नीलसरस्वति फट् स्वाहा" इति नील सरस्वती ।

(३३) तारं रमा परा कामः शक्तिर्वह्नि ततोऽमिधम् ॥ ६८ ॥
वाग्भवं ठद्वयं देवि मन्त्रराजोऽयमीरितः ।

प्रकाशम्—"ॐ श्रीं ह्रीं क्रीं सौः क्लीं सौः पराशक्त्यै ऐं स्वाहा" इति पराशक्तिः

मूलेन पूजयेदन्या देवीस्तत्परिवारगाः ॥ ६९ ॥
इत्येष शाक्तमन्त्राढ्यः पटलो देवदुर्लभः ।

अधुना ते मनून् शैवान् वक्ष्यामि शृणु पार्वति ॥ ७० ॥
इदं रहस्यं परमं तव भक्त्या प्रकाशितम् ।
गुह्यातिगुह्यगुप्तं च गोपनीयं स्वयोनिवत् ॥ ७१ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये शाक्तमन्त्रो-
द्धारनिरूपणं द्वितीयः पटलः ॥ २ ॥

अथ

तृतीयः पटलः ।

श्रीभैरव उवाच ।

यो देवदेवो देवेशि महामृत्युञ्जयः स्मृतः ।
मन्त्रोद्धारं प्रवक्ष्यामि तस्याहं शृणु पार्वति ॥ १ ॥
(१) व्यक्तं हृज्जं शक्तिशोमेऽपि शङ्का
मां तस्माद्धै पालय द्वित्तयैव ।
तस्माच्छक्तिः खं शरद् हृज्जतारं
मन्त्रोद्धारो देवि मृत्युञ्जयस्य ॥ २ ॥
अमृतेशस्य वक्ष्यामि मन्त्रोद्धारं महेश्वरि ।
येन विज्ञातमात्रेण दीक्षाफलमवाप्नुयात् ॥ ३ ॥
(२) तारं हृज्जं शरभाम मध्ये विश्वं तयाञ्चले ।
मन्त्रोऽयं सर्वसिद्धीशः मुमुक्षोशिववल्लभः ॥ ४ ॥
(३) प्रणवं भूतिबीजं च वटुकाय समुद्धरेत् ।

आपदुद्धारणायेति कुरुयुग्मं समुच्चरेत् ॥ ५ ॥
वटुकाय पराबीजं मन्त्रोऽयं देवदुर्लभः ।
(४) तारं व्योमं महादेवि ततो महेश्वराय च ॥ ६ ॥
विश्वमन्ते मनोर्दद्यान्मन्त्रोऽयं सर्वसिद्धिदः ।
(५) तारं विश्वं शिवायेति मन्त्रोऽयं भोगमोक्षदः ॥ ७ ॥
(६) तारं व्योमं शिवायेति नमोऽन्तेऽस्त्यपरो मनुः ।
इति शिवस्य मन्त्राः ।
(७) तारं वाणी शरत् कामः सदाशिवाय प्रोद्धरेत् ।
विश्वमन्ते स्मृतो मन्त्रो मन्त्रमौलिमणिः परः ॥ ८ ॥
इति सदाशिवस्य ।
(८) तारं व्योमं शिवो रुद्र प्रसीदेति युगं वदेत् ।
अन्ते ठद्वयमीशानि मन्त्रोऽयं देवदुर्लभः ॥ ९ ॥
इति रुद्रस्य ।
(९) तारं परा शिवो देवि महादेवाय ठद्वयम् ।
मन्त्रः शिवमदो देवि शैवानां परमार्थदः ॥ १० ॥
(१०) तारं काली शिवो नाम तुरीरूपं च ठद्वयम् ।
मन्त्रो भैरवविख्यातः कलौ भोगापवर्गदः ॥ ११ ॥
इति करालस्य ।
(११) तारं वाग्भवमामाया विकरालाय विन्यसेत् ।
अन्ते ठद्वयमुच्चार्य मन्त्रराजोऽयमीरितः ॥ १२ ॥
इति विकरालस्य ।
(१२) मायां हरितं डिम्बं नीलकण्ठाय चाश्मरी ।
दुर्गेशनीलकण्ठस्य मन्त्रोद्धारो दशाक्षरः ॥ १३ ॥
(१३) तारं परा रमा-बीजं शर्वायेति पदं वदेत् ।
अन्तेऽश्मरी मनोर्देवि मन्त्रोऽयं भोगदः स्मृतः ॥ १४ ॥

---

१ ° म्भ्र ° दाह । २ तुरीरूप चतुर्थेन्तमिलर्थः ।

(१४) प्रणवो वाग्भवो मारः शक्तिः पशुपतेर्वनम् ।
मन्त्रोऽयं देवदेवस्य वल्लभो मुक्तिसाधनम् ॥ १५ ॥
(१५) तारं परा मृडायेति विश्वमन्ते मनुः स्मृतः ।
(१६) तारं हृल्लं परा लक्ष्मीर्मध्ये भूपात्पिनाकिने ॥ १६ ॥
अन्तेऽस्मरी मनोर्देवि मन्त्रोऽयं वैरिसूदनः ।
(१७) तारं शिवो मठं देवि गिरिशायास्मरी मनुः ॥ १७ ॥
(१८) तारं परा भद्रिका च भीमायान्तेऽस्मरी मनुः ।
(१९) माया शिवाचरं मायः महागणपमुद्धरेत् ॥ १८ ॥
तयेऽस्मरी मनोरन्ते मन्त्रोऽयं विघ्नहारकः ।
(२०) तारं परा च वाह्नीकं प्रमथाधिपमुद्धरेत् ॥ १९ ॥
प्रसीद-द्वयमापोऽन्ते मन्त्रोऽयं देवदुर्लभः ।
(२१) छविः कुमाराय मनोरन्ते विश्वं मनुः परः ॥ २० ॥
सर्वदेवेन्द्रपददो भोगदो मोक्षदः स्मृतः ।
(२२) तारं काली शिवो देवि क्रोधनेशाय चास्मरी ॥ २१ ॥
मन्त्रोऽयं सर्वसिद्धीशो वैरिवर्गनिबर्हणः ।
(२३) तारं परा रमा लक्ष्मीरीशायेति वनं मनुः ॥ २२ ॥
(२४) तारं शिवः कामराजः कपालीशाय संवदेत् ।
अन्ते ठद्वयमुद्धृत्य मन्त्रोऽयं स्याद् दशाक्षरः ॥ २३ ॥
(२५) तारं कालीयुगं माया क्रूरभैरव मोद्धरेत् ।
प्रसीद-द्वयमापोऽन्ते मन्त्रोऽयं सर्वसिद्धिदः ॥ २४ ॥
(२६) तारं वाणी शरत् कामः संहारायाञ्चले वनम् ।
मन्त्रोऽयं देवदेवस्य वर्णितस्ते दशाक्षरः ॥ २५ ॥
(२७) तारं मा भूतिर्मा लक्ष्मीरीश्वरायास्मरी मनुः ।
(२८) तारं च भास्वती माया मर्गायान्तेऽस्मरी मनुः ॥ २६ ॥
(२९) तारं चाग्निः परा वीजं रुद्रे चास्मरी मनुः ।

(३०) प्रणवं कमला माया कालाग्नये-पद ततः ॥ २७ ॥
विश्वमन्ते मनोर्देवि मन्त्रराजोऽयमीरितः ।
(३१) तारं व्योमं शिवो देवि सद्योजाताय चाश्मरी ॥ २८ ॥
उग्रताराशिवस्यायमव्ययस्य मनुः स्मृतः ।
(३२) मात्रादिः षडभिज्ञवह्निकुलिशास्तस्माद्विलं मारजि-
द्वह्नी वज्रकगौतमाग्नियुगलं रात्र्यग्निवज्राङ्कितम् ।
शङ्खौ वीं च तमी शुभौ बकयुतौ शक्त्यौं[ऽक्लिं]र्वज्राश्मका
रात्र्यब्धीन्दुजसिन्दुमत्स्यकुलिशा मन्त्रोऽयमाघोरिकः ॥२९॥
(३३) कूर्चद्वन्द्वं महाकाल प्रसीदेति पदद्वयम् ।
मायाद्वयं वह्निजाया राजराजेश्वरो मनुः ॥ ३० ॥
(३४) वाग्भवं मदनशक्तितारका मा परा सकलविद्ययान्विता ।
तारयुक्तविपरीतबीजकः षोडशाक्षरविधिः शिवः स्मृतः ॥ ३१ ॥
इतीदं मन्त्रसर्वस्वं रहस्यं परमं परम् ।
तव भक्त्या मयाख्यातं नाख्येयं दुरात्मने ॥ ३२ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये शिवमन्त्रो-
द्धारनिरूपणं तृतीय. पटल ॥ ३ ॥

अथ

चतुर्थः पटलः ।

श्रीभैरव उवाच ।

अधुना कथयिष्यामि वैष्णवांस्त्वत्तो मनून् ।
येषा स्मरणमात्रेण दीक्षितो दीक्षितो भवेत् ॥ १ ॥
मन्त्रोद्धारं प्रवक्ष्यामि लक्ष्मीनारायणस्य ते ।
अष्टसिद्धिप्रदं सद्यः साधकाना सुदुर्लभम् ॥ २ ॥
(१) तारं परा च हरित परा लक्ष्मीस्ततोऽभिधम् ।
लक्ष्मीनारायणायेति निधमन्ते मनुः स्मृतः ॥ ३ ॥
(२) तारं रमा वाग्भवकामशक्ति-
र्मायाग्निराधेति पदं वदेच्च ।
कृष्णाय कूर्चं हरठद्वयं स्या-
च्छ्रीकृष्णमन्त्रो मनुराजमौलिः ॥ ४ ॥
(३) तारं परायुगं तारं विष्णवे विश्वमञ्चले ।
देवदेवस्य मन्त्रोऽयं विष्णोस्तव समीरितः ॥ ५ ॥
(४) तार रमा भूद्विजवाक्स्मराथ
शक्तिर्नृबीज नरसिंहदेवम् ।
तुर्याङ्कित वाक्ष नटफड्नं ने
ग्रोद्रो हि लक्ष्मीनरसिंहमन्त्रः ॥ ६ ॥
(५) तार रमार्णे सकला स्मरथ
लक्ष्मीवराहाय-पद वदेत् तु ।
अन्तेऽस्मरी वैष्णवधामदायी
लक्ष्मीवराहस्य मनुः स्मृतस्ते ॥ ७ ॥

(६) तारं परा भूति रमा कुचार्णं
श्रीजामदग्न्याय सरोजयुग्मम् ।
आपस्तथान्ते गदितोऽयमीड्यो
यथेष्टदो भार्गवराममन्त्रः ॥ ८ ॥

(७) तारं परा रमा लक्ष्मीसीतारामेति संवदेत् ।
प्रसीद-युगमापोऽन्ते मन्त्रोऽयं मुक्तिकारणम् ॥ ९ ॥

(८) तारं मा भूतिमा माल्यां वदेज्जनार्दनाय च ।
विश्वमन्ते मनोर्देवि मन्त्रोऽयं रिपुसूदनः ॥ १० ॥

(९) तारं परायुगं लक्ष्मीविश्वक्सेनाय संवदेत् ।
कूर्चं पद्मत्रयं नीरं वैष्णवाना सुदुर्लभः ॥ ११ ॥

(१०) तारं परा रमा वाणी कामो लक्ष्मीपदं वदेत् ।
वासुदेवाय विश्वं स्यान्मन्त्रोऽयं भोगमोक्षदः ॥ १२ ॥
इदं तत्त्वतमं गुह्यं रहस्यं परमाद्भुतम् ।
वैष्णवानां च सर्वस्वं गोपनीयं स्वयोनिवत् ॥ १३ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये वैष्णवमन्त्रो
द्धारनिरूपण चतुर्थः पटल ॥ ४ ॥

अथ

पञ्चमः पटलः ।

श्रीभैरव उवाच ।

अथ वक्ष्ये महत्तत्त्वं मन्त्राणां परमार्थदम् ॥
येन विज्ञातमात्रेण विद्या सिध्यति सत्वरम् ॥ १ ॥
उत्कीलनविधिं वक्ष्ये सर्वमन्त्ररहस्यकम् ।
अदातव्यमभक्तेभ्यो नाख्येयं यस्य कस्यचित् ॥ २ ॥
शाक्तानां देवि मन्त्राणां शैवानां च विशेषतः ।
वैष्णवानां मनूनां तु वक्ष्याम्युत्कीलनं परम् ॥ ३ ॥
प्रथमं देवि बालायास्तूपचर्यां शृणु पार्वति ।
वाणीमन्ते त्रिरुच्चार्य भवेदुत्कीलनं मनोः ॥ ४ ॥
अन्त्यकूटं वदेदादौ द्विर्देवि जपसिद्धये ।
भवेत् त्रिपुरभैरव्या मनोरुत्कीलनं परम् ॥ ५ ॥
कूटत्रयाणां प्रथमं वर्णं वर्णं समुद्धरेत् ।
जपेच्छ्रीषोडशार्चर्या भवेदुत्कीलनं मनोः ॥ ६ ॥
अथ वक्ष्ये रहस्यं ते कालिकाया महेश्वरि ।
निष्कीलिता स्याद्विद्येयं द्वाविंशत्यक्षरी परा ॥ ७ ॥
भद्रिकां प्रथमं दद्यादन्ते कालीत्रयं वदेत् ।
भद्रकालीमनोर्देवि भवेदुत्कीलनं तथा ॥ ८ ॥
ठद्वयान्ते परां दद्यात् जपेत् साधकसत्तमः ।
भवेदुत्कीलनं देवि राज्ञमातङ्गिनीमनोः ॥ ९ ॥
विश्वान्ते सकलां दद्याज्जपेत् पार्वति जापकः ।

मनोः श्रीभुवनेश्वर्याः स्यादुत्कीलनमुत्तमम् ॥ १० ॥
वधूभादौ पठेदन्ते तारं जप्त्वा च पार्वति ।
अयमुत्कीलनो मन्त्रस्तारायाः समुदाहृतः ॥ ११ ॥
मात्रां द्वादशिकीमादौ जपेन्मन्त्रस्य पार्वति ।
छिन्नशीर्षामनोरेष स्यादुत्कीलनकः परः ॥ १२ ॥
मायामादौ वनान्ते च वाग्भवं साधको जपेत् ।
सुमुख्या मन्त्रराजस्य भवेदुत्कीलनं तथा ॥ १३ ॥
वाग्भवं प्रथमं दद्यादिश्वान्ते प्रणवं जपेत् ।
सरस्वतीमनोर्देवि मन्त्रोऽस्त्युत्कीलनाभिधः ॥ १४ ॥
विश्वमादौ जपेद् देवि वनान्ते मदनं पठेत् ।
अन्नपूर्णामनोरेष स्यादुत्कीलनको मनुः ॥ १५ ॥
रमामादौ मनोर्दद्यात् पद्मत्रयमथाञ्जले ।
महालक्ष्मीमनोर्देवि मन्त्रोऽस्त्युत्कीलनाभिधः ॥ १६ ॥
सिन्धुरं सञ्जपेदादौ मायामन्ते महेश्वरि ।
शारिकामन्त्रराजस्य स्यादुत्कीलनको मनुः ॥ १७ ॥
वनमादौ च नामाग्रे तारं दत्त्वा जपेच्छिवे ।
शारदामन्त्रराजस्य मन्त्रोऽस्त्युत्कीलनाभिधः ॥ १८ ॥
शक्तिबीजं पठेदादौ ठद्वयान्ते च मन्मथम् ।
इन्द्राक्षीमन्त्रराजस्य स्यादुत्कीलनको मनुः ॥ १९ ॥
मृद्बीजं च मनोरादौ वनान्ते प्रणवं जपेत् ।
मन्त्रोऽयं बगलामुख्या मन्त्रोत्कीलनसिद्धिदः ॥ २० ॥
त्रिः पठेदश्मरीप्रान्ते प्रणवं साधकोत्तमः ।
तुरीमन्त्रस्य मन्त्रोऽयमुत्कीलनफलप्रदः ॥ २१ ॥
वह्निमादौ तथा चान्ते[1] तारं दत्त्वा महेश्वरि ।

---

1 'न्ते व' ख पाठ ।

जपेन्मन्त्रं महाराज्ञीमनूत्कीलनसिद्धये ॥ २२ ॥
रमामादौ जपेद् देवि मन्त्रान्ते सकलां जपेत्
ज्वालामुखीमनोरेष मन्त्रोऽस्त्युत्कीलनक्षमः ॥ २३ ॥
वेदीबीजं पठेदादौ नामान्ते प्रणवं जपेत् ।
भीडामन्त्रस्य मन्त्रोऽयमुत्कीलनफलप्रदः ॥ २४ ॥
विश्वान्ते वाग्भवं दद्यात् काममादौ जपेत् प्रिये ।
कालरात्रिमनोर्देवि स्यादुत्कीलनको मनुः ॥ २५ ॥
तारत्रयं पठेदन्ते मा-त्रयं प्रथमं जपेत् ।
भवानीमन्त्रराजस्य मन्त्रोऽयं कीलदोषनुत् ॥ २६ ॥
परामन्ते जपेद् देवि वज्रयोगेश्वरीमनोः ।
उत्कीलनाख्यो मन्त्रोऽयं मन्त्रसिद्धिफलप्रदः ॥ २७ ॥
मठमादौ जपेद् देवि ठद्वयान्ते हरं तथा ।
वाराहीमन्त्रराजस्य मन्त्रोऽस्त्युत्कीलनाभिधः ॥ २८ ॥
हरितं प्रथमं देवि विश्वान्ते वाग्भवं जपेत् ।
सिद्धलक्ष्मीर्मनोर्देवि मन्त्रोऽस्त्युत्कीलनाभिधः ॥ २९ ॥
वेश्यामादौ वनान्ते च डिम्बबीजं जपेच्छिवे ।
उत्कीलनाख्यो मन्त्रोऽयं कुलवागीश्वरीमनोः ॥ ३० ॥
वीचिबीजं जपेदादौ ठद्वयान्ते च तारकम् ।
पद्मावतीमनोर्देवि मन्त्रोऽस्त्युत्कीलनाभिधः ॥ ३१ ॥
वागुरां मञ्जुपेदादौ वनान्ते सकलां जपेत् ।
कुब्जिकामन्त्रराजस्य मन्त्रोऽयं कीलदोषहृत् ॥ ३२ ॥
मठमादौ मनोर्देवि प्रणवं ठद्वयाञ्चले ।
मन्त्रं जपेदयं मन्त्रो गौरीमन्त्रस्य कीलहृत् ॥ ३३ ॥
शक्तिमन्ते जपेद्विश्वं प्रथमं परमेश्वरि ।

---

१ 'मन्त्रोऽर्कमन्त्रो मनु' इ ग घ पाठः ।

खेचरीमन्त्रराजस्य स्यादुत्कीलनको मनुः ॥ ३४ ॥
कूर्चमादौ मनोरन्ते व्योमं दत्त्वा जपेच्छिवे ।
मनोर्नीलसरस्वत्याः स्यादुत्कीलनको मनुः ॥ ३५ ॥
शक्तिमादौ मनोर्देवि वासनामञ्चले जपेत् ।
पराशक्तेर्मनोर्देवि कीलदोषापहो मनुः ॥ ३६ ॥

श्रीभैरव उवाच ।

अधुना शैवमन्त्राणां केचिद् देवि मनूत्तमाः ।
निष्कीलिता मया ख्याताः केचित् पार्वति कीलिताः ॥ ३७ ॥
महेश्वरः शिवो रुद्रो महादेवः करालकः ।
विकरालः शिवो शर्वो मृडः पशुपतिस्तथा ॥ ३८ ॥
पिनाकी गिरिशो भीमः कुमारः प्रमथाधिपः ।
क्रोधेश ईश ईशानि कपाली क्रूरभैरवः ॥ ३९ ॥
संहार ईश्वरो भर्गो रुरुः कालाग्निभैरवः ।
एते मन्त्रा महादेवि कीलदोषविवर्जिताः ॥ ४० ॥
पुरश्चरणमात्रेण फलं दास्यन्ति सत्वरम् ।
अथवा देवदेवेशि वक्ष्ये तत्त्वं परात् परम् ॥ ४१ ॥
एतेषां शैवमन्त्राणां श्रुत्वा गोप्यतमं कुरु ।
मन्त्रादिबीजं देवेशि प्रतिमन्त्रं जपेत् सुधीः ॥ ४२ ॥
त्रिवारं साधको येन भवेदुत्कीलनं मनोः ।
मृत्युञ्जयोऽमृतेशानो वटुको नीलकण्ठकः ॥ ४३ ॥
सद्योजातो गणेशश्च देवेशोऽघोरभैरवः ।
महाकालो महादेवि कामेश्वर इति प्रिये ॥ ४४ ॥
एते मन्त्रा मया देवि कीलिता मन्त्रसिद्धये ।
एतेषां शृणु मन्त्राणां देवेश्युत्कीलनं परम् ॥ ४५ ॥
येनोच्चारणमात्रेण मन्त्रसिद्धिः प्रजायते ।

स्यमेत ' ग घ पाठ. ।

हृज्जवीजं जपेदादौ अन्ते शक्तिं जपेत् प्रिये ॥ ४६ ॥
श्रीमृत्युञ्जयमन्त्रस्य मन्त्रोऽस्त्युत्कीलनाभिधः ।
तारमन्ते जपेदादौ शक्तिं मन्त्रस्य पार्वति ॥ ४७ ॥
अमृतेश्वरमन्त्रस्य स्यादयं कीलदोषहृत् ।
*(परामादौ जपेदन्ते प्रणवं साधकोत्तमः ॥ ४८ ॥
मन्त्रो वटुकमन्त्रस्य स्यादयं कीलनाशकः ।)
हरितं प्रथमं दत्त्वा मन्त्रान्ते च शिवं जपेत् ॥ ४९ ॥
दुर्गाशिवस्य मन्त्रोऽयं नीलकण्ठस्य कीलनुत् ।
शिवमादौ जपेदन्ते तारं पार्वति साधकः ॥ ५० ॥
उग्रताराशिवस्यायं मन्त्रो मन्त्रस्य कीलहृत् ।
मायामन्ते जपेद् देवि शिवमादौ च साधकः ॥ ५१ ॥
महागणपतेर्मन्त्रो मनोरुत्कीलनाभिधः ।
विश्वमादौ मनोर्देवि मात्रादिं चाञ्चले जपेत् ॥ ५२ ॥
अघोरभैरवस्यायं मनोरुत्कीलनो मनुः ।
एषामपि महाकालो निष्कीलित इति स्मृतः ॥ ५३ ॥
अस्य मन्त्रप्रसादेन सर्वे निष्कीलिताः शिवे ।
कामेशकूटत्रयतः प्रथमार्णत्रयं जपेत् ॥ ५४ ॥
श्रीविद्याशिवमन्त्रस्य स्यादुत्कीलनको मनुः ।
अथोर्ध्वं वैष्णवानां ते मन्त्राणां वच्मि पार्वति ॥ ५५ ॥
उत्कीलनमनून् येषां जपमात्राच्छिवं भजेत् ।
हरितं प्रथमं दद्यादन्ते प्रणवमीश्वरि ॥ ५६ ॥
लक्ष्मीनारायणस्यायं स्यादुत्कीलनको मनुः ।
शक्तिमादौ मनोरन्ते वाग्भवं साधको जपेत् ॥ ५७ ॥
श्रीराधाकृष्णमन्त्रस्य मन्त्रोऽयं कीलदोषहृत् ।

---

* अकुटिबन्धान्तर्गतं ख पुस्तके नास्ति । १ 'नुत्' ख. पाठः । २ 'अथाह' ग घ. पाठः । ३ 'शिवो भवेत्' क पाठ ।

परायुगं जपेदन्ते विश्वमादौ जपेन्मनोः ॥ ५८ ॥
विष्णुमन्त्रस्य मन्त्रोऽयं स्यादुत्कीलनकाभिधः ।
स्मरमादौ जपेदन्ते नृबीजं साधकोत्तमः ॥ ५९ ॥
लक्ष्मीनृसिंहमन्त्रस्य मन्त्रोऽयं कीलदोषहृत् ।
तारमन्ते रमामादौ जपेत् साधकसत्तमः ॥ ६० ॥
लक्ष्मीवराहमन्त्रस्य भवेदुत्कीलनं परम् ।
कुचबीजं जपेदादौ मन्त्रान्ते पद्मयुग्मकम् ॥ ६१ ॥
मनोर्भार्गवरामस्य भवेदुत्कीलनं शिवे ।
परामन्ते रमामादौ जपेत् पार्वति सिद्धये ॥ ६२ ॥
श्रीसीतारामभद्रस्य मनोर्मन्त्रोऽस्ति कीलहृत् ।
मामन्ते प्रथमं मां च जपेत् पार्वति साधकः ॥ ६३ ॥
जनार्दनमनोर्मन्त्रः स्यादुत्कीलनकाभिधः ।
लक्ष्मीमादौ परामन्ते सच्छदुद्धारयेत् सुधीः ॥ ६४ ॥
विश्वकसेनमनोर्देवि स्यादुत्कीलनको मनुः ।
कममादौ च मन्त्रान्ते तारं देवि जपेत् सुधीः ॥ ६५ ॥
वासुदेवमनोर्मन्त्रः स्यादुत्कीलनकाभिधः ।
इति तत्त्वं महादेवि मन्त्राणां परमार्थदम् ।
तव स्नेहेन कथितं नाख्येयं ब्रह्मवादिभिः ॥ ६६ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये मन्त्रोत्कीलन-
विधिनिरूपणे पञ्चमः पटलः ॥ ५ ॥

अथ

षष्ठः पटलः ।

श्रीभैरव उवाच ।

अथ ते वर्णयिष्यामि सञ्जीवनमनून् प्रिये ।
एषामुच्चारमात्रेण मन्त्रः सिद्धिप्रदो भवेत् ॥ १ ॥
बालाया देवि ऋचर्याः शक्तिमादौ पठेत् सुधीः ।
सञ्जीवनाख्यो मन्त्रोऽयं दिव्यो मन्त्रस्य सिद्धये ॥ २ ॥
परात्रयं पठेदादौ जीवनं भैरवीमनोः ।
कूटत्रयाणां देवेशि त्रिकूटाया जपेत् सुधीः ॥ ३ ॥
द्वितीयार्णत्रयं देवि भवेत् सञ्जीवनं मनोः ।
सिद्धविद्या महारयामा सर्वदोषविवर्जिता ॥ ४ ॥
जप्या सिध्यै सदा सद्भिर्मल्लविद्भिर्मुमुक्षुभिः ।
भद्रिकायुगलं देवि दद्यादन्ते मनोः शिवे ॥ ५ ॥
भद्रकालीमनोरेष स्यात् सञ्जीवनको मनुः ।
तारं परा पठेदन्ते जपादौ साधकेश्वरि ॥ ६ ॥
राजमातङ्गिनीदेव्या भवेत् सञ्जीवन मनोः ।
वारत्रयं पठेदादौ मूलमन्त्रस्य वै पराम् ॥ ७ ॥
मन्त्रस्य भुवनेश्वर्या भवेत् सञ्जीवनं परम् ।
कालीं तारं पठेदन्ते मन्त्रस्यास्य महेश्वरि ॥ ८ ॥
उग्रतारामनोरेष स्यात् सञ्जीवनको मनुः ।

---

१ 'कालीत्रय' क ख ग घ पाठ ।

वासनां मूलमन्त्रस्य जपेदन्ते महेश्वरि ॥ ९ ॥
छिन्नमस्तामनोरेष स्यात् सञ्जीवनको मनुः ।
परामादौ जपेद् देवि काममन्ते तथैव च ॥ १० ॥
सुमुखीमन्त्रराजस्य भवेत् सञ्जीवनं प्रिये ।
तारद्वयं जपेन्मन्त्री मन्त्रान्ते मान्त्रिकेश्वरि ॥ ११ ॥
सरस्वतीमनोरेष स्यात् सञ्जीवनको मनुः ।
विश्वमन्ते जपेदादौ ठद्वयं कालिकेश्वरि ॥ १२ ॥
अन्नपूर्णामनोर्येन भवेत् सञ्जीवनं परम् ।
वाणीमन्ते जपेदादौ कामराजं च साधकः ॥ १३ ॥
महालक्ष्मीमनोर्देवि भवेत् सञ्जीवनं परम् ।
कूर्चमादौ परामन्ते जपेत् साधकसत्तमः ॥ १४ ॥
शारिकामूलमन्त्रस्य भवेत् सञ्जीवनं प्रिये ।
कामराजं जपेदादौ मायाबीजं तथाञ्चले ॥ १५ ॥
शारदामन्त्रराजस्य सञ्जीवनमनुः स्मृतः ।
मन्मथं शक्तिबीजं च जपेदादौ च साधकः ॥ १६ ॥
इन्द्राक्षीमूलमन्त्रस्य सञ्जीवनमनुः परः ।
मृत्युबीजं जपेद् देवि प्रणवं च वनाञ्चले ॥ १७ ॥
बगलामन्त्रराजस्य भवेत् सञ्जीवनं परम् ।
तारकं मूलमन्त्रान्ते त्रिरुच्चार्य जपेत् प्रिये ॥ १८ ॥
तुर्यामन्त्रस्य निर्णीतः सञ्जीवनमनुः परः ।
वह्निबीजं जपेदन्ते शक्तिमादौ महेश्वरि ॥ १९ ॥
राज्ञीमन्त्रस्य मन्त्रोऽयं सञ्जीवनकरः स्मृतः ।
कूर्चमादौ च तुरगं जपेदन्ते महेश्वरि ॥ २० ॥
ज्वालामुखीमनोरेष मन्त्रः सञ्जीवनाभिधः ।
वाग्भवं प्रणवादौ च ठद्वयान्ते जपेत् पराम् ॥ २१ ॥
एष सञ्जीवनो मन्त्रो भीडामगवतीमनोः ।

तारमन्ते रमामादौ जपेत् साधकसत्तमः ॥ २२ ॥
गणेश्वरीकालरात्र्याः स्याद् सञ्जीवनको मनुः ।
कूर्चमादौ हरान्ते मां जपेत् साधकसत्तमैः ॥ २३ ॥
भवानीमूलमन्त्रस्य भवेत् सञ्जीवनं परम् ।
मायामुच्चार्य देवेशि त्रिरादौ त्रिस्तथाञ्जले ॥ २४ ॥
सञ्जीवनमनुर्देवि स्याद्वज्रयोगिनीमनोः ।
मठमन्ते मठं चादौ जपेत् पार्वति कौलिकः ॥ २५ ॥
मन्त्रोऽयं धूम्रवाराह्या मनोः सञ्जीवनाभिधः ।
हरितं मूलमन्त्रान्ते जपेदादौ च मन्मथम् ॥ २६ ॥
सिद्धलक्ष्मीमनोरेष स्याद् सञ्जीवनको मनुः ।
कादिचामादौ रमामन्ते जपेत् साधकसत्तमः ॥ २७ ॥
भवेत् सञ्जीवनं देवि कुलवागीश्वरीमनोः ।
कममादौ महादेवि जपेदन्ते रमां शिवे ॥ २८ ॥
पद्मावतीमनोरेष स्मृतः सञ्जीवनो मनुः ।
वागुरां पङ्कजान्ते च प्रणवादौ परां जपेत् ॥ २९ ॥
कुब्जिकामूलमन्त्रस्य मन्त्रोऽयं जीवनाभिधः ।
वाहीकं प्रणवादौ च मूलान्ते तु शिवं जपेत् ॥ ३० ॥
गौरीमन्त्रस्य मन्त्रोऽयं स्याद् सञ्जीवनकाभिधः ।
कूटमन्ते विश्वमादौ जपेत् पार्वति साधकः ॥ ३१ ॥
खेचरीमन्त्रराजस्य भवेत् सञ्जीवनं शिवे ।
वाणीमादौ परामन्ते जपेन्मान्त्रिकसत्तमः ॥ ३२ ॥
भवेत् सञ्जीवनं देवि नीलासरस्वतीमनोः ।
वाग्भवं प्रणवादौ च काममन्ते जपेत् शिवे ॥ ३३ ॥
एष सञ्जीवनो मन्त्रः पराशक्तिमनोः स्मृतः ।

---

१ 'तारम्' ख पाठ । २ 'पार्वति साधक' ख पाठ । ३ 'न्तेऽपि' ग पाठः ।

अधुना शैवमन्त्राणां निष्कीलानां महेश्वरि ॥ ३४ ॥
वक्ष्ये तत्त्वं रहस्यं ते सञ्जीवनकरं परम् ।
मूलमन्त्राञ्चले मन्त्री जपेत् तारं पृथक् पृथक् ॥ ३५ ॥
सर्वेषां शैवमन्त्राणां भवेत् सञ्जीवनं प्रिये ।
तथापि कीलितानां ते सञ्जीवनमनून् ब्रुवे ॥ ३६ ॥
येषां साधनमात्रेण मूलविद्याशु सिध्यति ।
सूर्यनामाक्षरद्वन्द्वं जपेदादौ च साधकः ॥ ३७ ॥
मृत्युञ्जयमनोरेष मन्त्रः सञ्जीवनाभिधः ।
विश्वमादौ विश्वमन्ते जपेन्मान्त्रिकनायकः ॥ ३८ ॥
अमृतेश्वरमन्त्रस्य भवेत् सञ्जीवनं परम् ।
वटुकायेति तारादौ जपेत् पार्वति साधकः ॥ ॥ ३९ ॥
सञ्जीवनमनुः प्रोक्तो वटुकस्यैष दुर्लभः ।
शिवं च प्रणवादौ तु जपेत् साधकवन्दिते ॥ ४० ॥
श्रीनीलकण्ठमन्त्रस्य मन्त्रः सञ्जीवनाभिधः ।
परामादौ त्रिरुच्चार्य जपादौ सञ्जपेत् सुधीः ॥ ४१ ॥
सद्योजातमनोरेष स्मृतः सञ्जीवनो मनुः ।
शिवमन्ते द्विरुच्चार्य जपेद् देवि जपादितः ॥ ४२ ॥
महागणपतेर्मन्त्रो मनोः सञ्जीवनाभिधः ।
वज्रबीजानि मूलादौ जपेत् पार्वति साधकः ॥ ४३ ॥
अघोरदेवमन्त्रस्य मनुः सञ्जीवनः स्मृतः ।
निर्दोषो मन्त्रराजोऽयं महाकालस्य पार्वति ॥ ४४ ॥
अस्योच्चारणमात्रेण मन्त्राः सिध्यन्ति सर्वदा ।
कूटत्रयेभ्यो देवेशि द्वितीयाक्षरमुच्चरेत् ॥ ४५ ॥
जपेत् कामेशमन्त्रस्य भवेत् सञ्जीवनं शिवे ।
अथाहं वैष्णवानां ते मनूनां वक्ष्मि जीवनम् ॥ ४६ ॥

याञ्जात्वा साधको देवि भवेद्भैरवसन्निभः ।
हरितं मूलमन्त्रान्त जपेत् पार्वति साधकः ॥ ४७ ॥
लक्ष्मीनारायणमनोर्भवेत् सञ्जीवनं परम् ।
शक्तिमन्ते मनोरादौ वाग्भवं साधको जपेत् ॥ ४८ ॥
श्रीराधाकृष्णमन्त्रस्य सञ्जीवनमनुः स्मृतः ।
विश्वान्ते प्रणवं देवि जपेत् साधकसत्तमः ॥ ४९ ॥
विष्णुमन्त्रस्य मन्त्रोऽयं स्मृतः सञ्जीवनाभिधः ।
नृबीजं प्रथमं देवि प्रणवं चाञ्चले जपेत् ॥ ५० ॥
लक्ष्मीनृसिंहमन्त्रस्य मन्त्रः सञ्जीवनाभिधः ।
रमान्ते त्रिरुच्चार्य जपेदानन्दनिर्भरे ॥ ५१ ॥
लक्ष्मीवराहमन्त्रस्य सञ्जीवनमनुः स्मृतः ।
परापुरं जपेदादौ मन्त्रराजस्य पार्वति ॥ ५२ ॥
मन्त्रो भार्गवरामस्य मनोः सञ्जीवनः स्मृतः ।
मन्त्रान्ते प्रणवं देवि तारादौ सकलां जपेत् ॥ ५३ ॥
श्रीसीतारामन्त्रस्य मनोः सञ्जीवनो मनुः ।
विश्वमादौ परामन्ते जपेत् पार्वति मान्त्रिकः ॥ ५४ ॥
जनार्दनमनोरेष मन्त्रः सञ्जीवनः स्मृतः ।
परामादौ परामन्ते सतारां साधको जपेत् ॥ ५५ ॥
विश्वक्सेनमनोरेष स्यात् सञ्जीवनको मनुः ।
रमामादौ रमामन्ते जपादौ सञ्जपेत् सुधीः ॥ ५६ ॥
श्रीलक्ष्मीवासुदेवस्य मनोः सञ्जीवनो मनुः ।
इतीदं मन्त्रसर्वस्वं रहस्यं मार्गमद्भुतम् ।
तव भक्त्या मयाख्यातं गोपनीयं स्वयोनिवत् ॥ ५७ ॥

इति श्रीरुद्रयामले तन्त्र श्रीदेवीरहस्ये मन्त्रसञ्जीवन-
विधिनिरूपण षष्ठ पटल ॥ ६ ॥

अथ

सप्तमः पटलः ।

श्रीभैरव उवाच ।

अधुना कथयिष्यामि विद्या शापहरीं शिवे ।
सर्वेषामेव मन्त्राणां कलौ निस्तेजसां शृणु ॥ १ ॥
या बाला भैरवी सैव सैव त्रिपुरसुन्दरी ।
त्रिपुरा यास्ति सा काली श्यामा सैव परा स्मृता ॥ २ ॥
तार परां रमां बाले शिवशाप विमोचय ।
विमोचय हर नीरं बालाशापहरी स्मृता ॥ ३ ॥
वाणी शरत् स्मरो रुद्रशापं मोचय मोचय ।
तुरग ठद्वयं देवि भैरवीशापमोचनम् । ॥ ४ ॥
बालाबीजत्रयं कूटमाद्यं तारं परा रमाम् ।
सदाशिवस्य शाप च मोचय-द्वयमुद्धरेत् ॥ ५ ॥
शरत् कूट पठेदन्ते विद्येयं शापहारिणी ।
श्यामा परमविद्येयं द्वाविंशत्यक्षरी परा ॥ ६ ॥
महाश्रीषोडशीविद्या सर्वदोषविवर्जिता ।
तथापि दुर्लभा विद्या वक्ष्येऽह शापहारिणीम् ॥ ७ ॥
द्वाविंशत्यक्षरीदेव्या यथा मन्त्रो हि सिद्धति ।
कालीं हूँ पर नाम दक्षिणे कालिके तथा ॥ ८ ॥
वसिष्ठशाप प्रोच्चार्य मोचय-द्वयमीश्वरि ।
कालीं हूँ परा नीरमेषा स्याच्छापहारिणी ॥ ९ ॥
कालीं भीमा तट भद्रकालि भीमा शिवस्य हि ।

शापं मोचय-युग्मापो विद्येयं शापहारिणी ॥ १० ॥
तारं परां च मातङ्गि कालशापं विमोचय ।
तुरगं नीरमन्ते तु विद्येयं शापहारिणी ॥ ११ ॥
मायां भैरवशापं च मोचय-द्वयमञ्जले ।
मायां स्याद्भुवनेश्वर्या विद्येयं शापहारिणी ॥ १२ ॥
प्रणवं कामिनीं मायां ब्रह्मशापं विमोचय ।
विमोचयापस्तारायां विद्येयं शापहारिणी ॥ १३ ॥
वासनां कमलां मायां रुद्रशापं विमोचय ।
मोचयापो मयाख्यातं छिन्नमस्ताङ्गमोचनम् ॥ १४ ॥
वाग्भवं कामराजं च शिवशापं विमोचय ।
परां नीरमियं विद्या सुमुख्याः शापहारिणी ॥ १५ ॥
प्रणवं वामनां तारं सरस्वति वदेत् ततः ।
दुर्वासःशापं मुञ्चाशु ठद्वयं शापमोचनम् ॥ १६ ॥
तारं परामन्नपूर्णे शिवशापं विमोचय ।
कूर्चं हरं वनं देवि विद्येयं शापहारिणी ॥ १७ ॥
तारं रमां महालक्ष्मि विष्णुशापं विमोचय ।
तुरगं नीरमीशानि विद्येयं शापहारिणी ॥ १८ ॥
तारं च सिन्धुरं देवि शारिके ब्रह्मलाञ्छनम् ।
मोचय-द्वयमापश्च विद्येयं शापहारिणी ॥ १९ ॥
तारं मायां शारदे च विष्णुशापं विमोचय ।
शक्तिनीरं महादेवि विद्येयं शापहारिणी ॥ २० ॥
तारं वाणीं शक्तिकामिन्द्राणि ब्रह्मलाञ्छनम् ।
मोचय द्वयमापश्च विद्येयं शापहारिणी ॥ २१ ॥
तारं मृत्स्नां च बगले रुद्रशापं विमोचय ।
तारं मृदं वनं देवि विद्येयं शापहारिणी ॥ २२ ॥

तारं तारां च तुर्यें तु शिवशापं विमोचय ।
तारकं ठद्वयं देवि विद्येयं शापहारिणी ॥ २३ ॥
तारं वह्निं शरद्राज्ञि ब्रह्मशापं विमोचय ।
विमोचय वनं देवि विद्येयं शापहारिणी ॥ २४ ॥
तारं रमां परां ज्वालामुखि भैरवलाञ्छनम् ।
कूर्चं नीरं महादेवि विद्येयं शापहारिणी ॥ २५ ॥
तारं परां रमां भीडे ध्रुवशापं विमोचय ।
मोचयापो महादेवि विद्येयं शापहारिणी ॥ २६ ॥
तारं वाणीं च डिम्बं च कालरात्रि शिवस्य च ।
शापं मोचय नीरं च विद्येयं शापहारिणी ॥ २७ ॥
तारं रमां रमां तारं रुद्रशापं विमोचय ।
कूर्चं हरं वनं देवि विद्येयं शापहारिणी ॥ २८ ॥
तारं परां परां तारं वज्रयोगिनि प्रोद्धरेत् ।
शिवशापं मोचयापो विद्येयं शापहारिणी ॥ २९ ॥
तारं रमां च वाराहि नारदाङ्गं विमोचय ।
मठं नीरं महादेवि विद्येयं शापहारिणी ॥ ३० ॥
तारं रमां सिद्धलक्ष्मि सिद्धशापं विमोचय ।
वाणी शरत् स्मरो नीरं विद्येयं शापहारिणी ॥ ३१ ॥
तारं व्योमं रमां काङ्क्षां कुलवागीश्वरि स्फुटम् ।
शिवशापं च मुञ्चापो विद्येयं शापहारिणी ॥ ३२ ॥
तारं मायां च पद्मं च पद्मावति हरेस्तथा ।
शापं मुञ्चयुगं नीर विद्येयं शापहारिणी ॥ ३३ ॥
तारं मायां कुब्जिके च जह्नुशापं विमोचय ।
नीरमन्ते महादेवि विद्येयं शापहारिणी ॥ ३४ ॥
तारं शिवे गौरि भृगोः शापं मोचय मोक्ष्य ।

नीरमन्ते मनोर्देवि विद्येयं शापहारिणी ॥ ३५ ॥
*(तारं खेचरि रुद्रस्य शापं मोचय मोचय ।
परां नीरं महादेवि विद्येयं शापहारिणी ॥ ३६ ॥)
तारं वाणीं च नीलेति सरस्वति हरिच्छलम् ।
मोचयापो मनोरन्ते विद्येयं शापहारिणी ॥ ३७ ॥
तारं शक्तिः पराशक्ते शिवशापं विमोचय ।
विमोचय शरन्नीरं विद्येयं शापहारिणी ॥ ३८ ॥
अधुना शैवमन्त्राणां कीलितानां महेश्वरि ।
सर्वसाधारणीं विद्यां वक्ष्येऽहं शापहारिणीम् ॥ ३९ ॥
निष्कीलितानां मन्त्राणां विद्यां शापहरीं शृणु ।
यस्या उच्चारमात्रेण दुष्टमन्त्रोऽपि सिध्यति ॥ ४० ॥
तारं परां रमां वाणीं कामं शक्तिं सदाशिव ।
शिवशापं मोचयापो विद्येयं शापहारिणी ॥ ४१ ॥
तारं हृज्जं शरद्रुद्रशापं मोचय मोचय ।
शरद्धृज्जं च तारं च विद्येयं शापहारिणी ॥ ४२ ॥
तारं ततोऽमृतेशान शिवशापं विमोचय ।
युग्ममन्ते तथा तारं विद्येयं शापहारिणी ॥ ४३ ॥
तारं परां च वटुक ब्रह्मशापं विमोचय ।
द्वयं च देवीप्रणवो विद्येयं शापहारिणी ॥ ४४ ॥
तारं च नीलकण्ठेति दुर्वासाङ्गं विमोचय ।
मोचयापो महादेवि विद्येयं शापहारिणी ॥ ४५ ॥
तारं ह्रविः परा तारं सद्योजात रविच्छलम् ।
मोचय द्वयं देवि विद्येयं शापहारिणी ॥ ४६ ॥
तारं शिवं गणेशान रुद्रशापं विमोचय ।

---

* ख. पुस्तके नास्तिकः ।

वनमन्ते महादेवि विद्येयं शापहारिणी ॥ ४७ ॥
तारमाद्यक्षरहविर्देव स्वच्छन्दनायक ।
शिवशापं मोचयापो विद्येयं शापहारिणी ॥ ४८ ॥
तारं कूर्चं परां देवि महाकाल विधिच्छलम् ।
मोचय-द्वयमापश्च विद्येयं शापहारिणी ॥ ४९ ॥
वाग्भवं कामशक्तिश्च भैरवाङ्गं विमोचय ।
तारं परामाद्यबीजं विद्येयं शापहारिणी ॥ ५० ॥
अथ वैष्णवमन्त्राणां शृणु पार्वति सादरम् ।
विद्यां शापहरीं सद्यो मन्त्रसिद्धिर्भवेद् यतः ॥ ५१ ॥
तारं रमां च लक्ष्मीति नारायण शिवच्छलम् ।
मोचय-द्वयमापश्च विद्येयं शापहारिणी ॥ ५२ ॥
तारं शक्तिः परा तारं राधाकृष्ण विधिच्छलम् ।
मोचयापो महादेवि विद्येयं शापहारिणी ॥ ५३ ॥
तारं परां रमां विष्णो रुद्रशापं विमोचय ।
तारं ठद्वयमन्ते च विद्येयं शापहारिणी ॥ ५४ ॥
तारं परा नृबीजं च नरसिंह शिवच्छलम् ।
मोचय-द्वयमापश्चे[1] विद्येयं शापहारिणी ॥ ५५ ॥
तारं रमां[2] च लक्ष्मीति वराह हरिलाञ्छनम् ।
मोचय-द्वयमापोऽन्ते विद्येयं शापहारिणी ॥ ५६ ॥
तारं कूर्चं मार्गवेति शुक्रशापं विमोचय ।
तुरगं ठद्वयं देवि विद्येयं शापहारिणी ॥ ६७ ॥
तारं रमां रामभद्र गुरुशापं विमोचय ।
हरं ठद्वयमन्ते च विद्येयं शापहारिणी ॥ ५८ ॥
*(तारं रमा रमा तारं जनार्दन विधिच्छलम् ।

---

१ 'पोऽन्ते' ख पाठ । २ 'परां' ग. पाठ. । ३ ग पुस्तक अधिक पाठः ।

मोचयापो महादेवि विद्येयं शापहारिणी ॥ ५६ ॥)
तारं परां रमां तारं विश्वक्सेन मनुच्छलम् ।
मोचय-द्वयमापश्च विद्येयं शापहारिणी ॥ ६० ॥
तारं रमा रमा लक्ष्मीवासुदेव शिवच्छलम् ।
मोचय-द्वयमापश्च विद्येयं शापहारिणी ॥ ६१ ॥
इतीदं परमं तत्त्वं रहस्यं सारमुत्तमम् ।
गुह्यं सर्वस्वमीशानि गोपनीयं विशेषतः ॥ ६२ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये शापहरीविद्योद्धार-निरूपणं सप्तमः पटलः ॥ ७ ॥

अथ

अष्टमः पटलः

श्रीभैरव उवाच ।
अधुना कथयिष्यामि जपसाधनमुत्तमम् ।
येन साधितमात्रेण मन्त्रसिद्धिः प्रजायते ॥ १ ॥
गुरुपादप्रसादेन श्रीविद्या यदि लभ्यते ।
पुरश्क्रियाजपेनैव चेत्तां साधयितुं क्षमः ॥ २ ॥
वाग्मी धनी जयी शूर इह भोगी स भूपतिः ।
परत्र साधको देवि भवेद् भैरवसन्निभः ॥ ३ ॥
सुदिने शुभनक्षत्रे प्रातःकृत्यं विधाय च ।

स्वगृहं स्वगुरुं नत्वा नत्वा पादौ महेश्वरि ॥ ४ ॥
प्रक्षाल्य पूजायतने श्रीचक्रं पूजयेच्छिवे ।
सिन्दूरेण लिखेत् त्र्यस्रं गुरुं तत्र निवेशयेत् ॥ ५ ॥
तारं शिवत्रयं देवि गुरवे पदमुच्चरेत् ।
विश्वमन्ते महादेवि गुरुमन्त्रोऽयमुत्तमः ॥ ६ ॥
अनेन मूलमन्त्रेण गुरुं संपूजयेत् सुधीः ।
मातृकाभिः समं देवि यथास्थानेषु पार्वति ॥ ७ ॥
गन्धाक्षतप्रसूनाद्यैर्द्रव्यैर्देवि शुभाम्बरैः ।
गुरुं सन्तोषयेत् तत्र दक्षिणाभिः कुलामृतैः ॥ ८ ॥
तदाज्ञां शिरसादाय जपाद्य साधकोत्तमः ।
रवौ प्रातर्महादेवि गुरुं नत्वा च साधकः ॥ ९ ॥
प्राङ्मुखः प्रणतो भूत्वा जपेदष्टोत्तरं शतम् ।
शिवशक्त्योः पृथग् देवि जपं संपाद्य साधकः ॥ १० ॥
षडङ्गं मूलमन्त्रस्य दशांशेन जपेत् ततः ।
ततो देवि जपेन्मन्त्री छन्दोमुनिमनुं ततः ॥ ११ ॥
ततो देवि जयी जप्त्वा होमं कुर्याद् दशांशतः ।
तर्पयित्वा दशांशेन मार्जयेत् तद्दशांशतः ॥ १२ ॥
भोजयित्वा दशांशेन जपसिद्धिर्भवेत् ततः ।
जपात् सिद्धिर्जपात् सिद्धिर्जपात् सिद्धिर्महेश्वरि ॥ १३ ॥
न स्तवान्नार्चनाद् ध्यानात् सिद्धिर्भवति तादृशी ।
पारायणजपेनास्ति यादृशी मन्त्रिणां शिवे ॥ १४ ॥

श्रीदेव्युवाच ।

भगवन् परमेशान साधकानां हितेच्छया ।
पारायणजपं ब्रूहि यद्यहं तव वल्लभा ॥ १५ ॥

श्रीभैरव उवाच ।

देवि पारायणं वक्ष्ये विद्याजपफलाप्तये ।
येन सिद्धियुतो मन्त्री भवेद्भैरवसन्निभः ॥ १६ ॥
असंख्याताश्च विख्याताः पारायणजपाः प्रिये ।
तेषां तत्त्वं परं वक्ष्ये येन ब्रह्ममयो भवेत् ॥ १७ ॥
पारायणस्तु स जपः तत्त्वम् यद् ब्रह्मचिन्तनम् ।
तस्यैव सगुणस्यात्र चिन्तनं घटिकाजपः ॥ १८ ॥
द्विविधोऽयं जपो देवि सगुणो निर्गुणस्तथा ।
सिद्धः साध्य इति स्मृत्वा जपेत् पारायणं मनुम् ॥ १९ ॥
कलेर्युगारम्भदिने दिनेशो हल्लेखबीजेऽभ्युदितो बभूव ।
तदादि नित्यं घटिकैकमानात् प्रत्यक्षरं याति दिने दिनेऽर्कः ।२०।
नवार्णमन्त्रावलिमेति सूर्यो मध्यन्दिने सायमथ प्रभाते ।
त्रिभागमाद्यन्तरयोस्तथान्ते विधाय मन्त्रस्य जपेन्मुमुक्षुः ॥२१॥
एकादिपञ्चाशतिवर्णषट्क्त्या संयोज्य मन्त्रस्य नवाक्षराणि ।
घटीप्रमाणाः कुलमातृकाया भवन्ति वर्णा मनुराजसिद्ध्यै ॥२२॥
आई-विभूषितां कृत्वा मातृकां हंसभूषिताम् ।
मूलविद्यां जपेन्मन्त्री शिवशक्तिमयीं शिवे ॥ २३ ॥
पञ्चनादान् परित्यज्य यो जपेत् षोडशाक्षरीम् ।
पञ्चषष्ट्यक्षरीमूलान् पञ्चनादात्मको भवेत् ॥ २४ ॥
आदितो देवि विद्यादौ विद्यामध्ये तदग्रतः ।
विद्यान्तेऽपि त्यजेद्विद्यां शिवरूपां शिवो भवेत् ॥ २५ ॥
शक्रे विश्वरूपोऽपि सूर्योऽकारे तदोदितः ।
तदा प्रभृति लोकेऽस्मिन् मातृकासु चेरद्रविः ॥ २६ ॥
वासनावशतस्त्यक्तो वह्नितेजोमयो भवेत् ।
लक्ष्मीं प्राप्य शिवो मन्त्री सौभाग्यान्ता यथाक्रमम् ॥ २७ ॥
पयोदविद्यया विद्यामाई पल्लवितां क्रमात् ।

हंसान्तां सञ्जपेद् देवि मन्त्री मातृकया सदा ॥ २८ ॥
अयं पारायणो नाम जपः सिद्धिप्रदः कलौ ।
महाश्रीषोडशीविद्यामष्टभूतिमयीं पराम् ॥ २९ ॥
वेदादिभूतां प्रजपेन्मातृकाभिः कुलाश्रयः ।
इदं रहस्यं परमं पारायणजपात्मकम् ।
ब्रह्मविद्यालयोत्थानं नाख्येयं ब्रह्मवादिभिः ॥ ३० ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये पारायणजपविधि-निरूपणमष्टमः पटलः ॥ ८ ॥

अथ

नवमः पटलः ।

श्रीभैरव उवाच ।
अथाहं सर्वमन्त्राणां वक्ष्ये संपुटसद्क्रमम् ।
यं विज्ञाय भवेद् देवि सर्वसौख्यमयः सुधीः ॥ १ ॥
बालायाः शक्तिबीजं तु दद्यादादौ महेश्वरि ।
बालात्रिपुरसुन्दर्याः संपुटाख्योऽस्त्ययं मनुः ॥ २ ॥
मायात्रयं पठेदन्ते त्रिकूटाया महेश्वरि ।
साध्यस्त्रिपुरभैरव्याः संपुटाख्योऽस्त्ययं मनुः ॥ ३ ॥
शक्त्यादिकूटं मन्त्रस्य दद्यादादौ जपेन्मनुम् ।
महात्रिपुरसुन्दर्या मन्त्रोऽयं संपुटाभिधः ॥ ४ ॥
श्यामास्मि दक्षिणाकाली द्वात्रिंशत्यक्षरी शिवे ।

सर्वदोषविनिर्मुक्ता पुरापि कथितं मया ॥ ५ ॥
भद्रिकामञ्चले दत्त्वा जपेन्मूलं महेश्वरि ।
भद्रकाल्या अयं मन्त्रः संपुटाख्योऽस्ति सुन्दरि' ॥ ६ ॥
तारमन्ते जपेद्* देवि त्रिवारं मोचरेत् सुधीः ।
राजमातङ्गिनीदेव्याः संपुटाख्योऽस्त्ययं मनुः ॥ ७ ॥
विश्वान्ते च पराबीजं दशवारं पठेच्छिवे ।
मन्त्रोऽयं भुवनेश्वर्याः संपुटाख्यः सुसिद्धिदः ॥ ८ ॥
तुरगं मूलमन्त्रादौ जपेत् पार्वति साधकः ।
उग्रतारामनोरेष मन्त्रः श्रीसंपुटाभिधः ॥ ९ ॥
मायाद्वयं जपेदन्ते साधकः साधकेश्वरि ।
मन्त्रोऽयं छिन्नमस्तायाः संपुटाख्योऽतिदुर्लभः ॥ १० ॥
पद्मत्रयं पठेदादौ मायामन्ते महेश्वरि ।
देव्या उच्छिष्टमातङ्ग्याः संपुटाख्योऽस्त्ययं मनुः ॥ ११ ॥
वाग्भवं च मनोरन्ते पठेत् साधकसत्तमः ।
सरस्वत्या मनोर्देवि मन्त्रोऽयं संपुटाभिधः ॥ १२ ॥
तारं कामं मनोरन्ते दद्यात् पार्वति साधकः ।
अन्नपूर्णामनोरेष मनुः स्यात् संपुटाभिधः ॥ १३ ॥
वाग्भवं प्रथमं दद्यादन्ते दद्याच्च मन्मथम् ।
देवताया महालक्ष्म्याः संपुटाख्योऽस्त्ययं मनुः ॥ १४ ॥
सिन्धुरं साधको दद्यान्मनोरन्ते महेश्वरि ।
शारिकामूलमन्त्रस्य मन्त्रः संपुटकाभिधः ॥ १५ ॥
तारं कामं मनोरन्ते पठेत् साधकसत्तमः ।
शारदायाः सरस्वत्या मन्त्रोऽयं संपुटाभिधः ॥ १६ ॥
शक्तिमादौ पठेन्मन्त्री वाणीमन्ते महेश्वरि ।

पार्वति' इ. पाठः । * 'जो' इति स्यात् ।

इन्द्राक्ष्या वज्रहस्तायाः मन्त्रोऽयं संपुटाभिधः ॥ १७ ॥
रमनां मृत्तिकाबीजं मनोरन्ते पठेत् सुधीः ।
श्रीदेव्या बगलामुख्या मन्त्रः संपुटकाभिधः ॥ १८ ॥
तारं दद्यान्मनोरन्ते जपेत् पार्वति साधकः ।
महातुर्या मनोरेष संपुटाख्योऽस्ति सिद्धिदः ॥ १९ ॥
वह्निं वाणीं पठेदन्ते जपेत् पार्वति साधकः ।
महाराज्ञ्या मनोरेष मनुः स्यात् संपुटाभिधः ॥ २० ॥
कूर्चमादौ हरं चान्ते जपेन्मूलं महेश्वरि ।
ज्वालामुख्या अयं मन्त्रः संपुटाख्योऽस्ति पार्वति ॥ २१ ॥
तारं शक्तिं मनोरन्ते द्वयं प्रथमं पठेत् ।
संपुटाख्योऽस्त्ययं मन्त्रो भीडाया देवदुर्लभः ॥ २२ ॥
कुरु बीजं जपेदादौ विश्वान्ते प्रणवं पठेत् ।
कालरात्रिमनोरेष मन्त्रः संपुटकारणम् ॥ २३ ॥
रमां तारं पठेदन्ते कूर्चमादौ महेश्वरि ।
भवानीमूलमन्त्रस्य संपुटोऽयं मयेरितः ॥ २४ ॥
तारादौ सकलां दद्यादन्ते तारं जपेत् प्रिये ।
संपुटो वर्णितो देवि श्रीवज्रयोगिनीमनोः ॥ २५ ॥
मठबीजं जपेदादौ मन्त्रान्ते पङ्कजं जपेत् ।
मन्त्रोऽयं धूम्रवाराह्याः संपुटाख्यो मयेरितः ॥ २६ ॥
कामराजं जपेदादौ विश्वान्ते वाग्भवं जपेत् ।
सिद्धलक्ष्मीमनोरेष संपुटो वर्णितो मया ॥ २७ ॥
स्फुटामादौ जपेद् देवि वनान्ते पङ्कजं जपेत् ।
मन्त्रोऽयं संपुटाख्योऽस्ति कुलवागीश्वरीमनोः ॥ २८ ॥
कामराजं जपेदादौ वनान्ते सकलां जपेत् ।
[illegible] मन्त्रः स्यात् संपुटाभिधः ॥ २९ ॥

वागुरां प्रणवादौ च वनान्ते पङ्कजं जपेत् ।
कुब्जिकामूलमन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ३० ॥
मठमादौ महादेवि ठद्वयान्ते शिवं जपेत् ।
गौरीमन्त्रस्य मन्त्रोऽयं संपुटो वर्णितो मया ॥ ३१ ॥
विश्वान्ते सञ्जपेत् हृदं वृटादौ शरद जपेत् ।
खेचरीमूलमन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ३२ ॥
कूर्चं जपेन्मनोरादौ वनान्ते तुरगं जपेत् ।
मनोर्नीलसरस्वत्याः सपुटो वर्णितो मया ॥ ३३ ॥
वाग्भवं प्रथमं देवि प्रणवं ठद्वयाञ्चले ।
पराशक्तिमनोरेष मन्त्रः संपुटकारणम् ॥ ३४ ॥
निष्कीलितानां मन्त्राणां शैवानां कुलपूजिते ।
सर्वसाधारणं वक्ष्ये संपुटं सुरपूजिते ॥ ३५ ॥
तारद्वयं जपेदादौ मध्ये नामाञ्चले पराम् ।
सर्वेषां शैवमन्त्राणां सपुटाख्योऽस्त्ययं मनुः ॥ ३६ ॥
तारं हृज्ज पठेन्मध्ये पाशय-द्वयमादितः ।
मृत्युञ्जयमनोरेष संपुटो वर्णितो मया ॥ ३७ ॥
विश्वमादौ महादेवि शक्तिमन्ते जपेत् सुधीः ।
अमृतेश्वरमन्त्रस्य सपुटाख्योऽस्त्ययं मनुः ॥ ३८ ॥
कुरु द्वयादौ प्रणव परान्तेऽपि कुरु-द्वयम् ।
संपुटाख्यो मनुः प्रोक्तो बटुकस्य मया शिवे ॥ ३९ ॥
हरित द्विः समुच्चार्य मध्ये नाम ततः पराम् ।
मन्त्रोऽय नीलकण्ठस्य सपुटाख्यो मयेरितः ॥ ४० ॥
तारमन्ते परादौ जपेत् साधकसत्तमः ।
सद्योजातस्य मन्त्रस्य मन्त्रोऽय सपुटाभिधः ॥ ४१ ॥
परादय शिवान्ते च प्रणवान्ते शिवत्रयम् ।

महागणपतेरेष मन्त्रः संपुटकारकः ॥ ४२ ॥
विश्ववीजं जपेदादौ विश्वमन्ते जपेत् प्रिये ।
मन्त्रोऽस्त्यघोरदेवस्य वर्णितः संपुटाभिधः ॥ ४३ ॥
कूटमादौ महादेवि कूटान्ते वाग्भवं जपेत् ।
श्रीकामेश्वरमन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ४४ ॥
एतेषामपि मन्त्राणां शैवानां कुलनायिके ।
निष्कीलितो महाकालमन्त्रो दोषविवर्जितः ॥ ४५ ॥
अधुना वैष्णवानां ते मन्त्राणां परमेश्वरि ।
वक्ष्ये संपुटमन्त्रांश्च साधकानां हितेच्छया ॥ ४६ ॥
नामान्ते कमलां देवि विश्वान्ते प्रणवं जपेत् ।
लक्ष्मीनारायणमनोर्मन्त्रोऽयं संपुटाभिधः ॥ ४७ ॥
हरमादौ महादेवि ठद्वयान्ते रमां जपेत् ।
श्रीराधाकृष्णमन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ४८ ॥
तारमन्ते जपेदादौ विश्वं विश्वसमर्चिते ।
श्रीविष्णुमूलमन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ४९ ॥
स्मरमादौ जपेद् देवि रमाबीजं तथाञ्चले ।
लक्ष्मीनृसिंहमन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ५० ॥
विश्वमादौ मनोर्देवि नाम्नोऽग्रे सकलां जपेत् ।
लक्ष्मीवराहमन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ५१ ॥
सरोजं प्रथमं देवि वनान्ते च रमां जपेत् ।
जामदग्न्यमनोरेष मन्त्रः संपुटकारकः ॥ ५२ ॥
तारमन्ते वनं चादौ जपेत् साधकसत्तमः ।
श्रीसीताराममन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ५३ ॥
विश्वान्ते नाम देवेशि मायुगं प्रथमं जपेत् ।

---

१ विष्णो ' क ख पाठ ।

श्रीजनार्दनमन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ५४ ॥
परामादौ परामन्ते जपेत् साधकनायकः ।
विष्वक्सेनमनोरेष मन्त्रः संपुटकारकः ॥ ५५ ॥
वाणीमादौ जपेद् देवि लक्ष्मीमन्ते महेश्वरि ।
श्रीवासुदेवमन्त्रस्य मन्त्रोऽयं संपुटाभिधः ॥ ५६ ॥
इतीदं मन्त्रसर्वस्वं रहस्यं तत्त्वमुत्तमम् ।
तव स्नेहेन निर्णीतं गोपनीयं मुमुक्षुभिः ॥ ५७ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये संपुटविधिनिरूपणं नवमः पटलः ॥ ९ ॥

अथ

दशमः पटलः

श्रीभैरव उवाच ।
अधुना देवि वक्ष्येऽहं पुरश्चरणसाधनम् ।
येन साधितमात्रेण मन्त्रः सिद्धिप्रदो भवेत् ॥ १ ॥
जीवहीनो यथा देही[1] सर्वकर्मसु न क्षमः ।
पुरश्चरणहीनो हि न मन्त्रः सिद्धिदायकः ॥ २ ॥
वर्णलक्षं जपेन्मन्त्रं तदर्धं वा महेश्वरि ।
एकलक्षावधिं कुर्यान्नातो न्यूनं कदाचन ॥ ३ ॥
वटेऽरण्ये श्मशाने च शून्यागारे चतुष्पथे ।

---

१ 'देह.' ख. पाठः ।

अर्धरात्रेऽपि मध्याह्ने पुरश्चरणमारभेत् ॥ ४ ॥
सुदिने शुभनक्षत्रे सुमुहूर्ते महेश्वरि ।
स्वगुरुं पूजयित्वादौ पुरश्चर्यां समारभेत् ॥ ५ ॥
गुरोराज्ञां समादाय स्नात्वा वेदीं चरेत् सुधीः ।
चतुष्कोणामीशदिशि स्वहस्तपरिविस्तृताम् ॥ ६ ॥
तत्र लिखा महादेवि सिन्दूरेणाष्टगन्धकैः ।
लिखेद् बिन्दुत्रयस्तमादौ षडश्रं वृत्तमण्डलम् ॥ ७ ॥
वसुपत्रं वृत्ताढ्यं भूगेहेनोपशोभितम् ।
पुरश्चर्यायन्त्रमेतद्मदितं गिरिजे मया ॥ ८ ॥
सर्वसाधारणं पूज्यं साधकैस्तत्त्वदर्शिभिः ।
इन्द्राग्नियममांसाद-वरुणानिलवित्तदाः ॥ ९ ॥
सेश्वरा लरय(ट)क्षाम्रयसैहंबीजमण्डिताः ।
पूज्या सहेतयो देवि धराभवनमण्डले ॥ १० ॥
ब्राह्मी च वैष्णवी रौद्री कौमारी नारसिंहिका ।
वाराही चण्डिका देवि पूजनीयापराजिता ॥ ११ ॥
सभैरवा वसुदले वामावृत्या मुमुक्षुभिः ।
पार्वती कुब्जिका दुर्गा चामुण्डा नीलतारिणी ॥ १२ ॥
कात्यायनी पूजनीया षडश्रेषु महत्तरैः ।
गङ्गा च यमुना देवि पूज्या त्र्यश्रे सरस्वती ॥ १३ ॥
बिन्दौ पूज्या च सशिवा साधकैरिष्टदेवता ।
मूलमन्त्रेण गन्धार्घ्यपुष्पधूपादिदीपकैः ॥ १४ ॥
तत्र बिन्दौ न्यसेद्यन्त्रं स्वेष्टदेव्या महेश्वरि ।
वेदीविदिक्षु संस्थाप्य मन्त्री घटचतुष्टयम् ॥ १५ ॥
मूलेन साधको देवि यत्नान् संमन्त्र्य चापयेत् ।

---

१ 'गृहेण्यो' क ग पाठ । २ 'म' क. पाठः ।

वह्निनिर्ऋतिवातेशक्रमेणैवं समर्चयेत् ॥ १६ ॥
गणेशं भारतीं दुर्गां क्षेत्रपालं घटेषु च ।
स्वमूलेन देवेशि तत्र पूजा तथाह्निकीम् ॥ १७ ॥
कुर्यात् तदग्रतो देवि पुरश्चरणमारभेत् ।
श्रीचक्रं पूजयित्वादौ ततः कुर्याज्जपं सुधीः ॥ १८ ॥
शान्तो दम्भं तथा लौल्यं त्यजेन्मन्त्रस्य सिद्धये ।
ब्रह्मचर्यधरो मन्त्री ध्यायन् देवीं वरप्रदाम् ॥ १९ ॥
जपेन्मूलं वशी लक्षं नियमेन समाहितः ।
हविष्याशी महादेवि ततः सिद्धमनुर्भवेत् ॥ २० ॥
जप्त्वा मन्त्री मन्त्रराजं हुत्वा देवि दशांशतः ।
तर्पयेत् तद्दशांशेन मार्जयेत् तद्दशांशतः ॥ २१ ॥
भोजयेत् तद्दशांशेन मन्त्रसिद्धिर्भवेद् ध्रुवम् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥ २२ ॥
रात्रौ परस्त्रियं बालां श्यामां वा मदनातुराम् ।
आनीय पूजयेन्मन्त्री यथोक्तविधिना शिवे ॥ २३ ॥
नग्नो मुक्तकचो धीरो मधुपानपरायणः ।
शक्तिवक्षःसमाश्लिष्टो जपेन्मूलं यथाविधि ॥ २४ ॥
लक्षमेकं दशांशेन संस्कृतं होमतर्पणैः ।
मन्त्रसिद्धिर्भवेत् तस्य देवानामपि दुर्लभा ॥ २५ ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
पुत्रजन्मोत्सवदिने सूतिकाकुलमन्दिरे ॥ २६ ॥
मान्त्रिको मूलमन्त्रं स्वं जपेद् दशदिनावधि ।
दशांशसंस्कृतं मन्त्रं कुर्यात् सिद्धो भवेन्मनुः ॥ २७ ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।

---

१ 'सस्कृत' ख ग पाठः । २ तः' ख ग पाठ ।

मृतकाशौचदिवसे प्रथमे साधको जपेत् ॥ २८ ॥
मनुं वशी दिने रात्रौ वीरो भूत्वा यथार्थतः ।
एकादशेऽहनि सुधीः कुर्यान्मन्त्रे तु संस्कृतम् ॥ २९ ॥
कर्मणा मनसा वाचा मन्त्रः कल्पद्रुमो भवेत् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥ ३० ॥
सूर्योदयात् समारभ्य यावत् सूर्योदयान्तरम् ।
तावज्जप्त्वा निरातङ्को मन्त्रः कल्पद्रुमो भवेत् ॥ ३१ ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
सूर्योपरागवेलायां जपेन्मन्त्रं महेश्वरि ॥ ३२ ॥
जप्त्वा होमादिकं कृत्वा मन्त्रसिद्धिर्भवेद् ध्रुवम् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥ ३३ ॥
चन्द्रोपरागे देवेशि जपेन्मूलं यथाविधि ।
दशांशसंस्कृतो मन्त्रो भवेच्चिन्तामणिः क्षणात् ॥ ३४ ॥
यस्य नास्ति जपे शक्तिः पञ्चरत्नेश्वरीं जपेत् ।
वर्णलक्षपुरश्चर्याफलमाप्नोति साधकः ॥ ३५ ॥
इदं तत्त्वं हि मन्त्राणां सारात् सारं परात् परम् ।
अत्याज्यं गुह्यमीशानि गोपनीयं मुमुक्षुभिः ॥ ३६ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये पुरश्चर्या-
विधिनिरूपण दशम पटलः ॥ १० ॥

अथ

एकादशः पटलः ।

—=-:※०※:-=—

श्रीभैरव उवाच ।

अधुना देवि वक्ष्येऽहं पुरश्चर्याफलं परम् ।
यं लब्ध्वा साधको देवि मर्त्योऽप्यमरतां लभेत् ॥ १ ॥

श्रीदेव्युवाच ।

भगवंस्तत्त्ववेत्ता त्वं सकलागमपारगः ।
पुरश्चरणहोमस्य यद् मेऽद्य विधिं विभो ॥ २ ॥

श्रीभैरव उवाच ।

जप्त्वा मनुं लक्षसंख्यं साधको मन्त्रसाधकः ।
गत्वा रहःस्थलं देवि होमं कुर्याद् दशांशतः ॥ ३ ॥
सुदिने शुभनक्षत्रे साधको भैरवार्चने ।
गृहीत्वा होमसंभारं व्रजेत् प्रयतमानसः ॥ ४ ॥
तत्रैकतः श्मशानं तु धृत्वा संमुखपृष्ठयोः ।
ऐशान्यां दिशि देवेशि लिखेच्छ्रीचक्रमुत्तमम् ॥ ५ ॥
तत्समभ्यर्च्य विधिना श्रीचक्रं मूलविद्यया ।
ततो मन्त्रं जपेत् सिद्धमष्टोत्तरशतावधि ॥ ६ ॥
पूर्वस्यां दिशि सद्यत्नात् खनेत् कुण्डं त्रिकोणकम् ।
हस्तैकविस्तृतं चाधो हस्तैकपरिमाणतः ॥ ७ ॥
कुण्डेऽस्मिन् त्रिलिखेद्यन्त्रं त्र्यश्रं बिन्दुविराजितम् ।
षट्कोणमष्टपत्रं च त्रिवृत्तं भूगृहाङ्कितम् ॥ ८ ॥
ततः पूजां चरेद् देवि कुण्डचक्रस्य पार्वति ।
यथोक्तविधिना येन साधको दीक्षितो भवेत् ॥ ९ ॥

गणेशधर्मवरुणाः कुबेरसहितास्तथा ।
चतुर्द्वारेषु संपूज्याश्चत्वारो द्वारपालकाः ॥ १० ॥
माया च मोहिनी मत्ता माधवी वह्निवल्लभा ।
वर्तुली[1] वीरसूर्वाम्या पूज्या अष्टदलस्थिताः ॥ ११ ॥
अम्बालिकाम्बा वगला च्छिन्नशीर्षाम्बिका भगा ।
षट्कोणमध्यगाः पूज्याः कुण्डचक्रे महेश्वरि ॥ १२ ॥
वह्निं वैश्वानरं चाग्निं त्रिकोणे पूजयेच्छिवे ।
स्वाहाभगवतीं बिन्दौ जातवेदसमर्चयेत् ॥ १३ ॥
अग्निं मूलेन देवेशि वह्नेर्दशकलास्ततः ।
तारं वह्निः शिवोऽब्धिश्च हृज्जं शक्तिर्महेश्वरि ॥ १४ ॥
अग्ने वैश्वानरं ब्रूयाज्जटाभारेति संवदेत् ।
भास्वरेति त्रिनेत्रेति ज्वालामुख-पदं वदेत् ॥ १५ ॥
प्रज्वलेति पुनं ब्रूयाज्जातवेदासि संवदेत् ।
ठद्वयं संवदेदन्ते मन्त्रोऽयं वह्निवल्लभः ॥ १६ ॥
अनेन मूलमन्त्रेण वह्निचक्रं प्रपूजयेत् ।
गन्धाक्षतप्रसूनैश्च धूपदीपादितर्पणैः ॥ १७ ॥
नैवेद्याचमनीयाद्यैस्ताम्बूलैश्च सुवासितैः ।
तत्र संपूज्य देवेशि श्रीचक्रं नवयोनिकम् ॥ १८ ॥
ततो दिग्भैरवान् भूतानर्चयेत् कुसुमैः परम् ।
ततो देवि प्रमथ्याग्निं कुण्डचक्रे कुलेश्वरि ॥ १९ ॥
बिन्दौ वह्निं समावाह्य मूलेनोज्ज्वालयेच्छिवे ।
अग्निं सन्दीप्य मूलेन प्रणमेद् वह्निमुद्रया ॥ २० ॥
मूलेनाहुतिभिर्वह्निं हुनेत् षोडशभिस्ततः ।
अष्टोत्तरशतावृत्त्या दद्यादाज्येन पार्वति ॥ २१ ॥

---

१ 'वार्ताली' ग पाठ ।

आहुतीः पायसैर्देवि मृद्वीकागुरुपुष्पकैः ।
मत्स्यण्डशर्कराचन्द्रैः कस्तूरीदृषदङ्कितैः ॥ २२ ॥
ततो जप्त्वा महाविद्यां साधकान् पूजयेच्छिवे ।
पञ्च वा नव वा देवि तथैकादश वा शिवे ॥ २३ ॥
कुलीनान् धार्मिकाञ्छुद्धान् दीक्षितान् वाप्यदीक्षितान् ।
दृढव्रताञ्छुभाचारान् देवीभक्तिरतांस्तथा ॥ २४ ॥
वैष्णवान् गिरिजे शैवान् गुरुभक्तिपरायणान् ।
तत्र संपूज्य विधिवज् ज्ञात्वा भैरवसन्निभान् ॥ २५ ॥
पाद्यार्घ्यमधुपर्काद्यैर्गन्धाक्षतसुपुष्पकैः ।
तान् संपूज्य महादेवि दशांशं होममाचरेत् ॥ २६ ॥

श्रीदेव्युवाच ।

भगवन् देवदेवेश तन्त्रज्ञ परमेश्वर ।
कुलसाधकपूजाया संशयं छेतुमर्हसि ॥ २७ ॥
तत्र पूजाविधौ नाथ सर्वे पूज्या द्विजोत्तमाः ।
अथवा क्षत्रिया वैश्याः शूद्रा वा वद विस्तरात् ॥ २८

श्रीभैरव उवाच ।

प्रवृत्ते भैरवे तन्त्रे सर्वे वर्णा द्विजोत्तमाः ।
निवृत्ते भैरवे तन्त्रे सर्वे वर्णाः पृथक् पृथक् ॥ २९ ॥
सर्वदा शिवचक्रेऽस्मिन् संप्रदायोऽयमीरितः ।
न पुरश्चरणार्चायां तत्र सर्वे द्विजोत्तमाः ॥ ३० ॥
एकस्तु क्षत्रियः पुण्यो दाता वैष्णवसत्तमः ।
दृढव्रतः शुभाचारः कुलीनः शिवपूजकः ॥ ३१ ॥
शाक्तः परममन्त्रश्च कुलचक्रे निगद्यते ।
तत्र होमं च संपाद्य दद्यान्नैवेद्यमादरात् ॥ ३२ ॥
कुलचक्रगतान् देवि ब्राह्मणान् साधकोत्तमान् ।

पूजयेत् क्षत्रियो वीरो भक्तिश्रद्धासमन्वितः ॥ ३३ ॥
गन्धाक्षतसुपुष्पैश्च धूपदीपादिभिः शिवे ।
नैवेद्याचमनीयाद्यैर्मद्यैर्मांस्यैश्च लेह्यकैः ॥ ३४ ॥
सन्तर्प्य साधकान् देवि परमानन्दसंवितः ।
साधकः क्षत्रियं वीरं दातारं वीरसेवकम् ॥ ३५ ॥
आशीर्भिर्वर्धयेद् देवि प्रणमेत् त्रिपुराम्बिकाम् ।
कुलचक्रगता वीराः कुलचक्रमपूजकाः ॥ ३६ ॥
सर्वे ते कुलदेव्यन्ते यान्ति शीघ्रं कुलालयम् ।
क्षत्रियोऽपि महादेवि कुलसङ्घान् कुलार्थवित् ॥ ३७ ॥
सर्वपापविनिर्मुक्तः सर्वसिद्धिसमन्वितः ।
इह लोके श्रियं प्राप्य भुक्त्वा भोगान् यथेप्सितान् ॥ ३८ ॥
परत्र परमेशानि मृतो देवीपदं व्रजेत् ।
एवं विधाय मन्त्रज्ञो होम जपफलाप्तये ॥ ३९ ॥
पुरश्चर्याफलं देवि वर्णलक्षस्य सोऽश्नुते ।
वर्णलक्षजपस्यैवं फलमाप्नोति कौलिकः ॥ ४० ॥
सर्वे तत्र स्थिता नत्वा श्मशानस्थं च भैरवम् ।
संहारमुद्रया देवीं विसृज्य साशिवां शिवे ॥ ४१ ॥
सर्वे ते साधकश्रेष्ठा भवेयुः कुलभागिनः ।
इद रहस्यं देवेशि भक्त्या तव मयोदितम् ।
अप्रकाश्यमदातव्यमित्याज्ञा पारमेश्वरी ॥ ४२ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये पुरश्चर्याहोम विधिनिरूपणमेकादश पटल ॥ ११ ॥

अथ

द्वादशः पटलः ।

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि गुह्यं सर्वस्वमुत्तमम् ।
श्रीचक्रनिर्णयं नाम पटलं देवदुर्लभम् ॥ १ ॥
देवीनां परमप्रीत्या यन्त्रोद्धारं ब्रवीम्यहम् ।
यस्य कस्य न वक्तव्यं गोपनीयं विशेषतः ॥ २ ॥
त्रयस्त्रिंशतिदेवानां कोटयः स्युर्महेश्वरि ।
देवीनां च तथा देवि त्रयस्त्रिंशतिकोटयः ॥ ३ ॥
तासां मध्ये प्रधानाः स्युस्त्रयस्त्रिंशतिदेवताः ।
पूर्वोक्ता या महादेवि तासां मन्त्रोत्तमाञ्छृणु ॥ ४ ॥[1]

(१) अथ वक्ष्ये तव प्रीत्या बालामन्त्रं महेश्वरि ।
सर्वार्थसाधकं देवि सर्वाशापरिपूरकम् ॥ ५ ॥

बिन्दुस्त्रिकोणरसकोणकनागपत्र-
वृत्तत्रयाश्विंतमहीसदनत्रयं च ।
बालादिचक्रमिदमार्तिहरं गिरीश-
ब्रह्मेन्द्रविष्णुनमितं गदितं मया ते ॥ ६ ॥

(२) अथो त्रिपुरभैरव्या यन्त्रोद्धारं ब्रवीम्यहम् ।
सकलागमसाराढ्यमापदुद्धारणक्षमम् ॥ ७ ॥

बिन्दुस्त्र्यश्रं नागकोणं दशारं
वृत्ताश्विंतं वसुपत्रं कलारम् ।

---

१ 'यार्चित' क ख ग पाठ । २ 'र्चित' क ङ्ग पाठ ।

वृत्तत्रयं भूनिकेतत्रयं च
श्रीचक्रं ते वर्णितं भैरवीयम् ॥ ८ ॥

(३) अथो त्रिपुरसुन्दर्या वक्ष्ये श्रीचक्रनिर्णयम् ।
सर्वसंमोनं देवि सर्वसिद्धिप्रवर्तकम् ॥ ९ ॥
शून्यं मध्यगमग्निकोणसहितं दिग्दन्तिकोणाङ्कितं
विंशारं मनुभिश्रितं करिदलश्रीषोडशाराञ्चितम् ।
सद्वृत्तत्रयसंयुतं च धरणीगेहाङ्कितं त्रैपुरं
भक्त्याभीष्टफलप्रदं कलियुगे श्रीचक्रमुद्द्योतते ॥ १० ॥
बिन्दुस्त्रिकोणवसुकोणदशारयुग्म-
मन्वश्रनागदलसङ्गतषोडशारम् ।
वृत्तत्रयं च धरणीसदनत्रयं च
श्रीचक्रमेतदुदितं परदेवतायाः ॥ ११ ॥

(४) अथाहं कालिकायास्ते यन्त्रोद्धारं ब्रवीम्यहम् ।
सर्वार्थसिद्धिदं लोके सर्वकामप्रपूरकम् ॥ १२ ॥
त्रिकोणम्यं शून्यं तदुपरि शरत्कोणसहितं
त्रिकोणं षट्कोणं भगमिति च वृत्तं वसुदलम् ।
त्रिवृत्तं तद्बाह्ये क्षितिभुवनयुक्तं च जयता-
दिदं श्यामायन्त्रं मरणभयवर्गप्रमथनम् ॥ १३ ॥

(५) अथाहं भद्रकाल्यास्ते यन्त्रोद्धारं सुरप्रियम् ।
ब्रवीमि दयया देवि सर्वसारस्वतप्रदम् ॥ १४ ॥
मध्ये तुर्यवरं खमण्डलयुतं द्विःसप्तकाराङ्कितं
द्विस्तुर्यारयुगं चतुर्गुणचतुष्पत्रावलीशोभितम् ।
सद्वृत्तत्रयमण्डितं बहिरिलागेहत्रयोद्भासितं
जीयाद्यन्त्रमिदं यथेष्टफलदं श्रीभद्रकालीप्रियम् ॥ १५ ॥

(६) अथ वक्ष्यामि मातङ्ग्या यन्त्रं तन्त्रविनिश्चितम् ।

१ "मं" ख ग पाठ ।

देवदेवि तव प्रीत्या नचान्यत्र प्रकाशयेत् ॥ १६ ॥
बिन्दुत्रिकोणं वसुकोणयुक्तं
वृत्तं ततो नागदलं त्रिवृत्तम् ।
भूमन्दिरं पार्वति वह्निरेखं
मातङ्गिनीयन्त्रमिदं प्रदिष्टम् ॥ १७ ॥

(७) अथाहं भुवनेश्वर्या यन्त्रोद्धारं ब्रवीमि ते ।
प्रीत्या भक्त्या महेशानि नचाख्येयं महात्मभिः ॥ १८ ॥
बिन्दुत्रिकोणं रसकोणसंयुतं
वृत्तान्वितं[1] नागदलेन मण्डितम् ।
कैलारवृत्तत्रयभूगृहाङ्कितं[2]
श्रीचक्रमेतद् भुवनेश्वरीप्रियम् ॥ १९ ॥

(८) अथ वक्ष्यामि तारायाः यन्त्रोद्धारमनुत्तमम् ।
भोगमोक्षप्रदं देवि गोप्यं कुरु महेश्वरि ॥ २० ॥
बिन्दुत्रिकोणं च षडस्रयुक्तं
वृत्तं तथाष्टारदलं त्रिवृत्तम् ।
सभूपुरं चैकजटाविलास-
गेहं मया यन्त्रमिदं प्रदिष्टम् ॥ २१ ॥

(९) अथाहं छिन्नमस्तायाः यन्त्रोद्धारमनुत्तमम् ।
प्रवक्ष्यामि तव प्रीत्या न वक्तव्यं मुमुक्षुभिः ॥ २२ ॥
बिन्दुत्रिकोणं च बहिस्त्रिकोणं
त्रिकोणमूर्ध्वं शुभवृत्तबिम्बम् ।
वस्वश्रयुक्तं धरणीगृहं स्यात्
श्रीचक्रमेतत् परदेवतायाः ॥ २३ ॥

(१०) अथ वक्ष्यामि ते देव्या यन्त्रोद्धारं महेश्वरि ।

---

१ 'र्वित' क. ख. ग. पाठः । २ 'कराल' क. ख. ग. पाठः ।

सुमुख्याः सारसर्वस्वं न देयं ब्रह्मवादिभिः ॥ २४ ॥
बिन्दुं चानलकोणगं च विलिखेद् बाणाश्रकोणाङ्कितं
वृत्तं नागदलेन मण्डितमथो श्रीषोडशाराङ्कितम् ।
सद्वृत्तत्रयसंयुतं च धरणीगेहाङ्कितं पार्वति
श्रीचक्रं सुमुखीप्रियं विजयताद् भोगापवर्गप्रदम् ॥ २५ ॥
(११) अथ वक्ष्यामि तत्त्वं ते यन्त्रोद्धारं महेश्वरि ।
सरस्वत्याः कौलिकानां भुक्तिमुक्तिफलप्रदम् ॥ २६ ॥
त्रिकोणं सबिन्दुं ततः पट्ककोणं
सवृत्तं ततो नागपत्रं त्रिवृत्तम् ।
धरामन्दिरं वह्निरेखोज्ज्वलं ते
मयोक्तं हि सारस्वतं यन्त्रमेतत् ॥ २७ ॥
(१२) अथाहमन्नपूर्णाया यन्त्रराजं ब्रवीमि ते ।
सर्वसंमोहनं देवि सर्वभोगैकसाधनम् ॥ २८ ॥
त्रिकोणं रसारं त्रिकोणं त्रिकोणं
त्रिकोणं त्रिकोणं त्रिकोणं हि वृत्तम् ।
ततो नागपत्राञ्चितं[1] चाग्निवृत्तं
धरामन्दिरं चान्नपूर्णेष्टचक्रम् ॥ २९ ॥
(१३) अथ वक्ष्ये शिवे यन्त्रं महालक्ष्म्याः परात् परम् ।
यमभ्यर्च्य मया प्राप्तं दुर्लभं परमं पदम् ॥ ३० ॥
खं वह्न्यारगतं च कारममलं वृत्तं बहिः शोभनं
बाह्ये नागदलं कैलारविलसद्वृत्तत्रयोद्भासितम् ।
भूगेहत्रयशोभितं तव मया निर्णीतमेतत् परं
श्रीचक्रं परमार्थदायि च महालक्ष्मीप्रियं सिद्धिदम् ॥ ३१ ॥
(१४) यन्त्रोद्धारं प्रवक्ष्यामि साधकानां शुभावहम् ।

---

१ 'सित' क ख ग पाठ । २ कराल' क ख ग पाठः ।

शारिकाया महादेवि लीलालयलयाकुलम् ॥ ३२ ॥
खत्रिकोणवसुकोणसुवृत्तोद्-
द्योतनागदलवृत्तमण्डलम् ।
भूगृहं शिखिरवीन्दुभाञ्चितं
यन्त्रमेतदुदितं शिलालयम् ॥ ३३ ॥
(१५) यन्त्रोद्धारं महादेवि शारदाया ब्रवीम्यहम् ।
सर्वार्थसाधकं चक्रं सर्वकामप्रपूरकम् ॥ ३४ ॥
मध्ये बिन्दुस्तद्बहिः स्यात् त्रिकोणं
षट्कोणं स्याद् वृत्तवस्वश्रयुक्तम् ।
वृत्ताकारं षोडशारं त्रिवृत्तं
भूगेहं स्याच्छारदायन्त्रमेतत् ॥ ३५ ॥
(१६) अथाहं ते प्रवक्ष्यामि यन्त्रोद्धारं सुदुर्लभम् ।
इन्द्राद्यास्तत्त्वसर्वस्वं त्रिषु लोकेषु गोपितम् ॥ ३६ ॥
बिन्दुस्त्रिकोणाजपडश्रपडस्रयुक्त-
षट्कोणवृत्तवसुपत्रकलाश्रमिश्रम् ।
भूगेहबिम्बमनलेनशशिप्रभाभ-
मिन्द्राक्षिणीप्रियतरं जयचक्रमेतत् ॥ ३७ ॥
(१७) अथ ते बगलामुख्या यन्त्रोद्धारं ब्रवीम्यहम् ।
सर्वसिद्धिप्रदं देवि गोपनीयं प्रयत्नतः ॥ ३८ ॥
बिन्दुस्त्रिकोणं च रसारवृत्त--
वस्वश्रवृत्ताञ्चितषोडशारम् ।
वृत्तत्रयं भूसदनत्रयं च
श्रीचक्रमेतद् बगलामुखीयम् ॥ ३९ ॥
(१८) अथाहं ते महातुर्यायन्त्रोद्धारमनुत्तमम् ।
ब्रवीमि परमप्रीत्या सकलाभीष्टसाधनम् ॥ ४० ॥

बिन्दुस्त्रिकोणं नवयोनियुक्तं
वृत्ताञ्चितं नागदलं त्रिवृत्तम् ।
धरागृहं वह्नितुटीभिरीड्यं
तुर्यालयं चक्रमिदं प्रदिष्टम् ॥ ४१ ॥

(१९) यन्त्रोद्धारं प्रवक्ष्यामि सर्वाशापरिपूरकम् ।
सर्वार्थसाधकं चक्रं सर्वसंमोहनं तथा ॥ ४२ ॥
बिन्दुस्त्र्यश्रं षडश्रं च वृत्ताष्टदलमण्डितम् ।
वृत्तत्रयं धरासद्म राज्ञीश्रीचक्रमीरितम् ॥ ४३ ॥

(२०) अथ यन्त्रवरं वक्ष्ये ज्वालामुख्या महेश्वरि ।
सर्वतत्त्वैकनिलयं सर्ववाञ्छितदायकम् ॥ ४४ ॥
मध्ये शून्यं तदुपरि शरत्कोणमालिख्य देवि
तत्राधस्तात् त्रिकमथ बहिर्दिग्दलं वृत्तमेकम् ।
वसुश्र द्विः कदलजशरद्वृत्तभूगेहयुक्तं
ज्वालामुख्या जगति जयताच्चक्रमेतन्महेशि ॥ ४५ ॥

(२१) अथ वक्ष्यामि देवेशि भीडायन्त्रमनुत्तमम् ।
सर्वागमरहस्याढ्यं सर्वसारस्वतप्रदम् ॥ ४६ ॥
बिन्दुस्त्र्यश्रं काश्रमिश्रं सुवृत्तं
वसुश्रं स्यात् तद्बहिः षोडशारम् ।
वृत्तत्रयं भूमिगेहत्रयाढ्य
भीडायन्त्रं सर्वसिद्धिप्रदं स्यात् ॥ ४७ ॥

(२२) अथ वक्ष्यामि देवेशि कालराज्ञ्या अनुत्तमम् ।
यन्त्रोद्धारं परानन्दसाधनैकरसायनम् ॥ ४८ ॥
बिन्दुस्त्रिकोणरसकोणसुवृत्तनाग-
पत्रं कलारविलसद्दहनोरुवृत्तम् ।

---

१ 'महाराज्ञ्या महेश्वरि' ग पाठ । २ 'भेद्या' घ पाठ ।

भूमन्दिरत्रयमिदं गिरिपुत्रि यन्त्रं
श्रीकालरात्रिनिलयं परमार्थदं स्यात् ॥ ४९ ॥

(२३) अथाहं ते प्रवक्ष्यामि भवान्या यन्त्रमुत्तमम् ।
मूलमन्त्ररहस्याढ्यं सर्वसिद्धिप्रदायकम् ॥ ५० ॥
बिन्दुत्रिकोणं च षडश्रयुक्तं
वृत्तं च नागारकलादलाढ्यम् ।
वृत्तत्रयं भूसदनत्रयं स्यात्
श्रीचक्रमानन्दपदं भवान्याः ॥ ५१ ॥

(२४) अथ वक्ष्ये महादेवि यन्त्रराजं सुदुर्लभम् ।
श्रीवज्रयोगिनीदेव्याः सर्वसौख्यप्रवर्धनम् ॥ ५२ ॥
बिन्दुत्रिकोणं च बहिः षडश्रं
वृत्तैकमस्वश्र-वृत्तयुक्तम् ।
धरागृहं यन्त्रमिदं महेशि
श्रीवज्रशब्दाङ्कितयोगिनीयम् ॥ ५३ ॥

(२५) अथ वक्ष्यामि वाराह्या यन्त्रोद्धारमनुत्तमम् ।
सर्वमङ्गलमाङ्गल्यं साधकानां शुभावहम् ॥ ५४ ॥
त्रिकोणं सबिन्दुं पुनः स्यात् त्रिकोणं
ततः सप्तवारं त्रिकोणं प्रकुर्यात् ।
गजाश्रं कलारं हि वृत्तत्रयाङ्कं
धरासद्म यन्त्रं वराहेश्वरीयम् ॥ ५५ ॥

(२६) अथ वक्ष्ये महादेवि[1] यन्त्रोद्धारं सुदुर्लभम् ।
सर्ववैरिप्रशमनं सर्ववाञ्छितपूरकम् ॥ ५६ ॥
बिन्दुत्रिकोणषट्कोणवृत्ताष्टदलमण्डितम् ।
त्रिवृत्तं भूगृहं यन्त्रं सिद्धलक्ष्म्या मया स्मृतम् ॥ ५७ ॥

(२७) अथ यन्त्रवरं वक्ष्ये कुलवागीश्वरीप्रियम् ।

१ 'सिद्धलक्ष्म्या' ग. पाठः ।

साधकेष्टप्रदं दिव्यं परपदरसालयम् ॥ ५८ ॥
त्रिकोणं सबिन्दुं शराश्रं सवृत्तं
ततो नागपत्राञ्चितं षोडशारम् ।
त्रिवृत्तं धरासद्म पद्मास्पदं ते
सुयन्त्रं प्रदिष्टं च वागीश्वरीयम्[1] ॥ ५९ ॥

(२८) अथ वक्ष्यामि देवेशि यन्त्रं पद्मावतीप्रियम् ।
सर्वार्थसाधकं दिव्यं सर्वाशापरिपूरकम् ॥ ६० ॥
बिन्दुस्त्रिकोणवसुकोणसवृत्तनाग-
पत्रादिषोडशदलानलवर्तुलं च ।
भूमन्दिरत्रयमिदं सकलार्थदं स्यात्
पद्मावतीप्रियतरं जयचक्रमेतत् ॥ ६१ ॥

(२९) अथ वक्ष्ये महादेवि कुब्जिकायन्त्रमुत्तमम् ।
सर्वदेवरहस्यं च गोपनीयं विशेषतः ॥ ६२ ॥
बिन्दुस्त्रिकोणं रसकोणयुक्तं
वृत्तं ततो नागदलं[2] सवृत्तम् ।
धरागृहं सर्वरहस्यगर्भं[3]
श्रीकुब्जिकायन्त्रमिदं मयोक्तम् ॥ ६३ ॥

(३०) अथ वक्ष्ये महादेवि गौरीयन्त्रं सुदुर्लभम् ।
सर्वैश्वर्यप्रदं सर्वविघ्नप्रशमनं शिवे ॥ ६४ ॥
मध्ये त्रिकोणं खयुतं षडश्रं
वृत्तं तथा नागदलाग्निवृत्तम् ।
भूमन्दिरं कौलकुलेष्टतत्त्व-
भूतं सुचक्रं कथितं हि गौर्याः ॥ ६५ ॥

(३१) अथ वक्ष्ये महादेवि खेचरीयन्त्रमुत्तमम् ।

---

१ 'रीष्टम्' ङ पाठ. । २ 'न्द्वार' क. ख ग पाठ । ३ 'युग' क ख ग. पाठ।

योगिनां दुर्लभं योगसाधनानन्दकारणम् ॥ ६६ ॥
बिन्दुत्रिकोणकं वृत्तं वसुपत्राग्निवृत्तकम् ।
धरागृहं मयाख्यातं खेचरीयन्त्रमुत्तमम् ॥ ६७ ॥
(३२) अथ नीलसरस्वत्या यन्त्रोद्धारं ब्रवीम्यहम् ।
महाचीनपदस्थानां सिद्धिदं भोगदं शिवे ॥ ६८ ॥
बिन्दुस्ततोऽन्यारषडश्रयुक्तं
वृत्तं ततो नागदलाग्निवृत्तम् ।
धरागृहं वह्नितुरीभिरीड्यं
यन्त्रं परं नीलसरस्वतीयम् ॥ ६९ ॥
(३३) अथ देव्याः पराशक्तेर्यन्त्रोद्धारं ब्रवीम्यहम् ।
सर्वसंपत्प्रदं दिव्यं सर्वैश्वर्यप्रदायकम् ॥ ७० ॥
बिन्दुत्रिकोणं वृत्ताढ्यवसुपत्राग्निवृत्तकम् ।
भूगृहं यन्त्रमेतत्ते पराशक्तेर्मया स्मृतम् ॥ ७१ ॥
(३४) अथाहं यन्त्रमीशानि शिवस्य परमं ब्रुवे ।
सर्वसाधारणं सर्ववाञ्छितैकप्रदायकम् ॥ ७२ ॥
बिन्दुत्रिकोणवसुकोणदशारवृत्त-
नागाश्वषोडशदलानलवृत्तयुक्तम् ।
भूमन्दिरत्रयमिदं परमार्थदं स्याद्
साधारणं जगति यन्त्रमनादि शैवम् ॥ ७३ ॥
(३५) अथाहं वैष्णवं देवि यन्त्रराजं ब्रवीमि ते ।
सर्वसाधारणं लोके वैष्णवानां सुखप्रदम् ॥ ७४ ॥
बिन्दुत्रिकोणवसुकोणसुवृत्तनाग-
पत्राढ्यषोडशदलाञ्चितवृत्तबिम्बम् ।
भूमन्दिरं जयति यन्त्रमिदं भवानि
साधारणं परमवैष्णवधाम नित्यम् ॥ ७५ ॥

(३६) सर्वेषामेव मन्त्राणां शैवानां परमेश्वरि ।
गुरुरघोरो वक्ष्येऽहं तस्य यन्त्रमनुत्तमम् ॥ ७६ ॥
त्रिकोणं सविन्दुं शराभ्रं सकाभ्रं
ततो नागपत्रं सवृत्तं[1] कलारम् ।
चतुर्भूगृहोद्भासितं वह्निरेखं
सदोद्द्योततेऽघोरदेवस्य यन्त्रम् ॥ ७७ ॥

(३७) सर्वेषामेव मन्त्राणां वैष्णवानां महेश्वरि ।
लक्ष्मीनारायणः श्रेष्ठस्तस्य यन्त्रं ब्रवीम्यहम् ॥ ७८ ॥
विन्दुस्त्रिकोणं वस्वभ्रं वृत्ताष्टदलमण्डितम् ।
षोडशारं सवृत्तं च भूगेहेनोपशोभितम् ॥ ७९ ॥
लक्ष्मीनारायणस्यैतच्छ्रीचक्र परमार्थदम् ।
इतीदं सर्वदेवाना रहस्यं परमाद्भुतम् ।
तत्त्वं तव मयाख्यातं गोपनीयं स्वयोनिवत् ॥ ८० ॥

—=:*:=—

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये यन्त्रोद्धार-
निरूपण द्वादश पटल ॥ १२ ॥

[1] 'सुवृत्त' क ख ग पाठ ।

अथ

त्रयोदशः पटलः ।

—:※※※:—

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि रहस्यं सर्वकामिकम् ।
यन्त्रधारणपूजाया विधिं साधारणं परम् ॥ १ ॥
विना वर्म विना नाम्नां सहस्रकं महेश्वरि ।
न सिद्धिः साधकस्यास्ति भैरवस्यापि पार्वति ॥ २ ।
यः साधको जपेद् विद्यां यन्त्रधारणवर्जितः ।
सा विद्या कोटिजप्तापि तस्य निष्फलतां व्रजेत् ॥ ३ ॥
शुभेऽह्नि शुभनक्षत्रे शुभवारे महेश्वरि ।
माहेन्द्रे मुहूर्ते उत्थाय स्नात्वा ध्यात्वा गुरुं निजम् ॥ ४ ॥
सशिवां देवतां ध्यात्वा रहःस्थाने सुधूपिते ।
गन्धाष्टकेन विलिखेद् यन्त्रं मूलेन वेष्टितम् ॥ ५ ॥
तद्बाह्ये कवचं दिव्यं तथा नामसहस्रकम् ।
लिखेत् कनकलेखन्या भूर्जपत्रे सुशोभने ॥ ६ ॥
गन्धाष्टकं प्रवक्ष्यामि रहस्यं परमं प्रिये ।
अवाच्यं देवभक्ताय परशिष्याय सर्वथा ॥ ७ ॥
स्वयंभूकुसुमं कुण्डगोलोत्थं रोचनागुरु ।
कर्पूरं मृगनाभिश्च मद्य च मलयोद्भवम् ॥ ८ ॥
अपरं ते प्रवक्ष्यामि सिद्धिदं गन्धसाधनम् ।
वैष्णवाना च शैवाना शाक्ताना च शुभावहम् ॥ ९ ॥

काश्मीर-गोरोचन-पूगकादि-
रक्तनागोज-मरुद्र-मूर्वाः ।

पूतामकं चन्दनमिश्रमेतद्-
गन्धाष्टकं भैरवभैरवीप्रीत्यै ॥ १० ॥
गन्धाष्टकं स्वमूलेन निवेद्य कुलसाधकः ।
न्यासभूत्यादिकं कृत्वा ध्यायेद् देवीं शिवाङ्गनाम् ॥ ११ ॥
लिखेद्यन्त्रं निजं दिव्यं तद्बाह्ये मूलमन्त्रतः ।
मातृका विलिखेन्मन्त्री तद्बाह्ये कमलं लिखेत् ॥ १२ ॥
तथा नामसहस्रं च लिखित्वा भूर्जपत्रके ।
वेष्टयेत् तेन यन्त्रेण पीतनीलक्रमेण च ॥ १३ ॥
निजेष्टदेवीध्यानाभ-वर्णेन परमेश्वरि ।
लाक्षया परिवेष्ट्याथ सुवर्णेनाथ वेष्टयेत् ॥ १४ ॥
ततः परां गुटीं दिव्यां देवीरूपां विचिन्त्य च ।
यन्त्रधारण-मन्त्रस्य बिन्दौ संस्थापयेच्छिवे ॥ १५ ॥
यन्त्रधारण-मन्त्रं ते वक्ष्ये साधकपूजिते ।
कौलिकानां हितार्थाय गोपनीयं विशेषतः ॥ १६ ॥
बिन्दुस्त्रिकोणं षट्कोणं षडस्रं वसुपत्रकम् ।
त्रिवृत्तं च धरासद्म यन्त्रधारण-मन्त्रकम् ॥ १७ ॥
सिन्दूरेण लिखेद् देवि लयाङ्गं पूजयेच्छिवे ।
यस्य पूजनमात्रेण मन्त्री भैरवतां व्रजेत् ॥ १८ ॥
गणेशं धर्मराजं च वरुणं च कुबेरकम् ।
चतुर्दारेषु संपूज्याश्चत्वारो द्वारपालकाः ॥ १९ ॥
असिताङ्गं च कालाग्निं संहारं रुरुभैरवम् ।
क्रोधं विकराल च सुरेशोन्मत्तभैरवौ ॥ २० ॥
अष्टपत्रेषु संपूज्य भैरवानष्ट पार्वति ।
दुर्गां चण्डीं च सुमुखीं शिवादूतीं शिवां जयाम् ॥ २१ ॥

---

१ 'भैरवि भैरवेष्टम्' ख. पाठः ।

बहिः षट्कोणके पूज्यावेता मूलेन साधकैः ।
चारां च वाहिनीं दुर्गां वटुकं क्षेत्रजां तथा ॥ २३ ॥
छिन्नमस्तां परीत्यैतु पूजयेत् साधकोत्तमः ।
भवानीं कुब्जिकां गौरीं त्र्यग्रे पूज्या महेश्वरि ॥ २४ ॥
बिन्दौ स्वदेवतामिष्टां सशिवां कौलिकोत्तमः ।
गन्धाद्यैश्च धूपदीपादितर्पणैः ॥ २४ ॥
नैवेद्याचमनीयाद्यैस्ताम्बूलैश्च सुवासितैः ।
तत्र बिन्दौ महादेवि यथाविभवमात्मनः ॥ २५ ॥
सौवर्णं राजतं शुक्लामखिताम्रादिपूर्वकम् ।
देवताप्रीतये दद्याद् दक्षिणां गुरवेऽपि च ॥ २६ ॥
तत्र स्वयं गुटीं दिव्यां देवीरूपां कुलेश्वरि ।
पञ्चामृतैः पञ्चगव्यैः स्नापयेत् साधकोत्तमः ॥ २७ ॥
संस्थाप्य गुटिकां मन्त्री बिन्दौ संस्थापयेत् ततः ।
प्राणान् दत्त्वाऽऽवाहनादिमुद्रा मन्त्री प्रदर्शयेत् ॥ २८ ॥
पाद्यार्घ्यमधुपर्कादि सर्वं तत्र निवेदयेत् ।
चिन्तयेद् देवतारूपां पूजयेद् यन्त्रराजवत् ॥ २९ ॥
संपूज्य गुटिकां दिव्यां तदग्रे साधको जपेत् ।
मूलमन्त्रं यथाशक्त्या मालया करमालया ॥ ३० ॥
पठेत् तत्रैव कवचं मन्त्रनाममहस्रकम् ।
स्तोत्रं मन्त्रमयं देवि मन्त्रिचक्रं प्रपूजयेत् ॥ ३१ ॥
तैः समं साधकैः कुर्यात् पात्रवन्दनमीश्वरि ।
तान् सन्तर्प्य सुधीर्भक्त्या धारयेद् देवतां हृदि ॥ ३२ ॥
विसृज्य सशिवां देवीं नमेत् संहारमुद्रया ।

धारयेन्मूर्ध्नि वा बाहौ गुटिकां वरदायिनीम् ॥ ३३ ॥
य एवं धारयेद् यन्त्रं जपेन्मन्त्रं स साधकः ।
साक्षाद् भवभयोन्मुक्तो भवेद् भैरवसन्निभः ॥ ३४ ॥
जपसिद्धिर्भवेत् तस्य य एवं धारयेद् गुटीम् ।
बहुनोक्तेन किं देवि स भवेद् भैरवः स्वयम् ॥ ३५ ॥
इदं तत्त्वतमं दिव्यं सर्वस्वं परमार्थदम् ।
सारात् सारतरं गोप्यं गोपनीयं मुमुक्षुभिः ॥ ३६ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये यन्त्रधारणविधि-निरूपणं त्रयोदश. पटलः ॥ १३ ॥

अथ

चतुर्दशः पटलः ।

—※:※:※—

श्रीदेव्युवाच ।
भगवन् श्रोतुमिच्छामि च्छन्दोमुनिविनिर्णयम् ।
तथा देवीश्वरादीनां देवताबीजनिर्णयम् ॥ १ ॥
शक्तिकीलकदिग्बन्धनिर्णयं परमेश्वर ।
वक्तुमर्हसि मे देव यद्यस्ति मयि ते दया ॥ २ ॥
श्रीभैरव उवाच ।
एतद् गुह्यतमं देवि देवानां सारमुत्तमम् ।
देवीनामादिदेवाना मन्त्राणां मे रहस्यकम् ॥ ३ ॥
वक्ष्यामि तव भक्त्याहमृषिच्छन्दोविनिर्णयम् ।
देवानां मन्त्रराजस्य देवीनां वा तथैव च ॥ ४ ॥

षष्टिकल्पसहस्राणि येनैव विहितो जपः ।
तथाब्दषष्टिलक्षाणि षष्टिजन्मान्तरेषु च ॥ ५ ॥
पुरश्चर्याकरो देवि सर्षिरित्यभिधीयते ।
ऋषिहीनो भवेन्मन्त्रो जप्तो जन्मान्तरेषु च ॥ ६ ॥
मृत्यवायकरो लोके साधकानां महेश्वरि ।
यदा मन्त्रो मया वक्त्रान्महादेवि बहिष्कृतः ॥ ७ ॥
वेष्टितो येन तेजस्वी तच्छन्द इति गीयते ।
छन्दांसि विविधान्येषां मन्त्राणां परमेश्वरि ॥ ८ ॥
छन्दोहीनो भवेन्मन्त्रो नग्नो मर्त्य इव प्रिये ।
यदा जप्तो मनुर्देवि मया परमभक्तितः ॥ ९ ॥
मादुर्भूव मे सद्यो या सा प्रोक्तेति देवता ।
मन्त्रराजस्य देवीनां येनोत्पत्तिर्मया कृता ॥ १० ॥
तद्बीजमिति मन्त्राणां वर्ण्यते परमेश्वरि ।
बीजहीनो भवेन्मन्त्रः सिद्धिहानिकरः शिवे ॥ ११ ॥
बीजहीनं जगद्धीनं जलहीनो नदो यथा ।
जपान्ते जगदुत्पत्तिर्म्यिलिसंहारिकी मतिः ॥ १२ ॥
जाता मे येन देवेशि सा शक्तिरिति गीयते ।
शक्तिहीनो महादेवि मन्त्रो विघ्नकरो मतः ॥ १३ ॥
महामाङ्गल्यदो मन्त्रो देवीनां शक्तिबीजतः ।
जप्त्वा स्तुत्वा महादेवि पुनर्येन स गोपितः ॥ १४ ॥
निस्तेजस्कः पुनर्जातः कीलकं तदुदाहृतम् ।
निष्कीलितं जपान्ते च मनुमथद्धया शिवे ॥ १५ ॥
व्यर्थता साधकराजस्य सिद्धिं हरति भैरवः ।
जपकाले महादेवि राक्षसा भूतप्रेतकाः ॥ १६ ॥

---

[1] देवानां [2] ब्र पाठः ।

दिशो दश पलायन्ते येन दिग्बन्धनं च तत् ।
दिग्बन्धेनं विना देवि जपः पाठोऽपि वा तथा ॥ १७ ॥
निष्फलो विघ्नकृन्नित्यं तेन दिग्बन्धनं चरेत् ।
एतैर्विहीनो मन्त्रोऽस्ति निष्फलो विघ्नकारकः ॥ १८ ॥
ममापि देवि किं वक्ष्ये पुनः क्षुद्रेषु जन्तुषु ।
इत्येष पटलो गुह्यश्छन्दसा परमेश्वरि ॥
गोपनीयो महावीरैरित्याज्ञा पारमेश्वरी ॥ १९ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये ऋष्यादि-
निरूपणं चतुर्दशः पटलः ॥ १४ ॥

अथ

पञ्चदशः पटलः ।

श्रीभैरव उवाच ।
शृणु देवि प्रवक्ष्यामि श्मशानस्योग्रसाधनम् ।
येन साधनमात्रेण साधको भैरवो भवेत् ॥ १ ॥
श्रीदेव्युवाच ।
भगवन् भवता भक्त्या प्रसादोऽयं महान् कृतः ।
विस्मृतोऽयं विधिर्गुह्यः श्मशानस्यार्चनाङ्कितः ॥ २ ॥
सर्वतन्त्रेष्वविख्यातः स्मारितो मेऽधुना परः ।
श्रीभैरव उवाच ।

---

१ 'यन्त्रन' ख पाठ ।

त्रयस्त्रिंशतिकोटीनां देवतानां हि शङ्करः ।
नामभिर्विश्रुता देवि भवत्या मे परं श्रुताः ॥ ३ ॥
तासां वक्ष्येऽधुना देवि श्मशानार्चां यथाविधि ।
साधका येन जायन्ते सर्वसिद्धियुताः शिवे ॥ ४ ॥
विना श्मशानविधिना पूजायोगजपादयः ।
न सिद्ध्यन्ति वरारोहे कलौ भैरवशापतः ॥ ५ ॥
त्रिंशत्कोटयो देव्यः सर्वाः प्रेतासनस्थिताः ।
तत्र गत्वार्चयेद् यस्तु स भवेद् भैरवोपमः ॥ ६ ॥
तत्र घोरारवैर्देवि महाकालः सृगालकैः ।
सारमेयैश्च यक्षेन्द्रैः मोरगैः सपिशाचकैः ॥ ७ ॥
वेतालभूतप्रेतैश्च श्मशानार्चां करोति हि ।
तत्र भूता महाघोराश्चत्वारो विघ्नकारकाः ॥ ८ ॥
दिग्विदिक्षु भ्रमन्ते ते देव्यष्टौ भूतभैरवाः ।
ते संमुखगताः क्रूरा भूताः कुर्वन्ति विप्रियम् ॥ ९ ॥
भैरवा विघ्नहन्तारः शिवं कुर्वन्त्यसंमुखे ।
तेषां विधिं प्रवक्ष्यामि गुह्यं सारोत्तमोत्तमम् ॥ १० ॥
अप्रकाश्यमदातव्यं श्मशानार्चनमुत्तमम् ।
रवौ चन्द्रे कुजे सौम्ये गुरौ शुक्रे शनौ तथा ॥ ११ ॥
पुनः सूर्ये भ्रमन्ते ते दिग्विदिक्ष्वष्टभैरवाः ।

पूर्वोत्तरेशानसमीरणाग्नि-
केनाशरक्षोवरुणादिदिक्षु ।
महोग्र-चित्राम्बद-चण्ड-मास्त-
ह्रोलाक्ष-भूतेश-कराल-भीमाः ॥ १२ ॥
एते भ्रमन्ते सततं श्मशाने
दिग्भैरवा भूतयुता महेशि ।

एतान् समभ्यर्च्य वसेत् श्मशाने
स्यादन्यथा धीभ्रमणं विपत्तिः ॥ १३ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये श्मशानार्चन-
विधिनिरूपणं पञ्चदशः पटलः ॥ १५ ॥

अथ

षोडशः पटलः ।

श्रीभैरव उवाच ।

अथाहं पूजनस्यास्य वक्ष्ये पद्धतिमादरात् ।
गद्यपद्यमयीं देवि मन्त्रसिद्धिप्रदायिनीम् ॥ १ ॥
रात्रिशेषे समुत्थाय साधको विहितान्हिकः ।
श्मशानार्चनसंभारं समादाय च मानुगः ॥ २ ॥
सवीरो वीरभूमिं तु व्रजेद्रात्रिमुखे प्रिये ।
तत्र देवि विधिं वक्ष्ये शृणु पार्वति सादरम् ॥ ३ ॥
गुह्यं सारतमं गोप्यं नाख्येयं सिद्धिवाञ्छकैः ।

तत्र रात्रिमुखे सवीरः श्मशानं गत्वा सप्तपदान्तां भूमिमुत्सृज्य श्मशा-नवेलां नोल्लङ्घयेत् । तत्र संभारं संस्थाप्य स्वहस्तपादौ प्रक्षाल्य त्रिरा-चम्य प्राणायामत्रयं मूलेन विधाय, पूर्ववदाचम्य स्वमूलऋषिच्छन्दो-न्यासं कृत्वा कराङ्गन्यासौ कृत्वा मूलमष्टोत्तरशतं जपेत् । यथाश-क्ति जप्त्वा देवीं सशिवां स्वगुरुं ध्यात्वा, कवच-सहस्रनाम-स्तवान् पठन् वेलां सप्तपदमात्रामुल्लङ्घ्य, श्मशानमण्डलं प्रदक्षिणीकृत्य प्रविश्य चितां प्रणमेत् ।

ज्वालाकरालवदने कल्पान्तदहनप्रिये ।
प्राणिप्राणालयोद्भूते चिते मेऽनुग्रहं कुरु ॥ ४ ॥

इति नत्वा, यथावारं प्रशस्ताप्रशस्तान् भूतभैरवान् संमुखपृष्ठयोर्धृत्वा पूजामारभेत् ॥ श्रीदेव्युवाच ।

भगवन् भैरवान् भूतान् शापानुग्रहकारकान् ।
कथं संधारयेन् मन्त्री तत्र संमुखपृष्ठयोः ॥ ५ ॥

श्रीभैरव उवाच ।

एतद् देवि परं गुह्यं भूतभैरवसाधनम् ।
वक्ष्यामि तव भक्त्याहं न चाख्येयं दुरात्मने ॥ ६ ॥

भूतो रवौ पूर्वगतो महोग्र
श्चित्राङ्गदोऽप्युत्तरगो हिमांशौ ।
चण्डस्तथेशानगतो महीजे
भास्वान् बुधे भैरव एव वायौ ॥ ७ ॥

लोलार्चको वह्निगतः सुरेज्य
भूतेश्वरो दक्षिणगोऽसुरेज्ये ।
करालकोऽपि निर्ऋतिगोऽपि मन्दे
रवौ पुनः पश्चिमगोऽपि भीमः ॥ ८ ॥

एवं भ्रमन्ते सततं महेशि
दिग्भैरवा भूतगणाः श्मशाने
सुधांशुवृद्धौ शशिहीनपक्षे
तद्विपरीत्येन शिवे भ्रमन्ति ॥ ९ ॥

श्रीदेव्युवाच ।

महोग्रभीमयोः पूजा पक्षयोर्भीमनाम्यगोः ।
कथं देव करिष्यन्ति द्वयोर्भस्त्रारयोः ॥ ११ ॥

श्रीभैरव उवाच ।

पौर्णमास्यां शिवे दृष्ट्वा ग्रहवारं ततोऽष्टधा ।
रविवारं च संगुण्य प्रथमं वा द्वितीयकम् ॥ १२ ॥
प्रथमे रविवारे तु महोग्रं पूर्वगं यजेत् ।
द्वितीये पश्चिमे भीमं पूजयेच्छुक्लपक्षके ॥ १३ ॥
कृष्णपक्षेऽर्चयेद् भूतान् विपरीतक्रमेण तु ।
अधुनैषा प्रवक्ष्यामि पूजासारं महेश्वरि ॥ १४ ॥
अवाच्यं परशिष्याय कुचैलाय दुरात्मने ।
श्मशानपूजामन्त्रस्य महाकाल ऋषिः स्मृतः ॥ १५ ॥
उष्णिक् छन्द इति ख्यात देवी श्मशानकालिका ।
परा बीजं तटं शक्तिः काली कीलकमीरितम् ॥ १६ ॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ।

दिग्बन्धं तालत्रयं दत्त्वा नाराचमुद्रां प्रदर्शयेत् । इत्यासनशुद्धिं विधाय भूतशुद्धिं कुर्यात् । ॐहूं आकुञ्चेन सुषुम्नावर्त्मना प्रदीपकलिकाकारं ब्रह्मपथान्तर्नीत्वा स्वजीवं तत्र सदाशिवे लीनं ध्यात्वा, आदौ यमिति वायुबीजेन षोडशधा जप्तेन पापपुरुषं वामकुक्षिस्थं शोषयेत् । रमिति वह्निबीजेन चतुष्पञ्चाशद्वारजप्तेन दाहयेत् । वमिति वरुणबीजेन द्वात्रिंशद्वारजप्तेन प्लावयेत् । लमिति भूबीजेन दशधा जप्तेन शरीरं पिण्डीभूतं विभाव्य स्वजीवं हृदि संस्थाप्य प्राणानर्पयेत् । इति भूतशुद्धिः ॥ ॐआं क्रीं क्रौं यंरंलंवं शंषंसंहं सोऽहं हंसः मम प्राणा इह प्राणाः, एवं मम जीव इह स्थितः, एवं मम सर्वेन्द्रियाणि, मम वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । इति प्राणान् समर्प्य, मातृकान्यासं विधाय पूर्ववत् करषडङ्गन्यासौ कृत्वा, तत्र चितायां ईशाने चतुरस्रां वेदीं विधाय, तत्र श्रीचक्रं विभाव्य यथोक्तविधिनाभ्यर्च्य, तत्र नवग्रहान् संपूज्य, पूर्वे वटुकं संपूज्य भूतभैरवान् संपूजयेत् । ॐह्रीं महोग्राय

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि पानपूजाविधिं परम् ।
साधका येन जायन्ते कलौ भैरवसन्निभाः ॥ १८ ॥
श्मशानेषु चरेत् पानं निशीथे वा महेश्वरि ।
विना पानं न सिद्धिः स्यात् साधकानां कलौ ध्रुवम् ॥ १९ ॥
सुरा संविद्वारुणीति त्रिधा पानं सदोत्तमम् ।
तेषु ब्रह्मादयो देवा निलीना मुक्तये परम् ॥ २० ॥
आसवो मधुरं मद्यं शीधु चेति त्रयं परम् ।
तत्र सर्वे स्थिता देवा वासवाद्या अहर्निशम् ॥ २१ ॥
संपूज्य सशिवां देवीं प्रवृत्ते भैरवार्चने ।
तत्र पानं परादेव्या महानन्दप्रदायकम् ॥ २२ ॥
विना पानं न सिद्धिः स्याद् विना शक्तिसमर्चनम् ।
न सिद्ध्यति शिवे मन्त्रः श्मशानार्चां विना तथा ॥ २३ ॥
तस्मात् श्मशानं संपूज्य शक्तिमभ्यर्च्य साधकः ।
पानं भजेत् परादेव्याः श्रीचक्राग्रे यथाविधि ॥ २४ ॥
संवित्पानं चरेद्रात्रौ दिवापानं च शीधुना ।
अहोरात्रे सुरापानं भोगदं मोक्षदं शिवे ॥ २५ ॥
संविदासवयोर्मध्ये संविदेव गरीयसी ।
स वैष्णवः स शाक्तश्च स शैवो यः श्मशानगः ॥ २६ ॥
श्मशानभजनाद्वीरो भवेद् भैरवसन्निभः ।
पान तावद्भजेद् देवि यावत् संविन्मनोमयी ॥ २७ ॥
यदि तत्र विकारः स्यात् पान तद् ब्रह्मघातवत् ।
यावन्न चलते दृष्टिर्यावन्न चलते मनः ॥ २८ ॥
तावत् पानं प्रकर्तव्य पशुपानमतः परम् ।

---

१ 'वामणी' क ख ग पाठ ।

विना पूजां चरेद्यस्तु पानं वा चर्वणादकम् ॥ २९ ॥
मकारान् पञ्च देवेशि कुलटां वा परस्त्रियम् ।
स [1]रोगी निन्दितो लोके परपिण्डोपजीवकः ॥ ३० ॥
ब्रह्मघातवदीशानि शीघ्रं मृत्युमुखं व्रजेत् ।
आत्मोच्छिष्टं न दातव्यं परोच्छिष्टं न भक्षयेत् ॥ ३१ ॥
यद्युच्छिष्टं वीरचक्रे कौलिको भक्षयेच्छिवे ।
सिद्धिहानिर्भवेत् सद्यो योगिन्यो भक्षयन्ति तम् ॥ ३२ ॥
पूजाकाले निशीथे च ध्यात्वा देवीं शिवाङ्कगाम् ।
अभ्यर्च्य विधिना पानं कृत्वा चर्वणपूर्वकम् ॥ ३३ ॥
मकारैः पञ्चभिर्देवि तर्पयित्वा परस्त्रियम् ।
पानं पानं शिवे पानं सप्तवारं समुच्चरेत् ॥ ३४ ॥
तेन देवी शिवाङ्कोपविष्टा प्रादुर्भविष्यति ।
इत्येषा पद्धतिर्गुह्या श्मशानार्चनसंयुता ॥ ३५
गद्यपद्यमयी दिव्या तत्त्वसर्वस्वसंयुता ।
तव स्नेहेन विख्याता न प्रकाश्या कदाचन ।
इति गुह्यतमं देवि रहस्यं देवदुर्लभम् ।
अप्रकाश्यमदातव्यं गोपनीयं स्वयोनिवत् ॥ ३

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये श्मशानार्चनविधि-
निरूपणं षोडश पटलं ॥ १६ ॥

अथ

सप्तदशः पटलः ।

श्रीदेव्युवाच ।

भगवन् सर्वतत्त्वज्ञ सर्वलोकनमस्कृत ।
श्रीदेव्या यन्त्रराजस्य मालाकङ्कणयोरपि ॥ १ ॥
शोधनं श्रोतुमिच्छामि त्वयैव प्राङ्निवेदितम् ।
येन शुद्धिर्भवेद् देव द्रव्याणां साधकस्य हि ॥ २ ॥

श्रीभैरव उवाच ।

अधुना देवि वक्ष्यामि शोधनं सर्वकामदम् ।
सर्वसाधारणं लोके पटलं गुह्यमुत्तमम् ॥ ३ ॥
सुदिने देवि गत्वादौ श्मशानं साधकोत्तमः ।
कपालं नरदन्तानां माला कङ्कणमीश्वरि ॥ ४ ॥
अष्टोत्तरशतं जप्त्वा गूतं यन्त्रं निधापयेत् ।
पुनरष्टोत्तरशतं जप्त्वा तेनैव तर्पयेत् ॥ ५ ॥
देवान् पितॄन् ऋषीन् देवि माया-मा-कामबीजकैः ।
श्मशानभस्मलिप्तेन शुद्धेन सुरवन्दिते ॥ ६ ॥
ततो यन्त्रं लिखेद् देवि कपाले साधकोत्तमः ।
मालां कुर्यान्नृदन्तानां सकलाभीष्टसिद्धये ॥ ७ ॥
वामाचारपरः श्रीमान् यो न कुर्यान्महेश्वरि ।
यन्त्रं मालां शिवे तस्य मन्त्रहानिर्भवेद् ध्रुवम् ॥ ८ ॥
कपालं नूतनक्षौमे गृहीत्वा स्फटिकप्रभम् ।

श्मशानभस्म शुद्धं च कृत्वा साधकसत्तमः ॥ ९ ॥
स्वमन्त्रं साधयेद् धीमानन्यथा सिद्धिहानिदः ।
कपालयन्त्रं देवेशि केशकङ्कणमुत्तमम् ॥ १० ॥
नृदन्तमालां द्रव्यं च मुण्डपात्रं महेश्वरि ।
गोपयेत् साधकोऽत्यन्तं देवीरूपं विचिन्तयेत् ॥ ११ ॥
य एवं साधकः कुर्यात् तस्य सिद्धिरदूरतः[1] ।
अन्यथा सिद्धिहानिः स्यान्ममापि परमेश्वरि ॥ १२ ॥
इतीदं पटलं दिव्यं गुह्यं सर्वस्वमुत्तमम् ।
अप्रकाश्यमदातव्यं गोपनीयं विशेषतः ॥ १३ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये द्रव्यादिशोधन-निरूपण सप्तदश पटल ॥ १७ ॥

अथ

अष्टादशः पटलः ।

—: ※०※ :—

श्रीदेव्युवाच ।
भगवन् देवदेवेश मालायन्त्रार्चनं परम् ।
शोधन श्रोतुमिच्छामि विस्तरात् परमार्थदम् ॥ १ ॥
श्रीभैरव उवाच ।
अधुना देवि वक्ष्यामि पद्धतिं गद्यरूपिणीम् ।

---

१ 'नैव दूरत' घ पाठ ।

शोधनस्य हि द्रव्याणां मालादीना महेश्वरि ॥ २ ॥

तत्रादौ साधको रात्रिशेष उत्थाय पद्मपद्मासन. स्वशिरःस्थसहस्रारोर्ध्वमुखकमलकर्णिकान्तर्गत निजगुरुं ध्यात्वा, देवीं च हृद्विषये ध्यात्वा, मानसैरुपचारैरभ्यर्च्यांजपाऽप गुरवे देव्यै च समर्प्य प्रणमेत् । ततो बहिरागत्य नद्यादौ गत्वा स्नानसन्ध्यादि विधाय, यागगेहमेत्य नित्यकर्म समाप्य यन्त्रशोधनाधारभेत् । तत्रेशानदिग्विषये चतुष्कोणं हस्तैकविस्तृतां विश्वक् सम्यक्कया वेदीं विधाय विलिप्य सिन्दूरेण स्वदेवतायन्त्र विभाव्य, यथोक्तया पूजया संपूज्य द्रव्यादीन्यानाय्य यन्त्रादीन् शोधयेत् ॥

स्त्रीकेशैश्च चरेद् देवि कङ्कणं साधकोत्तमः ।
कङ्कण दन्तमालां च यन्त्रं कापालिकं शिवे ॥ ३ ॥
द्रव्यं मधु तथा मत्स्यं मांसं मुद्रां च मैथुनम् ।
मकारपञ्चसंयुक्तं पूजयेद् भैरवेश्वरीम् ॥ ४ ॥

तत्रेदानीयासनादिशुद्धिं कृत्वा, स्वमूलस्य सङ्कल्पपूर्वमृष्यादिन्यास कुर्यात् । ततो मूलेनाचम्य प्राणायामत्रयं कृत्वा भूतशुद्ध्यादिप्राणान् संस्थाप्य पञ्चगव्येनौषधसप्तकेन शोधन कुर्यात् ॥

स्तन्यं शुक्रं चारणालं तक्रं रक्तं स्वयोनिजम् ।
पञ्चगव्यमिति प्राज्यं कुर्यात् साधकसत्तमः ॥ ५ ॥

काश्मीर-गोरोचन-पूगकादि
कुरङ्गनाभीजमथापि मूर्वा ।
पूतामभेवं मलयोद्भवं च
सयन्त्रशुद्धौ महदौषधानि ॥ ६ ॥

एभि. सम्यक्कया यन्त्रं माला कङ्कण संलिप्य मूलविद्यया पृथक् पृथक् शोधन कुर्यात् । "ॐह्रींश्रींक्लीं देवि यन्त्रेश्वरि क्लींश्रींह्रींॐ यन्त्र शोधय २ ह्रश्रक्ल ठ ठ ठ स्वाहा ।"

इमा मन्त्रात्मिका विद्यामष्टोत्तरशतं जपेत् ।
यन्त्रे देवीं समावाह्य पूजयेत् साधकोत्तमः ॥ ७ ॥

तत्रादौ यन्त्र मूलविद्यया पञ्चगव्यौषधै संशोध्य, सिन्दूरयन्त्रे

विन्दूपरि संस्थाप्य पूर्ववत् स्वोक्तक्रमेण पूजयेत् । ततो मालामौषधादिना मूलविद्यया शोधयेत् । "ॐॐह्रांह्रींश्रींश्रीं क्लींक्लां मालारूपिणि सर्वसौभाग्यदायिनि हूं नृदन्तमालां शोधय २ फट् ठः ठ. ठः स्वाहा" । इत्येवमष्टोत्तरशतं जप्त्वा मूलविद्यया पञ्चगव्येन शोधयेत् । ततः कङ्कणं शतवालानां स्त्रीकेशस्य कृत्वा मूलविद्यया शोधयेत् । "ॐह्रींस्त्रींहूंश्रीश्रीं केशिनि निरालेशिनि कङ्कणं शोधय २ हुम्बां फट् ठः ठ ठः स्वाहा"। इति मूलविद्यामष्टोत्तरशतं जप्त्वा पञ्चगव्यौषधजलेन संशोध्य, धामहस्तदक्षहस्तयोर्निधाय स्वमूलं नृदन्तमालया यथाशक्त्या जपेत् । ततः कवचस्तोत्रसहस्रनामादिपाठं विधाय, मूलेन नैवेद्यं निवेद्य तदग्रे चक्रपूजां कुर्यात् । साधकैरेकादशक्रमेण वृत्तादृत्या यागमण्डपे उपविश्य, मध्ये त्रिकोणं सविन्दुं षडश्रकं वृत्तमष्टदलं वृत्तत्रयं भूगृहं विलिख्य रक्तपुष्पैः पूजयेत्—बाह्ये-गं गणेशाय नमः, धं धर्मराजाय नमः, वं वरुणाय नमः, क्रीं कुबेराय नमः, इति संपूज्य। अष्टदलेषु ह्रींश्रीं करालाय नमः, ह्रींश्रीं विकरालाय नमः, ह्रींश्रीं संहाराय नमः, ह्रींश्रीं रुरुभैरवाय नमः, ह्रींश्रीं महाकालाय नम , ह्रींश्रीं कालाग्नये नमः. ह्रींश्रीं सुप्तभैरवाय नम., ह्रींश्रीं उन्मत्तभैरवाय नम , इत्यभ्यर्च्य । षडश्रे-ॐह्रींश्रीं जयायै नमः, ॐ विजयायै० , ॐ शान्त्यै नमः, ॐ रत्यै नमः., ॐ प्रीत्यै नमः, ॐ मनोन्मनायै नम., इति पुष्पैरभ्यर्च्य। ततस्त्रिकोणे-गां गङ्गायै नमः, यां यमुनायै नम., सं सरस्वत्यै नम. इत्यभ्यर्च्य, विन्दौ मूलं० महामायायै नम., एवं संपूज्य, तत्र श्रीदेवीं ज्योतीरूपां गोघृतेन विभाव्य पञ्चवक्त्रां च पूजयेत् । तत्र भैरवं भैरवीं च पूजयेत् । तत्र वटुकं सशक्तिकं च पूजयेत् । "प्रवृत्ते भैरवे तन्त्रे सर्वे वर्णा द्विजातयः । निवृत्ते भैरवे तन्त्रे सर्वे वर्णाः पृथक् पृथक्" ॥ तत्रैव नव कन्याः अभ्यर्च्य,

वामे रामा रमणकुशला दक्षिणे चालिपात्र-
मग्रे मुद्राभरणकवटकौ मुक्तरस्योष्णशुद्धिः ।
तन्त्री वीणा मरसमधुरा सद्गुरुः सत्कथार्थं[1]
वामाचारः परमगहनो योगिनामप्यगम्यः[2] ॥ ८ ॥

---

१ 'सत्कथार्था' ङ पाठ. । २ 'कौला' ग घ पाठ ।

पीत्वा पीत्वा पुनः पीत्वा यावत् संविन्मनोमयी ।
यदि तत्र विकारः स्यात् पानं तद् ब्रह्मघातवत् ॥ ९ ॥
मधुपानपरो मन्त्री शक्तिं सन्तोषयेद्व्रते ।
रेतसा तर्पयेद् देवीं शक्तिं पानेन तर्पयेत् ॥ १० ॥
शक्त्युच्छिष्टं पिबेन्मद्यं वीरोच्छिष्टं तु चर्वणम् ।
मकारपञ्चसंयुक्तं कुर्याच्छ्रीचक्रमण्डलम् ॥ ११ ॥
साधकान् साधको भक्त्या सन्तर्प्य पानभोजनैः ।
सन्तर्प्य देवतामिष्टां मिष्टान्नैश्चर्वणैः शिवे ॥ १२ ॥
स्वगुरुं पूजयेद् भक्त्या तर्पयेच्छक्तितः परम् ।
सन्तोषयित्वा स्वगुरुं दक्षिणाभिश्च वन्दनैः ॥ १३ ॥
तदाज्ञां शिरसादाय नित्यकर्माणि सिद्धिदाम् ।

तत्रैवं चक्रे साधकानभ्यर्च्यानन्दभैरवं स्वात्मान ध्यात्वा परानन्दमयो भूत्वा, संहारमुद्रया देवीं सशिवां विसृज्य दण्डवत् प्रणमेत् ।


इत्येवं पद्धतिं गुह्यां गद्यपद्यैकरूपिणीम् ।
सकलागमसाराढ्या गोपयेत् साधकोत्तमः ॥ १४ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये शोधनपद्धति-निरूपणमष्टादश· पटलः ॥ १८ ॥

'रतो' क ख पाठ ।

अथ

एकोनविंशः पटलः ।



श्रीभैरव उवाच ।

अधुना देवि वक्ष्यामि सुरोत्पत्तिं महेश्वरि ।
यस्याः श्रवणमात्रेण दीक्षाफलमवाप्नुयात् ॥ १ ॥
समुद्रे मथ्यमाने तु क्षीराब्धौ सागरोत्तमे ।
तत्रोत्पन्ना सुरादेवी कुमारीरूपधारिणी ॥ २ ॥
नग्ना कालाग्निसदृशी कृतहासोल्लसन्मुखी ।
अष्टादशभुजा दिव्या नवकुम्भधरा तथा ॥ ३ ॥
नवपात्रधरा तद्वन्मदिरारुणलोचना ।
नानाकुसुमभूषाढ्या मुक्तकेशी त्रिलोचना ॥ ४ ॥
नानारत्नाङ्गदयुता मुक्ताहारलताञ्चिता ।
रक्तालाङ्गुलीयशोभाढ्या तुङ्गापीनस्तनान्विता ॥ ५ ॥
विचित्ररत्नखचितकाञ्चीगुणनितम्बिनी ।
रत्नसिंहासनगता परमानन्ददायिनी ॥ ६ ॥
ता दृष्ट्वा तुष्टुवुर्देवीं ब्रह्मविष्णुमहेश्वराः ।
ससुरासुरगन्धर्वाः सेश्वराः ससदाशिवाः ॥ ७ ॥
तदा प्रसन्नवदना वरदानोद्यता सुरा ।
आदौ पात्रं ददौ दिव्यमानन्दरसपूरितम् ॥ ८ ॥
सदाशिवाय देवेशि स नत्वा पात्रमग्रहीत् ।
पानाद् बिन्दुः पपातोर्व्यां जाता गुडलतास्तव ॥ ९ ॥

बिन्दुपातात् कणा जातास्तेभ्यो जाताः सहस्रशः ।
इक्षुभेदाश्च खदिरास्त्र्यूषणाद्याः सितादयः ॥ १० ॥
कम्बुका नागवल्ली च स्रवन्तीति महेश्वरि ।
गौडी चैतद्युता प्रोक्ता सर्वार्थफलदायिनी ॥ ११ ॥
ततो ददौ परं पात्रमीश्वराय सुरा शिवे ।
पात्राद् बिन्दुः पपातोर्व्यां ततो जाताहिवल्लरी ॥ १२ ॥
बिन्दुपातकणेभ्योऽपि द्राक्षाभेदाः सहस्रशः ।
मृद्वीकाद्या महादेवि जाताः परमपावनाः ॥ १३ ॥
माध्वी प्रोक्ता महाविद्यासाधने सर्वसिद्धिदा ।
ततो ददौ परं पात्रं रुद्रायामृतपूरितम् ॥ १४ ॥
पात्राद् बिन्दुः पपातोर्व्यां जाता गोधूमजातयः ।
तत्कणेभ्यो मदन्ती च जाता वै धान्यजातयः ॥ १५ ॥
पैष्टी प्रोक्ता सुरा देवि परमानन्ददायिनी ।
ततो ददौ परं पात्रं विष्णवे प्रभविष्णवे ॥ १६ ॥
पात्राद् बिन्दुः पपातोर्व्यां संविज्जाता ततः प्रिये ।
तत्कणेभ्योऽपि देवेशि तद्भेदाः कनकादयः ॥ १७ ॥
अन्ये च बहवो जाता भेदा मदनवर्धकाः ।
विज्जयेति मया प्रोक्ता वैष्णवी परमार्थदा ॥ १८ ॥
संविदासवयोर्मध्ये संविदेव गरीयसी ।
ततो ददौ पर पात्र श्रीसुरा परमेष्ठिने ॥ १९ ॥
पात्राद् बिन्दुः पपातोर्व्यां जातः शीधु परूपकः ।
तत्कणेभ्योऽपि सञ्जाता मदाः क्षौद्ररसादयः ॥ २० ॥
पानक प्रोक्तमीशानि सर्वसाधारणं परम् ।
ततो ददौ परं पात्रमिन्द्रायामृतनिर्भरम् ॥ २१ ॥

---

१ साधके' क ख ग पाठ । २ 'वर्धना ख ग पाठ । ३ पूरित क ख ग घ पाठः ।

पात्राद् बिन्दुः पपातोर्व्यां जातं जार्वीफलं ततः ।
तत्कणेभ्योऽपि सञ्जाता भेदाश्चामलकादयः ॥ २२ ॥
पानकं नाम तद् दिव्यं रसायनमुदाहृतम् ।
ततो ददौ परं पात्रं गुरवे गिरिजे सुरा ॥ २३ ॥
पात्राद् बिन्दुः पपातोर्व्यां गुडपुष्पं ततः शिवे ।
जातं तत्कणजा भेदा नारिकेलफलादयः ॥ २४ ॥
पानकं नाम देवेशि रसायनमिदं परम् ।
ततो ददौ परं पात्रं शुक्रायामृतपूरितम् ॥ २५ ॥
पात्राद् बिन्दुः पपातोर्व्यां जाताः खर्जूरपादपाः ।
तत्कणेभ्योऽपि सञ्जाता भेदा भादामकादयः ॥ २६ ॥
पानकं तदपि प्रोक्तं दिव्यं सन्तोषकारणम् ।
ततो ददौ परं पात्रं सूर्याचन्द्रमसोः सकृत् ॥ २७ ॥
पात्राद् बिन्दुः पपातोर्व्यां जाता सञ्जीवनौषधिः ।
तत्कणेभ्योऽपि सञ्जाता विविधौषधयः शिवे ॥ २८ ॥
पानक तदपि प्रोक्तं सर्वसाधारणं परम् ।
सर्वार्थफलदं देवि सर्वसारस्वतप्रदम् ॥ २९ ॥
दत्त्वा दिव्यं रसं देवी सुरा तत्र तिरोदधे ।
ते सर्वे परमेशानि सुरानन्दैकनिर्भराः ॥ ३० ॥
सदाशिवादयो देवाः सुरायै च वरं ददुः ।
ये पिबन्ति पर पानं परमानन्दकारणम् ॥ ३१ ॥
ते सर्वे यान्ति परमं पद शाश्वतमव्ययम् ।
विना गौडीं तथा माध्वीं सुरा यः पूजयेच्छिवाम् ॥ ३२ ॥
शिवं नारायणं रुद्र स भवेन्निरयास्पदम् ।
अदीक्षितः पशुर्देवि दीक्षितोऽप्यसुरः पशुः ॥ ३३ ॥

---

१ 'भाभामकादय' ङ पाठ । २ 'पृथक् क ख पाठ ।

तस्मात् सुरां शिवेऽभ्यर्च्य पूजायां वैष्णवोत्तमः ।
पिवेद्गौडीं तथा माध्वीं पैष्टीमासवमुत्तमम् ॥ ३४ ॥
पानकं च शुभाः सर्वे पूर्वाभावे परः परः ।
इतीदं परमं तत्त्वं कौलिकानां रहस्यकम् ।
आनन्देश्वरसर्वस्वं गोपनीयं स्वयोनिवत् ॥ ३५ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये सुरोत्पत्तिनिरूपणमेकोनविंशः पटलः ॥ १९ ॥

अथ

विंशः पटलः ।

श्रीभैरव उवाच ।
अधुना देवि वक्ष्येऽहं पात्रवन्दनमीश्वरि ।
तत्कालं यद्वदानन्दपात्रं देवैश्च वन्दितम् ॥ १ ॥
पूजायां पात्रमानन्दभरितं परमेश्वरि ।
गुरुणा दत्तमभ्यर्च्य प्रणमेच्छिरसा तदा ॥ २ ॥
श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृतालावितं
क्षेत्राधीश्वरयोगिनीगणमहासिद्धैः समाराधितम् ।

आनन्दागमकं महात्मकमिदं साक्षात् त्रिखण्डामृतं
वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥ ३ ॥ *
हैमं सिन्धुरमावहं दयितया दत्तं च पेयादिभिः
किञ्चिच्चञ्चलरक्तपङ्कजदृशा सानन्दमुद्वीक्षितम् ।
वामे स्वादुविशुद्धशुद्धिकमलं पाणौ विधात्मके
वन्दे पात्रमहं द्वितीयमधुनानन्दैकसंवर्धनम् ॥ ४ ॥
सर्वाम्नायकलाकलापकलितं कौतूहलोद्द्योतितं[3]
चन्द्रोपेन्द्रमहेन्द्रशम्भुवरुणब्रह्मादिभिः सेवितम् ।
ध्यातं देवगणैः परं मुनिगणैर्मोक्षार्थिभिः सर्वदा
वन्दे पात्रमहं तृतीयमधुना स्वात्मावबोधक्षमम् ॥ ५ ॥
मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूरितं[4]
मुद्रामैथुनधर्मकर्मनिरतं चाराम्लतिक्ताश्रयम् ।
आचार्याष्टकसिद्धभैरवकलान्यासेन संशोधितं
पायात् पञ्चमकारतत्त्वनिलयं पात्रं चतुर्थं नुमः ॥ ६ ॥
आधारे भुजगाधिराजवलये पात्रं महीमण्डलं
मद्यं सप्तसमुद्रवारि पिशितं चाष्टौ च दिग्दन्तिनः ।

सोऽहं भैरवमर्चयन् प्रतिदिनं तारागणैरच्यते–
रादित्यप्रमुखैः सुरासुरगणैराज्ञाकरैः किङ्करैः ॥ ७ ॥
सच्छत्रामलभद्रपीठपरमानन्दोदयादायकं
रम्यं राज्यकरं सदा सुखकरं सायुज्यसाम्राज्यदम् ।
नानाव्याधिभवान्धकारहरणं जन्मान्तरध्वंसनं
श्रीमद्भैरवभैरवीप्रियतरं पात्रं च षष्ठं नुमः ॥ ८ ॥
जाग्रत्स्वप्नसुषुप्तितुर्यपरतश्चैतन्यसाक्ष्यप्रदं
विद्युद्भास्करवह्निचन्द्रधनुषां ज्योतिष्कलाव्यापितम् ।
येडापिङ्गलमध्यगा त्रिवलया तस्याः प्रबोधोद्धरं
पात्रं सप्तममूषणेन तरुणानन्दप्रदं पातु माम् ॥ ९ ॥
खड्गं पात्रमथैकमञ्चलं च गुटिका कण्ठे हि सारस्वतं
शत्रोर्वाग्बलशौर्यकार्यहरणं देहस्थितेः कारणम् ।
वाञ्छासिद्धिकरं मनःस्थितिकरं वश्यं जगद्योषितां
पात्रं चाष्टममष्टसिद्धिकरणं प्रौढप्रसेनं भजे ॥ १० ॥
सर्वानन्दकरं सदाशिवपदं सर्वार्थसंपत्प्रदं
साम्राज्यार्थकरं समस्तसुखदं चाज्ञानविध्वंसनम् ।
आयुःकान्तियशोविवर्धनकरं संसारमोहच्छिद
पात्रं लक्षगुणात्मकं च नवमं प्रौढप्रतापं भजे ॥ ११ ॥
ब्रह्मविष्णुमहेशानां देवानां च विशेषतः ।
दुर्लभं पावनं पात्रं दशमं प्रणमाम्यहम् ॥ १२ ॥
पापघ्नं शान्तिशुभदं दिव्यं स्वादु सुखालयम् ।

पात्रमेकादशं वन्दे गुरुमेवासुस्वागतम् ॥ १३ ॥
पात्रं कृत्वा करे मन्त्री सर्वकर्म लभेत् सुखी ।
इह लोके श्रियं भुक्त्वा देहान्ते भैरवो भवेत् ॥ १४ ॥
देहस्थाखिलदेवता गजमुखाः क्षेत्राधिपा भैरवाः
योगिन्यो वटुकाश्च यक्षपितरः पैशाचिकाश्चेटकाः ।
अन्ये भूचरखेचराः प्रतिपगा वेतालभूतग्रहा-
स्तृप्ताः स्युः कुलपुत्रकस्य पिबतः पानं मदीपं चैरुम् । १५ ।
(करे माला मुखे हाला वामे रामा सुकोमला ।
हृदये त्रिपुरा बाला यागशाला गृहे गृहे ॥ १६ ॥
पात्रं भैरवपात्रं गोत्रं श्रीनाथपादुकागोत्रम् ।
शास्त्रं संविच्छास्त्रं ज्ञानं तत्त्वावबोधकं ज्ञानम् ॥ १७ ॥)
वामे रामा रमणकुशला दक्षिणे चालिपात्र-
मग्रे मुद्राश्चणकवटकौ सूकरस्योष्णशुद्धिः ।
स्कन्धे वीणा सरसमधुरा सद्गुरोः सत्कथा च
कौलो मार्गः परमगहनो योगिनामप्यगम्यः ॥ १८ ॥
अस्थिपिशितपुरन्ध्री-भोगपूजापरोऽहं
बहुविधकुलमार्गारम्भसंभावितोऽहम् ।
पशुजनविमुखोऽहं भैरवीमाश्रितोऽहं
गुरुचरणरतोऽहं भैरवोऽहं शिवोऽहम् ॥ १९ ॥
करे पात्रं मुखे स्तोत्रमानन्दो हृदयान्तरे ।
भक्तिर्गुरुपदाम्भोजे शरणं किमतः परम् ॥ २० ॥
एकेन शुष्कवटकेन घटं पिबामि
यावत् पिबामि महसा नवखण्डकेन ।

आघ्राय मांसमलिरोहितमुण्डखण्डं
गङ्गां पिबामि यमुनां सह सागरेण ॥ २१ ॥
वामे चन्द्रमुखी मुखे च मदिरा पात्रं कराम्भोरुहे
मूर्ध्नि श्रीगुरुचिन्तनं भगवतीध्यानास्पदं मानसम् ।
जिह्वायां जपसाधनं परिणतिः कौलक्रमाभ्यासने
ये सन्तो नियतं पिबन्ति सुरसं ते भुक्तिमुक्ती गताः ॥ २२ ॥
पीत्वा पीत्वा पुनः पीत्वा यावत् पतति भूतले ।
पुनरुत्थाय वै पीत्वा पुनर्जन्म न विद्यते ॥ २३ ॥
धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा ।
सुषुम्नावर्त्मना नित्यमद्यवृत्तीर्जुहोम्यहम् ॥ २४ ॥
प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचम्[1] ।
धर्माधर्मकलास्नेहपूर्णां[2] वह्नौ जुहोम्यहम् ॥ २५ ॥
यावन्न चलते दृष्टिर्यावन्न चलते मनः ।
तावत् पानं प्रकर्तव्यं पशुपानमतः परम् ॥ २६ ॥


इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये पात्रवन्दनविधि-
निरूपणं विंशः पटलः ॥ २० ॥

---

१ 'स्रुचा' क पाठ. । २ 'पूर्णवह्नौ' ङ पाठ ।

अथ

एकविंशः पटलः ।



श्रीभैरव उवाच ।

देवि वक्ष्यामि पूजान्ते शान्तिस्तोत्रमनुत्तमम् ।
वीरा येन परानन्दपदं प्राप्स्यन्ति निःस्पृहाः ॥ १ ॥
योगिनीचक्रमध्यस्थं मातृमण्डलवेष्टितम् ।
नमामि शिरसा नाथं भैरवं भैरवीप्रियम् ॥ २ ॥
अनादिघोरसंसार-व्याधिध्वंसैकहेतवे ।
नमः श्रीनाथवैद्याय कुलौषधप्रदायिने ॥ ३ ॥
आपदो दुरितं रोगाः समयाचारलङ्घनात् ।
ते सर्वेऽत्र व्यपोहन्तु दिव्यचक्रस्य मेलनात् ॥ ४ ॥
आयुरारोग्यमैश्वर्यं कीर्तिर्लाभः सुखं जयः ।
कान्तिर्मनोरथश्चास्तु पान्तु सर्वाश्च देवताः ॥ ५ ॥

संपूजकाना मतिपालकाना
यतीन्द्रयोगीन्द्रतपोधनानाम् ।
देशस्य राष्ट्रस्य कुलस्य राज्ञः
करोतु शान्तिं भगवान् कुलेशः ॥ ६ ॥
नन्दन्तु साधककुलान्वयदर्शका ये
सृष्ट्याद्यनाख्यचतुरुग्रमहान्वया ये ।
नन्दन्तु सर्वकुलकौलरताः परे ये
ऽन्येऽन्ये विशेषपदभेदकशाम्भवा ये ॥ ७ ॥

---

१ 'पारं' ख घ पाठः। २ 'निस्व' ग घ पाठ । ३ सदा' क ख पाठ । ४ 'प्यन्ते' क ख पाठ ।

नन्दन्तु सिद्धगुरवः स्वगुरुक्रमौघा
ज्येष्ठानुगाः समयिनो वटुकाः कुमार्यः ।
षड्योगिनीप्रवरवीरकुलप्रसूता
नन्दन्तु भूमिपतिगोद्विजसाधुलोकाः ॥ ८ ॥
नन्दन्तु नीतिनिपुणा निरवद्यनिष्ठा
निर्मत्सरा निरुपमा निरुपद्रवाश्च ।
नित्या निरन्तररता गुरवो निरीहाः
शान्ताश्च शान्तमनसो हृतशोकशङ्काः ॥ ९ ॥
नन्दन्तु योगनिरताः कुलयोगयुक्ता
आचार्यसामयिकसाधकपुत्रकाश्च ।
गावो द्विजा युवतयो यतयः कुमार्यो
धर्मे भवन्तु निरता गुरुभक्तियुक्ताः ॥ १० ॥
नन्दन्तु साधककुला ह्यणिमादिनिष्ठाः
शापाः पतन्तु द्विषतैः कुलयोगिनीनाम् ।
सा शाम्भवी स्फुरतु कापि ममाप्यगम्या
यस्यां गुरोश्चरणपङ्कजमेव लभ्यम् ॥ ११ ॥
याश्चक्रक्रमभूमिकावसतयो नाडीषु याः संस्थिता
याः कायद्रुमरोमकूपनिलया याः संस्थिता धातुषु ।
उच्छ्वासोर्मिमरुत्तरङ्गनिलया निःश्वासवासाश्च या-
स्ता देव्यो रिपुभक्षणोद्यमपरास्तृप्यन्तु कौलार्चिताः ॥ १२ ॥
या दिव्यक्रमपालिकाः क्षितिगता या देवतास्तोयगा
या नित्यं प्रथितप्रभाः शिखिगता या मातरिश्वाश्रयाः ।
या व्योमामृतमण्डलामृतमया याः सर्वदा सर्वगा-
स्ताः सर्वाः कुलमार्गपालनपराः शान्तिं प्रयच्छन्तु मे ॥ १३ ॥

---

१ 'निरञ्जन' ङ पाठः । २ 'साधन' क ख पाठ । ३ 'द्विषता' क ख पाठ ।

ऊर्ध्वं ब्रह्माण्डतो वा दिवि भुवनतले भूतले निस्तले वा
पातले वा तले वा पवनसलिलयोर्यत्र कुत्र स्थिता वा ।
क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिमांसैः
प्रीत्या देव्यः सदा वः शुभबलिविधिना पान्तु वीरेन्द्रवन्द्याः ।१४।
ब्रह्मा श्रीशेषदुर्गागुहचटुकगणा भैरवाः क्षेत्रपाला
वेतालादित्यरुद्रग्रहवसुमनुसिद्धाप्सरोगुह्यकाद्याः ।
भूता गन्धर्वविद्याधरऋषिपितृयक्षासुराहिप्रभूता
योगीशाश्चारणाः किंपुरुषमुनिसुराश्चक्रगाः पान्तु सर्वे ॥ १५ ॥
सत्यं चेद्गुरुवाक्यमेव पितरो देवाश्च चेद्योगिनी-
प्रीतिश्चेत्त परदेवता च यदि चेद्वेदाः प्रमाणाँश्च चेत् ।
शाक्तेयं यदि दर्शनं भवति चेदाज्ञेयमेषा(माशा)स्ति चेत्
सन्त्यत्रापि च कौलिकाश्च यदि चेत् स्यान्मे जयः सर्वदा ।१६।
तृप्यन्तु मातरः सर्वाः समुद्राः सगणाधिपाः ।
योगिन्यः क्षेत्रपालाश्च मम देहे व्यवस्थिताः ॥ १७ ॥
शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।
कालाग्न्यादिशिवान्तं च जगद्यज्ञेन तृप्यतु ॥ १८ ॥
पठित्वेदं नमेद् वीरान् वीरवन्दनमाचरेत् ।
स्तवेद् वीरान्नमेद् वीरान् मन्त्रसिद्धिः प्रजायते ॥ १९ ॥

इति शान्तिस्तोत्रम् ॥ अथ वीरवन्दनस्तोत्रम् ।

जगत्त्रयाभ्यर्चितशासनेभ्यः
परार्थसंपादनकोविदेभ्यः ।
समुद्धृतक्लेशमहोरगेभ्यो
नमो नमः साधकनायकेभ्यः ॥ २० ॥

---

१ 'निष्कले' क ङ पाठः । २ 'विधृत्वेषा शेषवद्' क ङ पाठः । ३ 'प्रमाण' च पाठः ।

प्रहीणसर्वास्रवबन्धनेभ्यः
सर्वार्थतत्त्वोदितसाधनेभ्यः[1] ।
सर्वप्रजाभ्युद्धरणोद्यतेभ्यो
नमो नमः साधकनायकेभ्यः ॥ २१ ॥
निस्तीर्णसंसारमहार्णवेभ्य-
स्तृष्णालतोन्मूलनतत्परेभ्यः[2] ।
जरारुजामृत्युनिवारकेभ्यो
नमो नमः साधकनायकेभ्यः ॥ २२ ॥
सद्धर्मरत्नाकरभाजनेभ्यो
निर्वाणमार्गोत्तमदेशिकेभ्यः ।
सर्वत्र संपूर्णमनोरथेभ्यो
नमो नमः साधकनायकेभ्यः ॥ २३ ॥
लोकानुकम्पाभ्युदितादरेभ्यः
कारुण्यमैत्रीपरिभावितेभ्यः[3] ।
सर्वार्थचर्यापरिपूरकेभ्यो
नमो नमः साधकनायकेभ्यः ॥ २४ ॥
विध्वस्तनिश्शेषकुवासनेभ्यो
ज्ञानाग्निना दग्धमलेन्धनेभ्यः[4] ।
प्रज्ञाप्तिज्ञापरिपूरकेभ्यो
नमो नमः साधकनायकेभ्यः ॥ २५ ॥
सर्वार्थिताशापरिपूरकेभ्यो
वैनेयपद्माकरबोधकेभ्यः[5] ।
विस्तीर्णसर्वार्थगुणाकरेभ्यो
नमो नमः साधकनायकेभ्यः ॥ २६ ॥

---

१ 'सर्वार्थकृ' क पाठः । २ 'त्रासनेभ्य' क पाठः । ३ 'क्षयो' क. ख. पाठः । ४ 'पु' ख. पाठः । ५ 'बोधनेभ्य' ग पाठः ।

अनन्तकर्माजितशासनेभ्यो
ब्रह्मेन्द्ररुद्रादिनमस्कृतेभ्यः ।
परम्परानुग्रहकारकेभ्यो
नमो नमः साधकनायकेभ्यः ॥ २७ ॥
विभग्नभूताद्दिमहाभयेभ्यो
मपञ्चकाचारपरायणेभ्यः ।
समस्तसौभाग्यकलाकरेभ्यो
नमो नमः कारणनायकेभ्यः ॥ २८ ॥
विभङ्गदुष्कर्मजवासनेभ्यः
समन्ततो जुष्टमहायशोभ्यः ।
लभ्यामलज्ञानकृतास्पदेभ्यो
नमो नमः शाम्भविशाम्भवेभ्यः ॥ २९ ॥
सर्वागमाम्भोधिमहाप्लवेभ्यः
श्रीचक्रपूजार्थपरायणेभ्यः ।
श्रीवीरचर्याचरणोत्तमेभ्यो
नमो नमः शाम्भविशाम्भवेभ्यः ॥ ३० ॥
श्रीमन्त्रकोटिद्युतिभूषणेभ्यो
द्वाविंशदुल्लासदशातिगेभ्यः ।
अद्वैततत्त्वामृतभाजनेभ्यो
नमो नमः शाम्भविशाम्भवेभ्यः ॥ ३१ ॥
षट्त्रिंशतालक्षणभूषितेभ्यः
प्रोत्फुल्लपद्माकरलोचनेभ्यः ।
प्रतप्तचामीकरविग्रहेभ्यो
नमो नमः शाम्भविशाम्भवेभ्यः ॥ ३२ ॥

---

१ 'विभग्न' क. ख. पाठः । २ 'द्य' ख ग. पाठः । एवमग्रेऽपि ।

सम्बोधसंभारसुसंस्थितेभ्यः
संसारनिर्वाणनिदर्शनेभ्यः ।
महाकृपावेष्टितमानसेभ्यो
नमो नमः शाम्भविशाम्भवेभ्यः ॥ ३३ ॥
परैक्यविज्ञानरसाकुलेभ्यो
वामाश्रिताचारभयानकेभ्यः ।
स्वातन्त्र्यविध्वस्तजगत्तमोभ्यो
नमो नमः शाम्भविशाम्भवेभ्यः ॥ ३४ ॥
श्मशानचर्याप्तमहाफलेभ्यो
मोहान्धकारापहृतित्वमेभ्यः ।
परस्पराज्ञापरिपालकेभ्यो
नमो नमः शाम्भविशाम्भवेभ्यः ॥ ३५ ॥
विधूतकेशालिकपालकेभ्यः
सुरासवारक्तविलोचनेभ्यः ।
नवीनकान्तारत-तत्परेभ्यो
नमो नमः शाम्भविशाम्भवेभ्यः ॥ ३६ ॥
विभूतिलिप्ताङ्गदिगम्बरेभ्य-
श्चिताग्निधूमालिभयानकेभ्यः ।
कपालसान्द्रामृतपानकेभ्यो
नमो नमो भैरविभैरवेभ्यः ॥ ३७ ॥
सिद्ध्यष्टकाधौनमहामुनिभ्यः
श्रीभैरवाचारकृतादरेभ्यः ।
स्वाधीनतान्यक्कृतनिर्जरेभ्यो
नमो नमो भैरविभैरवेभ्यः ॥ ३८ ॥

---

१ 'विशारविद्रसंकेभ्य.' क ङ पाठ । २ 'वामाश्रुत' घ च. पाठः । ३ 'दान' क. ग. ङ
[illegible] । ४ 'कृतादरेभ्यः' घ [illegible] ।

प्रशान्तशास्त्रार्थविचारकेभ्यो
निवृत्तनानारसकाव्यकेभ्यः ।
निरस्तनिःशेषविकल्पनेभ्यो
नमो नमो भैरविभैरवेभ्यः ॥ ३९ ॥
स्वात्मैक्यभावान्तरिताशयेभ्यः
सायुज्यसाम्राज्यसुखाकरेभ्यः ।
श्रीसच्चिदानन्दितविग्रहेभ्यो
नमो नमो भैरविभैरवेभ्यः ॥ ४० ॥
पराप्रसादास्पदमानसेभ्यो
ब्रह्माद्वयज्ञानरसाकुलेभ्यः ।
शिवोऽहमित्याश्रितचेतनेभ्यो
नमो नमो भैरविभैरवेभ्यः ॥ ४१ ॥
सर्वथा सर्वदानंदं सर्वं[1] घटपटादिसत् ।
जगज्जनितविस्तारं ब्रह्मेदमिति वेद्म्यहम् ॥ ४२ ॥
अहमेव परो हंसः शिवः परमकारणम् ।
मत्प्राणे स तु मच्चात्मा लीनः समरसीगतः ॥ ४३ ॥
सच्चिदानन्दनिलयं परापरमकारणम् ।
शिवाद्वयप्रकाशाढ्यं श्यामलं धाम धीमहि ॥ ४४ ॥
अनेन वीरस्तवकीर्तनेन
समुद्धृतक्लेशसुवासनोऽहम् ।
संसारकान्तारमहार्णवेऽस्मिन्-
निमज्जमानं जगदुद्धरेयम् ॥ ४५ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये शान्तिस्तोत्र-
वीरवन्दना-निरूपणमेकविंशः पटलः ॥ २१ ॥

---

१ 'सर्वं' ङ. पाठः । २ 'मत्' क ख पाठः ।

अथ

द्राविंशः पटलः ।

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि सुराशुद्धिविधिं परम् ।
यं विधाय कलौ मन्त्री भविता मुक्तिभाजनम् ॥ १ ॥
यैरेव पातकी देवि साधको द्रव्यसङ्करैः ।
शुद्धैस्तैरेव पूजायां भवेद्भोगापवर्गभाक् ॥ २ ॥
यदा प्रभृति लोकेऽस्मिन् सुरा ख्यातिमुपागता ।
तदा सर्वे सुरा देवि ब्रह्मविष्णुहरादयः ॥ ३ ॥
तत्संसर्गोद्भवानन्द-निर्भरान्तरमानसाः ।
असुरा राक्षसा यक्षा गन्धर्वा मानवादयः ॥ ४ ॥
भजन्ति च सुरां दिव्यां मन्त्रसंस्कारमन्त्रिताम् ।
कालेन कलशस्थाभूत् सुरादेवी सुरेश्वरि ॥ ५ ॥
कलिना कालरूपेण बाधिते जगति प्रिये ।
शप्ता शुक्रेण देवेशि रुचकारणहत्यया ॥ ६ ॥
शुक्रशापवशाद् देवा ब्रह्मविष्णुशिवादयः ।
ब्रह्मर्षयः सुरादेव्यै ददुः शापं यथाक्रमम् ॥ ७ ॥
ब्रह्महत्या सुरापानं समं ज्ञेयं महेश्वरि ।
सुरा शप्ता यदा देवैस्तदा दैत्या मुदं ययुः ॥ ८ ॥
सुरां पीत्वा तु दितिजैर्देवा बलविवर्जिताः ।
स्वर्गान्निराकृता देवि पुरन्दरपुरःसराः ॥ ९ ॥

---

१ 'मद्यपैः' ख. पाठः । २ 'गोत्सवा' क. ख. पाठः ।

तदा जिष्णुं पुरस्कृत्य देवा यज्ञमतन्वत ।
सदाशिवादयो देवि प्रादुर्भूता मखोत्तमे ॥ १० ॥
वर वृणु यथाभीष्टं देवनायक सांप्रतम् ।
तं तवाशु प्रयच्छामो गच्छामो निलयं स्वकम् ॥ ११ ॥
तदा शक्रोऽब्रवीद् देवि पुरस्कृत्य गुरं शिवे ।
तृणाग्रबिन्दुमात्रेण सुरायाः प्राशितेन च ॥ १२ ॥
या तृप्तिर्जायतेऽस्माकं न सामृतघटीशतैः ।
सा शस्ता ब्रह्मणा देवी विष्णुना शङ्करेण च ॥ १३ ॥
तां विना निर्बला जाताः शत्रुभिश्च पराजिताः ।
तदा सर्वे सुरा देवं शिवमीश्वरमव्ययम् ॥ १४ ॥
तुष्टुवुः परया भक्त्या प्रणिपत्य पुनः पुनः ।
एकाक्षराय रुद्राय अकारायात्मरूपिणे ॥ १५ ॥
उकारायादिदेवाय विद्यादेहाय वै नमः ।
तृतीयाय मकाराय शिवाय परमात्मने ॥ १६ ॥
सूर्याय सोमवर्णाय यजमानाय वै नमः ।
नमस्ते भगवन् रुद्र भास्करामिततेजसे ॥ १७ ॥
नमो भवाय देवाय शर्वाय च कपर्दिने ।
शिवाय क्षितिरूपाय सदासुरभ्ये[2] नमः ॥ १८ ॥
ईशानाय नमस्तुभ्यं संस्पर्शाय नमो नमः ।
पशूनां पतये चैव पावकामिततेजसे ॥ १९ ॥
भीमाय व्योमरूपाय शब्दमात्राय वै नमः ।
महादेवाय सोमाय अमृताय नमो नमः ॥ २० ॥
उग्राय यजमानाय नमस्ते कर्मयोगिने[3] ।
इति स्तुत्वा परं देवं भैरवं शिवमीश्वरम् ॥ २१ ॥

---

१ 'शक्राद्या' क ग. घ पाठ । २ भिदे' घ पाठ । ३ 'रूपिणे' क ख ग पाठः ।

प्रणेमुः सकला देवा ब्रह्मविष्णुहरादयः ।
तदा वागुदभूद् व्योम्नः पञ्चव्योमशरीरिणाम् ॥ २२ ॥
सुरेयं सर्वदा सेव्या सकलैस्तु मुमुक्षुभिः ।
युक्त्यानया प्रसङ्गेन यथावदनुपूर्वशः ॥ २३ ॥
चतुर्धा वेदरूपोऽहमृग्यजुःसामरूपवान् ।
अथर्वाहं च मन्त्रात्मा परमात्मा शिवोऽव्ययः ॥ २४ ॥
वेदानालोड्य वेदार्थं मन्त्ररूपं विधाय च ।
कुरुकुल्लां महाविद्यां सदाशिव प्रकाशय ॥ २५ ॥
आगमं नाम शास्त्रं तु चतुष्पष्ट्यात्मकं परम् ।
तस्मिन् सुरादिशुद्धिं तु प्रकाशय मनूत्तमैः ॥ २६ ॥
इति वाणी शिवोद्भूता विरराम यदा परा ।
सदाशिवं महेशानं तुष्टुवुः प्रणताः सुराः ॥ २७ ॥
ओंकाररूपिणे देव नमस्ते विश्वरूपिणे ।
नमो देवादिदेवाय महादेवाय वै नमः ॥ २८ ॥
अर्धनारीशरीराय सांख्ययोगप्रवर्तिते ।
वेदशास्त्रार्थगम्याय शाश्वताय नमो नमः ॥ २९ ॥
दीनार्तत्राणकर्त्रे च नमस्ते दिव्यचक्षुषे ।
नमः सहस्रशीर्षाय नमः साहस्रिकाङ्घ्रये ॥ ३० ॥
नमो मन्त्राय चिद्व्योमवासिने परमात्मने ।
इति स्तुत्वा महादेवो महात्मा श्रीमदाशिवः ॥ ३१ ॥
प्रोवाचागमशास्त्रं तु मोक्षमार्गं महात्मनाम् ।
देवदेवीति या देवी या भवानीति विश्रुता ॥ ३२ ॥
सदाशिवं प्रणम्याशु प्रोवाच श्लक्ष्णया गिरा ।
वद देवागमं शास्त्रं रहस्यं परमाद्भुतम् ॥ ३३ ॥

---

१ 'तदा' इ पाठ ।

यस्योच्चारणमात्रेण शापहीना भवेत् सुरा ।

श्रीशिव उवाच ।

शृणु देवि प्रवक्ष्यामि सुराशुद्धिं यथाक्रमम् ।
मकाराणां च सर्वेषां शोधनं सिद्धिवर्धनम् ॥ ३४ ॥
वेदो निष्कलशब्दो वै वेदार्थोऽस्त्यागमः शिवे ।
वेदार्थागमतत्त्वज्ञैः सुरा सेव्या मुमुक्षुभिः ॥ ३५ ॥
न वेदागमयोर्भेदः सर्वथेति विनिश्चयः ।
शास्त्राणां परमेशानि भ्रान्तिः कार्या न कौलिकैः ॥ ३६
अधुना शृणु देवेशि सुराशोधनमुत्तमम् ।
येन शोधनमात्रेण सर्वसिद्धिः प्रजायते ॥ ३७ ॥
मण्डलं वामतः कृत्वा जलेन रजसापि वा ।
कुङ्कुमेनाष्टगन्धेन सर्वथा वीरभस्मना ॥ ३८ ॥
त्रिकोणं विन्दुसंयुक्तं वृत्तं च चतुरश्रकम् ।
सामान्यार्घ्योदकेनाशु संप्रोक्ष्य कुलसुन्दरि ॥ ३९ ॥
तत्राधारं च संस्थाप्य वह्निमण्डलमर्चयेत् ।
वह्नेः कलाः समभ्यर्च्य यथावद्वक्ष्यते मया ॥ ४० ॥
रकार विन्दुसंयुक्तं वह्निबिम्बं च डेऽन्तिकम् ।
दशकलात्मने विश्वमिति मन्त्रेण पूजयेत् ॥ ४१ ॥
धूम्रा च नीलवर्णा च कपिला विस्फुलिङ्गिनी ।
ज्वाला हैमवती कव्यवाहनी हव्यवाहनी ॥ ४२ ॥
रौद्री सङ्कर्षणी चैव वैश्वानरकला दश ।
पूजयित्वोक्तविधिना गन्धाक्षतप्रसूनकैः ॥ ४३ ॥
कलशं संस्थुलं दिव्यं पुष्पमालादिशोभितम् ।
हैम वा राजत मार्दं स्थापयेद् वीरमुद्रया ॥ ४४ ॥
शम्भुना च यथा देवि विष्णुना च यथा पुरा ।

ब्रह्मणा च यथा पूर्वं तथा त्वां स्थापयाम्यहम् ॥ ४५ ॥
इति संस्थाप्य कलशं तत्र सूर्यं प्रपूजयेत् ।
सूर्यनाम समुच्चार्य जीवमन्त्रं महेश्वरि ॥ ४६ ॥
सूर्यमण्डलडेन्तं च श्रीद्वादशकलात्मने ।
विश्वमन्ते प्रयोक्तव्यं मनुनानेन पूजयेत् ॥ ४७ ॥
कला द्वादश सूर्यस्य पूजयेदुच्यते मया ।
तपिनी तापिनी चैव बोधिनी चैव रोधिनी ॥ ४८ ॥
कलिनी शोषणी चैव वरेण्याकर्षणी तथा ।
माया विश्वावती हेमप्रभा सौरकला इमाः ॥ ४९ ॥
संपूज्य कलशे देवि कौलिकः कुलसिद्धये ।
सुरया पूरयेत् कुम्भं विलोमैर्मातृकाक्षरैः ॥ ५० ॥
तदिदं चामृतं साक्षाच्चन्द्ररूपं विचिन्तयेत् ।
चन्द्रमण्डलमभ्यर्च्य मन्त्रेणानेन पार्वति ॥ ५१ ॥
शक्तिमुच्चार्य देवेशि सोममण्डलडेयुतम् ।
विश्वाञ्चलाय देवेशि श्रीषोऽशकलात्मने ॥ ५२ ॥
इति संपूज्य चन्द्रस्य कलाः षोडश पूजयेत् ।
अमृता मानदा तुष्टिः पुष्टिः प्रीती रतिस्तथा ॥ ५३ ॥
श्रीश्च ह्रीश्च स्वधा रात्रिर्ज्योत्स्ना हैमवती तथा ।
छाया च पूर्णिमा नित्या चामावस्या च षोडशी ॥ ५४ ॥
एताः संपूज्य मन्त्रैस्तु यजेद् देवीं च भैरवीम् ।
मूलेन तत्र कलशे त्रिकोणं च त्रिभावयेत् ॥ ५५ ॥
बिन्दुबिम्बे परां ध्यात्वा पूजयेदिष्टदेवताम् ।
प्रणवेनार्चयेद् देवि शिवं गन्धेन वायुना ॥ ५६ ॥
तत्र तारं च माया च परमस्वामिन्युद्धरेत् ।

'श्रीमयी' क ख ग पाठ ।

परमाकाशशून्यं च वाहिनीति समुद्धरेत् ॥ ५७ ॥
चन्द्रार्काग्निभक्षणीति पात्रे विंश-युगं वदेत् ।
ठद्वयान्तामिमां विद्यां जपेत्तु दशधा घटे ॥ ५८ ॥
तत्रैव मातृकान्ते च जपेदृचमिमां प्रिये ।
आकृष्णेन रजसेति नाम्नीं परमपावनीम् ॥ ५९ ॥
दशधैतामृचं देवि मधुवातऋतामिधाम् ।
तन्नानन्देशगायत्रीं जपेत्तु दशधा प्रिये ॥ ६० ॥
वाङ्मायामाः समुच्चार्य तथानन्देश्वराय च ।
विद्महे श्रीसुरादेव्यै धीमहीति ततो वदेत् ॥ ६१ ॥
तन्नोऽर्धनारीश्वरश्च प्रचोदयात् समुद्धरेत् ।
गायत्रीं दशधा जप्त्वा हंसः शुचिपदार्चयेत् ॥ ६२ ॥
अग्निमीळे पुरोहितं त्रिःसप्तप्येति कौलिकः ।
वकारं दीर्घपद्काद्यं प्रोच्चार्य तदनन्तरम् ॥ ६३ ॥
ब्रह्मशापमोचितायै सुरादेव्यै कुटान्तकम् ।
दशधा मजपेद्विद्यामिमे स्तोर्जेत्यृचं जपेत् ॥ ६४ ॥
तारं मायार्णषड्दीर्घान् प्रोच्चार्येति सुधे ततः ।
शुक्रशापं मोचय द्विर्वनान्तं च मनुं जपेत् ॥ ६५ ॥
अग्न आयाहीति ऋच दशधा मजपेत् प्रिये ।
शुक्रशापहरीं विद्यां प्रजपेदुच्यते यथा ॥ ६६ ॥
सूर्यमण्डलसंभूते वरुणालयसंभवे ।
अमाबीजमये देवि शुक्रशापाद्विमुच्यताम् ॥ ६७ ॥
देवानां (वेदाना) प्रणवो बीज ब्रह्मानन्दमयं यदि ।
तेन सत्येन देवेशि ब्रह्महत्या व्यपोहतु ॥ ६८ ॥
एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं परम् ।

---

[1] मया [2] ख पाठ ।

कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥ ६९ ॥
ब्रह्मशापविनिर्मुक्ता त्वं मुक्ता विष्णुशापतः ।
विमुक्ता रुद्रशापेन पवित्रा भव साम्प्रतम् ॥ ७० ॥
एतैर्मन्त्रैः समभ्यर्च्य त्रिवारं कौलिकः शिवे ।
शन्नो देवीरिति ऋचं दशधा प्रजपेद् घटे ॥ ७१ ॥
ततो मायां रमां देवि पङ्कं पड्दीर्घभाजितम् ।
छुरिकाकारिण्युच्चार्य शोभिनीति ततो वदेत् ॥ ७२ ॥
विकारानस्य द्रव्यस्य हर-युग्मं च ठद्वयम् ।
छुरिकाख्यां जपेद्विद्यां दशधा कलशोपरि ॥ ७३ ॥
यो विश्वच्छुरिति चैं ऋचं वै दशधा जपेत् ।
गुरुं ध्यात्वा सहस्रारे हृत्पद्मेऽपीष्टदेवताम् ॥ ७४ ॥
प्रणम्य कौलिको ध्यायेत् श्रीविरस्करणीं जपेत् ।
नीलतोयदसङ्काशां नीलकुन्तलशोभिताम् ॥ ७५ ॥
नीलाम्बरधरां देवीं नीलोत्पलविलोचनाम् ।
नीलपुष्पविभूषाढ्यां नीलालङ्कारभूषिताम् ॥ ७६ ॥
नीलाङ्गरागसंछन्नां नीलवैदूर्यमालिनीम् ।
इन्द्रनीलनिबद्धांशुमहार्घमणिभूषिताम् ॥ ७७ ॥
नीलवाजिसमारूढां नीलखड्गायुधां पराम् ।
निद्रापटेन नीलेन भुवनानि चतुर्दश ॥ ७८ ॥
मोहयन्तीं महापापां द्रव्यनिन्दकभक्षिणीम् ।
वीरपानरतान् वीरान् पालयन्तीं समन्ततः ॥ ७९ ॥
सङ्केतमण्डलं दिव्यं छादयन्तां स्ववाससा ।
परमानन्दवपुषीं परमानन्दभैरवीम् ॥ ८० ॥
परमानन्दजननीं प्रणमामि पराम्बिकाम् ।

---

१ 'मां' ट पाठः । २ 'भास्वराम्' क ग पाठः ।

इति ध्यात्वा जपेद्विद्यां यथावद् वर्ण्यते मया ॥ ८१ ॥
वाग्भवकाममठमायाश्च तिरस्करणि संवदेत् ।
सकलजनं मोहयार्ये वाग्वादिनि ततो वदेत् ॥ ८२ ॥
सकलपशुजनं च वदेद् आत्मनःपदम् ।
चक्षुःश्रोत्रजिह्वाघ्राणादीनि चेति तिरस्कुरु ॥ ८३ ॥
तिरस्कुरु ततः पश्चत्रयं ठद्वयमुद्धरेत् ।
श्रीतिरस्करणीं विद्यां सप्तधा दशधा घटे ॥ ८४ ॥
पावमान्याः परं ब्रह्म शुद्धं ज्योतिः सनातनम् ।
पितृंस्तर्पयति क्षीरं सर्पिर्मधूदकैः' ॥ ८५ ॥
ऋचमेतां जपेदादौ त्रिवारं त्रिर्जपेत् ततः ।
पावमान्यं परं ब्रह्म पावमान्यः परो रसः ॥ ८६ ॥
पावमान्यं परं ज्ञानं तेन त्वां पावयाम्यहम् ।
इति जप्त्वा गुरुं ध्यात्वा जपेद् वरुणबीजकम् ॥ ८७ ॥
हंस इत्यर्कमन्त्रं च देवीं कुण्डलिनीं स्मरेत् ।
प्रसुप्तभुजगाकारां सार्धत्रिवलयां शुभाम् ॥ ८८ ॥
सूर्यकोटिकरालाभां चन्द्रकोटिसुशीतलाम् ।
वह्निकोटिदुराद(ध)र्षां विसतन्तुतनीयसीम् ॥ ८९ ॥
षट् चक्राणि विभिद्याशु सुषुम्नावर्त्मना नयेत् ।
सहस्रारस्थितं देवं नत्वा शिवपदे लयेत् ॥ ९० ॥
शिवशक्त्योर्महज्ज्योतिर्ध्यात्वा चन्द्रकलाप्लुतम् ।
अमृतं वामनासाग्रान्निःसार्य कलशे क्षिपेत् ॥ ९१ ॥
अमृतीकृत्य तद् द्रव्यं धेनुमुद्रां प्रदर्शयेत् ।
मायां रमां कामकलाममृतेऽप्यमृतोद्भवे ॥ ९२ ॥
अमृतवर्षिण्युच्चार्य अमृतं स्रावय-द्वयम् ।
अंआं विष्णुकलान्ते च पठेत् पार्वति कौलिकः ॥ ९३ ॥

---

१ 'मधूदकम्' इ पाठः ।

विश्वान्तमन्नृतेश्वर्यं मनुमेनं जपेद् घटे ।
ध्यानामृतमयं द्रव्यं कर्पूरादिसुवासितम् ॥ ९४ ॥
एलालवङ्गकस्तूरी-चन्दनोशीरमिश्रितम् ।
विधाय मूलमन्त्रेण तीर्थान्यावाहयेद् घटे ॥ ९५ ॥
तारं शिवं शिवोद्भूतिं मूलमेतत् समुद्धरेत् ।
गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ ९६ ॥
नर्मदे सिन्धुकावेरि द्रव्येऽस्मिन् सन्निधिं कुरु ।
इत्यावाह्य महादेवि मुद्रयाङ्कुशरूपया ॥ ९७ ॥
सर्वतीर्थमयं द्रव्यं ध्यायेत् परमपावनम् ।
द्रव्यमध्ये विन्दुयुतं त्रिकोणं च विभावयेत् ॥ ९८ ॥
योनिमुद्रां निबद्ध्याशु ध्यायेदानन्दभैरवम् ।
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ॥ ९९ ॥
अष्टादशभुजं देवं पञ्चवक्त्रं त्रिलोचनम् ।
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थितम् ॥ १०० ॥
वृषारूढं नीलकण्ठं सर्वा(र्पा)भरणभूषितम् ।
कपालखट्वाङ्गधरं घण्टाडमरुवादिनम् ॥ १०१ ॥
पाशाङ्कुशधरं देवं गदामुसलधारिणम् ।
खड्गखेटकपट्टीश-मुद्गरोच्छूलकुन्तिनम् ॥ १०२ ॥
विचित्रखेटकं मुण्डवरदाभयपाणिकम् ।
लोहितं देवदेवेशं भावयेत् साधकोत्तमः ॥ १०३ ॥
दत्त्वा पुष्पाञ्जलिं कुम्भे जपेदानन्दभैरवम् ।
हकारं च भृगुं देवं मण्डकं धरणिं ततः ॥ १०४ ॥
(तथा जीमूतबीजं च हुतभुग्बीजमुद्धरेत् ।)
वायुं केशं तथानन्दभैरवाय ततोऽञ्जले ॥ १०५ ॥
विकुटं च मनुं जप्त्वा दशधा भैरवीं यजेत् ।

आनन्दभैरवीं ध्यायेद् यथावद् वर्ण्यते[1] शिवे ॥ १०६ ॥
समुद्रे मथ्यमाने तु क्षीराब्धौ सागरोत्तमे ।
तत्रोत्पन्ना सुरा देवी कुमारीरूपधारिणी ॥ १०७ ॥
भावयेच्च सुरां देवीं चन्द्रकोट्ययुतप्रभाम् ।
हिमकुन्देन्दुधवलां पञ्चवक्त्रां त्रिलोचनाम् ॥ १०८ ॥
अष्टादशभुजैर्युक्तां सर्वानन्दकरोद्यताम् ।
प्रहसन्तीं विशालाक्षीं देवदेवस्य सम्मुखीम् ॥ १०९ ॥
शक्तिं शिवं निर्जरं च भेकीं भूबीजमेव च ।
मेघं वह्निं समीराणं केशं चैव समुद्धरेत् ॥ ११० ॥
सुरादेव्यै कुटं चान्ते विद्यां च दशधा जपेत् ।
भैरवं भैरवीं चैव यष्ट्वा पार्वति कौलिकः ॥ १११ ॥
महामुद्रां धेनुमुद्रां योनिं मत्स्यं प्रदर्शयेत् ।
बद्ध्वा च लेलिहानाख्यां मुद्रां कुण्डलिनीं पुनः ॥ ११२ ॥
मूलाधारात् समुत्थाय सुषुम्नावर्त्मना प्रिये ।
द्वादशान्तं समास्थाप्य सोऽहं हंस इति स्मरेत् ॥ ११३ ॥
शिवेन सह संयोज्य परानन्दमयो भवेत् ।
तदुद्भूतामृतवृष्टिमुत्सृजेद् वामनासया ॥ ११४ ॥
प्रणवेन च देवेशि परद्रव्ये नियोजयेत् ।
साक्षादमृततत्त्वाढ्यं ध्यायेत् कलशमुत्तमम् ॥ ११५ ॥
वारुणं बीजमुच्चार्य मूलमन्त्रं समुच्चरेत् ।
दशधा प्रजपेद् देवि गन्धाक्षतपुरःसरः ॥ ११६ ॥
पुष्पैर्नानाविधैर्दिव्यैर्माल्यैर्विविधभूषणैः ।
संपूज्य कलशं दिव्यं घण्टानिःस्वानपूर्वकम् ॥ ११७ ॥
धूपैर्दीपैर्महोत्साहः परमैर्विविधौषधैः ।
प्रपूज्य परया भक्त्या प्रणामैः स्तुतिपूर्वकैः ॥ ११८ ॥

---

१ "वर्णिता" ग. पाठः ।

सर्वदेवमयं कुम्भं ध्यायेद् देवेशि साधकः ।
या सुरा सा उमादेवी यो द्रव्यं स महेश्वरः ॥ ११९ ॥
यो गन्धः स भवेद् ब्रह्मा यो मोहः स जनार्दनः ।
स्वादे च संस्थितः सोमः फेनायामनलः स्थितः ॥ १२० ॥
इच्छायां मन्मथो देवस्तद्धार्मुच्छिष्टभैरवः ।
द्रावे गङ्गा स्थिता देवि घटस्थाः सप्त सागराः ॥ १२१ ॥
सर्वतेजोमयं द्रव्यं परमानन्दनिर्भरम् ।
सर्वशापविनिर्मुक्तं सर्वमन्त्रसुसंस्कृतम् ॥ १२२ ॥
परमामृतभावेन भैरवं भैरवीं यजेत् ।
माहेश्वरैर्महावीरैर्महाचीनपदस्थितैः ॥ १२३ ॥
महाशक्तिमयैर्मान्यैः सेव्यं द्रव्यमिदं प्रिये ।
सन्तर्प्य देवतामिष्टां योगिनीगणमैश्वरम् ॥ १२४ ॥
वटुकं क्षेत्रपालांश्च [1]त्रिंशत्कोटिदेवताः ।
मातृर्मातृगणान् सर्वान् भूतप्रेतादिसंयुतान् ॥ १२५ ॥
सन्तर्प्य विधिवद् देवि गुरुं गुरुवरांस्ततः ।
गुरुं ध्यात्वा परां ध्यायेद्वीरान् संपूज्य शक्तितः ॥ १२६ ॥
शक्तियुक्तो यजेत् पात्रमित्याज्ञा पारमेश्वरी ।
शक्तिहीने वृथापानं शिवहीने वृथार्चनम् ॥ १२७ ॥
शिवशक्तिसमायोगे वीरपूजा विमोक्षदा ।
इतीदं शोधनं दिव्यं सुरायाः सुरदुर्लभम् ॥ १२८ ॥
तव स्नेहेन निर्णीतं शृणुष्वान्यदपि प्रिये ।
मद्यं मांसं तथा मीनो मुद्रा मैथुनमेव च ॥ १२९ ॥
मकारपञ्चकं पूज्यं शिवशक्तिसमागमे ।
पूजायां यद्यदानीतं भक्ष्यं भोज्यं च लेह्यकम् ॥ १३० ॥

---

१ 'त्रिंत्रिंशत् पाठः साधु ।

पेयं चोष्यं फलं पुष्पं सर्वं ,मन्त्रेण मन्त्रयेत् ।
विनाभिमन्त्रणेनैतद् यो मोहाद् भक्षयेच्छिवे ॥ १३१ ॥
स मान्त्रिकोऽपि देवेशि सहसा निरयी भवेत् ।
चतुरस्रं लिखेद्बिम्बं तत्र मीनान् निधापयेत् ॥ १३२ ॥
शोषयेद् दाहयेद् देवि स्रावयेन्मनुना शिवे ।
वायुबीजेन वाह्नेयेन वारुणेन यथाक्रमम् ॥ १३३ ॥
वेनुयोनिमहामत्स्यौ मुद्राश्चैव प्रदर्शयेत् ।
दशधा प्रजपेन्मन्त्रमानन्देश्वरभैरवम् ॥ १३४ ॥
प्रजप्य प्रपठेद्विद्या यथोक्ता कौलिकेश्वरि ।
कृतावतारो हरिणा कलिना पीडितं जगत् ॥ १३५ ॥
बलिना निगृहीतं च कौलिकाना हितेच्छया ।
भैरवीपरितोषार्थं स्वयं मीनोऽभवद् हरिः ॥ १३६ ॥
मायां च हरये विश्वं जपेदृचमतः परम् ।
त्र्यम्बकं यजामहीति मन्त्रं त्रिःसञ्जपेत् सुधीः ॥ १३७ ॥
प्रपूज्य गन्धपुष्पैस्तु प्रणमेद् देवता पराम् ।
चतुरस्रे महादेवि मांसपात्रं निधापयेत् ॥ १३८ ॥
संशोष्य सन्दह्य पलमाप्लाप्य कुलसुन्दरि ।
मुद्रात्रयं प्रदर्श्याशु प्रपठेत् कौलिको मनुम् ॥ १३९ ॥
छागलाज्येणमर्त्यांश्च[3](न्तः)कृतरूपाय विष्णवे ।
बल्यर्थं शिवशक्त्योस्तं प्रपद्ये विष्णुमव्ययम् ॥ १४० ॥
प्रतर्पयामि बल्यर्थं पवित्रीभव साम्प्रतम् ।
त्रिः पठित्वा ऋचं देवि जपेत् कौलिकसत्तमः ॥ १४१ ॥
स तद्विष्णुरिति स्मृत्वा प्रणमेद् योनिमुद्रया ।
मुद्रापात्रं समानीय स्थापयेच्चतुरश्रके ॥ १४२ ॥

---

१ 'आस्यमु' क ख ग पाठ । २ हरते सर्वपुस्तकेषु पाठ । ३ मन्त्राय' क ख ग पाठ ।

संशोषणं दाहनं च स्रावनं पूर्ववच्चरेत् ।
मुद्रात्रयं च संदर्श्य प्रपठेद् वेदवद् विधिम् ॥ १४३ ॥
देवतापूजने यानि सौरभेयानि सांप्रतम् ।
बल्यर्थं देवदेव्योश्च पवित्राणीह सिद्धये ॥ १४४ ॥
मूलं च दशधा जप्त्वा जपेदृचमनुत्तमाम् ।
(तद्विष्णोः परमं मन्त्रं मजप्योपरि कौलिकः ॥ १४५ ॥
प्रणम्य भक्तिभावेन कुण्डगोलं च शोधयेत् ।
चतुरश्रे च संस्थाप्य शोषयेद् दाहयेत् सुधीः ॥ १४६ ॥
आस्रावयेत् परंबीजैर्मुद्राभिरभिरक्षयेत् ।)
मूलं च दशधा जप्त्वा जपेदृचमथोपरि ॥ १४७ ॥
विष्णुर्योनिमिति स्मृत्वा मजप्य प्रणमेत्ततः ।
सर्वेषु देवद्रव्येषु समानीतेषु कौलिकैः ॥ १४८ ॥
ऋचमेतां जपेत् सम्यङ् मन्त्रमेनं समुद्धरेत् ।
ग्लूंम्लूंस्लूंप्लूंन्लूं देवेशि स्रान्तं खं कामकालिकम् ॥ १४९ ॥
अमृतेऽप्यमृतोद्भूतेऽप्यमृतेश्वरि चामृतम् ।
स्रावय-द्वयमुद्धृत्य ठद्वयं च समुद्धरेत् ॥ १५० ॥
इयं शापहरी विद्या मकाराणां महेश्वरि ।
पञ्चानां पञ्चकल्पाना स्मरणीयार्चनाविधौ ॥ १५१ ॥
संशोध्य शिवद्रव्याणि मन्त्रैर्मुद्राभिरेव च ।
ऋग्भिः क्रमेण मूलेन स्रा(पा)वयेच्च यथाक्रमम् ॥ १५२ ॥
आनन्दरससंपूर्णैः कलशामृतबिन्दुभिः ।
एवं संशोध्य द्रव्याणि परमाणि कुलेश्वरि ॥ १५३ ॥
भैरवं भैरवीं देवीं यजेद् वीरसमागमे ।
अपट्टा भैरवं देवमकृत्वा देवतार्चनम् ॥ १५४ ॥
पशुपानविधौ पीत्वा वीरोऽपि नरकं व्रजेत् ।

एवं संस्कृत्य देवेशि गुरुभक्तिपुरःसरम् ॥ १५५ ॥
यः पिबेत् परमं पानं शिवसायुज्यमाप्नुयात् ।
इतीदं परमं गुह्यं रहस्यानां रहस्यकम् ॥ १५६ ॥
अष्टसिद्धिमयं तत्त्वं गोपनीयं स्वयोनिवत् ।

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये सुराशोधनविधि-निरूपणं द्वाविंश. पटल. ॥ २२ ॥

अथ

त्रयोविंशः पटलः ।

श्रीभैरव उवाच ।
अधुना शृणु देवेशि शक्तिशोधनमुत्तमम् ।
येन[1] श्रवणमात्रेण पराशक्तिपदे लयेत् ॥ १ ॥
अदीक्षितकुलासङ्गात् सिद्धिहानिः प्रजायते ।
तत्कथाश्रवणं चेत् स्यात् ततस्तन्पगमनं यदि ॥ २ ॥
श्रीदेव्युवाच ।
कुलाचारक्रमार्चायां सिद्धिं कामयते तु यः ।
स कुलीनः कथं देव पूजयेत् कुलयोषितम् ॥ ३ ॥
श्रीभैरव उवाच ।
संशोधनमकृत्वा वै स्त्रीषु मद्येषु कौलिकः ।
कृतेऽपि सिद्धिहानिः स्यात् क्रुद्धा भवति चण्डिका ॥ ४ ॥

---

१ 'यस्य' ग पाठ ।

अभिषेकाद् भवेत् सिद्धिर्मन्त्रस्योच्चारणाच्छुभा ।
रतिकाले महेशानी दीक्षाकाले च कन्यका ॥ ५ ॥
बलाद्वा यत्नतो युक्त्या ग्रा(पां)वयेत् परयोषितम् ।
सुरया रेतसा वापि जलेन मधुनाथ वा ॥ ६ ॥
संङ्केऽभिषेचयेन्नारीं चण्डां वा मन्त्रवर्जिताम् ।
स्वकीयां परकीयां वा रूपयौवनगर्विताम् ॥ ७ ॥

श्रीदेव्युवाच ।

भगवन् देवदेवेश कुलाचारैकसिद्धये ।
कुलयोगी कथं कुर्याच्छोधनं कुलयोषिताम् ॥ ८ ॥

श्रीभैरव उवाच ।

कुलजां युवतिं वीक्ष्य नमस्कुर्यात् कुलेश्वरः ।
विधाय मानसीं पूजां मन्त्रं योगी समुच्चरेत् ॥ ९ ॥
बालां वा यौवनोन्मत्तां वृद्धां वा सुन्दरीं तथा ।
कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत ॥ १० ॥
तासां प्रहारो निन्दा च कौटिल्यमप्रियं तथा ।
सर्वथा नैव कर्तव्यमन्यथा सिद्धिरोधकृत् ॥ ११ ॥
स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव हि भूषणम् ।
स्त्रीगणेषु सदा भाव्यमन्यथा स्वस्त्रियामपि ॥ १२ ॥
विपरीतरता सापि भविता हृदयोपरि ।
साधकस्य भवेदाशु कामधेनुरिवापरा ॥ १३ ॥
नाधर्मो जायते तेन न कश्चिद् धर्महा भवेत् ।
तत्परः परतन्त्रीनां परतत्त्वे प्रलीयते ॥ १४ ॥
नटी कापालिकी वेश्या रजकी नापिताङ्गना ।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ॥ १५ ॥

---

१ ' संभोगेऽभिषिचेत् ' इति सर्वत्र पाठः ।

मालाकारस्य कन्यापि नव कन्याः प्रकीर्तिताः ।
एतासु कांचिदानीय संशोधनमथाचरेत् ॥ १६ ॥
पूजयेत् कौलिको देवि यथावद् वर्ण्यते मया ।
शक्तिशोधनमन्त्रस्य ऋषिः प्रोक्तः सदाशिवः ॥ १७ ॥
त्रिष्टुप् छन्द इति ख्यातं देवता च पराम्बिका ।
वाग्बीजं बीजमीशानि शक्तिः शक्तिरितीरिता ॥ १८ ॥
कामेशः कीलकं देवि दिग्बन्धो हरमीश्वरि ।
भोगापवर्गसिद्ध्यर्थं विनियोगो महेश्वरि ॥ १९ ॥
महानिशायामानीय नव कन्याश्च भैरवान् ।
एकादश नवाष्टौ वा कौलिकः कौलिकेश्वरि ॥ २० ॥
शोधयेन्नवभिर्मन्त्रैः पूजयेत् कौलिकोत्तमः ।
साधकः संस्पृशेदादौ कृत्वा विघ्नशोधनम् ॥ २१ ॥
भूतशुद्धिं विधायापि प्राणार्पणविधिं चरेत् ।
मन्त्रसंकल्पकं कृत्वा मुन्यादिन्यासमाचरेत् ॥ २२ ॥
विधाय मातृकान्यासं कराङ्गन्यासपूर्वकम् ।
हृत्पीठार्चां विधायाथ श्रीचक्रार्चनमाचरेत् ॥ २३ ॥
संशोध्य देवद्रव्याणि कुण्डगोलादिकं तथा ।
वीरार्चनं वीरकान्तासेवनं देवदुर्लभम् ॥ २४ ॥
यथोक्तविधिना देवीं संपूज्य श्रीपराम्बिकाम् ।
शक्तिं वामे तु संस्थाप्य पूजयेद्वर्ण्यते यथा ॥ २५ ॥
त्रिकोणं वाथ षट्कोणं त्र्यश्रत्रयमथो बहिः (बहिः) ।
शिवत्र्यश्रं कामत्र्यश्रं हेतित्र्यश्रं महेश्वरि ॥ २६ ॥
ब्रह्मत्र्यश्रं नवत्र्यश्रं सिन्दूरेण विभावयेत् ।
श्रीचक्रेषु हि नटयादिमालिन्यन्तं विचार्य च ॥ २७ ॥

---

१ 'ष पाठ । २ देवि त्र'क स पाठ ।

यामेवासां कुमारीणां कौलिकस्तु समानयेत् ।
तदीयं यन्त्रमालिख्य तस्मिंस्तामेव पूजयेत् ॥ २८ ॥
श्रीचक्रे स्थापयेद् वामे कन्यां भैरवचल्लभाम् ।
मुक्तकेशीं वीतलज्जां सर्वाभरणभूषिताम् ॥ २९ ॥
सर्वशृङ्गारशोभाढ्यां तारुण्यमदगर्विताम् ।
आनन्दलीनहृदयां सौन्दर्यातिमनोहराम् ॥ ३० ॥
शोधयेच्छुद्धिमन्त्रेण सुरानन्दामृताम्बुभिः ।
बालाबीजत्रयं देवि प्रोच्चार्य तदनन्तरम् ॥ ३१ ॥
त्रिपुरायै ततो विश्वं विश्वान्ते नामपूर्वकम् ।
इमां शक्तिं पवित्रीति कुरु-युग्मं समुद्धरेत् ॥ ३२ ॥
मम शक्तिं कुरु-युग्मं वह्निजायां समुद्धरेत् ।
मन्त्रेणानेन देवेशि कामिनीमभिषेचयेत् ॥ ३३ ॥
अभिषिच्य कुमारीं तां न्यासजालं प्रविन्यसेत् ।
मातृकावन्महादेवि कामबाणांस्ततो न्यसेत् ॥ ३४ ॥
चन्द्रबीजद्वयं देवि कामराजं च मोहनम् ।
शक्तिबीजं ततो देवि यथावद्विन्यसेत् प्रिये ॥ ३५ ॥
ललाटे वदने न्यस्य (चांसे) हृदये योनिमण्डले ।
सर्वसंक्षोभणं बाणं सर्वविद्रावणं तथा ॥ ३६ ॥
सर्वाकर्षणबाणं च सर्वसंमोहनं ततः ।
वशीकरणबाणं च पञ्चेषोः पञ्चबाणकान् ॥ ॥ ३७ ॥
विन्यस्य बाणमुद्राश्च पञ्चैता देवि दर्शयेत् ।
योनिचिह्ने जपेन्मन्त्रान् नव यान् वर्णयाम्यहम् ।[1] ३८ ॥
(१) तारं चन्द्र च वाग्बीजं कामं शक्तिं ततो वदेत् ।
नटिनीति महासिद्धिं मम देहि-युगं वदेत् ॥ ३९ ॥

---

१ 'यान् वर्ण्यते मया' क ख ग पाठ ।

ठद्वयं प्रोच्चरेदन्ते मन्त्रोऽयं नटिनीप्रियः ।
(२) कालीं कूर्चं परां शक्तिं कामं कापालिनि प्रिये ॥ ४० ॥
रेतो मुञ्च-युगं ब्रूयादन्ते दहनवल्लभा ।
देवि कापालिकीमन्त्रः कामदेववशङ्करः ॥ ४१ ॥
(३) तारद्वन्द्वं च हरितं मेघपेड्[1]दीर्घबीजकम् ।
वेश्ये कामदुघे रेतो मुञ्च-युग्माग्निवल्लभा ॥ ४२ ॥
वेश्याशोधनमन्त्रोऽयं सर्वकौलिकवल्लभः ।
(४) वेदाद्यं वाग्भवं कामं शक्तिं लक्ष्मीं परां स्मरेत् ॥ ४३ ॥
रजकीति महासिद्धिं देहि मे हर-ठद्वयम् ।
रजकीशुद्धिमन्त्रोऽयं कुलयोषिद्वशङ्करः ॥ ४४ ॥
(५) तारं तारत्रयं वस्त्रं प्रोच्चरेन्नापिताङ्गने ।
हर-युग्मं च मे विघ्नांस्तुरगं ठद्वयं ततः ॥ ४५ ॥
नापितस्त्रीशुद्धिमन्त्रो महामाङ्गल्यदायकः ।
(६) वेदाद्यं भूतिबीजं च तारं मायां धनुर्धरः ॥ ४६ ॥
ब्राह्मणि स्मर वीर्यं च मुञ्च मुञ्चेति सर्वदा ।
सिद्धिं मे देहि देहीति हरं दहनवल्लभा ॥ ४७ ॥
ब्राह्मणीशुद्धिमन्त्रोऽयं महासिद्धिप्रदायकः ।
(७) तारं रमा रमा तारं शूद्राणि च रतप्रिये ॥ ४८ ॥
रेतः स्तम्भय मे सिद्धिं देहि-युग्मं ततो वनम् ।
शूद्राणीशुद्धिमन्त्रोऽयं कामिनीजनमोहनः ॥ ४९ ॥
(८) तारकं शिवपड्दीर्घसंयुत मठबीजकम् ।
गोपालि मे सिद्धदण्डं द्रावय-द्वयमुद्धरेत् ॥ ५० ॥
ठद्वयान्तो महामन्त्रो गोपीशोधनसाधकः ।
(९) तारद्वयीसंपुटितां मृद्वीकां दीर्घसंयुताम् ॥ ५१ ॥

---

१ 'मेघवद्' इ. पाठ. ।

उद्धृत्य मालिनि प्रेम कुरु-युग्मं मयि स्मरेत् ।
तुरगं ठद्वयं प्रान्ते मन्त्रोऽयं मालिनीप्रियः ॥ ५२ ॥
एवं शोधनमन्त्रास्ते वर्णिताश्च पृथङ्मया ।
योनौ जपेत् कुमारीणां कौलिकः करमालया ॥ ५३ ॥
संजप्य दक्षकर्णे च मूलमन्त्रं त्रिरुच्चरेत् ।
अदीक्षितापि देवेशि दीक्षितैव भवेत् तदा ॥ ५४ ॥
दीक्षितां शोधितां वीरो भजेत् सर्वार्थसिद्धये ।
तारं व्योमौष्मकं च शिवायेति स्वयम्भुवम् ॥ ५५ ॥
संपूज्य शिवमन्त्रं च जपेत् संस्तभ्य पुंध्वजम् ।
जप्त्वा निरुध्य तं दण्डं करभीतुण्डमुद्रया[1] ॥ ५६ ॥
आनन्दतर्पितां कान्तां वीरः स्वानन्दविग्रहः ।
रतेन तर्पयेत् तत्र श्रीचक्रे वीरसंसदि ॥ ५७ ॥
पठन् मणवमुद्धृत्य मन्त्रराजं कुलेश्वरि ।
धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा ॥ ५८ ॥
सुषुम्नावर्त्मना नित्यमन्तर्वृत्तीर्जुहोम्यहम् ।
स्वाहान्तमन्त्रमुच्चार्य जपन् मूलं स्मरन् पराम् ॥ ५९ ॥
कुर्यान्निधुवनं मन्त्री मन्त्रसिद्धिमवाप्नुयात् ।
रतान्ते मज्जपेन्मूलं पठेन्मन्त्रमिमं पुनः ॥ ६० ॥
तारद्वयान्तरगतं परमानन्दकारणम् ।
प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचम् ॥ ६१ ॥
धर्माधर्मकलास्नेहपूर्णौ[2] वह्नौ जुहोम्यहम् ।
स्वाहान्तेनाशु मन्त्रेण शुक्रमादाय पार्वति ॥ ६२ ॥
श्रीचक्रे तर्पयेद् देवीं ततः सिद्धिमवाप्नुयात् ।
संपूज्य कान्तां सन्तर्प्य स्तुत्वा नत्वा परस्परम् ॥ ६३ ॥

---

१ 'करितुण्डाख्यमुद्रया' क. ख ग पाठः । २ 'पूर्णे' क. ख. ङ. पाठः ।

संहारमुद्रया मन्त्री शक्तिं वीरान् विसर्जयेत् ।
इतीदं परमं दिव्यं शक्तिशोधनमुत्तमम् ॥ ६४ ॥
तव स्नेहेन निर्णीतं गोपनीयं मुमुक्षुभिः ।

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये शक्तिशोधन-विधाननिरूपणं त्रयोविंशः पटलः ॥ २३ ॥

अथ

चतुर्विंशः पटलः ।

श्रीभैरव उवाच ।
शृणुष्वावहिता भूत्वा मालाशोधनमुत्तमम् ।
येन शोधनमात्रेण माला सिद्ध्यति सत्फला ॥ १ ॥
श्रीदेव्युवाच ।
माला कीदृग्विधा नाथ क्रियते कौलिकोत्तमैः ।
कियत्फला कियत्संख्या सर्वं मे वक्तुमर्हसि ॥ २ ॥
श्रीभैरव उवाच ।
नवान्ता वर्णिता संख्या कालोऽयं द्वादशावधिः ।
माला जपस्य देवेशि रहस्यमिदमैश्वरम् ॥ ३ ॥
कालात्मा सविता प्रोक्तो वह्निर्मे जपदेवता ।
द्वादशात्मा स सविता तदन्तार्मूर्तिरीरिता ॥ ४ ॥
माला रविफला प्रोक्ता संख्यया कौलिकेश्वरि ।
आवर्तयेच्च नवधा तामेव मणिमद्रये ॥ ५ ॥

अथान्तर्गुह्यमाचक्ष्व तव स्नेहेन पार्वति ।
मालारहस्यसर्वस्वं नाख्येयं यस्य कस्यचित् ॥ ६ ॥
रुद्राणां तु शतं चैकं भैरवाष्टकयोजितम् ।
कृत्वा मेरुं महारुद्रं जपमाला विनिर्मिता ॥ ७ ॥
न हन्याद् भैरवान् रुद्रैः रुद्रांश्च भैरवैस्तथा ।
अन्यथा जपहानिः स्याद्रुद्रस्य वचनं यथा ॥ ८ ॥
अष्टोत्कृष्टशतं देवि गोलकाना मुखं मुखे ।
पायुं पायौ निबध्नीयात् सूत्रे मन्त्रमनुस्मरन् ॥ ९ ॥
ऊर्ध्वे मेरुं महाकेतुं निबध्य कुलसुन्दरि ।
शङ्खमुक्ताप्रवालार्क-रुद्राक्षवरवीरुधाम् ॥ १० ॥
मणिकाञ्चनपद्माक्षनृदन्तानां यथाक्रमम् ।
सर्वेषां गोलकाना च मेरुं रुद्राक्षमाचरेत् ॥ ११ ॥
नरदन्तविरोधानां मेरुं वाजिरदं चरेत् ।
षण्मासेनाक्षसूत्राणा शोधनं साधकश्चरेत् ॥ १२ ॥
ततो जपेन्महाविद्यां कौलिको जपमालया ।
गुणैस्त्रिभिस्त्रिरावर्त्य षट्त्रिंशत्तत्त्वगोलकान् ॥ १३ ॥
तारं मेरुं विदध्यात् तु तत्त्वमालासु कौलिकः ।
अष्टोत्कृष्टशते प्रौढा मालेयं देवि दुर्लभा ॥ १४ ॥
प्रणवान्तरिता वर्णा देवि लोमानुलोमतः ।
वर्णिता मातृकामाला वेदादिहविराश्रिता ॥ १५ ॥
तारद्वयं स्वरान्ते च दद्याल्लोमानुलोमतः ।
तारद्वयं च वर्गान्ते वर्णाद्यन्ते च तद्द्वयम् ॥ १६ ॥
विधाय तुरगं मेरुं जपेच्छक्त्यर्णमालया ।
तारकामैः सपुटिता मालेयं गुरुवल्लभा ॥ १७ ॥

---

१ 'नृदन्तवीरुधा चैव' इति साधु पाठ । २ रावृत्य' सर्वत्र पाठ. ।

देवदेवस्य देवेशि स्वतन्त्रस्य महेशितुः ।
षडाननोद्भवास्तारा: षट् षडाम्नायसूचकाः ॥ १८ ॥
चतुर्णामाश्रमाणां तु शङ्खार्कवरवीरुधाम् ।
रुद्राक्षाणां प्रकुर्वीत मालां सर्वार्थसिद्धिदाम् ॥ १९ ॥
मुक्तामवालसद्रत्न-हेमपद्माक्षशालिनाम् ।
पूर्वाम्नायादिभेदानां मालां कुर्याद्यथाक्रमम् ॥ २० ॥
लोमानुलोमवर्णानां द्वयोत्कृष्टशतं शिवे ।
तारकामेन संयोज्य ब्रह्मोत्कृष्टशतं शिवे ॥ २१ ॥
चः सुमेरुं नियोज्यादौ वर्णलोमानुलोमकैः ।
स्वरवर्गयशॉल्लान्तान् योजयेत् परमेश्वरि ॥ २२ ॥
श्रीशिवाक्षरमालेयं वर्णिता स्नेहतो मया ।
श्रीमहाषोडशीविद्यागुरूनादाय पार्वति ॥ २३ ॥
षट्त्रिंशत्तत्त्वमात्राभिर्योजयेत् सप्तभिर्ग्रहैः ।
शिवामालेयमाख्याता शिवसायुज्यसिद्धये ॥ २४ ॥
पञ्चषष्ट्यक्षरीवर्णैश्चत्वारिंशतिभैरवैः ।
व्याधिकैर्योजयेन्माला भैरवीयमुदाहृता ॥ २५ ॥
अनामिकाद्वयं पर्व कनिष्ठादिक्रमेण तु ।
तर्जनीमूलपर्यन्तं करमालेयमाहृता ॥ २६ ॥
दशांशं मञ्जपेद् देवि केवलं करमालया ।
अनामिकाद्वयं पर्व कनिष्ठादिक्रमेण तु ॥ २७ ॥
तर्जनीमूलपर्यन्तं जपेद् द्वादशपर्वसु ।
कनिष्ठिकाचतुष्पर्वानामापर्वत्रयं तथा ॥ २८ ॥
मध्यमापर्व देव्येकं तर्जन्याश्च चतुष्टयम् ।
संयोज्य मंजपेद् विद्यां मन्त्री द्वादशपर्वसु ॥ २९ ॥

जपेद् द्वादशपर्वसु' क ग घ ।

शक्तिमालेयमाख्याता त्यक्त्वा पर्वचतुष्टयम् ।
दुर्गावृत्त्या जपेद् देवि सहस्राद्ययुतावधि ॥ ३० ॥
दिक्पालाश्च गृहाश्चाष्टौ सन्ति षोडशपर्वसु ।
प्रलम्बपर्वत्रितये त्रयो देवाः समाहिताः ॥ ३१ ॥
क्रूरग्रहौ च मन्दारौ दिक्पालौ यमनिर्ऋती ।
कुलिकश्चेति विख्यातो जपहानिकरो मतः ॥ ३२ ॥
कुलिकं सन्त्यजेद् देवि मन्त्री करजपे सदा ।
कनिष्ठामूलपर्वादिक्रमेण करगाः सुराः ॥ ३३ ॥
तान् शृणुष्व महादेवि यथावद्वर्ण्यते मया ।
ईशानोऽग्निर्निर्ऋतिश्च वायुरिन्द्रो यमस्तथा ॥ ३४ ॥
वरुणश्च कुबेरश्च सूर्यः सोमो बुधो गुरुः ।
मित्राद्वारसौरान्तौ ब्रह्मविष्णुमहेश्वराः ॥ ३५ ॥
जपसिद्धिकरा देवि सकलाः करदेवताः ।
कुलिकं सन्त्यजेद् देवि जपकाले स्वसिद्धये[2] ॥ ३६ ॥
कुलिको मुद्गरो ज्ञेयो मुद्गरे तु महद्भयम् ।
मुद्गरोल्लङ्घने शक्तिर्महारुद्रस्य केवलम् ॥ ३७ ॥
कुलिकं च महाकेतुं मेरुरूपं न लङ्घयेत् ।
अन्यथा देवि मन्त्री च देवताशापमाप्नुयात् ॥ ३८ ॥
अथ षण्मासिकीं शुद्धिं मालाना ते ब्रवीम्यहम् ।
यया सिद्धिर्भवेद् देवि देवानामपि दुर्लभा ॥ ३९ ॥
मालाशोधनकाले तु गत्वा प्रेतालयं सुधीः ।
विधाय भस्मना स्नानं जलेन मन्त्रितेन वा ॥ ४० ॥
तत्र स्नात्वोपविश्याथ कृत्वा विघ्नशोधनम् ।
भूतशुद्धिक्रमोपेतं प्राणार्पणविधिं ततः ॥ ४१ ॥

---

१ 'तमन्दारमुभौ तु' क ख ग. पाठः । २ 'जापको जपसिद्धये' क ख. ग. पाठः ।

देहशुद्धिं विधायाथ मन्त्रसङ्कल्पमाचरेत् ।
मालाशोधनमन्त्रस्य ऋषिः कालाग्निरुद्रकः ॥ ४२ ॥
छन्दोऽनुष्टुप् महादेवि देवी श्मशानभैरवी ।
कालरात्रीति विख्याता मुण्डमालाविलासिनी ॥ ४३ ॥
हरितं बीजमाख्यातं नलिनी शक्तिरीरिता ।
सूर्याख्यं कीलकं मालाशुद्धये विनियोगकः ॥ ४४ ॥
ऋषिच्छन्दोदैवतादिन्यासं कुर्यात् कुलार्थवित् ।
अङ्गन्यासं विधायाथ करन्यासादिपूर्वकम् ॥ ४५ ॥
विधायासनशुद्धिं च भूतशुद्धिक्रमं चरेत् ।
प्राणान् देवि प्रतिष्ठाप्य श्रीचक्रार्चनमाचरेत् ॥ ४६ ॥
योगपीठार्चनं कृत्वा द्रव्यादीनि विशोधयेत् ।
क्षेत्रेश-योगिनीवृन्दं सन्तर्प्य कुलसुन्दरि ॥ ४७ ॥
तयाङ्गं पूजयेद् देवि पूजान्ते सञ्जपेन्मनुम् ।
मालाया देवदेवेशि यथाम्नायं यथाविधि ॥ ४८ ॥
श्रीचक्रोपरि संस्थाप्य शोधयेत् कलशामृतैः ।
मालामूलेण देवेशि मूलमन्त्रेण साधकः ॥ ४९ ॥
मालामन्त्रान् प्रवक्ष्येऽहं शृणुष्वावहिता प्रिये ।
(१) तारं रमा रमा तारं शङ्खिनीति-पदं वदेत् ॥ ५० ॥
तारं मा तारमन्तेऽपो मन्त्रोऽयं शङ्खमालिकः ।
(२) तार लज्जा-युगं तारं मुक्तामालिनि मा-युगम् ॥ ५१ ॥
ठद्वयं मन्त्रराजोऽयं मुक्तामालाविशोधनः ।
(३) तारं धधूं च वेदाद्यं रौद्रे च रौद्रमालिनि ॥ ५२ ॥
अग्निबीजं ठद्वयं च मन्त्रोऽयं रौद्रमालिकः ।
(४) तारं मात्राद्यमुच्चार्य सूर्याख्यबीज-युग्मकम् ॥ ५३ ॥
अर्कमाले हरं नीरं मन्त्रः स्फटिकशुद्धिकृत् ।

(५) तारमब्धिरमायाः सिन्धुं रुद्राक्षमालिनि ॥ ५४ ॥
शुद्धा भव वनं मन्त्रो देवि रुद्राक्षशोधनः ।
(६) तारं तारात्रयं तारं वधूं तुलसि वैष्णवि ॥ ५५ ॥
वौषड् वनं महामन्त्रस्तुलसीशोधनाभिधः ।
(७) तारं तारौ च मृद्वीका मणिमाले मनोहरे ॥ ५६ ॥
ठद्वयं मन्त्रराजोऽयं मणिमालाविशोधनः ।
(८) वेदाद्यं कमला कुन्ती वाग्बीजं कामशक्तिकम् ॥ ५७ ॥
सुवर्णमाले शक्त्यापो मन्त्रोऽयं स्वर्णशोधनः ।
(९) तारं च वायुपूज्या च तारं पद्माक्षमालिनि ॥ ५८ ॥
हरितं ठद्वयं मन्त्रो देवि पद्माक्षशोधनः ।
(१०) तारत्रयं मा-त्रयं च कामराजत्रयं शिवे ॥ ५९ ॥
शिवः शक्तिर्दन्तमाले मुण्डमाले च वागुरा ।
वधूर्वह्निं वनं मन्त्रो नरदन्तविशुद्धिकृत् ॥ ६० ॥
पृथक्पृथक् महामन्त्रैः श्रीचक्रस्थां महेश्वरि ।
मालां संशोध्य संपूज्य मूलं जप्त्वा दशांशतः ॥ ६१ ॥
गन्धाक्षतप्रसूनैश्च पूजयेत् कौलिकोत्तमः ।
(११) ॐमाले माले महामाले सर्वतत्त्वस्वरूपिणि ॥ ६२ ॥
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ।
स्वाहान्तोऽयं महामन्त्रः सर्वमालाविशोधनः ॥ ६३ ॥
(१२) शिवबीजं समुच्चार्य ततोऽविघ्नं कुरु स्मरेत् ।
मे ठद्वयं महामन्त्रः सदा मालाविशोधनः ॥ ६४ ॥
एवं संशोध्य संस्कृत्य संपूज्य कुलसुन्दरि ।
मालामादाय देवेशि सञ्जपेदर्धरात्रके ॥ ६५ ॥

श्रीदेव्युवाच ।

---

१ 'तार' क ग घ. पाठः । २ 'सर्वशक्ति क. परात्परि' ग. घ ङ. पाठः । ३ 'सर्व' ग. पाठः

करमालास्तया प्रोक्ता यद्व्यस्तासां च शोधनम् ।
वद देव कथं कुर्यात् कौलिकः सर्वसिद्धये ॥ ६६ ॥

श्रीभैरव उवाच ।

काली कामः कृपा कुन्ती करमाले हरं वनम् ।
मन्त्रोऽयं करमालायाः शुद्धिदः सर्वसिद्धिदः ॥ ६७ ॥
षण्मासेनैव मालानां शोधनं साधकश्चरेत् ।
ततो जपेन्महाविद्यां सर्वसिद्धीश्वरो भवेत् ॥ ६८ ॥
इदं तत्त्वं हि तत्त्वानां सर्वस्वं पारदैवतम् ।
तव भक्त्या मयाख्यातं नाख्येयं ब्रह्मवादिभिः ॥ ६९ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये माला-तन्मन्त्रादिशोधन-निरूपणं चतुर्विंशः पटलः ॥ २४ ॥

अथ

पञ्चविंशः पटलः ।

—:-=०*०=-:—

श्रीभैरव उवाच ।

अधुना देवदेवेशि यन्त्रशोधनमुत्तमम् ।
वक्ष्यामि तव भक्त्याहं कौलिकानां हिताय च ॥ १ ॥
सौवर्णं राजतं ताम्रं स्फाटिकं रौधिकं तथा ।
कापालिकं च पाशासं श्रीचक्रं वैष्णवारिमकम् ॥ २ ॥
एतेष्वष्टसु दिव्येषु योगपीठेषु पार्वति ।

कृत ' ग. पाठः ।

विभावयेन्महायन्त्रं दैवं भौमं च भाविकम् ॥ ३ ॥
ऊर्ध्वरेखमधोरेखं तृतीयं गन्धचित्रितम् ।
त्रिविधं यन्त्रमीशानि सुसिद्धं[1] सिद्धसाध्यकम् ॥ ४ ॥
सहस्राभं च पाशासं शोधयेदुत्तरायणे ।
पञ्चमे पञ्चमे देवि ततः सिद्धिप्रदं भवेत् ॥ ५ ॥
शराङ्कुशं वैष्णवाश्मं शोधयेद् दक्षिणायने ।
चतुर्थे च चतुर्थे च ततः सिद्धिमवाप्नुयात् ॥ ६ ॥
सौवर्णं स्फाटिकं यन्त्रं वर्षान्ते शोधयेत् सुधीः ।
राजतं ताम्रिकं यन्त्रं षण्मासान्ते च शोधयेत् ॥ ७ ॥
एवं मयोक्तकालेषु शोधयेद् यन्त्रमीश्वरि ।
सिद्धये कौलिको देवि यथावद्वर्ण्यते मया ॥ ८ ॥
यन्त्रशोधनमन्त्रस्य ऋषिः प्रोक्तो मया शिवः ।
त्रिष्टुप् छन्द इति ख्यातं पराशक्तिश्च देवता ॥ ९ ॥
रमा बीजं परा शक्तिः कामः कीलकमीश्वरि[2] ।
श्रीचक्रशुद्धिसिद्ध्यर्थं विनियोगः प्रकीर्तितः ॥ १० ॥
मुन्यादिना चरेन्न्यासं करन्यासं षडङ्गकम् ।
ततो विघ्नशुद्धिं च प्राणार्पणविधिं चरेत् ॥ ११ ॥
इष्टर्षिदेवतान्यासं कराङ्गन्यासमाचरेत् ।
विधाय मातृकान्यासं लयाङ्गन्यासमंयुतम् ॥ १२ ॥
अर्धनारीश्वरन्यासं षोढान्यासमतः परम् ।
मूलत्रिखण्डकं न्यासं कृत्वा प्राणचयं शिवे ॥ १३ ॥
पीठपूजां स्वहृदये कृत्वा षट्चक्रदीपनम् ।
स्वर्णसिंहासने स्थाप्य श्रीचक्रं स्वेष्टदैवतम् ॥ १४ ॥
शोधयेन्मधुना देवि कुण्डगोलोद्भवेन वा ।

---

१ 'सुसिद्धं' क. ग. ङ. पाठः । २ 'कमुच्यते' ग. पाठः ।

अष्टगन्धेन वा देवि पौरुषेण रसेन वा ॥ १५ ॥
इज्याज्येन महादेवि संस्थाप्य कुलपूजिते ।
श्रीचक्रं मूलमन्त्रेण पूजयेत् तत्र कौलिकः ॥ १६ ॥
(१) वाग्भवं शक्तिबीजं वाक् शक्तिं चक्रेश्वरि प्रिये ।
यन्त्रं सौवर्णमुद्धृत्य शोधय-द्वयमुद्धरेत् ॥ १७ ॥
ठद्वयं स्वर्णयन्त्रस्य मन्त्रः शोधनकारकः ।
(२) तारं सिन्धुं च तारं च राजतं यन्त्रमुद्धरेत् ॥ १८ ॥
शोधय-द्वयमापश्च यन्त्रशोधनको मनुः ।
(३) तारं तारा च तारं च वधूं तारं च तारका ॥ १९ ॥
ताम्रेश्वरीति यन्त्रं मे शोधयापो महामनुः ।
(४) वेदाद्यं कमलां मायां तारं यन्त्रं कुलाम्बिके ॥ २० ॥
शोधय-द्विर्वह्निं मन्त्रः स्फाटिकारमविशोधनः ।
(५) प्रणवं कूर्चबीजं मा माया वायुपूजिता ॥ २१ ॥
रुद्रेश्वरि परा यन्त्रं शोधयापो मनुः स्मृतः ।
(६) तारं वाक् कामराजश्च शक्तिः कपालमालिनि ॥ २२ ॥
यन्त्रं शोधय ठद्वन्द्वं कपालशोधनो मनुः ।
(७) तारं गौरी च तार्तीयं वाक् कामश्च चितासने ॥ २३ ॥
यन्त्रं शोधय ठद्वन्द्वं मनुः पाशाम्बुशोधनः ।
(८) वेदाद्यं हरितं वाणी शक्तिः कामो रमा रमा ॥ २४ ॥
नित्ये विष्णुशिलायन्त्रं शोधयापो मनुः स्मृतः ।
इत्येवं यन्त्रमीशानि रत्नसिंहासनस्थितम् ॥ २५ ॥
मूलमन्त्रेण संस्नाप्य पूर्वोक्तौषधवारिणा ।
मन्त्रैरेभिः प्रजप्तैश्च पूजयेद् गन्धमाल्यकैः ॥ २६ ॥
संपूज्य देवि संशोध्य ततः पूजां शिवोदिताम् ।

---

१ 'पुष्पकैः' क ग घ ङ. पाठ । २ 'पूर्णं' च ग पाठः । ३ 'दितम्' ग. घ. पाठः

यथोक्तां साधकः कुर्याद् द्रव्यशोधनपूर्वकम् ॥ २७ ॥
अष्टाङ्गपूजां निर्माय निशीथे जपमाचरेत् ।

श्रीभैरव्युवाच ।

भगवन् कुलकौलेश भैरवाष्टकमध्यग ।
निशीथकालं मे ब्रूहि संशयोऽयं महान् मम ॥ २८ ॥

श्रीभैरव उवाच ।

अर्धरात्रस्तु त्रिविधो यन्मुहूर्तचतुष्टयम् ।
निशीथो वार्धरात्रश्च तृतीयैव महानिशा ॥ २९ ॥
द्वितीये च तृतीये च यामे यामलभैरवि ।
मुहूर्ते द्वे समादाय तथा द्वे च महेश्वरि ॥ ३० ॥
द्वे मुहूर्ते निशीथस्तु परतो द्वे मुहूर्तके ।
अर्धरात्रो मुहूर्ते द्वे पूजार्हः परमेश्वरि ॥ ३१ ॥
मुहूर्तैकं समादाय परतश्चैकमीश्वरि ।
यामद्वयादर्धरात्रो वर्णितः कौलसिद्धये ॥ ३२ ॥
शिवे मध्यमयोः सन्धिर्यामयोर्या महानिशा[1] ।
तस्यां परां जपेद्यस्तु स भवेच्छिवसन्निभः ॥ ३३ ॥
निशीथे पूजयेद्यन्त्रमर्धरात्रे जपेन्मनुम् ।
महानिशायां प्रजपेत् परां कौलिकसत्तमः ॥ ३४ ॥
किं किं न साधयेल्लोके यन्ममापि हि दुर्लभम् ।
रजः शुक्रं सुरां देवि मांसं मीनं च मैथुनम् ॥ ३५ ॥
सर्वथा शोधयेद् देवि मूलमन्त्रेण मान्त्रिकः ।
पिबेन्मद्यं भजेद्रामा स्मरेद् भैरविभैरवम् ॥ ३६ ॥
नमेद्गुरुं जपेद् विद्यामिति कौलमतं परम् ।
प्रातःकृत्यं शिवे कृत्वा श्रीचक्रं पूजयेत् ततः ॥ ३७ ॥


---

१ 'न्धि यादयो' ग घ पाठः ।

जपेन्मन्त्री महाविद्यां स्तोत्रपाठं चरेत् ततः ।
परां जपेत् सदा सत्यां ततो याति परं पदम् ॥ ३८ ॥
महापदि महोत्पाते महाशोके महाभये ।
महामोहे महाऽऽख्ये महादारिद्र्यसङ्कटे ॥ ३९ ॥
महारण्ये महाशून्ये[1] महाऽज्ञाने महारणे ।
दुरापदि दुराशे च दुर्भिक्षे दुर्निमित्तके ॥ ४० ॥
समस्तक्लेशसङ्घाते स्मरेद् देवि पराम्बिकाम् ।
वक्त्रे सरस्वती तस्य लक्ष्मीस्तस्य गृहे सदा ॥ ४१ ॥
धन्या च जननी तस्य येन देवी समर्चिता ।
इदं सारं हि तन्त्राणां मन्त्राणां तत्त्वमुत्तमम् ।
मयोदितं तव स्नेहान्नाख्येयं ब्रह्मवादिभिः ॥ ४२ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये भैरवभैरवीसंवादे परमार्थप्रदीपिकायां यन्त्रशोधनादिविधि-जप-पूजाकालनिरूपणं पञ्चविंशः पटलः ॥ २५ ॥

समाप्तमिदं पूर्वार्धम् ।



अथ

षड्विंशः पटलः ।

श्रीभैरव्युवाच ।

भगवन् भूतभव्येश[1] कुलधर्मप्रकाशक ।
कुलेश श्रोतुमिच्छामि तन्त्रसाम्योत्तरार्धकम् ॥ १ ॥

श्रीभैरव उवाच ।

अधुना देवि कौलेशि कौलिकानां हितेच्छया ।
तन्त्रोत्तरार्धं वक्ष्यामि रहस्यविजयाभिधम् ॥ २ ॥
दुर्गादेवी परादेवी पराशक्तिः पराम्बिका ।
देवदेवीति या ख्याता गायत्रीति श्रुतौ स्मृता ॥ ३ ॥
तेजोमयी महाश्यामा महात्रिपुरसुन्दरी ।
पञ्चात्मिका पञ्चमीशी पञ्चव्योमप्रकाशिनी ॥ ४ ॥
उग्रदुर्गा परा या श्रीस्तज्ज्योतिः परमं पदम् ।
परादेवीति या दुर्गा सा शिवः सा हरिः स्मृता ॥ ५
सा सूर्यः सविता सैव महागणपतिः स्मृता ।
पञ्चमी पञ्चिका देवी पञ्चमाचारवर्तिनी ॥ ६ ॥
पञ्चाक्षरीति गायत्री परमात्मेति कीर्त्यते ।
पञ्चकृत्यमयी देवी सर्वदेवीमयी शिवा ॥ ७ ॥
गणेशार्कहरीशान-दुर्गारूपा सरस्वती ।
महाश्यामा महाविद्या पूजनीया यथाक्रमम् ॥ ८ ॥
न कुर्याद् भेदमेतेषां कौलिको वैष्णवोऽथवा ।
गणेशार्कहरीशान-दुर्गाणां परमार्थवित् ॥ ९ ॥

---

१ 'भव' ग. ङ पाठ । २ 'विख्याता' क पाठः । ३ 'वेद्य' क ख ग पाठः ।

पूजयेदैक्यभावेन देवीभक्त्यैव भक्तिमान् ।
देवीचक्रेऽर्चयेत् सर्वांश्छबलिङ्गेऽथवा शिवे ॥ १० ॥
सालिग्रामशिलायां वा सूर्यपीठेऽथवा प्रिये ।
श्रीगणेश्वरचक्रेण न भेदं कारयेद् बुधः ॥ ११ ॥
भेदं वै कुरुते यस्तु स शैवः शिवहा भवेत् ।
पृथक् पृथक् शिवे कुर्यादर्चनं कौलिकोत्तमः ॥ १२ ॥
गणेशस्य च सूर्यस्य विष्णोर्देवि शिवस्य च ।
श्रीदेव्या उग्रदुर्गाया मन्त्री देवीरहस्यवित्[1] ॥ १३ ॥
अद्याहं तव देवेशि प्रेम्णा वक्ष्ये कुलात्मकम् ।
रहस्यविजयं नाम तन्त्रं तन्त्रोत्तरार्धकम् ॥ १४ ॥
पञ्चाङ्गभूतमेतेषां सर्वमन्त्रार्चनामयम् ।
गणेशस्य च पञ्चाङ्गं पञ्चाङ्गं सवितुस्तथा ॥ १५ ॥
लक्ष्मीनारायणस्यापि पञ्चाङ्ग श्रीशिवस्य च ।
दुर्गादेव्याश्च पञ्चाङ्गं दुर्गादेवीरहस्यकम् ॥ १६ ॥
उत्तरार्धमिति प्रोक्तं तन्त्रस्यास्य महेश्वरि ।
सर्वस्वमेतद् देवेशि तन्त्र देवीरहस्यकम् ॥ १७ ॥
अवक्तव्यमभक्तेभ्यो गोपयेत् कुलनायकः ।
प्रथमं देवि पञ्चाङ्गं महागणपतेः शृणु ॥ १८ ॥
येन श्रवणमात्रेण विघ्ननाशो भवेत् क्षणात् ।
मेरुपृष्ठे सुखासीनं महादेव त्रिलोचनम् ॥ १९ ॥
सुरासुरगणैर्युक्त ब्रह्माच्युतनमस्कृतम् ।
सिद्धकिन्नरगन्धर्वैर्यक्षभूतपिशाचकैः ॥ २० ॥
तोषितं नतिभिः स्तोत्रैः पार्वतीसहित शिवम् ।
सस्मितं भाषमाण च ब्रह्मणा हरिणा सह ॥ २१ ॥

---

[1] 'वत्' क. पाठ. । २ 'तन्त्र' क ख ग पाठ. ।

पार्वती प्रणता भूत्वा वचनं समभाषत ।

श्रीदेव्युवाच ।

भगवन् सर्वतत्त्वज्ञ सर्वधर्मप्रकाशक ।
कार्यस्य देवतानां च मनुष्याणां तथैव च ॥ २२ ॥
विघ्नः केन भवेद् देव संशयं छिन्दि शङ्कर ।

श्रीभैरव उवाच ।

देवि वक्ष्ये रहस्यं ते प्रश्नोत्तरमिदं महत् ।
अवक्तव्यमभक्तेभ्यो भक्तेभ्यो मुक्तिसाधनम् ॥ २३ ॥
विनायको गणाध्यक्षो गणेश इति यः प्रभुः ।
विघ्नकर्ता जगत्त्राता विघ्नहर्तेति विश्रुतः ॥ २४ ॥
तस्य भक्तस्य देवस्य मर्त्यस्यापि महेश्वरि ।
विघ्नो न बाधते जातु यस्तं संपूजयेत् सदा ॥ २५ ॥
यो जपेद् देवि तन्मन्त्रं कवचं तस्य धारयेत् ।
पठेन्नाम्नां सहस्रं तु स्तोत्रं मूलैकसाधनम् ॥ २६ ॥
विघ्नो न बाधते तस्य कार्यहानिर्न वा भवेत् ।

श्रीदेव्युवाच ।

देवदेव महादेव गणेशस्य जगत्प्रभो ।
मन्त्रं यन्त्रं स्तवं वर्म नाम्नां सहस्रमुत्तमम् ॥ २७ ॥
पूजां श्रोतुमहं त्वत्तो वाञ्छामि परमेश्वर ।

श्रीभैरव उवाच ।

यो देवदेवो वरदो गणेशो विघ्ननायकः ।
गजाननो गणाध्यक्षो विनायक इति श्रुतः ॥ २८ ॥
पञ्चाङ्गमखिलं तस्य वक्ष्यामि तव प्रीतये ।
तत्रादौ ते प्रवक्ष्यामि मन्त्रोद्धारं सुरेश्वरि ॥ २९ ॥

१ 'तस्य' क पाठः ।

यन्त्रोद्धारं लयाङ्गं च महागणपतेः शिवे ।

अथ मन्त्रोद्धारः—

तारं मा सकला स्मरो यठशिवौ नाम्नो वरेति द्वयं
सर्पः सर्वमतो जनं डुलिलते जीमूतशर्माक्षरम् ।
भेकी खं लवणं समीरसहितं मन्त्राश्चले ठद्वयं
ह्यष्टाविंशतिवर्णको निगदितो वैनायकोऽयं मनुः ॥ ३० ॥

इति मन्त्रोद्धारः । प्रकाशम्—ॐ श्रीं ह्रीं क्लीं ग्लाम गणपतये वरवरद सर्व-जनं मे वशमानय स्वाहा ॥ (२८)

तत्त्वलक्षं सवेदाङ्क पुरश्चर्या प्रकीर्तिता ।
वटे चतुष्पथे शून्यगृहे प्रेतालये चरेत् ॥ ३१ ॥
नास्यं विघ्नो न वाशौचं न वा मन्त्रविपर्ययः ।
न क्लेशो नच दुर्बुद्धिर्न मोहो नच शोकता ॥ ३२ ॥
सर्वथा सिद्धमन्त्रोऽयं महागणपतेः शिवे ।
यन्त्रोद्धारं प्रवक्ष्यामि सर्वाशापरिपूरकम् ॥ ३३ ॥
सर्वसंमोहनं चक्रं गणेशस्य जगत्प्रभोः ।

अथ यन्त्रोद्धारः—

त्रिकोणं खयुक्तं दशार महेशि
सुवृत्तं तथा नागपत्रं कलारम् ।
सुवृत्तं चतुर्द्वारयुक्तं प्रयुक्तं
गजास्यस्य श्रीचक्रमेतत् प्रसिद्धम् ॥ ३४ ॥

अथ ध्यानं प्रवक्ष्यामि सर्वसिद्धिप्रदायकम् ।
येन स्मरणमात्रेण सर्वे विघ्नाः पलायते ॥ ३५ ॥
उद्यत्कोटिदिवाकराशुसदृशं रक्तं किरीटोज्ज्वलं
पात्रं मोदकपूर्णमीक्षुकलशं पद्मालसद्धस्तं भुजैः ।
बिभ्राणं शुचिनागसम्भवलसत्काय भुजङ्गोज्ज्वलं
ध्यायेत् सिंहयुगासनं गणपतिं त्रैलोक्यचिन्तामणिम् ॥३६॥

---

[1] 'लस्त' सर्वत्र पाठ ।

गामित्यादिकरन्यासं हृदयादिषडङ्गकम् ।
षड्वर्गबीजमार्गेण कल्पन्यासं चरेत् ततः ॥ ३७ ॥
लयाङ्गमधुना वक्ष्ये[1] यन्त्रस्य परमेश्वरि ।
पूजनं सर्वतन्त्रेषु गोपितं शरजन्मना ॥ ३८ ॥
इन्द्रधर्मेशवरुणाः कुबेरसहितास्तथा ।
पूर्वपश्चिमयोः पूज्या दक्षिणोत्तरयोस्तथा ॥ ३९ ॥
इति द्वारपालाः ।
नन्दिवीरेशसौभाग्य-भृङ्गिरीटिविराटकाः ।
पुष्पदन्तविकर्तान्त्य-चित्तलोहितसुन्दराः ॥ ४० ॥
नूपुराढ्यविचारोग्ररूप-सुप्तविनर्तकाः ।
गणाः षोडश संपूज्याः षोडशारेषु सुन्दरि ॥ ४१ ॥
करालं विकरालं च संहारं रुरुमेव च ।
महाकालं च कालाग्निं सितास्यमसितात्मकम् ॥ ४२ ॥
अष्टपत्रेषु देवेशि पूजयेदष्ट भैरवान् ।
विनायकं विघ्नराजं गणाध्यक्षं गजाननम् ॥ ४३ ॥
हेरम्बं मोदकाहारं द्वैमातुरमरिन्दमम् ।
एकदन्तं वक्रतुण्डं दशारेषु प्रपूजयेत् ॥ ४४ ॥
कुमारं च जयन्त च प्रद्युम्नं सुरसुन्दरि ।
त्रिकोणे पूजयेद्विन्द्यौ महागणपतिं प्रभुम् ॥ ४५ ॥
गणेशं चैव गाङ्गेयं सिंहासनमतः परम् ।
विघ्नान्तकाखुवाहौ च त्रिपुरान्तकमीश्वरि ॥ ४६ ॥
उपर्युपरि सपूज्य पूजयेदायुधास्ततः ।
शतपत्रं सहस्रार दन्तमाला महेश्वरि ॥ ४७ ॥
मोदकाङ्कितपात्रं च कलश परशु ततः ।

---

१ 'लयाङ्गमथ वक्ष्येह' इ पाठ ।

शङ्खौ संपूजयेद्विन्दौ लयाङ्गमिदमुच्यते ॥ ४८ ॥
मन्त्रस्यास्य गणेशस्य ऋषिर्ब्रह्मा प्रकीर्तितः ।
गायत्र्यं छन्द इत्युक्तं देवो गणपतिः स्मृतः ॥ ४९ ॥
शिवबीजं च बीजं स्यान्मायाशक्तिरुदाहृता ।
कुरुद्वयं कीलकं स्यात् सर्वमन्त्रैकसाधनम् ॥ ५० ॥
त्रैलोक्यविजये देवि विनियोगः प्रकीर्तितः ।
अयुतं च जपेन्मूलं हुत्वा सर्पिर्यवाङ्कुरम् ॥ ५१ ॥
मोहयेत् परमेशानि मारयेद् रिपुमण्डलम् ।
अयुतं च जपेन्मूलं वटे हुत्वा चितानले ॥ ५२ ॥
स्तम्भयेदखिलांल्लोकान् वादिदस्युबलानि च ।
नद्यां साधक एवाशु जपेदयुतसंख्यया ॥ ५३ ॥
जुहुयादिभविएमासं रिपुमुच्चाटयेद् ध्रुवम् ।
विद्वेषयेच्च ब्रह्माणं गिरिजे नात्र संशयः ॥ ५४ ॥
वने निम्बरसं हुत्वा जप्त्वा मूलमथायुतम् ।
वशयेदपि राजानमाकर्षयति योषितः ॥ ५५ ॥
इतीदं पटलं गुप्त महागणपतेः शिवे ।
सर्वतन्त्रैकसर्वस्व गोपनीयं विशेषतः ॥ ५६ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये महागणपति(पटल)मन्त्रोद्धारनिरूपण षड्विंश पटल ॥ २६ ॥

अथ

सप्तविंशः पटलः ।

श्रीभैरव उवाच ।

अथाहं पद्धतिं वक्ष्ये महागणपतेः पराम् ।
गद्यैकसारसर्वस्वामानन्दैकतरङ्गिणीम् ॥ १ ॥

साधको रात्रिशेषे समुत्थाय पद्मासनं बद्ध्वा, मूलेन त्रिराचम्य स्वशिरसि सहस्रारपद्मकेसरोज्ज्वलकर्णिकान्तर्गतं निजगुरुं शुक्लालङ्कारं ध्यात्वा नत्वा, तच्छासनमादाय बहिरागत्य मलोत्सर्गशोधनं[1] विधाय, षेणौङ्कं शौचं कृत्वा नद्यादौ गत्वा वाग्भीकबीजेन दन्तान् विशोध्य शिवबीजेन गण्डूषाणि कृत्वा, श्रींह्रींक्लीं इति मलापकर्षणं स्नानं विधाय मूलेनाङ्कुशमुद्रया तत्र त्रिकोणं विलिख्य, "गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु" ॥ इति तत्र तीर्थमावाह्य, देवं सशिवं (सशक्तिं) मूलेनावाह्य मूलेन मुखं त्रिः प्रोक्ष्य त्रिरात्मानं पयसि प्रोन्मज्ज्य, "ह्रींहंसः श्रीसूर्याय" एष तेऽर्घो नमः, इत्यर्कायार्घ्यत्रयं दत्त्वा जलादुत्थाय वैदिकीं सन्ध्यां निर्वर्त्य तान्त्रिकीं कुर्यात् । ततो वामकरे जलं धृत्वा वर्मणावगुण्ठ्य मूलेन सप्तधाभिमन्त्र्य तद्गलितोदकबिन्दुभिः स्वशिरः सप्तधा प्रोक्ष्य, तज्जलमिडयान्तर्नीत्वा वामनासया विरिच्य सुषुम्नामार्गेण दक्षहस्ते निःक्षिप्य, अस्त्राय फडिति मन्त्रेण वामभागस्थशिलायामास्फालयेत्, इत्यघमर्षणं विधायाचम्य प्राणायामत्रयं चरेत् । यथा—पूरकः १६ कुम्भकः ३२ रेचकः ६४ एवं विधाय, गायत्रीं त्रिर्जपेत् । ॐह्रीं यज्ञतुण्डाय विद्महे श्रींक्लीं एकदन्ताय धीमहि क्लौं गणपतिस्तन्नः प्रचोदयात् ३, इति यथाशक्त्या जप्त्वा गायत्र्या देवीदेवयोरर्घ्यत्रयं दत्त्वा, 'मूल समस्तभुवनान्तरायहरण हरपुत्र गणगन्धर्वसिद्धवन्दितं प्रकटविकटाम्नायपरापररूपं गणाध्यक्षं गजानन महागणपतिं वरदगणेशं

१ 'मलापशोधन' ग. पाठः । २ 'शाम्बावर्णौ' क. ग. पाठ ।

गायत्रीच्छन्दसे नमो मुखे, श्रीमहागणपतिदेवतायै नमो हृदि, गं बीजाय नमो नाभौ, ह्रीं शक्तये नमो गुह्ये, कुरु कुरु कीलकाय नमः पादयोः, त्रैलोक्यविजये विनियोगाय नमः सर्वाङ्गेषु, इति ऋष्यादिन्यासः। गा अङ्गुष्ठाभ्यां नमः, हृदयाय नमः। गीं तर्जनीभ्यां नमः, शिरसे स्वाहा। गूं मध्यमाभ्यां नमः, शिखायै वषट्। गैं अनामिकाभ्यां नमः, कवचाय हुं। गौं कनिष्ठाभ्यां नमः, नेत्रेभ्यो वौषट्। गः करतलपृष्ठाभ्यां नमः, अस्त्राय फट्। इति करषडङ्गन्यासः॥ ॐआत्मतत्त्वं हृदयाय नमः। ॐविद्यातत्त्वं शिरसे स्वाहा। ॐशिवतत्त्वं शिखायै वषट्। ॐगुरुतत्त्वं कवचाय हुं। ॐयोगतत्त्वं नेत्रेभ्यो वौषट्। ॐसर्वतत्त्वमस्त्राय फट्। इति तत्त्वन्यासः॥ ॐअं कंखंगंघंङंआं हृदयाय नमः, इंचंछंजंझंञंईं शिरसे स्वाहा, उंटंठंडंढंणंऊं शिखायै वषट्, एंतंथंदंधंनंऐं कवचाय हुं, ओंपंफंबंभंमंऔं नेत्रेभ्यो वौषट्, अंयंरंलंवंशंषंसंहंळंक्षंअः अस्त्राय फट्। एवं करन्यासः। इति कलन्यासः॥ ॐगं कामरूपीठाय नमो हृदये, ॐगं काञ्चीपीठाय नमः शिरसि, ॐगं मधुपुरीपीठाय नमः शिखायां। ॐगं उड्डीयानपीठाय नमः कवचे। ॐगं अयोध्यापीठाय नमो नेत्रयोः। ॐगं जालन्धरपीठाय नमः अस्त्रे, इति पीठन्यासः॥ ॐ हृदयाय नमः। ह्रीं गणपतये शिरसे स्वाहा। श्रीं वरवरद शिखायै वषट्। क्लीं सर्वजनं मे कवचाय हुं। ग्लौं वशमानय नेत्रेभ्यो वौषट्। गं स्वाहा अस्त्राय फट्। एवं करन्यासः, इति मन्त्रन्यासः॥ एवं न्यासं विधाय श्रीचक्रं ध्यात्वा चतुरस्रं षोडशदलं

मध्ये नवरत्नखचितरत्नमयवेदिकायै नमः । उपरि रत्नसिंहासनाय नमः । उपरि उच्चैःश्वेतच्छत्राय नमः । पीठस्य कल्पितवह्निकोणादिषु धर्माय नमः, इत्यादि । कल्पितपूर्वादिषु अधर्माय नमः, इत्यादि । सिंहासनमध्ये आनन्दकन्दाय नमः । संविन्नालाय० । सहस्रदलकमलाय० । प्रकृतिमयपत्रेभ्यो० । विकृतिमयकेसरेभ्यो० । पञ्चाशद्वर्णभेदात्मसर्वतत्त्वरूपायै कर्णिकायै नमः । उपरि अं अर्कमण्डलाय नमः । सों सोममण्डलाय नमः । रं वह्निमण्डलाय नमः । तं तमसे० । रं रजसे० । सं सत्त्वाय० । ह्रौंगंह्रौं सर्वमन्त्रात्मनाय नमः । ऊँअंआं इत्यादिक्षान्तमुच्चार्य, शिवशक्तिसदाशिवेश्वर० इत्यादिसकलतत्त्वात्मने ह्रीं योगपीठाय नमः, इति योगपीठपूजां विधाय पात्राणि स्थापयेत् । स्वधामभागे त्रिकोणषट्कोणवृत्तचतुरस्ररूपं यन्त्रं विलिख्य शङ्खमुद्रां प्रदर्श्य, गां हृदयाय नमः । गीं शिरसे० । गूं शिखायै० । गैं कवचाय० । गौं नेत्रेभ्यो० । गः अस्त्राय फट् । इति त्रिपादिकां प्रक्षाल्य मूलेन संस्थाप्य, रं वह्निमण्डलाय दशकलात्मने नमः श्रीमद्गणपतिपात्रासनाय नमः इति गन्धाक्षतैरभ्यर्च्य, तदुपरि पाद्य संस्थाप्य, ओं सूर्यमण्डलाय द्वादशकलात्मने नमः श्रीमद्गणपत्यर्घ्यपात्राय नमः, ततो मूलेनापूर्य ओं चन्द्रमण्डलाय षोडशकलात्मने नमः गणपतिपात्राय नमः इति गन्धाक्षतैरभ्यर्च्य, ततोऽङ्कुशमुद्रया "गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥" इति तीर्थमावाह्य, मूलेनाष्टधाभिमन्त्र्य षडङ्गैः संपूज्य, मत्स्यमुद्रयाच्छाद्य फडिति क्षोटिकाभिः संरक्ष्य, हुमित्यवगुण्ठ्य, वमित्यमृतीकृत्य, शङ्खचक्रमुसलयोनिमुद्राः प्रदर्श्य, तेनैव जलेन यागवस्तूनि प्रोक्षयेत् । मलं ओंह्रौं परमामृतरूपेण महागणपतिचन्द्रमण्डलनिवासाय चन्द्रामृतेन पूरय पूरय द्रव्य पात्रमुकु २ ओंह्रौं जुंसः स्वाहा । अनेन सर्वं प्रोक्षयेत् । तदुत्तर पाद्यार्घ्यमनीयमधुपर्कपात्राणि संस्थाप्य संपूज्यात्मानं तन्मयं विभाव्य, ओं नमो भगवते सकलगुणात्मशक्तियुक्ताय योगपीठात्मनेऽनन्ताय नमः इति संपूज्य, सशक्तिकं देवं मूलेनावाह्य मूलेन नवमुद्राः प्रदर्श्य, मूलमष्टधा विधाय प्राणान् प्रतिष्ठाप्य स्वागतमित्युदीर्य मूलेन पाद्यार्घ्यं दद्यात् । एवं पाद्यार्घ्यमनीयमधुपर्कस्नानादि विधाय मातृकाक्षरैरभ्यर्च्य, तैर्मपदेनैवाचमनीयादीन् निवेद्य

पुष्पाञ्जलित्रयं दत्त्वा देवस्यावरणदेवताः पूजयेत् । ॐह्रींश्रीं सर्वाशापूरकचक्राय नमः इति पुष्पाञ्जलिं दत्त्वा, ॐह्रींश्रीं इन्द्राय नमः पूर्वे। ३ वरुणाय नमः पश्चिमे । ३ धर्मराजाय नमो दक्षिणे । ३ कुबेराय नमः उत्तरे । इति चतुरश्रं गन्धाक्षतैरभ्यर्च्य, प्रथमावरणम् ॥ मूलेन पुष्पाञ्जलिं दत्त्वा ॐह्रींश्रीं नन्दिने नमः । ३ वीरेशाय नमः । ३ सौभाग्याय नमः । ३ भृङ्गिरीटिने नमः । ३ विराटकाय नमः । ३ पुष्पदन्ताय नमः । ३ विकर्तनाय नमः । ३ अन्त्यगणाय नमः । ३ चित्तगणाय नमः । ३ लोहिताय नमः । ३ सुन्दराय नमः । ३ नूपुराढ्याय नमः । ३ विचाराय नमः । ३ उग्ररूपाय नमः । ३ सुताय नमः । ३ विनर्तकाय नमः । इति षोडशारं गन्धाक्षतैर्दक्षिणावर्तेनाभ्यर्च्य, द्वितीयावरणम् ॥ मूलेन पुष्पाञ्जलिं दत्त्वा ॐह्रींश्रीं करालाय नमः, ३ विकरालाय नमः, ३ संहाराय० । ३ रुरवे० । ३ महाकालाय० । ३ कालाग्नये० । ३ सितास्याय० । ३ असितात्मने नमः । इति वसुदलं गन्धाक्षतदूर्वाभिर्दक्षिणावर्तेनाभ्यर्चयेदिति तृतीयावरणम् ॥ मूलेन पुष्पाञ्जलिं दत्त्वा ॐह्रींश्रीं विनायकाय नमः । ३ विघ्नराजाय नमः । ३ गणाध्यक्षाय० । ३ गजाननाय० । ३ हेरम्बाय० । ३ मोदकाहाराय० । ३ द्वैमातुराय० । ३ अरिन्दमाय० । ३ एकदन्ताय० । ३ वक्रतुण्डाय नमः । इति गन्धाक्षतदूर्वाभिर्दशारमभ्यर्चयेदिति चतुर्थावरणम् ॥ मूलेन पुष्पाञ्जलिं दत्त्वा ३ कुमाराय नमः अग्रे । ३ जयन्ताय० दक्षे । ३ प्रद्युम्नाय० वामे । इति गन्धाक्षतदूर्वाभिः त्रिकोणमभ्यर्चयेदिति पञ्चमावरणम् ॥ मूलेन पुष्पाञ्जलिं दत्त्वा मूलविद्यामुच्चार्य ह्रीं स्वशक्तिसहिताय महागणपतये नमः इति सप्तधा विन्दुं संपूजयेदिति षष्ठावरणम् ॥ मू० ह्रीं गणेशाय नमः । ह्रीं गाङ्गेयाय नमः । ह्रीं सिंहासनाय नमः । ह्रीं विघ्नान्तकाय नमः । ह्रीं आखुवाहाय नमः । ह्रीं त्रिपुरान्तकाय नमः । इत्युपरि गन्धाक्षतदूर्वाभिरभ्यर्चयेदिति सप्तमावरणम् ॥ उपरि मूलं० ह्रीं शतपत्राय नमः, ह्रीं सहस्राराय नमः, ह्रीं दन्तमालाये नमः, ह्रीं मोदकपात्राय नमः, ह्रीं सुधाकलशाय नमः, ह्रीं परशवे नमः, ह्रीं

---

१ 'ध्येति' ग पा० ।

शङ्खाय नमः, ह्रीं पाञ्चजन्याय नमः, इति, "दर्शनेनापि शङ्खस्य किं पुनः स्पर्शनेन च । विलयं यान्ति पापानि हिमवद्भास्करोदये" ॥ इति सप्तधा संपूजयेदित्यष्टमावरणम् ॥ मूलमुच्चार्य गन्धाक्षतदूर्वापुष्पधूपदीपनैवेद्याचमनीयताम्बूलच्छत्रचामरादीन् समर्प्य, देवाग्रे संकल्पपूर्वं षडङ्गन्यासं विधाय देवं ध्यात्वा, मूलेन मालामभ्यर्च्य यथाशक्त्या मूलं जपेत् । ततो मूलमुच्चार्य देवाय जपं समर्प्य, कवचसहस्रनामस्तवराजपाठं देवाग्रे कृत्वा, मूलं "प्रातःप्रभृति सायान्तं सायादिप्रातरन्ततः । यत्करोमि गणाध्यक्ष तदस्तु तव पूजनम्" ॥ इति नत्वा संहारमुद्रया सशक्तिकं देवं विसर्जयेत् ॥

इति श्रीनित्यपूजायाः पद्धतिं गद्यरूपिणीम् ।
महागणपतेर्दिव्यां सर्वथा देवि गोपयेत् ॥ १ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये वरदगणेशपूजापद्धतिनिरूपणं सप्तविंशः पटलः ॥ २७ ॥



अथ

अष्टाविंशः पटलः ।

विघ्नेशं विश्ववन्द्यं सुविपुलयशसं लोकरक्षाप्रदक्षं
साक्षात् सर्वापदासु प्रशमनसुमतिं पार्वतीप्राणसूनुम् ।
प्रायः सर्वासुरेन्द्रैः ससुरमुनिगणैः साधकैः पूज्यमानं
कारुण्येनान्तरायामितभयशमनं विघ्नराजं नमामि ॥ २ ॥
ॐश्रींद्रींगं शिरः पातु महागणपतिः प्रभुः ।
विनायको ललाटं मे विघ्नराजो भ्रुवौ मम ॥ ३ ॥
पातु नेत्रे गणाध्यक्षो नासिकां मे गजाननः ।
श्रुती मेऽवतु हेरम्बो गण्डौ मे मोदकाशनः ॥ ४ ॥
द्वैमातुरो मुखं पातु चाधरौ पातरिन्दमः ।
दन्तान् ममैकदन्तोऽव्याद् वक्रतुण्डोऽवताद् रसाम् ॥ ५ ॥
गाङ्गेयो मे गलं पातु स्कन्धौ सिंहासनोऽवतु ।
विघ्नान्तको भुजौ पातु हस्तौ भूपकवाहनः ॥ ६ ॥
ऊरू ममावतान्नित्यं देवस्त्रिपुरघातनः ।
हृदयं मे कुमारोऽव्याज्जयन्तः पार्श्वयुग्मकम् ॥ ७ ॥
प्रद्युम्नो मेऽवतात् पृष्ठं नाभिं शङ्करनन्दनः ।
कटिं नन्दिगणः पातु शिश्नं वीरेश्वरोऽवतु ॥ ८ ॥
मेढ्रं मेऽवतु सौभाग्यो भृङ्गिरीटी च गुह्यकम् ।
विराटकोऽवतादूरू जानू मे पुष्पदन्तकः ॥ ९ ॥
जङ्घे मम निकर्तोऽव्याद् गुल्फावन्त्यगणोऽवतु ।
पादौ चित्रगणः पातु पादाधो लोहितोऽवतु ॥ १० ॥
पादपृष्ठं सुन्दरोऽव्याद् नूपुराढ्यो वपुर्मम ।
विचारो जठरं पातु भूतानि चोग्ररूपकः ॥ ११ ॥
शिरसः पादपर्यन्तं वपुः सुप्तगणोऽवतु ।
पादादिमूर्धपर्यन्तं वपुः पातु विनर्तकः ॥ १२ ॥
विस्मारितं तु यत् स्थानं गणेशस्तत् सदावतु ।

पूर्वे मां ह्रीं करालोऽव्यादाग्नेये विकरालकः ॥ १३ ॥
दक्षिणे पातु संहारो नैर्ऋते रुरुभैरवः ।
पश्चिमे मां महाकालो वायौ कालाग्निभैरवः ॥ १४ ॥
उत्तरे मां सितास्योऽव्यादैशान्यामसितात्मकः ।
प्रभावे शतपत्रोऽव्यात् सहस्रारस्तु मध्यमे ॥ १५ ॥
दन्तमाला दिनान्तेऽव्यान्निशि पात्रं सदावतु ।
कलशो मां निशीथेऽव्यान्निशान्ते परशुस्तथा ॥ १६ ॥
सर्वत्र सर्वदा पातु शङ्खयुग्मं च मद्वपुः ।
ॐॐॐ राजकुले हहौं रणभये ह्रींह्रीं कुद्यूतेऽवतात्
श्रींश्रीं शत्रुगृहे शशौं जलभये क्लींक्लीं वनान्तेऽवतु ।
ग्लौंग्लूंग्लैंग्लंगुं सच्चभीतिषु महाव्याध्यार्तिषु ग्लौंगगौं
नित्यं यक्षपिशाचभूतफणिषु ग्लौंगं गणेशोऽवतु ॥ १७ ॥
इतीदं कवचं गुह्यं सर्वतन्त्रेषु गोपितम् ।
वज्रपञ्जरनामानं गणेशस्य महात्मनः ॥ १८ ॥
अङ्गभूतं मनुमयं सर्वाचारैकसाधनम् ।
विनानेन न सिद्धिः स्यात् पूजनस्य जपस्य च ॥ १९ ॥
तस्मात् तु कवचं पुण्यं पठेद्वा धारयेत् सदा ।
तस्य सिद्धिर्महादेवि करस्था पारलौकिकी ॥ २० ॥
यंयं कामयते कामं तंतं प्राप्नोति पाठतः ।
अर्धरात्रे पठेन्नित्यं सर्वाभीष्टफलं लभेत् ॥ २१ ॥
इति गुह्यं सुकवचं महागणपतेः प्रियम् ।
सर्वसिद्धिमयं दिव्यं गोपयेत् परमेश्वरि ॥ २२ ॥

इति श्रीरुद्रयामले तन्त्र श्रीदेवीरुद्रस्ये महागणपतिकवच-
निरूपणमष्टाविंशः पटलः ॥ २८ ॥

अथ

एकोनत्रिंशः पटलः ।

श्रीभैरव उवाच ।

शृणु देवि रहस्यं मे यत्पुरा सूचितं मया ।
तव भक्त्या गणेशस्य वक्ष्ये नामसहस्रकम् ॥ १ ॥

श्रीदेवी ।

भगवन् गणनाथस्य वरदस्य महात्मनः ।
श्रोतुं नामसहस्रं मे हृदयं प्रोत्सुकायते ॥ २ ॥

श्रीभैरवः ।

आद्ये मे त्रिपुरनाशे तु जाता विघ्नकुलाः शिवे ।
मोहेन मुक्ते चेतस्ते सर्वे बलदर्पिताः ॥ ३ ॥
तदा प्रभुं गणाध्यक्षं स्तुता नामसहस्रकैः ।
विघ्ना दूरात् पलायन्त कालरुद्रादिव प्रजाः ॥ ४ ॥
तस्यानुग्रहतो देवि जातोऽहं त्रिपुरान्तकः ।
तमद्यापि गणेशानं स्तौमि नामसहस्रकैः ॥ ५ ॥
तमद्य तव भक्त्याहं साधकानां हिताय च ।
महागणपतेर्वक्ष्ये दिव्यं नामसहस्रकम् ॥ ६ ॥
(पाठकानां च दातॄणां सुखसंपत्प्रदायकम् ।
दुःखापहं च श्रोतॄणां मन्त्रनामसहस्रकम्) ॥ ७ ॥

अस्य श्रीवरदगणेशसहस्रनामस्तोत्रमन्त्रस्य श्रीभैरव ऋषिः, गायत्र्यं छन्दः, श्रीमहागणपतिर्देवता, गं बीजं, ह्रीं शक्तिः, कुरु २ कीलकं, धर्मार्थकाममोक्षार्थे सहस्रनामस्तवपाठे विनियोगः । पूर्ववद् ध्यानम्—

ॐ ह्रीं श्रीं क्लीं-गणाध्यक्षो ग्लौंग-गणपतिर्गुणी ।
गुणाग्रो निर्गुणो गोप्ता गजवक्त्रो विभावसुः ॥ ८ ॥
विश्वेश्वरो विभादीप्तो दीपनो धीवरो धनी ।
सदाशान्तो जगत्तातो विश्वक्सेनो विभाकरः ॥ ९ ॥
विसम्भी विजयी वैद्यो वारानिधिरनुत्तमः ।
अणीयान् विभवी श्रेष्ठो ज्येष्ठो गाथाप्रियो गुरुः ॥ १० ॥
सृष्टिकर्ता जगद्धर्ता विश्वभर्ता जगन्निधिः ।
पतिः पीतविभूषाङ्गो रक्ताक्षो लोहिताम्बरः ॥ ११ ॥
विरूपाक्षो विमानस्थो विनयः सनयः सुधी ।
सुरूपः सारिवक्त्रः सत्यः शुद्धः शङ्करनन्दनः ॥ १२ ॥
नन्दीश्वरो सदानन्दी वन्दिस्तुत्यो विचक्षणः ।
दैत्यमर्दी मदाक्षीवो मदिरारुणलोचनः ॥ १३ ॥
सारात्मा विश्वसारश्च विश्वचारी विलेपनः ।
पर ब्रह्म पर ज्योतिः साक्षी यक्षो विकत्थनः ॥ १४ ॥
वीरेश्वरो वीरहर्ता सौभाग्यो भाग्यवर्धनः ।
भृङ्गिरीटी भृङ्गमाली भृङ्गकूजितनादितः ॥ १५ ॥
विनर्तको विनेतापि विनतानन्दनोऽर्चितः ।
वैनतेयो विनम्राङ्गो विश्वनेता विनायकः ॥ १६ ॥
विराटको विराटश्च विदग्धो विधिरात्मभूः ।
पुष्पदन्तः पुष्पहारी पुष्पमालाविभूषणः ॥ १७ ॥
पुष्पेषुमर्थनः पुष्टो विकर्ता कर्तरीकरः ।
अन्त्योऽन्तकश्चित्तगणश्चित्तचिन्तापहारकः ॥ १८ ॥
अचिन्त्योऽचिन्त्यरूपश्च चन्दनाकुलमुण्डकः ।
लिपितो लोहितो लुप्तो (१००) लोहिताक्षो विलोभकः ॥ १९ ॥

---

१ गणनाथो ख पाठ । २ नयान दा क ख पाठ ।

लुब्धाशयो लोभरतो लाभदोऽलङ्घ्यगात्मकः ।
सुन्दरः सुन्दरीपुत्रः समस्तासुरघातनः ॥ २० ॥
नूपुराढ्यो विभवदो नरो नारायणो रविः ।
विचारी वान्तदो वाग्मी वितर्की विजयेश्वरः ॥ २१ ॥
सुप्तो बुद्धः सदारूपः सुखदः सुखसेवितः ।
विकर्तनो विपचारी विनटो नर्तको नटः ॥ २२ ॥
नाट्यो नाट्यप्रियो नादोऽनन्तोऽनन्तगुणात्मकः ।
विश्वमूर्विश्वघाती च विनतास्यो विनर्तकः ॥ २३ ॥
करालः कामदः कान्तः कमनीयः कलाधरः ।
कारुण्यरूपः कुटिलः कुलाचारी कुलेश्वरः ॥ २४ ॥
विकरालो गणश्रेष्ठः संहारो हारभूषणः ।
रुरू रम्यमुखो रङ्गो रेवतीदयितो रसः ॥ २५ ॥
महाकालो महादंष्ट्रो महोरगभयापहः ।
उन्मत्तरूपः कालाग्निरग्निमूर्येन्दुलोचनः ॥ २६ ॥
सितास्यः सितमाल्यश्च सितदन्तः सितांशुमान् ।
असितात्मा भैरवेशो भाग्यवान् भगवान् भगः ॥ २७ ॥
भगात्मजो भगावासो भगदो भगवर्धनः ।
शुभङ्करः शुचिः शान्तः श्रेष्यः श्रव्यः शचीपतिः ॥ २८ ॥
वेदाद्यो वेदकर्ता च वेदवेद्यः सनातनः ।
विद्याप्रदो वेदसारो वैदिको वेदपारगः ॥ २९ ॥
वेदध्वनिरतो धीरो वरो वेदागमार्थवित् * ।
तत्त्वज्ञः सर्वगः साधुः सदयः § मद् (२००) अमन्मयः ॥ ३० ॥
निरामयो निराकारो निर्भयो नित्यरूपभृत् ।

---

१ 'निधि' क ख ग पाठ । २ 'रण' ङ पाठ । इदं नामत्रयम् । ३ सन्मय इति नामच्छेदः ।

निर्वैरो वैरिविध्वंसी मत्तवारणसन्निभः ॥ ३१ ॥
शिवङ्करः शिवसुतः शिवः सुखविवर्धनः ।
श्वैत्यः श्वेतः शतमुखो मुग्धो मोदकभोजनः ॥ ३२ ॥
देवदेवो दिनकरो धृतिमान् द्युतिमान् धवः ।
शुद्धात्मा शुद्धमतिमाञ्छुद्धदीप्तिः शुचिव्रतः ॥ ३३ ॥
शरण्यः शौनकः शूरः शरदम्भोजधारकः ।
दारकः शिखिवाहेष्टः शीतः शङ्करवल्लभः ॥ ३४ ॥
शङ्करो निर्भवो[2] नित्यो लयकृल्लास्यतत्परः ।
लूतो लीलारसोल्लासी विलासी विभ्रमो भ्रमः ॥ ३५ ॥
भ्रमणः शशभृत् सूर्यः शनिर्धरणिनन्दनः ।
बुद्धो विबुधसेव्यश्च बुधराजो बलन्धरः ॥ ३६ ॥
जीवो जीवप्रदो जैत्रः स्तुत्यो नुत्यो नतिप्रियः ।
जनको जिनमार्गज्ञो जैनमार्गनिवर्तकः ॥ ३७ ॥
गारीसुतो गुरुरवो गौराङ्गो गजपूजितः ।
पर पद परं धाम परमात्मा कविः कुजः ॥ ३८ ॥
राहुर्दैत्यशिरश्छेदी केतुः कनककुण्डलः ।
ग्रहेन्द्रो ग्राहितो ग्राह्योऽग्रणीर्घुर्घुरनादितः ॥ ३९ ॥
पर्जन्यः पीवरो पोत्री पीनवक्षाः पराजितः ।
वनेचरो वनपतिर्वनवासः सरोपमः ॥ ४० ॥
पुण्य पूतः पवित्र च परात्मा पूर्णविग्रहः ।
पूर्णेन्दुशकलाकारो मन्युः पूर्णमनोरथः ॥ ४१ ॥
युगात्मा युगभृद् यज्ञा (३००) याज्ञिको यज्ञवत्सलः ।
यशस्वी यजमानेष्टो वज्रभृद् वज्रपञ्जरः ॥ ४२ ॥

---

[1] 'शिवानन्दविवर्धन' क ख ङ पाठ । [2] 'निर्भय' क ख पाठ । [3] 'मन्' ख पाठ । [4] याग क ग ङ पाठ ।

मणिभद्रो मणिमयो मान्यो मीनध्वजाश्रितः ।
मीनध्वजो मनोहारी योगिनां योगवर्धनः ॥ ४३ ॥
द्रष्टा स्रष्टा तपस्वी च विग्रही तापसप्रियः ।
तपोमयस्तपोमूर्तिस्तपनश्च तपोधनः ॥ ४४ ॥
रुचको मोचको रुष्टस्तुष्टस्तोमरधारकः ।
दण्डी चण्डांशुरव्यक्तः कमण्डलुधरोऽनघः ॥ ४५ ॥
कामी कर्मरतः कालः कोलः क्रन्दितदिङ्मुखः ।
आमको जगतिपूज्यश्च जाड्यहा जडसूदनः ॥ ४६ ॥
जालन्धरो जगद्वासी हासकृद् हवनो हविः ।
हविष्मान् हव्यवाहार्चो हाटको हाटकाङ्गदः ॥ ४७ ॥
सुमेरुर्हिमवान् होता हरपुत्रो हलङ्कषः ।
हालाप्रियो हृदाशान्तः कान्ताहृदयपोषणः ॥ ४८ ॥
शोषणः क्लेशहा क्रूरः कठोरः कठिनाकृतिः ।
कृवरो धीमयो व्याता ध्येयो धीमान् दयानिधिः ॥ ४९ ॥
दविष्ठो दमनो धुस्यो दाता नाता सितः समः ।
निर्गतो नैगमी गम्यो निर्जेयो जटिलोऽजरः ॥ ५० ॥
जनजीवो जितारातिर्जगद्व्यापी जगन्मयः ।
चामीकरनिभोऽनाद्यो नलिनायतलोचनः ॥ ५१ ॥
रोचनो मोचनो मन्त्री मन्त्रकोटिसमाश्रितः ।
पञ्चभूतात्मकः पञ्चसायकः पञ्चचक्रकः ॥ ५२ ॥
पञ्चमः पश्चिमः पूर्वः (४००) पूर्णः कीर्णालकः कृणिः ।
कठोरहृदयो ग्रीवालङ्कृतो लालिताशयः ॥ ५३ ॥
लोलचिरो बृहन्नासो मासपत्तर्तुरूपवान् * ।
ध्रुवो द्रुतगतिर्धर्म्यो धर्मी नाकिप्रियोऽनलः ॥ ५४ ॥

---

१ 'मणिमयः' क ख ग पाठ । २ 'नाभ्य' ङ पाठ । * इदं नामत्रयम् ।

अगस्त्यो ग्रस्तभुवनो भुवनैकमलापहः ।
सागरः स्वर्गतिः स्वद्यः सानन्दः साधुपूजितः ॥ ५५ ॥
सतीपतिः समरसः सनकः सरलः सुरः ।
सुराप्रियो वसुपतिर्वासवो वसुपूजितः ॥ ५६ ॥
वित्तदो वित्तनाथश्च धनिनां धनदायकः ।
राजी राजीवनयनः स्मृतिदः कृत्तिकाम्बरः ॥ ५७ ॥
आश्विनोऽश्वमुखः शुभ्रो भरणो भरणीप्रियः ।
कृत्तिकासनगः कोलो रोही रोहणपादुकः ॥ ५८ ॥
ऋक्षवेष्टोऽरिमर्दी च रोहिणीमोहनोऽमृतम् ।
मृगराजो मृगशिरा माधवो मधुरध्वनिः ॥ ५९ ॥
आर्द्राननो महाबुद्धिर्महोरगविभूषणः ।
भूक्षेपदत्तविभवो भूकरालः पुनर्मयः ॥ ६० ॥
पुनर्देवः पुनर्जेता पुनर्जीवः पुनर्वसुः ।
तित्तिरिस्तिमिकेतुश्च तिमिचारकघातनः ॥ ६१ ॥
तिष्यस्तुलाधरो जम्भ्यो विश्लेषोऽश्लेष एणराट् ।
मानदो माधवो मादो वाचालो मघवोपमः ॥ ६२ ॥
मेध्यो मघाप्रियो भेवो महाभुण्डो महाभुजः ।
पूर्वफाल्गुनिकः स्फीतः फल्गुरुत्तरफाल्गुनः ॥ ६३ ॥
फेनिलो ब्रह्मदो ब्रह्मा हस्ततन्तुसमाश्रयः ।
घोणाहस्तश्चतुर्हस्तो हस्तिवक्त्रो हलायुधः ॥ ६४ ॥
चित्राम्बरो(५००)ऽर्चितपदः स्वादिनः स्वातिविग्रहः ।
विशाखः शिखिसेव्यश्च शिखिध्वजसहोदरः ॥ ६५ ॥
अणू रेणुः कलास्फारोऽनूरू रेणुसुतो नरः ।
अनूराधाप्रियो राध्यः श्रीमञ्ज्येष्ठः शुचिस्मितः ॥ ६६ ॥
ज्येष्ठः श्रेष्ठार्चितपदो मूलं त्रिजगतो गुरुः ।

शुचिः पूर्वस्तथाषाढश्चोत्तराषाढ ईश्वरः ॥ ६७ ॥
श्रव्योऽभिजिदनन्तात्मा श्रवो वेपितदानवः ।
श्रावणः श्रवणः श्रोता धनी धन्यो धनिष्ठकः ॥ ६८ ॥
शातातपः शातकुम्भः शतंज्योतिः शतंभिषक् ।
पूर्वाभाद्रपदो भद्रश्चोत्तराभाद्रपादितः ॥ ६९ ॥
रेणुकातनयो रामो रेवतीरमणो रमी ।
अश्वियुक् कार्तिकेयेष्टो मार्गशीर्षो मृगोत्तमः ॥ ७० ॥
पुष्यशौर्यः फाल्गुनात्मा वसन्तश्चित्रको मधुः ।
राज्यदोऽभिजिदात्मीयस्तारेशः तारकद्युतिः ॥ ७१ ॥
प्रतीतः प्रोज्झितः प्रीतः परमः पारमो हितः ।
परहा पञ्चभूः पञ्चवायुः पूज्यः परं महः ॥ ७२ ॥
*पुराणागमविद् योग्यो महिषो रासभोऽग्रगः ।
ग्राहो मेषो वृषो मन्दो मन्मथो मिथुनार्चितः ॥ ७३ ॥
कल्कभृत् कटको दीनो मर्कटः कर्कटो घृणी ।
कुक्कुटो वनजो हंसः परहंसः मृगालकः ॥ ७४ ॥
सिंहः सिंहासनो मूषो मोघो मूषकवाहनः (६००) ।
पुत्रदो नरकत्राता कन्याप्रीतः कुलोद्वहः ॥ ७५ ॥
अतुल्यरूपो बलदस्तुलाभृत् तुल्यसाक्षिकः ।
आलिचापधरो धन्वी कच्छपो मकरो मणिः ॥ ७६ ॥
स्थिरः प्रभुर्महाकर्मी महाभोगी महायशाः ।
वसुमूर्तिधरो व्यग्रोऽसुरहारी यमान्तकः ॥ ७७ ॥
देवाग्रणीर्गणाध्यक्षो ह्यम्बुजालो महामनिः ।
अङ्गदी कुण्डली भक्तिप्रियो भक्तविवर्धनः ॥ ७८ ॥
गाणपत्यप्रदो मायी वेदवेदान्तपारगः ।

'प्रेयो' क ख पाठः । * इद नामद्वयम् ।

कात्यायनीसुतो ब्रह्मपूजितो विघ्ननाशनः ॥ ७६ ॥
संसारभयविध्वंसी महोरस्को महीधरः ।
विघ्नान्तको महाग्रीवो भृशं मोदकमोदितः ॥ ८० ॥
वाराणसीप्रियो मानी गहन आखुवाहनः ।
गुहाशयो विष्णुपदीतनयः स्थानदो ध्रुवः ॥ ८१ ॥
परार्द्धिस्तुष्टो विमलो मौलिमान् वल्लभाप्रियः ।
चतुर्दशीप्रियो मान्यो व्यवसायो मदान्वितः ॥ ८२ ॥
अचिन्त्यः सिंहयुगलनिविष्टो बालरूपधृत् ।
धीरः शक्तिमतां श्रेष्ठो महाबलसमन्वितः ॥ ८३ ॥
सर्वात्मा हितकृद् वैद्यो महाकुक्षिर्महामतिः ।
करणं मृत्युहारी च पापसङ्घनिवर्तकः ॥ ८४ ॥
उद्भिद् वज्री महादैत्यसूदनो दीनरक्षकः ।
भूतचारी प्रेतचारी बुद्धिरूपो मनोमयः ॥ ८५ ॥
अहङ्कारवपुः सांख्यपुरुषास्त्रिगुणात्मकः ।
तन्मात्ररूपो भूतात्मा इन्द्रियात्मा वशीकरः ॥ ८६ ॥
मलत्रयबहिर्भूतो ह्यवस्थात्रयवर्जितः ।
नीरूपो बहुरूपश्च किन्नरो नागविक्रमः ॥ ८७ ॥
एकदन्तो महावेगः सेनानी खिदशाधिपः ।
विश्वकर्ता विश्वबीजं (७००) श्रीः संपद्धृतिर्मतिः ॥ ८८ ॥
सर्वशोषकरो वायुः सूक्ष्मरूपः सुनिश्चलः ।
संहर्ता सृष्टिकर्ता च स्थितिकर्ता लयाश्रितः ॥ ८९ ॥
सामान्यरूपः सामास्योऽथर्वशीर्षा यजुर्भुजः ।
ऋगीक्षणः काव्यकर्ता शिक्षाकारी निरुक्तवित् ॥ ९० ॥
शेषरूपधरो मुख्यः शब्दब्रह्मस्वरूपभाक् ।

विचारवाञ्शङ्खधारी सत्यव्रतपरायणः ॥ ९१ ॥
महातपा घोरतपाः सर्वदो भीमविक्रमः ।
सर्वसंपत्करो व्यापी मेघगम्भीरनादभृत् ॥ ९२ ॥
समृद्धो भूतिदो भोगी वेशी शङ्करवत्सलः ।
शम्भुभक्तिरतो मोक्षदाता भवदवानलः ॥ ९३ ॥
सत्यस्तपा ध्येयमूर्तिः कर्ममूर्तिर्महांस्तथा ।
* समष्टिव्यष्टिरूपश्च पञ्चकोशपराङ्मुखः ॥ ९४ ॥
तेजोनिधिर्जगन्मूर्तिश्चराचरवपुर्धरः ।
प्राणदो ज्ञानमूर्तिश्च नादमूर्तियुतोऽक्षरः ॥ ९५ ॥
भूताद्यस्तैजसो भावो निष्कलश्चैव निर्मलः ।
कूटस्थश्चेतनो रुद्रः क्षेत्रवित् पुरुषो बुधः ॥ ९६ ॥
अनाधारोऽप्यनाकारो धाता च विश्वतोमुखः ।
अग्रतवर्यवपुः स्कन्दानुजो भानुर्महाप्रभः ॥ ९७ ॥
यज्ञहर्ता यज्ञकर्ता यज्ञानां फलदायकः ।
यज्ञगोप्ता यज्ञमयो दक्षयज्ञविनाशकृत् ॥ ९८ ॥
वक्रतुण्डो महाकायः कोटिसूर्यसमप्रभः ।
एकदंष्ट्रः कृष्णपिङ्गो विकटो धूम्रवर्णकः ॥ ९९ ॥
टङ्कधारी जम्बुकश्च नायकः शूर्पकर्णकः ।
सुवर्णगर्भः सुमुखः श्रीकरः सर्वसिद्धिदः ॥ १०० ॥
सुवर्णवर्णो हेमाङ्गो महात्मा चन्दनच्छविः ।
स्वङ्गः स्वचः (८००) शतानन्दो लोकमिल्लोकविग्रहः ॥ १०१ ॥
इन्द्रो जिष्णुर्धूमकेतुर्वह्निः पूज्यो दवान्तकः ।
पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः ॥ १०२ ॥

* इदं नामद्वयम् ।

कुम्भभृत् कलशी कुञ्जो मीनमांससुतर्पितः ।
‡राशितारागृहमयस्तिथिरूपो जगद्विभुः ॥ १०३ ॥
प्रतापी प्रतिपत्प्रेयान् द्वितीयोऽद्वैतनिश्चितः ।
त्रिरूपश्च तृतीयाग्निस्त्रयीरूपस्त्रयीतनुः ॥ १०४ ॥
चतुर्थीवल्लभो देवो पारगः पञ्चमीरवः ।
षड्रसास्वादकोऽजातः षष्ठी षष्टिकवत्सरः ॥ १०५ ॥
सप्तार्णवगतिः सारः सप्तमीश्वर ईहितः ।
अष्टमीनन्दनोऽनार्तो नवमीभक्तिभावितः ॥ १०६ ॥
दशदिक्पतिपूज्यश्च दशमी द्रुहिणो द्रुतः ।
एकादशात्मा गणपो द्वादशीयुगचर्चितः ॥ १०७ ॥
त्रयोदशमनुस्तुत्यश्चतुर्दशसुरप्रियः ।
चतुर्दशेन्द्रसंस्तुत्यः पूर्णिमानन्दविग्रहः ॥ १०८ ॥
दर्शादर्शो दर्शनश्च वानप्रस्थो मुनीश्वरः ।
मौनी मधुरनाड्मूल मूर्तिमान् मेघवाहनः ॥ १०९ ॥
महागजो जितक्रोधो जितशत्रुर्जयाश्रयः ।
रौद्रो रुद्रप्रियो रुक्मो रुद्रपुत्रोऽघतापनः ॥ ११० ॥
भवप्रियो भवानीष्टो भारभृद् भूतभावनः ।
गान्धर्वकुशलोऽकुण्ठो वैकुण्ठो विष्णुसेवितः ॥ १११ ॥
वृत्रहा विघ्नहा सीरः समस्तदुरितापहः ।
मञ्जुलो मार्जनो मत्तो दुर्गापुत्रो दुरालसः ॥ ११२ ॥
अनन्तचित्सुधाधारो वीरो वीर्यैकसाधकः ।
भास्वन्मुकुटमाणिक्यः कूजत्किङ्किणिजालकः ॥ ११३ ॥
शुण्डाधारी तुण्डचलः कुण्डली मुण्डमालकः ।

---

‡ इदं नामत्रयम् ।

पद्माक्षः पद्महस्तश्च (९००) पद्मनाभसमर्चितः ॥ ११४ ॥
उद्गीथो नरदन्ताढ्यमालाभूषणभूषितः ।
नारदो वारणो लोलश्रवणः शूर्पकश्रवाः ॥ ११५ ॥
बृहदुल्लासनासाढ्यव्याप्तत्रैलोक्यमण्डलः ।
इलामण्डलसंभ्रान्तकृतानुग्रहजीवकः ॥ ११६ ॥
बृहत्कर्णाञ्चलोद्भूतवायुर्वाञ्छितदिक्कटः ।
बृहदास्यरवाक्रान्तभीमब्रह्माण्डभाण्डकः ॥ ११७ ॥
बृहत्पादसमाक्रान्तसप्तपातालवेपितः ।
बृहद्दन्तकृतात्युग्ररणानन्दरसालसः ॥ ११८ ॥
बृहद्धस्तधृताशेषायुधनिर्जितदानवः ।
स्फुरत्सिन्दूरवदनः स्फुरत्तेजोग्निलोचनः ॥ ११९ ॥
उद्दीपितमणिस्फूर्जन्नूपुरध्वनिनादितः ।
चलत्तोयप्रवाहाढ्यनदीजलकणाकुलः ॥ १२० ॥
भ्रमत्कुञ्जरसङ्घातवन्दिताङ्घ्रिसरोरुहः ।
ब्रह्माच्युतमहारुद्रपुरःसरसुरार्चितः ॥ १२१ ॥
अशेषशेषप्रभृतिव्यालजालोपसेवितः ।
गर्जत्पञ्चाननारावप्राप्ताकाशधरातलः ॥ १२२ ॥
हाहाहूहूकृतात्युग्रसुरविभ्रान्तमानसः ।
पञ्चाशद्वर्णबीजाढ्यमन्त्रमन्त्रितविग्रहः ॥ १२३ ॥
वेदान्तशास्त्रपीयूषधारासाप्लावितभूतलः ।
शङ्खध्वनिसमाक्रान्तपातालादिनभस्तलः ॥ १२४ ॥
चिन्तामणिर्महामल्लो मल्लहस्तो बलिः कलिः ।
कृतत्रेतायुगोल्लासमासमानजगत्त्रयः ॥ १२५ ॥
द्वापरः परलोकैककर्मध्वान्तसुधाकरः ।
सुधासिक्तवपुर्व्याप्तब्रह्माण्डादिकटाहकः ॥ १२६ ॥

अकारादिक्षकारान्तवर्णपङ्क्तिसमुज्ज्वलः ।
अकाराकारसोद्गीततारनादनिनादितः ॥ १२७ ॥
इकारेकारमत्राढ्यमालाभ्रमणलालसः ।
उकारोकारप्रोद्गारिघोरनागोपवीतकः ॥ १२८ ॥
ऋवर्णाङ्कितऋकारपद्मद्वयसमुज्ज्वलः ।
ॡकारयुतॡकारशङ्खपूर्णदिगन्तरः ॥ १२९ ॥
एकारैकारगिरिजास्तनपानविचक्षणः ।
ओकारौकारविश्वादिकृतसृष्टिक्रमालसः ॥ १३० ॥
अंअः वर्णावलीव्याप्तपादादिशीर्षमण्डलः ।
कर्णतालकृतात्युच्चैर्वापुर्वीजितनिर्जरः ॥ १३१ ॥
गणेशध्वजरत्नाढ्यकिरीटारुणपादकः ।
गर्विताशेषगन्धर्वगीततत्परश्रोत्रकः ॥ १३२ ॥
घनवाहनवागीशपुरःसरसुरार्चितः ।
ङवर्णामृतधाराढ्यशोभमानैकदन्तकः ॥ १३३ ॥
चन्द्रकुङ्कुमजम्बालालिप्तसुन्दरविग्रहः ।
छत्रचामररत्नाढ्यमुकुटालङ्कृताननः ॥ १३४ ॥
जटाबद्धमहानर्घमणिपङ्क्तिविराजितः ।
झाकारिमधुपव्रातगाननादनिनादितः ॥ १३५ ॥
ञवर्णकृतसंहारदैत्याष्टकपूर्णमुद्गरः ।
टङ्कारुक्फलास्वादवेपिताशेषमूर्धजः ॥ १३६ ॥
ठकाराटवडकाराङ्गढकारानन्दतोषितः ।
णवर्णामृतपीयूषधाराधरसुधाधरः ॥ १३७ ॥
ताम्रसिन्दूरपुञ्जाढ्यललाटफलकच्छविः ।
थकारघनपङ्क्त्याढ्यमन्तोषितद्विजव्रजः ॥ १३८ ॥
दयामयहृदम्भोजधृतत्रैलोक्यमण्डलः ।

---

१ 'आघ्रात' ख पाठ ।

धनदादिमहायक्षसंसेवितपदाम्बुजः ॥ १३९ ॥
नमिताशेषदेवौघकिरीटमणिरञ्जितः ।
परवर्गापवर्गादिमार्गच्छेदनदक्षकः ॥ १४० ॥
फणिचक्रसमाक्रान्तगलमण्डलमण्डितः ।
बद्धभ्रूयुगभीमोग्रसंतर्जितसुरासुरः ॥ १४१ ॥
भवानीहृदयानन्दवर्धनैकनिशाकरः ।
मदिराकलशस्फीतकरालैककराम्बुजः ॥ १४२ ॥
यज्ञान्तरायसङ्घातघातसञ्जीकृतायुधः ।
रत्नाकरसुताकान्तकान्तिकीर्तिविवर्धनः ॥ १४३ ॥
लम्बोदरमहाभीमवपुर्दीनीकृतासुरः ।
वरुणादिदिगीशानरचितार्चनचर्चितः ॥ १४४ ॥
शङ्करैकप्रियप्रेमनयनानन्दवर्धनः ।
षोडशस्वरितालापगीतगानविचक्षणः ॥ १४५ ॥
समस्तदुर्गतिसरिन्नाथोत्तारणकोडुपः ।
हरादिब्रह्मवैकुण्ठब्रह्मगीतादिपाठकः ॥ १४६ ॥
क्षमापूरितहृत्पद्मसंरक्षितचराचरः ।
ताराङ्[1]मन्त्रवर्णैकविग्रहोज्ज्वलविग्रहः ॥ १४७ ॥
अकारादिक्षकारान्तविद्याभूषितविग्रहः ।
ॐश्रींविनायको ॐह्रींविघ्नाध्यक्षो गणाधिपः ॥ १४८ ॥
हेरम्बो मोदकाहारो वक्रतुण्डो विधिस्मृतेः[2] ।
वेदान्तगीतो विद्यार्थी शुद्धमन्त्रः षडक्षरः ॥ १४९ ॥
गणेशो वरदो देवो द्वादशाक्षरमन्त्रितः ।
सप्तकोटिमहामन्त्रमन्त्रिताशेषविग्रहः । १५० ॥
गाङ्गेयो गणसेव्यश्च ॐश्रींह्रीमातुरः शिवः ।
ॐह्रींश्रींक्लींग्लौंगंदेवो महागणपतिः प्रभुः (१०००) ॥ १५१ ॥

---

१ 'तारार्णं' ख. पाठ । २ 'विधि स्मृति' ग पाठः । । ३ 'सिद्ध' ख. पाठ ।

इदं नाम्ना सहस्रं ते महागणपतेः स्मृतम् ।
गुह्यं गोप्यतमं गुप्तं सर्वतन्त्रेषु गोपितम् ॥ १५२ ॥
सर्वमन्त्रनिधिं दिव्यं सर्वविघ्नविनाशनम् ।
ग्रहतारामयं राशिवर्णषड्क्तिसमन्वितम् ॥ १५३ ॥
सर्वविद्यामयं ब्रह्मसाधनं साधकप्रियम् ।
गणेशस्य च सर्वस्वं रहस्यं त्रिदिवौकसाम् ॥ १५४ ॥
यथेष्टफलदं लोके मनोरथप्रपूरणम् ।
अष्टसिद्धिमयं साध्य साधकानां जयप्रदम् ॥ १५५ ॥
विनार्चनं विना होमं विना न्यासं विना जपम् ।
अणिमाद्यष्टसिद्धीनां साधनं स्मृतिमात्रतः ॥ १५६ ॥
चतुर्थ्यामर्धरात्रे तु पठेन्मन्त्री चतुष्पथे ।
लिखेद्भूर्जे रवौ देवि पुण्यं नाम्ना सहस्रकम् ॥ १५७ ॥
धारयेत्तु चतुर्दश्यां मध्याह्ने मूर्ध्नि वा भुजे ।
योषिद्वामकरे बद्ध्वा पुरुषो दक्षिणे भुजे ॥ १५८ ॥
स्तम्भयेदपि ब्रह्माणं मोहयेदपि शङ्करम् ।
वशयेदपि त्रैलोक्यं मारयेदखिलान् रिपून् ॥ १५९ ॥
उच्चाटयेच्च गीर्वाणान् शमयेच धनञ्जयम् ।
वन्ध्या पुत्रान्लभेच्छीघ्रं निर्धनो धनमाप्नुयात् ॥ १६० ॥
त्रिवारं यः पठेद्रात्रौ गणेशस्य पुरः शिवे ।
नमः शक्तियुतो देवि भुक्त्वा भोगान् यथेप्सितान् ॥ १६१ ॥
प्रत्यक्षं वरदं पश्येद्गणेशं साधकोत्तमः ।
य एनं पठते नाम्ना सहस्रं भक्तिपूर्वकम् ॥ १६२ ॥
तस्य वित्तादिविभवो दासवुःसपदः सदा ।
रणे राजभये द्यूते पठेन्नाम्ना सहस्रकम् ॥ १६३ ॥
सर्वत्र जयमाप्नोति गणेशस्य प्रसादतः ।

---

१ 'इद'म पाठ ।

इतीदं पुण्यसर्वस्वं मन्त्रनामसहस्रकम् ॥ १६४ ॥
महागणपतेर्गुह्यं गोपनीयं स्वयोनिवत् ।

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये महागणपति-सहस्रनामनिरूपणमेकोनत्रिंशः पटल ॥ २९ ॥

अथ

त्रिंशः पटलः ।

श्रीदेव्युवाच ।
भगवन् परमेशान महागणपतेर्विभोः ।
स्तोत्रमद्भुतमं ब्रूहि मूलमन्त्रस्य तत्त्वतः ॥ १ ॥

श्रीभैरव उवाच ।
महागणपतेर्वक्ष्ये स्तोत्रं तत्त्वनिरूपणम् ।
जीवस्याङ्गे[1] कलौ शीघ्रं जीवन्मुक्तिप्रदायकम् ॥ २ ॥

अस्य श्रीमहागणपते. स्तोत्रस्य भैरव ऋषि गायत्र्य छन्दः श्रीमहागणपतिर्देवता ग बीज ह्रीं शक्ति हुं कुरु कुरु कीलकं जीवन्मुक्तिकामनार्थे महागणपतिस्तवराजपाठे विनियोगः ॥ ध्यानम्—

द्विचतुर्दशवर्णभूषिताङ्गं
शशिसूर्याग्निविलोचनं सुरेशम् ।
अहिभूषितकण्ठमच्युतं
भ्रमयन्तं हृदये स्मरे गणेशम् ॥ ३ ॥

---

१ * देवस्याम ट. पाठ ।

तारं नारदगीतमाद्यमनिशं यः साधकेन्द्रो जपे-
द्रात्रावह्नि निशामुखे शवगृहे शून्यालये वा प्रभो ।
तस्य स्मेरमुखाम्बुजाः प्रतिदिनं लावण्यदर्पोज्ज्वलाः
स्वर्वेश्याश्च वशीभवन्ति त्रिदिवे भूमौ समस्ता नृपाः ॥ ४ ॥
सकलां सकलां जपेद्यदा गणनाथप्रियमन्त्रमेव यः ।
सकलक्ष्मापतिमूर्धसु स्फुरच्चरणाब्जो भुवि शोभते च सः ॥ ५ ॥
कमलां कमलास्पृही च यो हृदये ध्यायति देवमध्यगाम् ।
तव मन्त्रप्रभावतस्तदा कमला सद्मनि तस्य निश्चला ॥ ६ ॥
कामराजमनिशं स्मरातुरो यो जपेद्धृदि गणेश तावकम् ।
उर्वशीवदनपद्मपट्पदो धीयतेऽधरपरागकामृतम् ॥ ७ ॥
मठं जपेद्यो निशि शून्यगेहे विमुक्तकेशो गणनाथ भक्त्या ।
रणे रिपूनिन्द्रसमान् विजित्य प्राप्नोति राज्यं नृपचक्रवर्ती ॥ ८ ॥
शिवार्णमन्तर्यदि साधको जपेदरण्यभूमौ शिवसन्निधौ विभो ।
चराचरे वै विचरेद्विमाने जगत्त्रयेऽपामरचक्रवर्ती ॥ ९ ॥
गणपतय इति मूलमनुं यो जपते भजते शृणुते पठते ।
गणकिन्नरसिद्धसुरासुरैर्नमितो लभते गाणपत्यं सः ॥ १० ॥
वर वरदेति च मन्त्रमिमं यो भजते निशि वा दिवमेऽप्यनिशम् ।
वदने वसने सदने वसते हृदि वाक् कमला तव भक्तिरपि ॥ ११ ॥
सर्वं जनं मे इति मन्त्रराजं जपन्ति ये भोजनकावसाने ।
भजन्ति ते नन्दनचन्दनादिवृक्षेषु लीलां सुरसुन्दरीभिः ॥ १२ ॥
वशमानयेति भगवन् यदि जपति स्मरतप्तहृदयश्च ।
वशमेति किन्नरसुताप्युर्वशी मतं सुरतदक्षा ॥ १३ ॥
स्वाहेति मन्त्रान्तरयुग्ममेतज्जपेद् दिनान्तेऽप्यशनादिकाले ।
रोगा अशेषा विलयं प्रयान्ति तमांसि सूर्येऽभ्युदिते यथाशु ॥ १४ ॥

---

१ 'ततः' क. ग घ पाठः ।

पद्महस्तममृतांशुसन्निभं शङ्खयुग्ममपरं च दधानम् ।
त्र्यक्षमग्निसदृशं स्मरन्ति ये ते प्रयान्ति त्रिदिवं विमानगाः ॥ १५ ॥

बिन्दुत्र्यश्रदशारवासवकलावेदाश्रमध्ये विभो
ये ध्यायन्ति भवन्तमीड्यवपुषं त्रैलोक्यरक्षापरम् ।
जित्वा भूमिमनल्पकल्पनिवहान् भुक्त्वा सहायैर्युताः
पश्चाद्यान्ति गणेश तावकपदं देवासुरैर्दुर्लभम् ॥ १६ ॥

इति गणपतेः स्तोत्रं मन्त्रात्मकं परमं जपेत्
पठति शृणुयाद्भक्त्या नित्यं समस्तरहस्यकम् ।
इह धनपतिर्लक्ष्मीमायुः सुतांल्लभतेऽचिराद्
व्रजति त्रिदिवं जीवन्मुक्तः परत्र स साधकः ॥ १७ ॥

इति स्तवोत्तमं देवि महागणपतेः परम् ।
गोप्यं गुप्तं[1] सदा गोप्यं पञ्चाङ्गं सुरसुन्दरि ॥ १८ ॥
पञ्चाङ्गं च गणेशस्य रहस्यं मम पार्वति ।
विना शिष्याय नो दद्यात् साधकाय विना तथा ॥ १९ ॥
विना दानं न दातव्यं विना दानं न ग्राहयेत् ।
अन्यथा सिद्धिहानिः स्यात् सर्वथा दानमाचरेत् ॥ २० ॥
पटलं पद्धतिं वर्म मन्त्रनामसहस्रकम् ।
स्तोत्रं पञ्चाङ्गमनिशं[2] गोपनीयं प्रयत्नतः ॥ २१ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये महागणपतेः
स्तोत्रनिरूपणं त्रिंश. पटलः ॥ ३० ॥

—:-=०*०=-:—

इति गणपतिपञ्चाङ्गं समाप्तम् ॥

---

१ 'गुप्तं गोप्यं सदा' क. ख. ग पाठः । २ 'मखिलं' ङ. पाठान्तरम् ।

अथ

एकत्रिंशः पटलः ।

अथ सूर्यपञ्चाङ्गम् ।

श्रीभैरव उवाच ।

कैलासशिखरासीनं भैरवीपतिमीश्वरम् ।
भैरवं चन्द्रमुकुटं गणगन्धर्वसेवितम् ॥ १ ॥
पन्नगाभरणोपेतं जटामुकुटमण्डितम् ।
भस्माङ्गरागधवलं सर्पगोनसकङ्कणम् ॥ २ ॥
सिंहचर्मपरीधानं गजचर्मोत्तरीयकम् ।
कपालखट्वाङ्गधरं घण्टाडमरुधारिणम् ॥ ३ ॥
त्रिशूलबाणासंकरं वरामयकरं शिवम् ।
मुण्डमालाधरं कामकालान्धकभयङ्करम् ॥ ४ ॥
ब्रह्मोपेन्द्रेन्द्रनमितं चन्द्रकोटिसुशीतलम् ।
यक्षेशकिन्नरोपेतं सुरासुरनमस्कृतम् ॥ ५ ॥
रक्षोमारीमहाप्रेत-भूतवेतालसंकुलम् ।
साध्यसिद्धपिशाचोप-भैरवप्रणतं प्रभुम् ॥ ६ ॥
ब्रह्मर्षिसेवितं देवं पार्वतीसहितं विभुम् ।
गङ्गाधरं प्रसन्नास्यं हसिताननपङ्कजम् ॥ ७ ॥
नन्दिरुद्रार्चितं शम्भुं दृष्ट्वा प्रोवाच भैरवी ।

श्रीदेव्युवाच ।

भगवन् देवदेवेश भक्तानामभयप्रद ।
त्वं शिवः परमेशानस्त्वं विष्णुस्त्वं प्रजापतिः ॥ ८ ॥
सत्त्वाश्रितो रजोरूपस्तामसो लोकनाशनः ।
निर्गुणो भैरवाध्यक्षः कारणानां च कारणम् ॥ ९ ॥
वेदमूलो वेदगम्यो जगत्त्राता जगत्पतिः ।
त्वं मे प्राणाधिको देव क्रीतास्मि तव किङ्करी ॥ १० ॥
पुरा पृष्टोऽसि भगवन् मया त्वं भक्तिपूर्वकम् ।
अद्य तद्वद तत्त्वं मे यद्यहं तव वल्लभा ॥ ११ ॥

श्रीभैरवः ।

किं वक्ष्यामि शिवे तत्त्वं यत् तवास्ति सुदुर्लभम् ।
विस्मृतं वद मे शीघ्रं वक्ष्ये प्राणाधिकासि मे ॥ १२ ॥

श्रीदेव्युवाच ।

देवदेव महादेव दैत्यनायकपूजित ।
सकलागमसारज्ञ कौलिकानां हितेच्छया ॥ १३ ॥
वद शीघ्रं दयासिन्धो पञ्चाङ्गं पूर्वसूचितम् ।
देवदेवस्य सूर्यस्य सर्वतत्त्वोत्तमोत्तमम् ॥ १४ ॥

श्रीभैरवः ।

एतद् गुह्यतमं देवि पञ्चाङ्गं द्वादशात्मनः ।
सर्वागमरहस्यं[1] ते वक्ष्ये स्नेहेन पार्वति ॥ १५ ॥
पटलं, नित्यपूजायाः पद्धतिं कवचं परम् ।
मन्त्रनामसहस्रं च स्तोत्रं मूलात्मकं प्रिये ॥ १६ ॥
पञ्चाङ्गमिदमीशानि देवदेवस्य भास्वतः ।
सर्वसारमयं दिव्यं रहस्यं मम दुर्लभम् ॥ १७ ॥

---

१ 'सर्वांगम' क. ख. ग. पाठः ।

अदातव्यमभक्तेभ्यो भक्तेभ्यो भोगदायकम् ।
अथाहं पटलं वक्ष्ये मूलमन्त्रमय प्रिये ॥ १८ ॥
यस्य श्रवणमात्रेण सर्वरोगैः प्रमुच्यते ।
यो देवदेवो भगवान् भास्करस्तेजसां निधिः ॥ १९ ॥
प्रत्यक्षदेवो वेदानां कर्ता साक्षी च कर्मणाम् ।
सवितेति च वेदेषु परमात्मा जगत्पतिः ॥ २० ॥
गायत्रीवल्लभः सूर्यः सृष्टिस्थितिलयेश्वरः ।
कालात्मा च परं धाम परं ब्रह्मेति गीयते ॥ २१ ॥
तस्यादिदेवदेवस्य सूर्यस्य सवितुः शिवे ।
मन्त्रोद्धारं पर वक्ष्ये सर्वसिद्धिमयं कलौ ॥ २२ ॥

तारं डिम्बं भूतिशक्तीं च सूर्यं
ङेन्तं मध्ये विश्वमन्ते भवानि ।
मन्त्रोद्धारः सवितुर्वर्णितस्ते
दुर्गाक्षरो भोगमोक्षैकहेतुः ॥ २३ ॥

नास्य विघ्नो न वा दोषो न साध्यारिभयं शिवे ।
न शौचनियमो वापि विपर्ययभयं नहि ॥ २४ ॥
अष्टसिद्धिप्रदो मन्त्रः सर्वरोगहरः परः ।
सर्वार्थसाधको देवि न देयो यस्य कस्यचित् ॥ २५ ॥
वर्णलक्षं जपेन्मन्त्रं साधकः साङ्गमीश्वरि ।
किं किं न लभते मन्त्री वाञ्छितं सूर्यमुद्रणात् ॥ २६ ॥
लक्षमेकं जपेन्मन्त्र दशांशं साधको हुनेत् ।
तर्पयेत् तद्दशांशेन मार्जयेत् तद्दशांशतः ॥ २७ ॥
भोजयेत् तद्दशांशेन मन्त्रः कल्पद्रुमो भवेत् ।
वटेऽरण्ये श्मशाने च शून्यागारे चतुष्पथे ॥ २८ ॥
अर्धरात्रेऽथ मध्याह्ने परश्चरणमाचरेत् ।

सूर्योपरागसमये ग्रासावधि विमुक्तितः ॥ २९ ॥
यज्जपेत् तद्भवेत् सिद्धं भोगमोक्षैककारणम् ।
मन्त्रस्यास्य महादेवि ऋषिर्ब्रह्मा समीरितः ॥ ३० ॥
गायत्र्यं छन्द इत्युक्तं सविता देवता स्मृतः ।
व्योमं बीजं परा शक्तिस्तारं कीलकमीश्वरि ॥ ३१ ॥
धर्मार्थकाममोक्षार्थे विनियोग इति स्मृतः ।
मायाबीजेन षड्दीर्घभागिना न्यासमाचरेत् ॥ ३२ ॥
करन्यासषडङ्गानि यथावदनुपूर्वशः ।
कोलत्रयं पठेद् देवि जपादौ साधकोत्तमः ॥ ३३ ॥
उत्कीलनं भवेद् देवि मन्त्रराजस्य पार्वति ।
शरत्त्रयं पठेन्मध्ये मूलमन्त्रस्य साधकः ॥ ३४ ॥
सञ्जीवनमनुः प्रोक्तो मन्त्रस्यास्य महेश्वरि ।
मातृकाशोधितं मन्त्रं कृत्वा पार्वति साधकः ॥ ३५ ॥
निस्त्रौटिल्यो भवेन्मन्त्रः सर्वसिद्धिप्रदायकः ।
वेदादिडिम्बकान्त्यच्छं शक्तिर्मध्ये पठेच्छिवे ॥ ३६ ॥
शिवशापं मोचय द्वितः पुनर्जाया विभावसोः ।
इयं शापहरी विद्या जप्या साधकसत्तमैः ॥ ३ ॥
दशधा सवितुर्देवि येन मन्त्री शिवं भजेत् ।
सिद्धं मन्त्रं जपेद् देवि यथाशक्त्याक्षमालया ॥ ३८ ॥
सर्वरोगैर्विमुक्तो हि भोगमोक्षफलं लभेत् ।
जगदन्ते पठेद् देवि शरद्वार च कौलिकः ॥ ३९ ॥
सपुटाख्योऽस्त्ययं मन्त्रो मन्त्ररत्नामणिः परः ।
गुरूपदेशतो ज्ञेयः सूर्यास्त्रमनुरुत्तमः ॥ ४० ॥
यं जप्त्वा सवितुर्मन्त्रो भवेत् कल्पद्रुमोऽचिरात् ।
तारं व्योमं च सूर्याय विग्रहे तदनन्तरम् ॥ ४१ ॥

मायां शक्तिं समुच्चार्य ज्योतीरूपाय धीमहि ।
तन्नः शिवश्च शक्तिश्च परमात्मा प्रचोदयात् ॥ ४२ ॥
वर्णिता सूर्यगायत्री सर्वतन्त्रेषु गोपिता ।
दशधा साधकैर्जप्या संध्यास्वर्चासु तर्पणे ॥ ४३ ॥
ध्यानमस्य प्रवक्ष्यामि सर्वदेवरहस्यकम् ।
सर्वरोगापहं देवि भोगमोक्षफलप्रदम् ॥ ४४ ॥

कल्पान्तानलकोटिभास्वरमुखं सिन्दूरधूलीजपा-
वर्णं रत्नकिरीटिनं द्विनयनं श्वेताब्जमध्यासनम् ।
नानाभूषणभूषितं स्मितमुखं रक्ताम्बरं चिन्मयं
सूर्यं स्वर्णसरोजरत्नकलशौ दोर्भ्यां दधानं भजे ॥ ४५ ॥

यन्त्रोद्धारं प्रवक्ष्यामि सर्वाशापरिपूरकम् ।
सर्वसंमोहनं दिव्यं सर्वसिद्धिमयं शिवे ॥ ४६ ॥

बिन्दुत्रिकोणवसुकोणसुवृत्तरूपं
दिव्याष्टपत्रविलसद्दहनारणाढ्यम् ।
रेखात्रयाश्रितधरासदनं च देवि
श्रीचक्रमेतदुदितं सवितुर्वरेण्यम् ॥ ४७ ॥

लयाङ्गमस्य यन्त्रस्य वक्ष्ये पार्वति साधरम् ।
यस्य श्रवणमात्रेण कोटिपूजाफलं लभेत् ॥ ४८ ॥
शक्राग्नियममांसाद-वरुणानिलवित्तदाः ।
सेशाः पूज्या बहिर्द्वारे यन्त्रराजस्य साधकैः ॥ ४९ ॥
गणेशश्चण्डवेतालो लोलाक्षो विकरालकः ।
अन्तर्द्वास्याः शिवे पूज्या वामावर्तेन साधकैः ॥ ५० ॥
दिव्यसिद्धमनुप्राख्यं गुरुपङ्क्तित्रयं शिवे ।
वृत्तत्रयेऽर्चयेन्मन्त्री गन्धपुष्पाक्षतादिभिः ॥ ५१ ॥
चन्द्रं भौमं बुधं जीवं शुक्रं सौरं तमस्तथा ।

केतुं वसुदले देवि वामावृत्त्यार्चयेत् सुधीः ॥ ५२ ॥
दीप्तां सूक्ष्मां जयां भद्रां विमला निर्मलां ततः ।
विद्युतां सर्वतोवक्त्रां ग्रहैर्वसुदलेऽर्चयेत् ॥ ५३ ॥
सूर्यं दिवाकरं भानुं भास्करं रविमीश्वरि ।
त्वष्टारं तपनं धर्मं वसुकोणे समर्चयेत् ॥ ५४ ॥
हंसं गृहपतिं देवि त्रिकोणे च त्रयीतनुम् ।
श्रीबिन्दुमण्डले देवि सवितारं समर्चयेत् ॥ ५५ ॥
कलाः समर्चयेद् देवि वसुकोणे त्रिकोणके ।
तपिनीं तापिनीं चैव बोधिनीं चैव रोधिनीम् ॥ ५६ ॥
केलिनीं शोषिणीं चैव वरेण्याकर्षिणीयुताम् ।
एताः संपूज्य वस्वश्रे कौलिकः कुलसिद्धये ॥ ५७ ॥
माया विश्वावतीं हेमप्रभा त्र्यश्रे समर्चयेत् ।
विस्फुरां सवितारं च बिन्दुबिम्बे समर्चयेत् ॥ ५८ ॥
कमलैः केवलं देवं पूजयेदायुधानि च ।
सुवर्णपद्मं संपूज्य रत्नाढ्यकलश शिवे ॥ ५९ ॥
मूलेन विधिवद् देवं[1] नमेत् कैवल्यसिद्धये ।
लयाङ्गमेतदाख्यात सर्वतन्त्रेषु गोपितम् ॥ ६० ॥
मुद्रा पद्माभिधा देवि दर्शयेदर्चनाविधौ ।
अङ्गुष्ठौ विमुखौ मध्ये संयोज्य तर्जनीद्वयम् ॥ ६१ ॥
कनिष्ठिके च संयोज्य मध्यमानामिकाः पृथक् ।
पद्ममुद्रेयमाख्याता बिम्बमुद्रा शृणु प्रिये ॥ ६२ ॥
अङ्गुष्ठौ संमुखौ कृत्वा समुखीरङ्गुलीश्चरेत् ।
ऊर्ध्वं करयुगं कृत्वा बिम्बमुद्रेयमीरिता ॥ ६३ ॥
अधोमेरुर्वाममध्या तद्वन्मे सव्यमध्यमा ।

---

१ 'देवि' इ पाठ ।

तथैव कौलिकः कुर्याद्वामतः सव्यतोऽङ्गुलीः ॥ ६४ ॥
इयं तु भास्करीमुद्रा त्रैलोक्यवशकारिणी ।
सर्वरोगापहा ख्याता दर्शनीयार्चनाविधौ ॥ ६५ ॥
अङ्गुष्ठयोश्च चन्द्रारौ ज्ञेज्यावनामयोस्तथा ।
सितासितौ च तर्जन्योः राहुकेतू प्रलम्बयोः ॥ ६६ ॥
मध्ये तु भास्करं देवं ध्यात्वा मुद्रां प्रदर्शयेत् ।
आवाहने च गन्धादौ नैवेद्ये च विसर्जने ॥ ६७ ॥
धूपदीपादिनैवेद्यं देयं सर्वं खशोल्कया ।
खशोल्काख्या महामुद्रा (सर्वरोगापहारिणी ॥ ६८ ॥
सर्वार्थसाधनकरी दुःखदारिद्र्यनाशिनी ।
बद्धा मुष्टियुगं देवि पर्वं पर्वणि योजयेत् ॥ ६९ ॥
अङ्गुष्ठयोर्नियं बद्धोर्ध्वं सर्वयोन्युत्तमोत्तमाम् ।
खशोल्काख्या महामुद्रा) शत्रुवर्गविमर्दिनी ॥ ७० ॥
रविं दृष्ट्वा प्रणम्यादौ दर्शनीया महेश्वरि ।
महामुद्रा महागोप्या महामार्तण्डवल्लभा ॥ ७१ ॥
इमां यो भानवीं मुद्रां दर्शयेत् पूजने सुधीः ।
शतवर्षसहस्राणां पूजाफलमवाप्नुयात् ॥ ७२ ॥
प्रयोगानष्ट वक्ष्येऽहं शृणु पार्वति सादरम् ।
येषां साधनमात्रेण मन्त्रः सिद्धिप्रदो भवेत् ॥ ७३ ॥
स्तम्भनं मोहनं चैव मारणाकर्षणे ततः ।
वशीकरणविद्वेषौ शान्तिकी पौष्टिकी क्रिया ॥ ७४ ॥
एतेषां साधनं वक्ष्ये साधकानां हितेच्छया ।
अप्रकाश्यमदातव्यं कलौ रोगापहं शिवे ॥ ७५ ॥
(१) रवौ प्रभाते शयनादुत्थायावश्यकं चरेत् ।
स्नात्वा जपेन्महादेवि सूर्याग्रे साधकोऽयुतम् ॥ ७६ ॥

हुनेद् दशांशतो देवि पद्मपद्माच्छर्कराः ।
सर्पिषा स्तम्भनं सद्यो वादितस्करपाथसाम् ॥ ७७ ॥
(२) रवौ मध्याह्नवेलायां जपेदयुतसंख्यया ।
हुनेद् दशांशमीशानि घृतपद्माच्चनागरान् ॥ ७८ ॥
तर्पयेत् पयसा सद्यो मोहनं द्युसदामपि ।
(३) रवौ सायं जपेन्मूलं नदीतीरस्थितो[1] रहः ॥ ७९ ॥
अयुतं तद्दशांशेन हुनेत् पद्माच्चपर्पटान् ।
घृतेन दध्ना सन्तर्प्य मारणं द्विषतां भवेत् ॥ ८० ॥
(४) रवौ निशीथे संजप्य मूलमन्त्रायुतं शिवे ।
हुनेद् दशांशमम्भोजशटीघृतकुलत्थकैः ॥ ८१ ॥
आकर्षणं भवेत् सद्यो देवि नाकस्त्रियामपि ।
(५) रवौ प्राह्णे मुहूर्ते तु स्नात्वा तत्र जपेज्जले ॥ ८२ ॥
अयुतं मूलविद्याया दशांशं जुहुयात् सुधीः ।
घृतमत्स्यण्डकर्पूर-पद्मपद्माच्चकेसरान् ॥ ८३ ॥
इन्द्रोऽपि वशतां याति किं पुनः क्षुद्रभूमिपः ।
(६) सूर्योदये जपेद्विद्यां साधकोऽयुतसंख्यया ॥ ८४ ॥
जुहुयात् सर्पिरम्भोज-मुस्तापर्पटशर्कराः ।
विषेण तर्पयेद् देवं भवेद्विद्वेषणं द्विषाम् ॥ ८५ ॥
(७) रवावर्धोदिते देवि कूपभूमौ जपेन्मनुम् ।
अयुतं तद्दशांशेन हुनेद् घृतयवाकणाः ॥ ८६ ॥
अम्भोजकेसरं शुण्ठी शान्तिर्भवति तत्क्षणात् ।
अतिवृष्टेरनावृष्टेः राजभीतेर्महेश्वरि ॥ ८७ ॥
(८) रवावस्तङ्गतेऽप्यर्घे जपेद्वानीरमूलके ।
मन्त्रायुतं महादेवि जुहुयाद् घृतगोपयः ॥ ८८ ॥

---

१ 'वद्रि' ख पाठः । २ 'कण्टीं' ङ. पाठ. ।

पद्मपद्माद्यकिञ्जल्क-मत्स्यण्डार्कदलानि च ।
दशांशं तर्पयेद् दध्ना क्षीरेण मितया सुधीः ॥ ८९ ॥
महापुष्टिर्भवेल्लोके देवानामपि दुर्लभा ।
इत्येष पटलो गुह्यः सवितुश्चातिवल्लभः ॥ ९० ॥
सर्वमन्त्रमयो दिव्यो गोपनीयो मुमुक्षुभिः ।

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये सूर्यपटलनिरूपण-
मेकत्रिंशः पटलः ॥ ३१ ॥

अथ

द्वात्रिंशः पटलः ।

तदाज्ञां गृहीत्वा बहिरागत्य मलादीन् संत्यज्य, वर्णानुरूपं शौचं विधाय देवं ध्यात्वा प्राणायामत्रयं विधाय, तत्त्वत्रयेणाचम्य दन्तधावनं कुर्यात् । तद्यथा—क्लीं सर्वजनमनोहराय कामदेवाय वौषट्, इति दन्तान् संशोध्य, ह्रामिति गण्डूषत्रयं विधाय प्रणवेन त्रिराचम्य शिरोमुखहृत्कुक्षिनाभिपृष्ठलिङ्गजानुपादेषु प्रत्येकं मूलबीजादशसंख्यं न्यसेत् । तत उपस्पृश्य मायाबीजेन तारादिना प्राणायामत्रयं कुर्यात् । पूरकं १६ कुम्भकं ६४ रेचकं ३२ इति प्राणापानसमानोदानव्यानादीन् नियम्य, नद्यादौ गत्वा मृत्त्रयं मूलेन त्रिधाभिमन्त्र्य, मलापकर्षणं स्नानं निर्माय ॐगांगींगूं 'गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥' इत्यङ्कुशमुद्रया सूर्यमण्डलात्तीर्थान्यावाह्य, 'ॐ भगवन् भवभूतेश ग्रहनायक भास्कर । चिद्रूप वेदनेत्रेश परमार्थाद्वय प्रभो ॥ यावत् त्वां तर्पयिष्यामि तावद्भागो इहावह ।' इत्यावाह्य, तृतीयां मृदमङ्गे विलिप्य मूलं सप्तधा समुच्चार्य, कुम्भमुद्रां प्रदर्श्य जले त्रिरुन्मज्जेत् । इति स्नात्वा, देवं ध्यात्वा मूलेन देवायार्घ्यत्रयं दत्त्वा मूलविद्यां दशधा जप्त्वा सूर्यमण्डलाय महामार्तण्डायार्घ्यत्रयं दद्यात् । ॐह्रीं सूर्यरूपाय विद्महे हंसः ज्योतीरूपाय धीमहि तन्नो हंसः प्रचोदयात् ३ । ॐहंसः महामार्तण्डाय प्रकाशशक्तिसहिताय एष तेऽर्घ्यो नमः । इत्यर्घ्यत्रयं दत्त्वा, मूलेन त्रिर्मार्जनपूर्वमाचम्य वासोऽन्यत् परिधाय संध्यां कुर्यात् । यथा—जले त्र्यश्रं कृत्वा स्वदेहं उपस्पृश्य, वामहस्ते जलं धृत्वा दक्षहस्तेनाच्छाद्य, लवंरंयंह्र इति त्रिरभिमन्त्र्य दक्षकरे धृत्वा, तद्गलितास्बुबिन्दुभिः स्वमूर्ध्नि द्वादशधा समार्ज्य, इडया तज्जलमन्तर्नीत्वा, शारीरं कलुषं प्रक्षाल्य वामनासया विरेच्य तज्जलं कृष्णं पापरूपं स्ववामभागस्थवज्रशिलायामास्फालयेदिति मलापकर्षणं कृत्वा, ॐह्रीं आत्मतत्त्वं शोधयामि स्वाहा, ॐह्रीं विद्यातत्त्वं शोधयामि स्वाहा, ॐह्रीं शिवतत्त्वं शोधयामि स्वाहा, इति त्रिराचम्य, पूर्ववत् १६ । ६४ । ३२ वि. प्राणानायम्य गायत्रीं दशधा जपेत् । "सवितुर्देवि गायत्रीं कौलिको दशधा जपेत् । महापातकयुक्तोऽपि सर्वरोगैः प्रमुच्यते ॥ इति जप्त्वा, मूलं यथाशक्त्या जप्त्वा जपं देवाय समर्प्य, मूलमुच्चार्य "उदयन्तमनाभासं परमं व्योम चिन्मयम् । अव्ययं सच्चि-

दाकाशमगन्म ज्योतिरुत्तमम् स्वाहा-इत्युपस्थाय जलाञ्जलिं दत्त्वा, पुनर्जले श्रीचक्रं वा योनिचक्रं विन्दुमण्डितं विलिख्य, मूलान्ते श्रीमहामार्तण्डदेवः सूर्यः सविता विस्फुरासहितस्तृप्यतामिति द्वादशधारं संतर्प्य, प्रत्येकं परिवारदेवताः संतर्प्य, पित्रादितर्पणं विधाय विराचम्य, ज्ञानेशाय वरुणाय ॐहूंश्रूंवां वरुणाय वौषट्, इति नत्वा, देवं सदेवीकं विसृज्य, हृत्कुशेशयकोशान्तर्लीनं ध्यात्वा, स्नानशाटीं निर्वर्त्य यागमण्डपमागच्छेदिति सन्ध्याविधिः ॥

तत्र पादौ प्रक्षाल्य गेहान्तः प्रविश्य सामान्यार्घ्योदकेनाभ्युक्ष्य, ॐहां देहल्यै नमः, ॐगं गणपतये नमः, ॐसं सरस्वत्यै नमः, ॐदुं दुर्गायै नमः, ॐक्षां क्षेत्रपालाय नमः, मध्ये वास्तुदेवताभ्यो नमः, इति पूर्वद्वारादारभ्योत्तरद्वारपर्यन्तमभ्यर्च्य, द्वारोर्ध्वे गङ्गायै नमः, दक्षिणे यमुनायै नमः, द्वाराधः सरस्वत्यै नमः, उत्तरे चक्रायै नमः, मध्ये सुधार्णवाय नमः, इति संपूज्य मूलेन निरीक्ष्य, छोटिकाभिः संताड्य यथार्हमासन उपविश्य शोधनं कुर्यात् ।

ॐथां आसनशोधनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनशोधने विनियोगः । ॐप्रीं पृथिव्यै नमः "ॐमहि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥" ॐक्रांह्रांह्रीं आधारशक्तिकमलासनाय नमः, ॐ अनन्ताय नमः, पद्मनालाय नमः, पद्माय नमः, परागेभ्यो नमः, अष्टदलपद्मासनाय नमः, सहस्रदलपद्मासनाय नमः, ॐहंसः श्रीकर्णिकायै नमः, सप्ततुरगेभ्यो नमः, इति संपूज्य दिव्यदृष्ट्या दिव्यांस्तालत्रयेणान्तरिक्षगतान् धामपार्ष्णिघातत्रयेण भौमान् विघ्नानुत्सार्य, "अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥" इत्यस्त्रमन्त्रेण भूतान्निःसार्य, ॐहः अस्त्राय फडिति दिग्बन्धनं कृत्वा, "ॐहंसः मां रक्ष २ हूं फट् स्वाहा" इत्यात्मरक्षां विधाय, हूं फट् धामनासया वायुमापूर्य, ह्रीं फट् कुम्भयित्वा, मः फट् विरेच्य, स्वात्मानं हंसरूपं ध्यात्वा ॐहंसः इत्यामुखेन कुलकुण्डलिनीं सार्धत्रिवलयां दीर्घाकारामुत्थाप्य, प्रदीपकलिकाकारां विसतन्तुतनीयसीं तडित्कोटिप्रभां चन्द्रकोटिशीतलां सूर्यकोटिदुर्दर्शां वह्निकोटिकरालां सुषुम्नामार्गेण षट्चक्रं भित्त्वा ब्रह्मपथान्त

---

१ 'निरीक्ष्य' स पाठ ।

नीत्वा परमशिवेन संयोज्य, सामरस्योद्भवानन्दामृतेन सन्तर्प्य, पुनस्तेनैव पथा मूलाधारं प्रापयित्वा, धामे पापपुरुषं श्मश्रुलं रक्ताक्षं धूम्रवर्णं खड्गचर्मधरं स्वाङ्गुष्ठाकारं विचिन्त्य, यंरंवंलंहं इति भूतबीजैः शोषण-दाहन-प्लावनादीन् कुर्यात्। यथा—आदौ प्राणायामयोगेन यमिति वायुबीजेन षोडशधारजप्तेन शोषयेत्। ततो रमिति वह्निबीजेन चतुष्षष्टिवारजप्तेन दाहयेत्। वमिति वरुणबीजेन द्वात्रिंशद्वारजप्तेन प्लावयेत्। लमिति भूबीजेन दशधा जप्तेन देहं दृढं विचिन्त्य, हमित्याकाशबीजेन दशधा जप्तेन शून्यात्मकं स्वात्मानं ध्यात्वा हृदयारविन्दकर्णिकायां देवं सूर्यं ध्यायेत्। "देदीप्यमानमुकुटं मणिकुण्डलमण्डितम्। देवं सहस्रकिरणं विस्फुरालिङ्गितं स्मरेत्॥" इति ध्यात्वा स्वात्मानं देवरूपं स्मृत्वा, ॐआंह्रींक्रोंह्रांह्रीं हंसः मम प्राणा इह प्राणाः मम जीव इह स्थितः मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुस्त्वक्श्रोत्रजिह्वाघ्राणप्राणाः इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा. इति भूतशुद्धिप्राणप्रतिष्ठाक्रमः॥ ततो मूलन्यासं विधाय, मूलान्ते शिरसि त्रिः सूर्यं संपूज्य मन्त्रसङ्कल्पं कुर्यात्।

ॐअस्य श्रीसूर्यपूजामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्र्यं छन्दः, श्रीसविता देवता, ह्रां बीजं, ह्रीं शक्तिः, ॐकीलकम्, धर्मार्थकाममोक्षार्थे सूर्यपूजायां विनियोगः। ब्रह्मऋषये नमः शिरसि, गायत्र्यच्छन्दसे नमो मुखे, श्रीसवित्रे देवतायै नमो हृदि, ह्रां बीजाय नमो नाभौ, ह्रीं शक्तये नमो गुह्ये, ॐकीलकाय नमः पादयोः, जपे विनियोगाय नमः सर्वाङ्गेषु। ह्रां अङ्गुष्ठाभ्यां नमः, ह्रीं तर्जनीभ्यां नमः, ह्रूं मध्यमाभ्यां नमः, ह्रैं अनामिकाभ्यां नमः ह्रौं कनिष्ठिकाभ्यां नमः, ह्रः करतलपृष्ठाभ्यां नमः। ह्रां हृदयाय०। ह्रीं शिरसे०। ह्रूं शिखायै०। ह्रैं कवचाय०। ह्रौं नेत्रा०। ह्रः अस्त्राय०। इति करषडङ्गन्यासः। ॐनमः शिरसि, ह्रां नेत्रयोः, ह्रीं मुखे, सः हृदे, सूं कुक्षौ, र्यां नाभौ, यं जानुनोः, नं पादयोः, मः शिरसः पादपर्यन्तमिति सप्तधा व्यापयेदिति मूलविद्यान्यासः॥

ॐह्रां ऋग्वेदात्मने सूर्याय नमः शिरसि। ॐह्रीं यजुर्वेदात्मने सूर्याय नमः कुक्षौ। ॐसः सामवेदात्मने सूर्याय नमो गुह्ये। ॐ अथर्ववेदात्मने सूर्याय नमः पादयोः। इति त्रिर्व्यापयेदिति वेदन्यासः॥

ओंह्रां आत्मरूपाय सूर्याय हृदयाय नमः । ओंह्रीं परमात्मने सूर्याय शिरसे स्वाहा । ओंह्रूं सर्वभूतात्मने सूर्याय शिखायै० । ओंह्रैं ज्ञानात्मने सूर्याय कवचाय० । ओंह्रौं अन्तरात्मने सूर्याय नेत्रत्रयाय० । ओंह्रः हंसात्मने सूर्याय अस्त्राय फट् । एवमङ्गुली-न्यासः । इत्यात्मन्यासः ॥

ओंह्रां सोमात्मने सूर्याय अङ्गुष्ठाभ्यां० । ओंह्रीं भौमात्मने सूर्याय तर्ज-नीभ्यां० । ओंह्रूं बुधात्मने सूर्याय मध्यमाभ्यां० । ओंह्रैं जीवात्मने सूर्याय अनामिकाभ्यां० । ओंह्रौं शुक्रात्मने सूर्याय कनिष्ठिकाभ्यां० । ओंह्रः सौरात्मने सूर्याय करतलपृष्ठाभ्यां नमः । एवं हृदयादिन्यासः । इति ग्रहन्यासः ॥

ओंअंआंइईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः सूर्याय नमः मूलाधारे । ह्रां कं-खंगंघंङं सूर्याय नमः मणिपूरे । ह्रीं चंछंजंझंञं सूर्याय नमः स्वाधि-ष्ठाने । सः टंठैडंढंणं सूर्याय नमः अनाहते । सूर्याय तंथंदंधंनं सूर्याय नमः विशुद्धौ । नं पंफंबंभंमं सूर्याय नमः आज्ञायां । मः यंरंलंवंशं-षंसंहंळंक्षः सूर्याय नमः करन्ध्रे । इति सप्तधा व्यापयेदिति मूलशु-द्धिमातृकान्यासः ॥

अंआं गायत्रीछन्दसे सूर्याय नमो ब्रह्मरन्ध्रे । इंईं त्रिष्टुप्छन्दसे सूर्याय नमः आज्ञायां । उंऊं अनुष्टुप्छन्दसे सूर्याय नमो विशुद्धौ । ऋंॠंऌंॡं उष्णिक्छन्दसे सूर्याय नमः अनाहते । एंऐं विराट्छन्दसे सूर्याय नमः स्वाधिष्ठाने । ओंऔं सम्राट्छन्दसे सूर्याय नमो मणि-पूरे । अंअः बृहतीछन्दसे सूर्याय नमो मूलाधारे । इति सप्तधा व्यापयेदिति सप्तछन्दोन्यासः ॥

ओं गौराश्वाय सूर्याय नमो ब्रह्मरन्ध्रे । ह्रां पाण्डुराश्वाय सूर्याय नमः आज्ञायां । ह्रीं सिताश्वाय सूर्याय नमो विशुद्धौ । सः श्वेता-श्वाय सूर्याय नमः अनाहते । सूर्याय हिमाश्वाय सूर्याय नमः स्वाधि-ष्ठाने । नं क्षीराश्वाय सूर्याय नमो मणिपूरे । मः कुन्दाश्वाय सूर्याय नमो मूलाधारे । इति त्रिर्व्यापयेत् इति सप्ततुरगन्यासः ॥

ओं अजपादेवतायै सूर्याय नमः करन्ध्रे । ह्रां गायत्रीदेवतायै सूर्याय नमः आज्ञायां । ह्रीं सावित्रीदेवतायै सूर्याय नमो विशुद्धौ । सः सर-स्वतीदेवतायै सूर्याय नमः अनाहते । सूर्याय व्यक्तरीदेवतायै सूर्याय नमः स्वाधिष्ठाने । नं ब्रह्मवादिनीदेवतायै सूर्याय नमो मणिपूरे । मः पञ्चमु-

खीदेवतायै सूर्याय नमो मूलाधारे । इति त्रिर्व्यापयेदिति गायत्रीन्यासः ॥

ॐ शिवतत्त्वाय सूर्याय नमो ब्रह्मरन्ध्रे । ह्रां शक्तितत्त्वाय सूर्याय नमः आज्ञायां । ह्रीं मायातत्त्वाय सूर्याय नमो विशुद्धौ । सः विद्यातत्त्वाय सूर्याय नमः अनाहते । सूर्याय कलातत्त्वाय सूर्याय नमः स्वाधिष्ठाने । नं नियतितत्त्वात्मने सूर्याय नमो मणिपूरे । मः आत्मतत्त्वाय सूर्याय नमो मूलाधारे । इति त्रिर्व्यापयेदिति तत्त्वन्यासः ॥

ॐ कामरूपपीठेशाय सूर्याय नमो ब्रह्मरन्ध्रे । ह्रां उड्डीयानपीठेशाय सूर्याय नमः आज्ञायां । ह्रीं जालन्धरपीठेशाय सूर्याय नमो विशुद्धौ । सः पूर्णगिरिपीठेशाय सूर्याय नमः अनाहते । सूर्याय मधुपुरीपीठेशाय सूर्याय नमः स्वाधिष्ठाने । नं अवन्तीपीठेशाय सूर्याय नमो मणिपूरे । मः वाराणसीपीठेशाय सूर्याय नमो मूलाधारे । मूलं कुरुक्षेत्रपीठेशाय सूर्याय नमः सर्वाङ्गेषु । इति त्रिर्व्यापयेदिति पीठन्यासः । इति द्वादशन्यासाः । यथोक्तम्

मुनिमायामूलविद्या-वेदात्मग्रहशुद्धयः ।
छन्दस्तुरगगायत्री-तत्त्वपीठादयः पुनः ॥
एते हि द्वादश न्यासाः सर्वतन्त्रेषु गोपिताः ।
वर्णितास्तव देवेशि सर्वरोगापहारकाः ॥
एतान् यः कुरुते न्यासान् सवितुः सर्वसिद्धये ।
तस्य लक्ष्मीधनारोग्यविद्याकीर्तिसुखाप्तयः ॥
न्यासान्ते भास्करं ध्यायेत् पूजाकोटिफलं लभेत् । इति ॥

अथ मातृकान्यास.—अं कं ५ आं अङ्गुष्ठाभ्यां नमः । इं चं ५ ईं तर्जनीभ्यां० । उं टं ५ ऊं मध्यमाभ्यां० । पं तं ५ ऐं अनामिकाभ्यां० । ओं पं ५ औं कनिष्ठिकाभ्यां० । अं यंरंलंवंशंषंसंहंळंक्षं अः करतलपृष्ठाभ्यां नमः । इति करन्यासः । एवं षडङ्गन्यासः । इति स्वराद्यन्तमातृकान्यासः ॥

अथ शुद्धमातृकान्यासः—अं नमः शिरसि । आं नमो मुखवृत्ते । एवं इं दक्षनेत्रे । ईं वामनेत्रे । उं दक्षकर्णे । ऊं वामकर्णे । ऋं दक्षनासापुटे । ॠं वामे । ऌ दक्षगण्डे । ॡं वामे । एं ऊर्ध्वोष्ठे । ऐं अधरोष्ठे । ओं ऊर्ध्वदन्तपंक्तौ । औं अधोदन्तपंक्तौ । अं शिरसि । अः मुखे । कं दक्षबाहुमूले । खं कुर्परे । गं मणिबन्धे । घं अङ्गुलिमूले । ङं

अङ्गुल्यग्रे । चं वामबाहुमूले । छं कुर्परे । जं मणिबन्धे । झं अङ्गुलिमूले । ञं अङ्गुल्यग्रे । टं दक्षपादमूले । ठं जानुनि । डं गुल्फे । ढं अङ्गुलिमूले । णं अङ्गुल्यग्रे । तं वामपादमूले । थं जानुनि । दं गुल्फे । धं अङ्गुलिमूले । नं अङ्गुल्यग्रे । पं दक्षपार्श्वे । फं वामे । बं पृष्ठे । भं नाभौ । मं जठरे । यं हृदि । रं दक्षांसे । लं ककुदि । वं वामांसे । शं हृदादिदक्षहस्ताग्रान्तं । षं हृदादिवामहस्ताग्रान्तं । सं हृदादिदक्षपादाग्रान्तं । हं हृदादिवामपादाग्रान्तं । ळं पादादिशिरःपर्यन्तं । क्षः नमः शिरसः पादपर्यन्तामिति त्रिर्व्यापयेत् । इति मातृकान्यासः ॥ ह्रीं नमः शिरसि, हं नमो हृदि, सः नमः पादयोः, मूलं शिरसः पादपर्यन्तं त्रिर्व्यापयेदिति[1] न्यासं विधाय हृत्कमलकर्णिकान्तर्गतं देवं ध्यायेत्—

जपादाडिमबिम्बाभं द्विभुजं चारुणाम्बरम् ।
सप्ताश्वरथसंयुक्तं मणिकुण्डलमण्डितम् ॥
केयूरहाराभरणं- कलशाम्भोजधारिणम् ।
सवितारं जगन्नाथं विस्फुरालिङ्गितं भजे ॥

एवं ध्यात्वा मानसोपचारैरभ्यर्च्य, स्वचामे त्रिकोणवृत्तमण्डलं विलिख्य "रं वह्निमण्डलाय दशकलात्मने नमः" इति संपूज्य, त्रिपदीं क्षालितां संस्थाप्य, तत्र शङ्खं संस्थाप्य शङ्खे "अं अर्कमण्डलाय द्वादशकलात्मने नमः" इति संपूज्य, तीर्थजलेनापूर्य "सौः सोममण्डलाय षोडशकलात्मने नमः" इत्यभ्यर्च्य, हंसः सूर्याय ह्रीं नमः इति त्रिर्गन्धाक्षतपुष्पैः समभ्यर्च्य, ऊँगांगींगूं "गङ्गे च यमुने चैव" इत्यादिना सूर्यमण्डलात् तीर्थान्यङ्कुशमुद्रयावाह्य, ऊँह्रांह्रींसः हंसः शुचिषदे सूर्याय नमैः इति संपूज्य, धेनुयोनिमत्स्यखशोल्कामुद्राः प्रदर्श्य प्रणमेत् ।

दर्शनेनापि शङ्खस्य किं पुनः स्पर्शनेन च ।
विलयं यान्ति पापानि हिमवद्भास्करोदये ॥

इति सामान्यार्घ्यं विधाय, सुधार्घ्यं कुर्यात् । यथा सामान्यार्घ्यस्य दक्षे त्रिकोणवृत्तचतुरश्रं विलिख्य, सामान्यार्घ्योदकेनाभ्युक्ष्य, ऊँह्रां हृदयाय नमः पूर्वे । ऊँह्रीं शिरसे स्वाहा दक्षिणे । ऊँह्रूं शिखायै वषट् पश्चिमे

---

१ 'इत्यं' घ. पाठः । २ 'स्वाहा' ङ. पाठः ।

ॐह्रैं कवचाय हुं उत्तरे । ॐह्रौं नेत्रेभ्यो वौषट् अधः । ॐह्रः अस्त्राय फट् ऊर्ध्वे । इति संपूज्य, ॐमिति ईशाने, ह्रमित्याग्नेये, सः इति अग्रे, इति त्र्यश्रं संपूज्य, ज्वालिताधारं संस्थाप्य " रं वह्निमण्डलाय दशकलात्मने नमः " इत्यभ्यर्च्य, तत्र

सौवर्णं राजतं वापि रक्तं वा मृण्मयं घटम् ।
स्थापयेच्छोभितं दिव्यमालाभिः कुङ्कुमाञ्चितम् ॥

इति संस्थाप्य " हंसः सूर्यमण्डलाय द्वादशकलात्मने नमः " इति संपूज्य, मधुमात्रेणापूर्यं तत्रानामिकाङ्गुष्ठाभ्याममृतधारापातेन संपूर्यं, " सौं सोममण्डलाय षोडशकलात्मने नमः " इति सोममण्डलादमृतीकरणमुद्रयामृतं ध्यात्वा तत्रानीय कुम्भे निःक्षिप्य, अंआ इत्यादिक्षान्तमुच्चार्य मूलमुच्चार्य, " ह्रांह्रींसूंह्रैंह्रौंह्रः अः अमृते अमृतोद्भवे अमृताकर्षिणि अमृतवर्षिणि महामार्तण्डमण्डलेश्वरि सुधादेवि परमानन्देश्वरि ह्रांह्रींसः हंसः सोहं स्वाहा " इति दशधा जपेत् इति जप्त्वा,

सूर्यमण्डलसंभूते वरुणालयसंभवे ।
अमाबीजमये देवि शुक्रशापाद्विमुच्यताम् ॥
वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन देवेशि[2] शुक्रशापाद्विमुच्यताम् ॥
एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम्[3] ।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥
कृष्णशापविनिर्मुक्ता त्वं शुक्रा ब्रह्मशापतः ।
विमुक्ता रुद्रशापेन पवित्रा भव सांप्रतम् ॥
पवमानः परानन्दः पवमानः परो रसः ।
पवमानं परं ब्रह्म तेन त्वां पावयाम्यहम् ॥

इति त्रिः संपूज्य गङ्गादितीर्थान्यावाह्य धेनुयोनिमत्स्यमुद्राः प्रदर्श्य " हंसः सोहं स्वाहा " इत्यमृतीकृत्य, मूलं दशधा प्रजप्य गन्धाक्षतपुष्पैः संपूज्य महामृतमय तीर्थं ध्यायेदिति घटस्थापनम् ॥

---

१ ' देवाना ' ङ. पाठः । २ ' ते देवि ' घ, ङ. पाठः । ३ ' परं ' ङ. पाठः ।

दत्त्वा, आवाहनसंस्थापनसंनिरोधनावगुण्ठनसंमुद्री (करणसुप्रसन्नामृतीकरणपरमी) करणानुपूर्वं धेनुयोनिमत्स्यपद्मवियत्प्रभानुपशोलकामुद्राः प्रदर्श्य, मूलान्ते भगवन् सूर्य इदं रत्नसिंहासनमास्यताम्। मूलान्ते परमावरणदेवता रश्मिमण्डलान्तर्गता ध्यात्वा, मूल पाद्याचनीय-मधुपर्काचमनीयपात्रेभ्यः सर्वं समर्प्य, मूलान्ते भगवन्नर्घ्यं गृहाण वौषट्, मू० गन्धं गृहाण नमः, मू० पुष्पाणि गृहाण वषट्, मू० सर्वाङ्गे गङ्गोदकं नमः, मू० भगवन् रत्नवस्त्रालङ्कारादि गृहाण नमः, मू० भगवन् रत्नपादुके गृहाण नमः, मू० भगवन् रत्नसिंहासनं नमः, मू० गन्धाक्षतपूर्वं पुष्पाणि गृहाण नमो वौषट्, मू० भगवन् धूपं गृहाण नमः, मू० भगवन् दीपं गृहाण नमः, इति यशोलक्या सर्वं दत्त्वा, आत्मपुरतस्त्र्यश्रं सवृत्तं भूमौ विलिख्य, तत्र साधारं पात्रं संस्थाप्य, नैवेद्यं निवेद्य मूलेनामृतीकृत्य, स्वशोलक्या निरीक्ष्य, मूलं दशधा जप्त्वा, धेनुयोनिमुद्रे प्रदर्श्य, ॐहांहींस. भगवन् सूर्य अपोशानं नमः, अमृतोपस्तरणमसि स्वाहा इति जलं दत्त्वा, पुण्डरकमुद्रां प्रदर्श्य आसमुद्रयाऽऽचाम्य, मूलान्ते देवं संतृप्तं ध्यात्वा इदमाचमनीयं स्वधा, (अमृतापिधानमसि स्वाहा) मू० आचमनं नमः, मूलान्ते सप्तधा परमपात्रामृतेन सन्तर्प्य विस्फुरामपि त्रि. सन्तर्प्य प्रणमेत्। ततः परिवारदेवता ध्यायेत्। यथा—

सौम्यानि रक्तवर्णानि वरदाभयकराणि च।
भूषितानि द्विहस्तानि भानोरङ्गानि भावयेत्॥
दंष्ट्राकरालमत्युग्रं प्रज्वलत्पावकप्रभम्।
तर्जयद् विघ्नसङ्घातमित्थमस्त्रं विचिन्तयेत्॥
सोमं कुमुदकुन्दाभं भौमं चामीकरप्रभम्।
नीलरत्ननिभं सौम्यं गुरुं गोरोचनानिभम्॥
गोक्षीरसन्निभं शुक्रं शनिं नीलाञ्जनप्रभम्।
कामरूपधराः सर्वे दिव्याम्बरविभूषणाः॥
वामोर्ध्वदक्षिणाधस्ता दत्तहस्ताभयप्रदाः।

---

१ 'वर्ण' स पाठः।

ध्यानपूर्वं ग्रहानेवं सुभक्त्या कौलिकोऽर्चयेत् ॥

इति पुष्पाञ्जलिं दत्त्वा, वीरपात्रामृतेन संहृतिक्रमेण स्वधामावृत्त्या पूजयेत्। द्वाःस्थादिदेवायुधस्थानार्चनान्तं पूजाक्रमः, इति शिवशासनम् यथा-लं इन्द्रश्रीपादुकां पूजयामि तर्पयामि नमः, वीरपात्रामृतेन तर्पयेत् । रं अग्निश्रीपादुकां पू० । टं यमश्रीपा० । क्षं निर्ऋतिश्री० । वं वरुणश्री० । यं वायुश्री० । सं सोमश्री० । हं ईशानश्री० । ॐ ब्रह्मश्री० । ह्रीं अनन्तश्री० । इति पद्मपत्रैरभ्यर्चयेत् (अभीष्टसिद्धिं०) इति प्रथमावरणम् ॥

ॐ गं गणेशश्रीपादुकां पू० । ॐ चं चण्डवेतालश्रीपा० । ॐ लोलाक्षश्रीपा० । ॐ विकरालश्री० । इति गन्धाक्षतपुष्पैरभ्यर्च्य पूर्वदक्षिणपश्चिमोत्तरेषु वामावर्तेनान्तर्द्वाःस्थान् संपूजयेदिति (अभीष्ट०) इति द्वितीयावरणम् ॥

मू० गुं स्वगुरुपादुकां पूजयामि नमः तर्पयामि नमः, इति गुरुपात्रामृतेन संपूज्य, वा संतर्प्य, पं परमगुरुश्री०, पं परमेष्ठिगुरुश्री०, इति वृत्तत्रयेषु वायव्यादीशान्तं संपूजयेदिति तृतीयावरणम् ॥

सौः ज्योत्स्नादेवीदीप्तासहितसोमश्रीपा० । इति ग्रहपात्रामृतेन तर्पयेत् । सं सृप्तासहितमङ्गलश्री० । बं जयासहितबुधश्री० । जुं भद्रासहितजीवश्री० । श्रीं विमलासहितशुक्रश्री० । शं निर्मलासहितशनिश्री० । रां विद्युतासहितराहुश्री० । कं सर्वतोवक्त्रासहितकेतुश्री० । इति गन्धाक्षतपद्मपरागैर्वामावर्तेन वसुदले पूर्वादीशान्तं संपूजयेदिति चतुर्थावरणम् ॥

ॐह्रांह्रीं तपनीसहितसूर्यश्रीपा० । ३ तापिनीसहितदिवाकरश्री० । ३ धोधिनीसहितभानुश्री० । ३ रोधिनीसहितभास्करश्री० । ३ कालिनीसहितरविश्री० । ३ शोषिणीसहितत्वष्टृश्री० । ३ धरेण्यासहिततपनश्री० । ३ आकर्षिणीसहितधर्मश्री० । इति श्रीपरमपात्रामृतेन स्वधामावृत्त्या वसुकोणे पद्मपत्रैः संपूजयेदिति पञ्चमावरणम् ॥

ॐह्रांह्रीं मायासहितहंसश्रीपा० इतीशाने । ३ विश्वावतीसहितग्रहपति-

---

१ * कुं कुबेर० ख पाठ ।

श्रीं० इति आग्नेये । ३ हेमप्रभासहितत्रयीतनुश्रीं० इत्यग्रे । इति गन्ध-पुष्पाक्षतैरर्चयेदिति षष्ठावरणम् ॥

३ "*जगद्ध्वनिमये मातर्घण्टायै नमः*" इति संपूज्य शनैर्वादयन् मूलविद्यामुच्चार्य श्रींविस्फुरासहितसवितृश्रीं०, इति द्वादशवारं शतपत्रैः केवलमभ्यर्चयेदिति सप्तमावरणम् ॥

३ रत्नकलशश्रीपा०, ३ सुवर्णकमलश्रीं०, इति परमपात्रामृतेन वाम-दक्षिणयोः करकमलयोः संपूजयेदित्यष्टमावरणम् ॥ इत्थं संपूज्य, मूलेन मूलदेवतां त्रिः सन्तर्प्य प्रणमेत् । ततो मूलदेवतासहिताय श्रीसूर्याय सपरिच्छदाय परमान्नं नैवेद्यं निवेदयामि नमः, मूलेन दत्त्वा मूलान्ते सप्तप्रदक्षिणानि कृत्वा मूलान्ते मेरुपुण्ड्रकमुद्रां प्रदर्श्य पुनः पुनः प्रणमेत् ॥

दक्षिणान्तर्गता वामा वामान्तरगताः पराः ।
अङ्गुलीर्योजयेद् देवि चाङ्गुष्ठौ संमुखौ चरेत् ॥
आवर्त्य व्योमवद् हस्तावङ्गुष्ठौ देव्यधोमुखौ ।
मेरुपुण्ड्रकमुद्रेयं दिव्या भास्करवल्लभा ॥
नैवेद्ये च प्रणामे च पुण्ड्राख्यां प्रदर्शयेत् ।

इति नत्वा संकल्पपूर्वं षडङ्गं विधाय प्राणायामत्रयं कृत्वा अर्कमालया मूले यथाशक्त्या जपेत् । जपान्ते,

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादात् प्रभाकर ॥

इति जपं देवाय समर्प्य, योनिमुद्रया प्रणमेत् । ततः कवचसहस्रना-मस्तवराजपाठं कुर्यात् (वैश्वदेवादिनित्यकर्म कुर्यात्) । तदपि विघ्नमु-द्रया देवाय समर्प्य दण्डवत् प्रणम्य, ॐ ह्रौं वीरवटुकाय नमः । ॐ यां यूं यौं योगिनीभ्यो नमः । ॐ क्षां क्षेत्रपालेभ्यो नमः । ॐ त्रां त्रीं तेजश्चण्डाभ्यां[2] नमः, इति बलिं निवेद्य, "ॐ ह्रां ह्रीं सर्वभूतेभ्यः सर्व-विघ्नकृद्भ्यो बलिर्वौषट्" इति बलिं दत्त्वा, (ततः सूर्यस्य क्षमापयेत्)

---

१ 'जगत्प्रिय' इ. पाठः । 'दिवाकर' स. पाठः । २ 'तेजश्चण्डाय' इ. पाठः ।

श्रीसामयिकैः सह वीरवन्दनं विधाय, तदन्ते "ॐ सोहं हंसः स्वाहा" इत्यानन्दपात्रं शिरसि निःक्षिप्य, परमानन्दमयो भूत्वा स्वात्मानं तेजोमयं सूर्यरूपं विभाव्य "ॐहृः अस्त्राय फट्" सूर्यास्त्रं ध्यात्वा प्रणम्य पुष्पाञ्जलिं दत्त्वा भानवीं मुद्रां प्रदर्श्य, संहारमुद्रया श्रीचक्रे विन्दुबिम्बात् सूर्यतेजोमयं पुष्पमादाय पिङ्गलयाघ्राय तत्सौरं तेजः परमशिवेन संयोज्य, पुनर्मूलाधारं प्रापय्य स्वात्मानं तेजोमयरूपं दिव्यं नाटयन् स्वशक्त्या सह यथासुखं विहरेत् ॥

इत्येषा नित्यपूजायाः पद्धतिर्गद्यरूपिणी ।
तव स्नेहेन निर्णीता नाख्येया कौलिकैः प्रिये ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये सूर्यपूजापद्धति-निरूपणं द्वात्रिंशः पटलः ॥ ३२ ॥



अथ

त्रयस्त्रिंशः पटलः ।



श्रीभैरव उवाच ।

यो देवदेवो भगवान् भास्करो महसां निधिः ।
गायत्रीनायको भास्वान् सवितेति प्रगीयते ॥ १ ॥
तस्याहं कवचं दिव्यं वज्रपञ्जरकाभिधम् ।
सर्वमन्त्रमयं गुह्यं मूलविद्यारहस्यकम् ॥ २ ॥
सर्वपापापहं देवि दुःखदारिद्र्यनाशनम् ।

१ 'श्रेष्ठ' क पाठः । २ 'दिव्यं' क. पाठः । ३ 'पापहरं' क. ख. पाठः ।

महाकुष्ठहरं पुण्यं सर्वरोगनिवर्हणम् ॥ ३ ॥
सर्वशत्रुसमूहघ्नं संग्रामे विजयप्रदम् ।
सर्वतेजोमयं सर्वदेवदानवपूजितम् ॥ ४ ॥
रणे राजभये घोरे सर्वोपद्रवनाशनम् ।
मातृकावेष्टितं वर्म भैरवाननिर्गतम् ॥ ५ ॥
ग्रहपीडाहरं देवि[1] सर्वसङ्कटनाशनम् ।
धारणादस्य देवेशि ब्रह्मा लोकपितामहः ॥ ६ ॥
विष्णुर्नारायणो देवि रणे दैत्याञ्जयिष्यति ।
शङ्करः सर्वलोकेशो वासवोऽपि दिवस्पतिः ॥ ७ ॥
ओषधीशः शशी देवि शिवोऽहं भैरवेश्वरः ।
मन्त्रात्मकं परं वर्म सवितुः सारमुत्तमम् ॥ ८ ॥
यो धारयेद् भुजे मूर्ध्नि रविवारे महेश्वरि ।
स राजवल्लभो लोके तेजस्वी वैरिमर्दनः ॥ ९ ॥
बहुनोक्तेन किं देवि कवचस्यास्य धारणात् ।
इह लक्ष्मीधनारोग्य-वृद्धिर्भवति नान्यथा ॥ १० ॥
परत्र परमा मुक्तिर्देवानामपि दुर्लभा ।
कवचस्यास्य देवेशि मूलविद्यामयस्य च ॥ ११ ॥
वज्रपञ्जरकाख्यस्य मुनिर्ब्रह्मा समीरितः ।
गायत्र्यं छन्द इत्युक्तं देवता सविता स्मृतः ॥ १२ ॥
माया बीजं शरत् शक्तिर्नमः कीलकमीश्वरि ।
सर्वार्थसाधने देवि विनियोगः प्रकीर्तितः ॥ १३ ॥

अस्य श्रीवज्रपञ्जरकवचस्य, ब्रह्मा ऋषिः, गायत्र्यं छन्दः, श्रीसविता देवता, ह्रीं बीजं, सः शक्तिः, नमः कीलकं, सर्वार्थसाधने वज्रपञ्जरकवच-पाठे विनियोगः ॥

---

१ 'देवि' क. पाठः । २ 'निवारणम्' क. पाठः ।

ॐत्रंत्रांइंईं शिरः पातु ॐ सूर्यो मन्त्रविग्रहः ।
उंऊंऋंॠं ललाटं मे द्रां रविः पातु चिन्मयः ॥ १४ ॥
ऌंॡंएंऐं पातु नेत्रे द्रीं ममारुणसारथिः ।
ओंऔंअंअः श्रुती पातु सः सर्वजगदीश्वरः ॥ १५ ॥
कंखंगंघं पातु गण्डौ सं सूरैः सुरपूजितः ।
चंछंजंझं च नासां मे पातु र्यो अर्यमा प्रभुः ॥ १६ ॥
टंठंडंढं मुखं पायाद् यं योगीश्वरपूजितः ।
तंथंदंधं गलं पातु नं नारायणवल्लभः ॥ १७ ॥
पंफंबंभं मम स्कन्धौ पातु मं महतां निधिः ।
यरंलंवं भुजौ पातु मूलं मकलनायकः ॥ १८ ॥
शंषंसंहं पातु वक्षो मूलमन्त्रमयो ध्रुवः ।
ळक्षः कुक्षिं सदा पातु ग्रहनाथो दिनेश्वरः ॥ १९ ॥
ङंञंणंनंमं मे पातु पृष्ठं दिवसनायकः ।
अंआंइंईं उंऊंऋंॠं नाभिं पातु तमोपहः ॥ २० ॥
ऌंॡंएंऐं ओंऔंअंअः लिङ्गं मेऽव्याद् ग्रहेश्वरः ।
कंखंगंघंचं छंजंझं कटिं भानुर्ममावतु ॥ २१ ॥
टंठंडंढं तंथंदंधं जानू भास्वान् ममावतु ।
पंफंबंभं यंरंलंवं जङ्घे मेऽव्याद् विभाकरैः ॥ २२ ॥
शंषंसंहंळंक्षः पातु मूलं पादौ त्रयीतनुः ।
ङंञंणंनंमं मे पातु सविता सकलं वपुः ॥ २३ ॥
सोमः पूर्वे च मा पातु भौमोऽग्नौ मा सदावतु ।
बुधो मा दक्षिणे पातु नैर्ऋत्यां गुरुरेव माम् ॥ २४ ॥
पश्चिमे मां सितः पातु वायव्यां मा शनैश्चरः ।
उत्तरे मां तमः पायादैशान्यां मा शिखी तथा ॥ २५ ॥

ऊर्ध्वं मां पातु मिहिरो मामधस्ताज्जगत्पतिः ।
प्रभाते भास्करः पातु मध्याह्ने मां दिनेश्वरः ॥ २६ ॥
सायं वेदप्रियः पातु निशीथे विस्फुरापतिः ।
सर्वत्र सर्वदा सूर्यः पातु मां चक्रनायकः ॥ २७ ॥
रणे राजकुले द्यूते विवादे शत्रुसङ्कटे ।
सङ्ग्रामे च ज्वरे रोगे पातु मां सविता प्रभुः ॥ २८ ॥
ओंओंओं उत ओंऊऊहसमर्यः सूर्योऽवतान्मां भयाद्
द्रांद्रींद्रुं[3] दहहा हसौः हसहसौः हंसोऽवतात् सर्वतः ।
सःसःसः ससमा नृपाद्वनचराच्चौराद्रणात् संकटात्
पायान्मां कुलनायकोऽपि सविता ओंह्रींहसौः सर्वदा ॥ २९ ॥
द्रांद्रींद्रूं दर्घनं तथा च तरणिर्भांभैर्भयाद् भास्करो
रारींरूं रुरुरूं रविर्ज्वरभयात् कुष्ठाच्च शूलामयात् ।
अंअंआं विविवीं महामयभयं मां पातु मार्तण्डको
मूलव्याप्ततनुः सदावतु परं हंसः सहस्रांशुमान् ॥ ३० ॥
इति श्रीकवचं दिव्यं वज्रपञ्जरकाभिधम् ।
सर्वदेवरहस्यं च मातृकामन्त्रवेष्टितम् ॥ ३१ ॥
महारोगभयघ्नं च पापघ्नं मन्मुखोदितम् ।
गुह्यं यशस्करं पुण्यं सर्वश्रेयस्करं शिवे ॥ ३२ ॥
लिखित्वा रविवारे तु तिथ्ये वा जन्मभे प्रिये ।
अष्टगन्धेन दिव्येन सुधाक्षीरेण पार्वति ॥ ३३ ॥
अर्कक्षीरेण पुण्येन भूर्जत्वचि महेश्वरि ।
कनकीकाष्ठलेखन्या कवचं भास्करोदये ॥ ३४ ॥
श्वेतसूत्रेण रक्तेन श्यामेनावेष्टयेद् गुटीम् ।
सौवर्णेनाथ संवेष्ट्य धारयेन्मूर्ध्नि वा भुजे ॥ ३५ ॥

---

१ 'देश' ख. पाठ । २ 'सहा' क ख ग पाठ । ३ 'स' क.ख.ग. पाठ । ४ 'वर्ण' ख.पाठ ।

रणे रिपूञ्जयेद् देवि वादे सदसि जेष्यति ।
राजमान्यो भवेन्नित्यं सर्वतेजोमयो भवेत् ॥ ३६ ॥
कण्ठस्था पुत्रदा देवि कुक्षिस्था रोगनाशिनी ।
शिरःस्था गुटिका दिव्या राजलोकवशङ्करी ॥ ३७ ॥
भुजस्था धनदा नित्यं तेजोबुद्धिविवर्धिनी ।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना ॥ ३८ ॥
कण्ठे सा धारयेन्नित्यं बहुपुत्रा प्रजायते ।
यस्य देहे भवेन्नित्यं गुटिकैषा महेश्वरि ॥ ३९ ॥
महास्त्राणीन्द्रमुक्तानि ब्रह्मास्त्रादीनि पार्वति ।
तद्देहं प्राप्य व्यर्थानि भविष्यन्ति न संशयः ॥ ४० ॥
त्रिकालं यः पठेन्नित्यं कवचं वज्रपञ्जरम् ।
तस्य सद्यो महादेवि सविता वरदो भवेत् ॥ ४१ ॥
अज्ञात्वा कवचं देवि पूजयेद् यस्त्रयीतनुम् ।
तस्य पूजार्जितं पुण्यं जन्मकोटिषु निष्फलम् ॥ ४२ ॥
शतावर्तं पठेद्धर्मे सप्तम्यां रविवासरे ।
महाकुष्ठादितो देवि मुच्यते नात्र संशयः ॥ ४३ ॥
नीरोगो यः पठेद्धर्मे दरिद्रो वज्रपञ्जरम् ।
लक्ष्मीवाञ्जायते देवि सद्यः सूर्यप्रसादतः ॥ ४४ ॥
भक्त्या यः पपठेद् देवि कवचं प्रत्यहं शिवे ।
इह लोके श्रियं भुक्त्वा देहान्ते मुक्तिमाप्नुयात् ॥ ४५ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये वज्रपञ्जराख्यसूर्यकवच
निरूपणं त्रयस्त्रिंश. पटल ॥ ३३ ॥

अथ

चतुस्त्रिंशः पटलः ।

श्रीभैरव उवाच ।

देवदेवि महादेवि सर्वाभयवरप्रदे ।
त्वं मे प्राणप्रिया प्रीता वरदोऽहं तव स्थितः ॥ १ ॥
किञ्चित् प्रार्थय मे प्रेम्णा वक्ष्ये तत्ते ददाम्यहम् ।

श्रीदेव्युवाच ।

भगवन् देवदेवेश महारुद्र महेश्वर ॥ २ ॥
यदि देयो वरो मह्यं वरयोग्यास्म्यहं यदि ।
देवदेवस्य सवितुर्वद नाममहस्रकम् ॥ ३ ॥

श्रीभैरव उवाच ।

एतद्गुह्यतमं देवि सर्वस्वं मम पार्वति ।
रहस्यं सर्वदेवानां दुर्लभं कामनावहम् ॥ ४ ॥
यो देवो भगवान् सूर्यो वेदकर्ता प्रजापतिः ।
कर्मसाक्षी जगच्चक्षुः स्तोतुं तं केन शक्यते ॥ ५ ॥
यस्यादिर्मध्यमन्तं च सुरैरपि न गम्यते ।
तस्यादिदेवदेवस्य सवितुर्जगदीशितुः ॥ ६ ॥
मन्त्रनाममहस्रं ते वक्ष्ये साम्राज्यसिद्धिदम् ।
सर्वपापापहं देवि तन्त्रवेदागमोद्धृतम् ॥ ७ ॥
माङ्गल्यं पौष्टिकं चैव रक्षोघ्नं पावनं महत् ।
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ॥ ८ ॥
धनदं पुण्यदं पुण्यं श्रेयस्करं यशस्करम् ।

पापहरं देवि मन्त्रनाम' क ग घ पाठः ।

वक्ष्यामि परमं तत्त्वं मूलविद्यात्मकं परम् ॥ ९ ॥
ब्रह्मणो यत् परं ब्रह्म पराणामपि यत् परम् ।
मन्त्राणामपि यत् तत्त्वं महसामपि यन्महः ॥ १० ॥
शान्तानामपि यः शान्तो मनूनामपि यो मनुः ।
योगिनामपि यो योगी वेदानां प्रणवश्च यः ॥ ११ ॥
ग्रहाणामपि यो भास्वान् देवानामपि वासवः ।
ताराणामपि यो राजा वायूनां च प्रभञ्जनः ॥ १२ ॥
इन्द्रियाणामपि मनो देवीनामपि यः परा ।
नगानामपि यो मेरुः पन्नगानां च वासुकिः ॥ १३ ॥
तेजसामपि यो वह्निः कारणानां च यः शिवः ।
सविता यस्तु गायत्र्याः परमात्मेति कीर्त्यते ॥ १४ ॥
वक्ष्ये परमहंसस्य तस्य नामसहस्रकम् ।
सर्वदारिद्र्यशमनं सर्वदुःखविनाशनम् ॥ १५ ॥
सर्वपापप्रशमनं सर्वतीर्थफलप्रदम् ।
ज्वररोगापमृत्युघ्नं सदा सर्वाभयप्रदम् ॥ १६ ॥
तत्त्वं परमतत्त्वं च सर्वसारोत्तमोत्तमम् ।
राजप्रसादविजय-लक्ष्मीविभवकारणम् ॥ १७ ॥
आयुष्करं पुष्टिकरं सर्वयज्ञफलप्रदम् ।
मोहनस्तम्भनाकृष्टि-वशीकरणकारणम् ॥ १८ ॥
अदातव्यमभक्ताय सर्वकामप्रपूरकम् ।
शृणुष्वावहिता भूत्वा सूर्यनामसहस्रकम् ॥ १९ ॥

अस्य श्रीसूर्यनामसहस्रस्य, श्रीब्रह्मा ऋषि, गायत्र्य छन्द श्रीभगवान् सविता देवता, ह्रां बीज, स्रं शक्ति, ह्रीं कीलक धर्मार्थकाममोक्षार्थे सूर्यसहस्रनामपाठे विनियोग । ध्यानम्—

कल्पान्तानलकोटिभास्वरमुखं सिन्दूरधूलीजपा-
वर्णं स्वर्किरीटिनं त्रिनयनं श्वेताब्जमध्यासनम् ।

नानाभूषणभूषितं स्मितमुखं रक्ताम्बरं चिन्मयं
सूर्यं स्वर्णसरोजरत्नकलशौ दोर्भ्यां दधानं भजे ॥ १ ॥
प्रत्यक्षदेवं विशदं सहस्रमरीचिभिः शोभितभूमिदेशम् ।
सप्ताश्वगं सद्ध्वजहस्तमाद्यं देवं भजेऽहं मिहिरं हृदब्जे ॥ २ ॥
ॐह्रांह्रींसः[1]हसःसोह[2] सविता भास्करो भगः ।
भगवान् सर्वलोकेशो भूतेशो भूतभावनः ॥ ३ ॥
भूतात्मा सृष्टिकृत् स्रष्टा कर्ता हर्ता जगत्पतिः ।
आदित्यो[2] वरदो वीरो वीरलो विश्वदीपनः ॥ ४ ॥
विश्वकृद् विश्वहृद् भक्तो भोक्ता भीमोऽभयापहः ।
विश्वात्मा पुरुषः साक्षी[3] परं ब्रह्म परात् परः ॥ ५ ॥
प्रतापवान् विश्वयोनिर्विश्वेशो विश्वतोमुखः ।
कामी[4] योगी महाबुद्धिर्मनस्वी[5] मनुरव्ययः ॥ ६ ॥
प्रजापतिर्विश्ववन्द्यो वन्दितो भुवनेश्वरः ।
भूतभव्यभविष्यात्मा तत्त्वात्मा ज्ञानवान् गुणी ॥ ७ ॥
सात्त्विको राजसस्तामस्तमस्वी करुणानिधिः[6] ।
सहस्रकिरणो भास्वान् भार्गवो भृगुरीश्वरः ॥ ८ ॥
निर्गुणो निर्ममो नित्यो नित्यानन्दो[7] निराश्रयः ।
तपस्वी कालकृत् कालः कमनीयतनुः कृशः ॥ ९ ॥
दुर्दर्शः सुदृशो दाशो दीनबन्धुर्दयाकरः[8] ।
द्विभुजोऽष्टभुजो धीरो दशबाहुर्दशातिगः ॥ १० ॥
दशाशफलदो विष्णुर्जिगीषुर्जयवाञ्छयी ।
जटिलो निर्भयो भानुः पद्महस्तः कुशेशयः ॥ ११ ॥

---

१ 'ह्सौं हस' ङ पाठ । २ 'आदित्य' ख पाठ । ३ 'साक्षात्' ङ पाठ ।
४ 'कामयोगी' क पाठ । ५ 'महस्वी' घ पाठ । ६ 'निमल' ख पाठ ।
७ 'निरानन्द' ग पाठ । ८ 'दयानिधि' ग पाठ ।

समाहितगतिर्धाता विधाता कृतमङ्गलः ।
मार्तण्डो लोकधृत् त्राता रुद्रो भद्रप्रदः प्रभुः ॥ १२ ॥
अरातिशमनः शान्तः शङ्करः कमलासनः ।
अचिन्त्यवपुः (१००) श्रेष्ठो महाचीनक्रमेश्वरः ॥ १३ ॥
महार्तिदमनो दान्तो महामोहहरो हरिः ।
नियतात्मा च कालेशो दिनेशो भक्तवत्सलः ॥ १४ ॥
कल्याणकारी कनठकर्कशः कामवल्लभः ।
व्योमचारी महान् सत्यः शम्भुरम्भोजवल्लभः ॥ १५ ॥
सामगः पञ्चमो द्रव्यो ध्रुवो दीनजनप्रियः ।
त्रिजटो रक्तवाहश्च रक्तवस्त्रो रतिप्रियः ॥ १६ ॥
कालयोगी महानादो निश्चलो दृश्यरूपधृक् ।
गम्भीरघोषो निर्घोषो घटहस्तो महोमयः ॥ १७ ॥
रक्ताम्बरधरो रक्तो रक्तमाल्यानुलेपनः ।
सहस्रहस्तो विजयो हरिणामी हरीश्वरः ॥ १८ ॥
मुण्डः कुण्डी भुजङ्गेशो रथी सुरथपूजितः ।
न्यग्रोधवासी न्यग्रोधो वृषकर्णः कुलन्धरः ॥ १९ ॥
शिखी चण्डी जटी ज्वाली ज्वालातेजोमयो विभुः ।
हेमो हेमकरो हारी हरिद्रासनसंस्थितः ॥ २० ॥
हरिदश्वो जगद्वासी जगतां पतिरिङ्गितः ।
विलोचनो विलासी च विरूपाक्षो विकर्तनः ॥ २१ ॥
विनायको विभासश्च भासो भासा पतिः पतिः ।
मतिमान् रतिमान् स्वक्षो विशालाक्षो विशंपतिः ॥ २२ ॥

बालरूपो गिरिचरः गीर्पतिर्गोमतीपतिः ।
गङ्गाधरो गणाध्यक्षो गणसेव्यो गणेश्वरः ॥ २३ ॥
गिरीशनयनावासी सर्वगामी सतीप्रियः ।
सत्यात्मकः सत्यधरः सत्यसन्धः सहस्रगुः ॥ २४ ॥
अपारमहिमा मुक्तो मुक्तिदो मोक्षकामदः ।
मूर्तिमान् (२००) दुर्धरोऽमूर्तिस्तुटिरूपो लवात्मकः ॥ २५ ॥
प्राणेशो व्यानदोऽपानसमानोदानरूपवान् ।
क्षपको घटिकारूपो मुहूर्तो दिनरूपवान् ॥ २६ ॥
पक्षो मास ऋतुर्वर्षो दिनकालेश्वरेश्वरः ।
अयनं युगरूपश्च कृतं त्रेतायुगस्त्रिपात् ॥ २७ ॥
द्वापरश्च कलिः कालः कालात्मा कलिनाशनः ।
मन्वन्तरात्मको देवः शक्रस्त्रिभुवनेश्वरः ॥ २८ ॥
वासवोऽग्निर्यमो रक्षो वरुणो यादसां पतिः ।
वायुर्वैश्रवणः शैर्व्यो गिरिजो जलजासनः ॥ २९ ॥
अनन्तोऽनन्तमहिमा परमेष्ठी गतज्वरः ।
कल्पान्तकलनः क्रूरः कालाग्निः कालसूदनः ॥ ३० ॥
महाप्रलयकृत् कृत्यः कृत्याशीर्युगवर्तनः ।
कालावर्तो युगधरो युगादिः शतकेश्वरः ॥ ३१ ॥
आकाशनिधिरूपश्च सर्वकालप्रवर्तकः ।
अचिन्त्यः सुबलो बालो बलाकाबल्लभो वरः ॥ ३२ ॥
वरदो वीर्यदो वाग्मी वाग्पतिर्वाग्विलासदः ।
साख्येश्वरो वेदगम्यो मन्त्रेशस्तन्त्रनायकः ॥ ३३ ॥
कुलाचारपरो नत्यो नतितुष्टो नतिप्रियः ।

अलमस्तुलमीमेय्यस्तुष्टा रोगनिवर्हणः ॥ ३४ ॥
प्रस्कन्दनो विभागश्च नीरांगो दशदिक्पतिः ।
वैराग्यदो विमानस्थो रत्नकुम्भधरायुधः ॥ ३५ ॥
महापादो महाहस्तो महाकायो महाशयः ।
ऋग्यजुःसामरूपश्च सष्टाथर्वणशाखिलः ॥ ३६ ॥
सहस्रशाखी सद्वृत्तो महाकल्पप्रियः पुमान् ।
कल्पवृक्षश्च मन्दारो (३००) मन्दाराचलशोभनः ॥ ३७ ॥
मेरुर्हिमालयो माली मलयो मलयद्रुमः ।
सन्तानकुसुमच्छन्नः सन्तानफलदो विराट् ॥ ३८ ॥
क्षीराम्भोधिर्घृताम्भोधिर्जलधिः क्लेशनाशनः ।
रत्नाकरो महामान्यो वैश्यो वेणुधरो वणिक् ॥ ३९ ॥
वसन्तो मारमामन्तो ग्रीष्मः कल्मषनाशनः ।
वर्षाकालो वर्षपतिः शरदम्भोजवल्लभः ॥ ४० ॥
हेमन्तो हेमकेयूरः शिशिरः शिशुवीर्यदः ।
सुप्रतिः सुगतिः साधुर्विष्णुः साम्बोऽम्बिकासुतः ॥ ४१ ॥
सारग्रीवो महाग्रजः सुनन्दो नन्दिसेवितः ।
सुमेरुशिखरावासी सप्तपातालगोचरः ॥ ४२ ॥
आकाशचारी नित्यात्मा विभुत्वविजयप्रदः ।
कुलकान्तः कुलाद्रीशो विनयी विजयी वियत् ॥ ४३ ॥
विश्वम्भरो वियच्चारी वियद्रूपो वियद्रथः ।
सुरथः सुगतस्तुल्यो वेणुवादनतत्परः ॥ ४४ ॥
गोपालो गोमयो गोप्ता प्रतिष्ठायी प्रजापतिः ।

आवेदनीयो वेदाद्यो महादिव्यवपुः सुराट् ॥ ४५ ॥
निर्जीवो जीवनो मन्त्री महार्णवनिनादभृत्[1] ।
वसुरावर्तनो नित्यः सर्वाम्नायप्रभुः सुधीः ॥ ४६ ॥
न्यायनिर्वापणः शूली कपाली पद्ममध्यगः ।
त्रिकोणनिलयश्चैत्यो बिन्दुमण्डलमध्यगः ॥ ४७ ॥
बहुमालो महामालो दिव्यमालाधरो जपः ।
जपाकुसुमसङ्काशो जपपूजाफलप्रदः ॥ ४८ ॥
सहस्रमूर्धा देवेन्द्रः सहस्रनयनो रविः ।
सर्वतत्त्वाश्रयो ब्रह्मा वीरवन्द्यो विभावसुः ॥ ४९ ॥
विश्वावसुर्वसुपतिर्वसुनाथो विसर्गवान् ।
आदिरादित्यलोकेशः सर्वगामी (४००) कलाश्रयः ॥ ५० ॥
भोगेशो देवदेवेन्द्रो नरेन्द्रो हव्यवाहनः ।
विद्याधरेशो विद्येशो यक्षेशो रक्षणो गुरुः ॥ ५१ ॥
रक्षःकुलैकवरदो गन्धर्वकुलपूजितः ।
अप्सरोवन्दितोऽजय्यो जेता दैत्यनिबर्हणः ॥ ५२ ॥
गुह्यकेशः पिशाचेशः किन्नरीपूजितः कुजः ।
सिद्धसेव्यः समाम्नायः साधुसेव्यः सरित्पतिः ॥ ५३ ॥
ललाटाद्यो विश्वदेहो नियमी नियतेन्द्रियः ।
अर्कोऽर्ककान्तरत्नेशोऽनन्तबाहुरलोपकः ॥ ५४ ॥
अलिपात्रधरोऽनङ्गोऽप्यम्बरेशोऽम्बराश्रयः ।
अकारमातृकानाथो देवानामादिराकृतिः ॥ ५५ ॥
आरोग्यकारी चानन्दविग्रहो निग्रहो ग्रहः ।
आलोककृत् तथादित्यो वीरादित्यः प्रजाधिपः ॥ ५६ ॥
आकाशरूपः स्वाकार इन्द्रादिसुरपूजितः ।

---

१ 'नादवान्' ख. पाठः । २ 'माद्यः' ख. पाठः ।

इन्दिरापूजितश्चेन्दुरिन्द्रलोकाश्रयस्त्विनः ॥ ५७ ॥
ईशान ईश्वरश्चन्द्रे ईश ईकारवल्लभः ।
उन्नतास्योऽप्युरुवपुरुन्नताद्रिचरो गुरुः ॥ ५८ ॥
उत्पलोऽप्युच्चलत्केतुरुच्चैर्हयगतिः सुखी ।
उकाराकारसुखितस्तथोष्मा निधिरूपणः ॥ ५९ ॥
ऋनूरुसारथिश्चोष्णभानुरूकारवल्लभः ।
ऋणहर्ता ऋलिहस्त ऋऋभूषणभूषितः ॥ ६० ॥
ॡप्तान्न ॡमनुस्यायी ॡलृगण्डयुगोज्ज्वलः ।
एणाङ्कामृतदर्शीनपट्टभृद् बहुगोचरः ॥ ६१ ॥
एकचैकधरश्चैकोऽनेकपैंचुस्तयैदयदः ।
एकारबीजरमण ऐऐओष्ठामृताकरः ॥ ६२ ॥
ओंकारकारणं ब्रह्म औकारौचित्यमण्डनः ।
ओऔदन्तालिरहितो महितो महतां पतिः ॥ ६३ ॥
अंविद्याभूषणो भूष्यो लक्ष्मीशोऽम्बीजरूपवान् ।
अःस्वरूपः (५००) स्वरमयः सर्वस्वरपरात्मकः ॥ ६४ ॥
अंअःस्वरूपमन्त्राङ्गः कलिकालनिवर्तकः ।
कर्मैकवरदः कर्मसाक्षी कल्मषनाशनः ॥ ६५ ॥
कचध्वंसी च कपिलः कनकाचलचारकः ।
कान्तः कामः कपिः क्रूरः कीरः केशनिसूदनः ॥ ६६ ॥
कृष्णः कापालिकः कुञ्जः कमलाश्रयणः कुली ।
कपालमोचकः काशः काश्मीरघनसारभृत् ॥ ६७ ॥
कूजत्किन्नरगीतेष्टः कुरुराजः कुलन्धरः ।
कुवासी कुलकौलेशः ककारोच्चरमण्डनः ॥ ६८ ॥

खवासी खेटकेशानः खड्गमुण्डधरः खगः ।
खगेश्वरश्च खचरः खेचरीगणसेवितः ॥ ६९ ॥
खरांशुः खेटकधरः खलहर्ता खवर्णकः ।
गन्ता गीतप्रियो गेयो गयावासी गणाश्रयः ॥ ७० ॥
गुणातीतो गोलगतिर्गुच्छलो गुणिसेवितः ।
गदाधरो गदहरो गाङ्गेयवरदः प्रगी ॥ ७१ ॥
गिङ्गिलो गोटिलो गान्तो गकाराक्षरभास्करः ।
घृणिमान् घुर्घुरारावो घण्टाहस्तो घटाकरः ॥ ७२ ॥
घनच्छन्नो घनगतिर्घनवाहनतर्पितः ।
ङान्तो ङेशो ङकाराङ्गश्चन्द्रकुङ्कुमवासितः ॥ ७३ ॥
चन्द्राश्रयश्चन्द्रधरोऽच्युतश्चम्पकसन्निभः ।
चामीकरप्रभश्चण्डभानुश्चण्डेशवल्लभः ॥ ७४ ॥
चञ्चच्चकोरकोकेष्टश्चपलश्चपलाश्रयः ।
चलत्पताकश्चण्डाद्रिश्चीवरैकधरोऽचरः ॥ ७५ ॥
चित्कलावर्धिताश्चिन्त्यश्चिन्ताध्वंसी चवर्णवान् ।
छत्रभृच्छलहृच्छन्दच् छुरिकाच्छिन्नविग्रहः ॥ ७६ ॥
जाम्बूनदाङ्गदोऽजातो जिनेन्द्रो जम्बुवल्लभः ।
जम्बारिर्जङ्घिटो जङ्घी जनलोकतमोपहः ॥ ७७ ॥
जयकारी (६००) जगद्धर्ता जरामृत्युविनाशनः ।
जगत्त्राता जगद्धाता जगद्ध्येयो जगन्निधिः ॥ ७८ ॥
जगत्साक्षी जगच्चक्षुर्जगन्नाथप्रियोऽजितः ।
जकाराकारमुकुटो झञ्झालञ्झाकृतिर्झटः ॥ ७९ ॥

---

१ 'खवासा' ङ पाठ । २ 'खेचराश्च' ख पाठ । ३ 'गदाहारः' ख. पाठः । ४ 'सुधी.' ख. पाठ । ५ 'गाजिल ग पाठ' । ६ 'गजगण्डाहताकर.' ख पाठः । ७ 'हृत्' घ ग पाठः, ८ 'जल्लि.' घ ग. पाठः । ९ 'योनि.' क. ख. पाठः ।

भिल्लीश्वरो भकारेशो भञ्जाञ्जुलिकराम्बुजः ।
भगाचरान्वितष्टङ्कष्टिट्टिमासनसंस्थितः ॥ ८० ॥
टीत्कारष्टङ्कधारी च ठःस्वरूपष्ठठाधिपः ।
डम्मरो डामरडिण्डी डामरीशो ढलाकृतिः ॥ ८१ ॥
डाकिनीसेवितो डाढी ढढगुल्फाङ्गुलिप्रभः ।
णेशप्रियो णदर्णेशो णकारपदपङ्कजः ॥ ८२ ॥
ताराधिपेश्वरस्तथ्यस्तन्त्रीवादनतत्परः ।
त्रिपुरेशस्त्रिनेत्रेशस्त्रयीतनुरधोक्षजः ॥ ८३ ॥
तामस्तामरसेष्टश्च तमोहर्ता तमोरिपुः ।
तन्द्राहर्ता तमोरूपस्तपसां फलदायकः ॥ ८४ ॥
तुट्यादिकलनाकान्तस्तकाराक्षरभूषणः ।
स्थाणुस्थलीस्थितो नित्यं स्थविरः स्थण्डिलः स्थुलः ॥८५॥
थकारजानुरध्यात्मा देवनायकनायकः ।
दुर्जयो दुःखहा दाता दारिद्र्यच्छेदनो दमी[3] ॥ ८६ ॥
दौर्भाग्यहर्ता देवेन्द्रो द्वादशाराब्जमध्यगः ।
द्वादशान्तैकवसतिर्द्वादशात्मा दिवस्पतिः ॥ ८७ ॥
दुर्गमो दैत्यशमनो दूरगो दुरतिक्रमः ।
दुर्ध्येयो दुष्टवंशघ्नो दयानाथो दयाकुलः ॥ ८८ ॥
दामोदरो दीधितिमान् दकाराक्षरमातृकः ।
धर्मबन्धुर्धर्मनिधिर्धर्मराजो धनप्रदः ॥ ८९ ॥
धनदेष्टो धनाध्यक्षो धरादर्शो धुरन्धरः ।
धूर्जटीक्षणवासी च धर्मक्षेत्रो धराधिपः ॥ ९० ॥
धाराधरो धुरीणश्च धर्मात्मा धर्मवत्सलः ।
धराभृद्वल्लभो धर्मी धकाराक्षरभूषणः ॥ ९१ ॥

---

१ 'स्थिर ख ग पाठ । २ दानव' क ख पाठ । ३ 'च्छेदनोद्यमी' ख ग पाठ. ।

नर्मप्रियो नन्दिरुद्रो (७००) नेता नीतिप्रियो नयी ।
नलिनीवल्लभो नुन्नो नाट्यकृन्नाट्यवर्धनः ॥ ९२ ॥
नरनाथो नृपस्तुत्यो नभोगामी नमःप्रियः ।
नमोन्तो नमितारातिर्नरनारायणाश्रयः ॥ ९३ ॥
नारायणो नीलरुचिर्नम्राङ्गो नीललोहितः ।
नादरूपो नादमयो नादविन्दुस्वरूपकः ॥ ९४ ॥
नाथो नागपतिर्नागो नगराजाश्रितो नगः ।
नाकस्थितोऽनेकवपुर्नकाराक्षरमातृकः ॥ ९५ ॥
पद्माश्रयः परं ज्योतिः पीवरांसः पुटेश्वरः ।
प्रीतिप्रियः प्रेमकरः प्रणतार्तिभयापहः ॥ ९६ ॥
परत्राता परध्वंसी पुरारिः पुरसंस्थितः ।
पूर्णानन्दमयः पूर्णतेजाः पूर्णेश्वरीश्वरः ॥ ९७ ॥
पटोलवर्णः पटिमा पाटलेशः परात्मवान् ।
परमेशवपुः प्रांशुः प्रमत्तः प्रणतेष्टदः ॥ ९८ ॥
अपारपारदः पीनः पीताम्बरप्रियः पविः ।
पाचनः पिचुलः प्लुष्टः प्रमदाजनसौख्यदः ॥ ९९ ॥
प्रमोदी प्रतिपक्षघ्नः पकाराक्षरमातृकः ।
फलं भोगापवर्गस्य फलिनीशः फलात्मकः ॥ १०१ ॥
फुल्लदम्भोजमध्यस्थः फुल्लदम्भोजधारकः ।
स्फुटद्योतिः स्फुटाकारः स्फटिकाचलचारकः ॥ १०२ ॥
स्फूर्जत्किरणमाली च फकाराक्षरपार्श्वकः ।
बालो बलप्रियो बान्तो बिलध्वान्तहरो बली ॥ १०३ ॥
बालादिर्बर्बरध्वंसी बब्बोलामृतपानकः ।
बुधो बृहस्पतिर्बृन्दो बृहदश्वो बृहद्गतिः ॥ १०४ ॥
बपुष्टो भीमरूपश्च भामयो भेश्वरप्रियः ।

---

१ 'नन्दिप्रिय.' ग घ पाठः । २ 'नादप्रियः' ख. पाठः । ३ 'प्रमदः' ग. घ पाठ. ४ 'स्फुरद द्योती' घ पाठ. । ५ 'हृतः' ग. घ. पाठः ।

भगो भृगुर्भृगुस्थायी भार्गवः कविशेखरः ॥ १०५ ॥
भाग्यदो भानुदीप्ताङ्गो भनाभिश्च भमातृकः ।
महाकालो (८००) महाध्यक्षो महानादो महामतिः ॥ १०६ ॥
महोज्ज्वलो मनोहारी मनोगामी मनोभवः ।
मानदो मल्लहा मल्लो मेरुमन्दरमन्दिरः ॥ १०७ ॥
मन्दारमालाभरणो माननीयो मनोमयः ।
मोदितो मदिराहारो मार्तण्डो मुण्डमुण्डितः ॥ १०८ ॥
महावराहो मीनेशो मेषगो मिथुनेष्टदः ।
मदालसोऽमरस्तुत्यो मुरारिवरदो मनुः ॥ १०९ ॥
माधवो मेदिनीशश्च मधुकैटभनाशनः ।
माल्यवान् मेघनो मारो मेधावी मुसलायुधः ॥ ११० ॥
मुकुन्दो मुररीशानो मरालफलदो मदः ।
मदनो मोदकाहारो मकाराक्षरमातृकः ॥ १११ ॥
यज्ञा यज्ञेश्वरो यान्तो योगिनां हृदयस्थितः ।
यात्रिको यत्नफलदो यायी यामलनायकः ॥ ११२ ॥
योगनिद्राप्रियो योगकारणं योगिवत्सलः ।
यष्टिधारी च यत्नेशो योनिमण्डलमध्यगः ॥ ११३ ॥
युयुत्सुजयदो योद्धा युगधर्मानुवर्तकः ।
योगिनीचक्रमध्यस्थो युगलेश्वरपूजितः ॥ ११४ ॥
यान्तो यज्ञकृतिलको यकाराक्षरभूषणः ।
रामो रमणशीलश्च रत्नभानू रुरुप्रियः ॥ ११५ ॥
रत्नमाली रत्नतुङ्गो रत्नपीठान्तरस्थितः ।
रत्नांशुमाली रत्नाढ्यो रत्नकङ्कणनूपुरः ॥ ११६ ॥

---

१ 'मलयभृत्य.' ग पाठ., २ 'मोदनो' ग पाठ । ३ 'योगि' ख पाठ० ।
४ 'माला' ख पाठ

रत्नाङ्गदलसद्बाहू रत्नपादुकमण्डितः ।
रोहिणीशाश्रयो रक्षाकरो रात्रिश्वरान्तकः ॥ ११७ ॥
रकाराक्षररूपश्च लज्जाबीजाश्रितो लवः ।
लक्ष्मीभानुर्लतावासी लसत्कान्तिश्च लोकभृत् ॥ ११८ ॥
लोकान्तकहरो लामावल्लभो लोमशोऽलिगः ।
लिङ्गेश्वरो लिङ्गनादो लीलाकारी ललम्बुसः ॥ ११९ ॥
लक्ष्मीवाँल्लोकविध्वंसी लकाराक्षरभूषणः ।
वामनो वीरवीरेन्द्रो वाचालो (६००) वाक्पतिप्रियः ॥ १२० ॥
वाचामगोचरो वान्तो वीणावेणुधरो वनम् ।
वाग्भवो वालिशध्वंसी विधानायकनायकः ॥ १२१ ॥
वकारमातृकामौलिः शाम्भवेष्टप्रदः शुकः ।
शशी शोभाकरः शान्तः शान्तिकृच्छमनप्रियः ॥ १२२ ॥
शुभङ्करः शुक्लवस्त्रः श्रीपतिः श्रीयुतः श्रुतः ।
श्रुतिगम्यः शरद्बीजमण्डितः शिष्टसेवितः ॥ १२३ ॥
शिष्टाचारः शुभाचारः शेषः शेषालताडनः ।
शिपिविष्टः शिविः[1] शुक्रसेव्यः शाम्बरमातृकः ॥ १२४ ॥
षडाननः षट्करकः षोडशस्वरभूषितः ।
षट्पदस्वनसन्तोषी षडाम्नायप्रवर्तकः ॥ १२५ ॥
षड्रसास्वादसन्तुष्टः षकाराक्षरमातृकः ।
सूर्यभानुः सूरभानुः सूरिभानुः सुखाकरः ॥ १२६ ॥
समस्तदैत्यवंशाग्निः समस्तसुरसेवितः ।
समस्तसाधकेशानः समस्तकुलशेखरः ॥ १२७ ॥
सुरसूर्यः सुधासूर्यः स्वःसूर्यः साम्बरेश्वरः ।
हरित्सूर्यो हरिद्भानुर्हविर्भुग् हव्यवाहनः ॥ १२८ ॥

---

१ 'मार्कण्ड' ख. पाठः । २ 'शिवः' ख. 'ग. पाठः ।

हालासूर्यो होमसूर्यो हुतसूर्यो हरीश्वरः ।
क्रूंबीजसूर्यो क्ष्रींसूर्यो हकाराक्षरभाक्तकः ॥ १२९ ॥
ऊंबीजभण्डितः सूर्यः क्षोणीसूर्यः क्षमापतिः ।
क्षुत्सूर्यः क्षान्तसूर्यश्च ऊंक्षःसूर्यः सदाशिवः ॥ १३० ॥
अकारसूर्यः क्षःसूर्यः सर्वसूर्यः कृपानिधिः ।
भूःसूर्यश्च भुवःसूर्यः स्वःसूर्यः सूर्यनायकः ॥ १३१ ॥
अहस्सूर्य ऋक्षसूर्यो लग्नसूर्यो महेश्वरः ।
राशिसूर्यो योगसूर्यो मन्त्रसूर्यो मनूत्तमः ॥ १३२ ॥
तत्त्वसूर्यः परासूर्यो विष्णुसूर्यः प्रतापवान् ।
रुद्रसूर्यो ब्रह्मसूर्यो वीरसूर्यो वरोत्तमः ॥ १३३ ॥
धर्मसूर्यः कर्मसूर्यो विघ्नसूर्यो विनायकः । (१०००)
इतीदं देवदेवेशि मन्त्रनामसहस्रकम् ॥ १३४ ॥
देवदेवस्य सवितुः सूर्यस्यामिततेजसः ।
सर्वसारमयं दिव्यं ब्रह्मतेजोविवर्धनम् ॥ १३५ ॥
ब्रह्मज्ञानमयं पुण्यं पुण्यतीर्थफलप्रदम् ।
सर्वयज्ञफलैस्तुल्यं सर्वसारखतप्रदम् ॥ १३६ ॥
सर्वश्रेयस्करं लोके कीर्तिदं धनदं परम् ।
सर्वव्रतफलोद्रिक्तं सर्वधर्मफलप्रदम् ॥ १३७ ॥
सर्वरोगहरं देवि शरीरारोग्यवर्धनम् ।
प्रभावमस्य देवेशि नाम्नां सहस्रकस्य च ॥ १३८ ॥
कल्पकोटिशतैर्वर्षैर्नैव शक्नोमि वर्णितुम् ।
यं यं काममभिध्यायेद् देवानामपि दुर्लभम् ॥ १३९ ॥
तं तं प्राप्नोति सहसा पठनेनास्य पार्वति[1] ।
यः पठेच्छ्रावयेद्वापि शृणोति निपतेन्द्रियः ॥ १४० ॥

---

१ 'सुन्दरि' ख. ग. पाठः ।

स वीरो धर्मिणां राजा लक्ष्मीवानपि जायते ।
धनवाञ्जायते लोके पुत्रवान् राजवल्लभः ॥ १४१ ॥
आयुरारोग्यवान् नित्यं स भवेत् संपदां पदम् ।
रवौ पठेन्महादेवि सूर्यं संपूज्य कौलिकः ॥ १४२ ॥
सूर्योदये रविं ध्यात्वा लभेत् कामान् यथेप्सितान् ।
संक्रान्तौ यः पठेद् देवि त्रिकालं भक्तिपूर्वकम् ॥ १४३ ॥
इह लोके श्रियं भुक्त्वा सर्वरोगैः प्रमुच्यते ।
सप्तम्यां शुक्लपक्षे यः पठेदस्तंगते रवौ ॥ १४४ ॥
सर्वारोग्यमयं देहं धारयेत् कौलिकोत्तमः ।
व्यतीपाते पठेद् देवि मध्याह्ने संयतेन्द्रियः ॥ १४५ ॥
धनं पुत्रान् यशो मानं लभेत् सूर्यप्रसादतः ।
चक्रार्चने पठेद् देवि जपन् मूलं रविं स्मरन् ॥ १४६ ॥
रवीभूत्वा महाचीनक्रमाचारविचक्षणः ।
सर्वशत्रून् विजित्याशु लभेल्लक्ष्मीं प्रतापवान् ॥ १४७ ॥
यः पठेत् परदेशस्थो वटुकार्चनतत्परः ।
कान्ताश्रितो वीतभयो भवेत् स शिवसन्निभः ॥ १४८ ॥
शतावर्तं पठेद्यस्तु सूर्योदययुगान्तरे ।
सविता सर्वलोकेशो वरदः सहसा भवेत् ॥ १४९ ॥
बहुनात्र किमुक्तेन पठनादस्य पार्वति ।
इह लक्ष्मीं सदा भुक्त्वा परत्रामोति तत्पदम् ॥ १५० ॥
रवौ देवि लिखेद्भूर्जे मन्त्रनामसहस्रकम् ।
अष्टगन्धेन दिव्येन नीलपुष्पहरिद्रया ॥ १५१ ॥
पञ्चामृतौषधीमिश्र नृपुक्पीयूषविन्दुभिः ।
विलिख्य विधिवन्मन्त्री यन्त्रमध्येऽर्णवेष्टितम् ॥ १५२ ॥
गुटीं विधाय संपूज्य मूलमन्त्रमनुस्मरन् ।

कन्याकर्तितसूत्रेण वेष्टयेद्रक्तलाक्षया ॥ १५३ ॥
सुवर्णेन च संवेष्ट्य पञ्चगव्येन शोधयेत् ।
साधयेन्मन्त्रराजेन धारयेन्मूर्ध्नि वा भुजे ॥ १५४ ॥
किं किं न साधयेद् देवि यन्ममापि सुदुर्लभम् ।
कुष्ठरोगी च शूली च प्रमेही कुक्षिरोगवान् ॥ १५५ ॥
भगन्धरातुरोऽप्यर्शी अश्मरीवांश्च कृच्छ्रवान् ।
मुच्यते सहसा धृत्वा गुटीमेतां सुदुर्लभाम् ॥ १५६ ॥
वन्ध्या च काकवन्ध्या च मृतवत्सा च कामिनी ।
धारयेद्गुटिकामेतां वक्षसि स्मयतर्पिता ॥ १५७ ॥
वन्ध्या लभेत् सुतं कान्तं काकवन्ध्यापि पार्वति ।
मृतवत्सा बहून् पुत्रान् सुरूपांश्च चिरायुषः ॥ १५८ ॥
रणे गत्वा गुटीं धृत्वा शत्रूञ्जित्वा लभेच्छ्रियम् ।
अक्षताङ्गो महाराजः सुखी स्वपुरमाविशेत् ॥ १५९ ॥
यो धारयेद् भुजे नित्यं राजलोकवशङ्करीम् ।
गुटिकां मोहनाकर्षस्तम्भनोच्चाटनक्षमाम् ॥ १६० ॥
स भवेत् सूर्यसङ्काशो महसा महसां निधिः ।
धनेन धनदो देवि विभवेन च शंकरः ॥ १६१ ॥
श्रियेन्द्रो यशसा रामः पौरुषेण च भार्गवः ।
गिरा बृहस्पतिर्देवि नयेन भृगुनन्दनः ॥ १६२ ॥
बलेन वायुसङ्काशो दयया पुरुषोत्तमः ।
आरोग्येण घटोद्भूतिः कान्त्या पूर्णेन्दुसन्निभः ॥ १६३ ॥
धर्मेण धर्मराजश्च रत्ने रत्नाकरोपमः ।
गाम्भीर्येण तथाम्भोधिर्दातृत्वेन बलिः स्वयम् ॥ १६४ ॥
सिद्ध्या श्रीभैरवः साक्षादानन्देन चिदीश्वरः ।

---

१ 'मूलमन्त्रेण मन्त्रयेत्' ख. ग. पाठः ।

किं प्रलापेन बहुना पठेद्वा धारयेच्छिवे ॥ १६५ ॥
शृणुयाद् यः परं दिव्यं सूर्यनामसहस्रकम् ।
स भवेद् भास्करः साक्षात् परमानन्दविग्रहः ॥ १६६ ॥
स्वतन्त्रः स प्रयात्यन्ते तद्विष्णोः परमं पदम् ।
इदं दिव्यं महत् तत्त्वं सूर्यनामसहस्रकम् ॥ १६७ ॥
अप्रकाश्यमदातव्यमवक्तव्यं दुरात्मने ।
अभक्ताय कुचैलाय परशिष्याय पार्वति ॥ १६८ ॥
कर्कशायाकुलीनाय दुर्जनायाधबुद्धये ।
गुरुभक्तिविहीनाय निन्दकाय शिवागमे ॥ १६९ ॥
देयं शिष्याय शान्ताय गुरुभक्तिपराय च ।
कुलीनाय सुभक्ताय सूर्यभक्तिरताय च ॥ १७० ॥
इदं तत्त्वं हि तत्त्वानां वेदागमरहस्यकम् ।
सर्वमन्त्रमयं गोप्यं गोपनीयं स्वयोनिवत् ॥ १७१ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये सूर्यसहस्रनाम-निरूपणं चतुस्त्रिंशः पटलः ॥ ३४ ॥

अथ

पञ्चत्रिंशः पटलः ।

श्रीभैरव उवाच ।
अधुना देवि वक्ष्यामि स्तोत्रं मन्त्रनिरूपणम् ।
पञ्चमाङ्गमयं तत्त्वं सर्वापत्तारणं ध्रुवम् ॥ १ ॥

१ 'इद भद्र' घ पाठः ।

अष्टसिद्धिमयं साध्यं सिद्धिदं बुद्धिवर्धनम् ।
सर्वामयप्रशमनं तेजोबलविवर्धनम् ॥ २ ॥
महादारिद्र्यहरणं पुत्रपौत्रप्रदं शिवे ।
भोगापवर्गदं लोके रहस्यं मम पार्वति ॥ ३ ॥
स्तोत्रस्यास्य महादेवि ऋषिर्ब्रह्मा समीरितः ।
गायत्र्यं छन्द इत्युक्तं देवता सविता स्मृतः ॥ ४ ॥
बीजं च व्योमाख्यातं भाया शक्तिरितीरिता ।
प्रणवः कीलकं देवि विश्वं दिग्बन्धनं ततः ॥ ५ ॥
भोगापवर्गसिद्ध्यर्थं विनियोगः प्रकीर्तितः ।

अस्य श्रीसूर्यस्तोत्रमन्त्रस्य, श्रीब्रह्मा ऋषि., गायत्र्यं छन्दः, सविता देवता, ह्रां बीज, ह्रीं शक्ति, ॐ कीलक, मम दिग्बन्धनं, भोगापवर्गसिद्ध्यर्थे पाठे विनियोगः ॥ ध्यानम्—

देदीप्यमानमुकुटं माणिक्यकुण्डलमण्डितम् ।
विस्फुरालिङ्गितं ध्यात्वा स्तोत्रमेवदुदीरयेत् ॥ ६ ॥
कल्पान्तानलकोटिभास्वरमुखं सिन्दूरधूलीजपा-
वर्णं रत्नकिरीटिनं द्विनयनं श्वेताब्जमध्यासनम् ।
नानाभूषणभूषितं स्मितमुखं रक्ताम्बरं चिन्मयं
मूर्यं स्वर्णसरोजरत्नकलशौ दोर्भ्यां दधानं भजे ॥ ७ ॥
वेदाद्यं नादविन्दुस्फुरितशशिकलालङ्कृतं मन्त्रमूलं
यो ध्यायेद्वेदविद्याध्ययनविरहितो जाड्यपूर्णो दरिद्रः ।
सद्यः स चोर्वीपालोज्ज्वलमुकुटलसद्रत्ननीराजिताङ्घ्रि-
र्वागीशं जेष्यते[1] द्राङ् सुरसदसि सुधापूरिताभिश्च वाग्भिः ॥८॥
शिवाकारं वह्निं शशधरकलाविन्दुललितं
विभो ध्यात्वेच्चित्ते मनुमुकुटरत्नं जपति यः ।

---

1 ' जीयते ' क ख, ग पाठ ।

स संग्रामे जित्वा सकलरिपुसङ्घातमचिराद्
भवेत् सम्राड् भूमौ व्रजति हि परासुस्तव पदम् ॥ ९ ॥
व्योमानलारूढमिति स्मरेद् यो
वामाक्षिबिन्द्वीन्दुकलाभिरामम् ।
गद्यादिपद्यामृतवर्षिणी वाग्
वक्त्रे विभो तस्य करस्थिता श्रीः ॥ १० ॥
शक्तिं भक्तियुतो जपेद्यदि मनोर्मध्ये स्मरन् भास्करं
रोगार्तो निजशक्तिकामरसिको हालारसेनालसः ।
वीरो वीर्यमयो निरामयवपुर्भूत्वेह भुक्त्वा श्रियं
स्वर्गस्त्रीजनवीजितः स भगवन् धामाव्ययं यास्यति ॥ ११ ॥
सूर्यायेत्यभिधाक्षराणि जपते यो देव सूर्योदये
मूकः शोकयुतो महामयमयो दारिद्र्यपीडाकुलः ।
सद्यो गद्यसुपद्यसारसरला निर्याति वाणी मुखात्
तस्यारोग्यतनोर्भवन्ति भगवन् वश्याः सदा संपदः ॥१२॥
विश्वं विश्वमनोर्विभोऽश्वलगवं यो मानसे सञ्जपेद्
रात्रौ कामकलासमाहिततनुः कामातुरः कौतुकी ।
कामं हन्त तिलोत्तमोत्तमतमा कामाभिरामाऽसमा
सद्यस्तस्य वशीभविष्यति महातेजस्विनो मानिनः ॥ १३ ॥
मणिमुकुटमरीचिस्फीतभास्वल्ललाटं
कनककलशदिव्याम्भोजहस्तारविन्दम् ।
निखिलनिगमगम्यं विस्फुरालिङ्गिताङ्गं
मनसि सरमिजेष्टं सूर्यमीशं नमामि ॥ १४ ॥
भूगेहशोभितप(मु)रारण्यभूपिताष्ट-
पद्माश्रितात्मनवकोणपुराश्रविन्दौ ।

---

१ 'महाभव' इ पाठ. ।

देवं निपतमुदितांशुसहस्रभास्वद्-
देहं भजामि भगवन्तमनन्तमाद्यम् ॥ १५ ॥
इति स्तोत्रं मन्त्रात्मकमखिलतन्त्रोद्धृतमिदं
पठेत् प्रातःस्नातो मिहिरभुवनेशस्य भवतः ।
भवेद् भोगी भूमौ विभवमहितः कीर्तिसहितः
परत्रान्ते विष्णोर्व्रजति परमं धाम सवितुः ॥ १६ ॥
इतीदं देवि पञ्चाङ्गं देवदेवस्य भास्वतः ।
तव स्नेहान्मयाख्यातं नाख्येयं यस्य कस्यचित् ॥ १७ ॥
यद्गृहे वर्तते पुण्यं पञ्चाङ्गं परमात्मनः ।
सवितुः सर्वसर्वस्वं रहस्यं गुह्यमुत्तमम् ॥ १८ ॥
तद्गृहे निश्चला लक्ष्मीर्दामीव वसति चरेत् ।
नाग्निभीतिर्न दारिद्र्यं न रोगो नाप्युपद्रवः ॥ १९ ॥
न राजभीतिर्नो शोकः सदा सर्वार्थसंपदः ।
इदं तत्त्वं हि तत्त्वानां रहस्यं देवदुर्लभम् ॥ २० ॥
अदातव्यमभक्ताय दातव्यं च महात्मने ।
गुह्यातिगुह्यगुह्यं च सूर्यपञ्चाङ्गमुत्तमम् ॥ २१ ॥
सर्वदा सर्वथा गोप्यं गोपनीयं स्वयोनिवत् ।

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये सूर्यस्तोत्र-
निरूपणं पञ्चत्रिंशः पटलः ॥ ३५ ॥

—:०*०:—

समाप्तं सूर्यपञ्चाङ्गम् ॥

---

१ 'तत्त्व' ग. पाठ. । २ 'सर्वदा सपदो गृह क. ग. पाठ ।

अथ

षट्त्रिंशः पटलः ।

लक्ष्मीनारायणपञ्चाङ्गम् ।

—:०:※:०:—

श्रीभैरव उवाच ।

कैलासोत्तुङ्गशिखरे रत्नराजिविराजिते ।
कल्पद्रुमवनाकीर्णे स्वर्णपाषाणमण्डिते ॥ १ ॥
पद्मरागशिलामुक्ता-माणिमाणिक्यभूषिते ।
वसन्तकुसुमामोद-गन्धवाहैकवाहिनि ॥ २ ॥
नवरत्नशिलाभद्रं-पीठस्थं परमेश्वरम् ।
देवदेवं जगन्नाथं पार्वतीसहितं विभुम् ॥ ३ ॥
वसन्तं[1] च जपन्तं च ध्यायन्तं ब्रह्म शाश्वतम् ।
पन्नगाभरणोपेतं जटामुकुटमण्डितम् ॥ ४ ॥
कपालखट्वाङ्गकरं वराभयधरं हरम् ।
देवदानवयक्षेन्द्र-पिशाचोरगसेवितम् ॥ ५ ॥
गणगन्धर्वसिद्धौघ-नारदार्चितमव्ययम् ।
प्रसन्नवदनं देवं देवी दृष्ट्वा महेश्वरम् ॥ ६ ॥
प्रणम्योत्थाय सहसा बद्धाञ्जलिपुटं पुरः ।
उवाच पार्वती देवी[2] शिवं त्रैलोक्यनायकम् ॥ ७ ॥

श्रीदेव्युवाच ।

---

१ 'वद्र' ख पाठ । २ 'रमण' ग पाठः । ३ 'णीता' क पाठ ।

भगवन् देवदेवेश देवासुरनमस्कृत ।
त्वं शिवः सर्वलोकेशः सत्यः सच्चित्स्वरूपकः ॥ ८ ॥
अनन्तः परमात्मेति त्रिजगत्कारणं प्रभुः ।
उत्पत्तिस्थितिकृन्नित्यं लयकृद् भुवनेश्वरः ॥ ९ ॥
अनादिनिधनो देवस्त्रिगुणात्मापि निर्गुणः ।
किं तत् परं महत्तत्त्वं यज्जपस्यैष सन्ततम् ॥ १० ॥
तत्तत्त्वं श्रोतुमिच्छामि त्वत्तो भक्तास्मि किङ्करी ।

श्रीभैरव उवाच ।

लक्षवारसहस्राणि वारितासि पुनः पुनः ।
स्त्रीस्वभावान्महादेवि पुनर्मां परिपृच्छसि ॥ ११ ॥
भक्त्यानया प्रसन्नोऽहं तव पार्वति तत्त्वतः ।
एतद्रहस्यं परमं वक्ष्ये गुह्यं दिवौकसाम् ॥ १२ ॥
अवक्तव्यमिदं तत्त्वमदातव्यं महेश्वरि ।
तव स्नेहेन वक्ष्यामि नचाख्येयं महात्मभिः ॥ १३ ॥
यो देवदेवो वरदो लक्ष्मीनारायणो विभुः ।
सर्गस्थितिकरो लोके प्रलयान्तकरो लये ॥ १४ ॥
स एव परमेशानो देवपन्नगरक्षसाम् ।
दैत्यकिन्नरयक्षेन्द्र-मनुजानलपायसाम् ॥ १५ ॥
ब्रह्मादिकीटपर्यन्त-जगत्त्रितयकारणम् ।
अव्ययः सात्त्विकः सर्वभूतात्मा परमेश्वरः ॥ १६ ॥
तस्य देवस्य पश्चाङ्ग पटलं पठति शिवे ।
कवचं मन्त्रभूतं च मन्त्रनामसहस्रकम् ॥ १७ ॥
श्रोत्रं जपामि देवेशि स्मरामि मनसा सदा ।
पठाम्यहर्निशं शान्तः परमानन्दकारणम् ॥ १८ ॥

---

१ प्रथम 'त्व' पादः ।

श्रीदेव्युवाच ।

पञ्चाङ्गं देवदेवस्य लक्ष्मीनारायणस्य वै ।
श्रोतुमिच्छाम्यहं नाथ वक्तुमर्हसि साम्प्रतम् ॥ १९ ॥

श्रीभैरव उवाच ।

परमार्थमदं देवि पञ्चाङ्गं सर्वसिद्धिदम् ।
वक्ष्यामि परमेशस्य लक्ष्मीनारायणस्य ते ॥ २० ॥
तत्रादौ पटलं वक्ष्ये मूलविद्यारहस्यकम् ।
मन्त्रोद्धारं प्रवक्ष्यामि लक्ष्मीनारायणस्य ते ॥ २१ ॥
अष्टसिद्धिप्रदं सद्यः साधकानां सुदुर्लभम् ।
तारं परा च हरितं परा लक्ष्मीस्ततोऽभिधम् ॥ २२ ॥
लक्ष्मीनारायणायेति विंशमन्ते मनुः स्मृतः ।
नास्य विघ्नो नवा दोषो न भीतिर्न विपर्ययः ॥ २३ ॥
साक्षान्मोक्षप्रदो मन्त्रः सर्वार्थफलदायकः ।
वर्णलक्षपुरश्चर्यां विनायं चास्ति दोषभाक् ॥ २४ ॥
जीवहीनो यथा देहः सर्वकर्मसु न क्षमः ।
पुरश्चरणहीनोऽपि न मन्त्रः फलदायकः ॥ २५ ॥
वटेऽरण्ये श्मशाने च शून्यागारे चतुष्पथे ।
अर्धरात्रे च मध्याह्ने पुरश्चरणमाचरेत् ॥ २६ ॥
वर्णलक्षं पुरश्चर्या तदर्धं वा महेश्वरि ।
एकलक्षावधिं कुर्यान्नातो न्यूनं कदाचन ॥ २७ ॥
प्रथमं गुरुहस्तेन साधकस्य करेण वा ।
ततः स्वयं चरेद्भक्त्या पुरश्चर्या विधानतः ॥ २८ ॥
जपाद् दशांशतो होमस्तद्दशांशेन तर्पणम् ।
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम् ॥ २९ ॥

* 'मार्जिनेन' च पाठः ।

विना दशांशहोमेन न तत्फलमवाप्नुयात् ।
पञ्चरत्नेश्वरीं विद्यां लक्ष्मीनारायणस्य हि ॥ ३० ॥
जपेत् तां पञ्चभिः सार्धं पुरश्चर्याफलं लभेत् ।
अथ मन्त्रस्य देवेशि संस्कारविधिमाचरेत् ॥ ३१ ॥
विधिना येन सद्यस्तु साधकः सिद्धिभाग्भवेत् ।
उत्कीलयेन्मनुं देवि ततः सञ्जीवयेत् पुनः ॥ ३२ ॥
विद्यां शापहरीं देवि जपेत् सद्गुरुवक्त्रतः ।
सिद्धं मन्त्रं जपेदन्ते पुनः संपुटितं चरेत् ॥ ३३ ॥
एष योगवरो मन्त्रो योगिनां दुर्लभः कलौ ।
अथोत्कीलनमाचक्ष्वे मन्त्रस्यास्य महेश्वरि ॥ ३४ ॥
परार्णं हरितं भूतिं मा नाम सकलां पठेत् ।
विश्वान्ते प्रणवो देवि सकृदुच्चारयेत् सुधीः ॥ ३५ ॥
मन्त्रोत्कीलनमेतत् स्यात् सर्वतन्त्रमयं शिवे ।
मन्त्रसञ्जीवनं वक्ष्ये शृणु पार्वति सादरम् ॥ ३६ ॥
परा विभूतिर्मा तारं नामान्ते विश्वमीरितम् ।
सञ्जीवनाख्यो गदितो मन्त्रराजो महेश्वरि ॥ ३७ ॥
शिवेन वर्णिता विद्यां शिवे शापहरीं जपेत् ।
वक्ष्यामि तव भक्त्याहं गुह्यां सर्वार्थदायिनीम् ॥ ३८ ॥
तारं परा विर्देवेशि ब्रह्मशापं ततः पठेत् ।
मोचय-द्वयमुद्धृत्य परा मा ठद्वय जपेत् ॥ ३९ ॥
विद्येयं दुर्लभा लोके लक्ष्मीनारायणप्रिया ।
सिद्धं मन्त्रं जपेन्मन्त्री पुनः संपुटितं चरेत् ॥ ४० ॥
संपुटस्य मनुं वक्ष्ये सर्वागमसमुद्धृतम् ।
विश्वमादौ मनुं पश्चान्नाम चान्ते जपेत् प्रिये ॥ ४१ ॥
संपुटाख्यो मनुर्देवि वर्णितोऽयं फलाप्तये ।

मन्त्रस्यास्य महादेवि वर्णितोऽत्र ऋषिः शिवः ॥ ४२ ॥
त्रिष्टुप् छन्दो मयाख्यातं देवतापि समीरिता ।
लक्ष्मीनारायणो देवि बीजं लक्ष्मीरुदाहृता ॥ ४३ ॥
शक्तिः परा, तथा तारं कीलकं समुदाहृतम् ।
भोगापवर्गसिद्ध्यर्थं विनियोगः प्रकीर्तितः ॥ ४४ ॥
ध्यानमस्य प्रवक्ष्यामि लक्ष्मीनारायणस्य ते ।
येनैव ध्यानमात्रेण लक्ष्मीः सन्निधिमेष्यति ॥ ४५ ॥
पूर्णेन्दुवदनं पीतवसनं कमलासनम् ।
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥ ४६ ॥
तारमाभूतिबीजैस्तु षड्दीर्घान्तैर्महेश्वरि ।
न्यासं कुर्यात् षडङ्गादि करशुद्ध्यादिपूर्वकम् ॥ ४७ ॥
यन्त्रोद्धारं प्रवक्ष्यामि सर्वाशासिद्धिदं परम् ।
सर्वसंमोहनं यन्त्रं वाञ्छितैकप्रदायकम् ॥ ४८ ॥
बिन्दुस्त्रिकोणं वस्वश्रं वृत्ताष्टदलमण्डितम् ।
षोडशारं वृत्तं च भूगृहेणोपशोभितम् ॥ ४९ ॥
लक्ष्मीनारायणस्यैतच्छ्रीचक्रं परमार्थदम् ।
लयाङ्ग देवि वक्ष्यामि भोगमोक्षफलप्रदम् ॥ ५० ॥
वेदागमरहस्याढ्यं पूजाकोटिफलप्रदम् ।
वज्रशक्तिदण्डखड्ग-पाशयष्टिध्वजास्ततः ॥ ५१ ॥
शूल पूज्याः शिवे चैते बाह्यद्वारेषु सर्वदा ।
इन्द्राग्नियममारुद-वरुणानिलवित्तदाः ॥ ५२ ॥
सेश्वराः साधकैः पूज्या ब्रह्मानन्तादयस्ततः ।
केशव माधवं कृष्ण गोविन्दं मधुसूदनम् ॥ ५३ ॥
गङ्गाधरं शङ्खधरं चक्रपाणिं चतुर्भुजम् ।
पद्मापुष्प कैटभारि घोरदंष्ट्र जनार्दनम् ॥ ५४ ॥

वैकुण्ठं वामनं चैव पूजयेद् गरुडध्वजम् ।
षोडशारेषु देवेशि वामावर्तेन साधकः ॥ ५५ ॥
तत्रार्चयेन्महादेवि मन्त्री गुरुचतुष्टयम् ।
असिताङ्गं हसकेतुं वंशीपाणिं च पूजयेत् ॥ ५६ ॥
वृत्तत्रयेषु देवेशि साधको गन्धपुष्पकैः ।
संहारं रुरुकं चण्डं भूतेशं कालभैरवम् ॥ ५७ ॥
कपालं भीषणं[1] चैव तथा श्मशानभैरवम् ।
पूजयेत् साधकः सिद्ध्यै वसुपत्रे महेश्वरि ॥ ५८ ॥
विष्णुं च वासुदेवं च देवं दामोदरं तथा ।
नृसिंहं च महादेवि देवं सङ्कर्षणं तथा ॥ ५९ ॥
त्रिविक्रमं चानिरुद्धं विश्वक्सेनं च साधकः ।
लक्ष्मीशब्दाङ्कित देवि वसुकोणेषु पूजयेत् ॥ ६० ॥
गङ्गां च यमुनां चैव त्र्यश्रे सरस्वतीं तथा ।
पूजयेदग्रवह्नीशक्रमयोगेन पार्वति ॥ ६१ ॥
लक्ष्मीनारायणं देवं पूजयेद् बिन्दुमण्डले ।
महालक्ष्मीं राज्यलक्ष्मीं सिद्धलक्ष्मीं च पूजयेत् ॥ ६२ ॥
शङ्खं चक्रं गदा पद्मं पूजयेद् बिन्दुमण्डले ।
गन्धाक्षतप्रसूनादि-गुरुमान्यविभूषणैः ॥ ६३ ॥
संपूज्यामृतकुम्भस्थैर्बिन्दुभिर्मन्त्रपूजितैः ।
तर्पयेत् साधको देवं मकारैः पञ्चभिः परम् ॥ ६४ ॥
लयाङ्गमेतदाख्यातं मयोगानष्ट पार्वति ।
वक्ष्ये येन भवेत् सिद्धिर्मन्त्रस्यास्य विशेषतः ॥ ६५ ॥
स्तम्भनं मोहनं चैव मारणाकर्षणौ ततः ।
वशीकार तथोच्चाट शान्तिक पौष्टिक ततः ॥ ६६ ॥

---

१ कपालिभीषणौ ' इति साधु पाठ ।

एतेषां साधनं वक्ष्ये प्रयोगाणां महेश्वरि ।
एषां साधनमात्रेण मन्त्रसिद्धिः प्रजायते ॥ ६७ ॥
(१) रवौ स्नात्वा महादेवि गत्वाश्वत्थतरोस्तलम् ।
जपेदयुतमीशानि हुनेत् तत्र दशांशतः ॥ ६८ ॥
घृतमत्स्यण्डगुडजैः पुष्पैरानन्दमिश्रितैः ।
स्तम्भनं जायते सद्यो वादिवातार्कपाथसाम् ॥ ६९ ॥
(२) चन्द्रेऽर्धरात्रवेलायां गत्वा शृङ्गाटकं सुधीः ।
दिशो बद्ध्वासनं शोध्य प्राणायामं विधाय च ॥ ७० ॥
जपेन्मूलं हरिं ध्यात्वा हुत्वा देवि दशांशतः ।
घृतनागरपुष्पाग-करञ्जकुसुमानि च ॥ ७१ ॥
तर्पयित्वा दशांशेन मार्जयित्वा महेश्वरि ।
तन्नस्मना चरेद् भाले तिलकं साधकोत्तमः ॥ ७२ ॥
त्रैलोक्यं सदसा दृष्ट्वा मोहमेष्यति तन्मुखम् ।
(३) भौमे गत्वा श्मशानं च जपेदयुतसंख्यया ॥ ७३ ॥
हुनेद् दशांशतो देवि सर्पिर्गोधूमपायसम् ।
दूर्वापत्रं सासवं च मृत्युश्च म्रियते क्षणात् ॥ ७४ ॥
(४) बुधे गत्वाटवीं दूरं जपेज्-झंझातटे शिवे ।
अयुतं मूलमन्त्रं च हुनेत् सर्पिर्यवाकणान् ॥ ७५ ॥
दूर्वापूतासपद्मादपत्राणि कुसुमानि च ।
स्मरापि पुरतस्तस्य सद्यः प्रादुर्भविष्यति ॥ ७६ ॥
(५) गुरौ गत्वा नदीतीरं जपेत् तत्र दशांशतः ।
हुनेदाज्येन मधुना शटीचन्द्रकरीरकान् ॥ ७७ ॥
तन्नस्मना साधितेन त्रैलोक्यं वशमेष्यति ।
(६) शुक्रेऽशोकतरुं गत्वा जपेदयुतसंख्यया ॥ ७८ ॥
हुनेत् सर्पिर्नागपटं शालिचूर्णं तुषाकुलम् ।

तर्पयेदासवाज्येन-रसैर्भुक्त्वा दशाशतः ॥ ७६ ॥
शक्तेः शम्भुसमानस्य भवेदुच्चाटनं ध्रुवम् ।
(७) शनौ गत्वा नदीतीरं जपेदयुतसंख्यया ॥ ८० ॥
होमो दशाशतः कार्यो घृतपायसकुङ्कुमैः ।
सारणालैर्जम्बुफलैः शान्तिकं जापते क्षणात् ॥ ८१ ॥
(८) शुभर्क्षे शुभवारे वा गत्वोपवनमण्डलम् ।
जपेदयुतमीशानि हुनेदाज्येन पङ्कजैः ॥ ८२ ॥
सोत्पलं सकणं साम्लं महापुष्टिः प्रजायते ।
एतद्रहस्यं परमं तव भक्त्या मयोदितम् ॥ ८३ ॥
लक्ष्मीनारायणस्येद सर्वस्वं परमार्थदम् ।
अदातव्यमभक्तेभ्यो दुष्टेभ्यो वीरवन्दिते ॥ ८४ ॥
महाचीनपदस्थेभ्यो भोगदं मोक्षद कलौ ।
गोप्यं गुह्यतमं तत्त्व गुह्याद्गुह्यतमं शिवे ।
आनन्दकारणं गोप्यं गोपनीय स्वयोनिवत् । ८५ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये लक्ष्मीनारायणपटल-निरूपण षट्त्रिंश पटल ॥ ३६ ॥

अथ

सप्तत्रिंशः पटलः ।

श्रीभैरव उवाच ।
अधुना देवि वक्ष्येऽहं गयपर्वकरूपिणीम् ।
पद्धतिं नित्यपूजाया लक्ष्मीनारायणस्य ते ॥ १ ॥

प्राप्ते मुहूर्ते उत्थाय बद्धपद्मासनः स्वशिरःस्थसहस्रारादधोमुखकमलकर्णिकान्तर्गतं निजगुरुं श्वेतालङ्कारालङ्कृतं ध्यात्वा, मानसैरुपचारैरभ्यर्च्य, तदग्रे मूलं स्वशक्त्या जप्त्वा, तज्जपं गुरवे समर्प्य, तदाज्ञामादाय बहिरागत्य दूरं मलादि संत्यज्य वर्णोक्तं शौचमादाय, नद्यादौ गत्वा, "ॐक्लीं सर्वजनप्रियाय कामदेवाय नमः" इति दन्तान् विशोध्य, आत्मशुद्धिं कृत्वा मृत्त्रयं मूलेन संशोध्य, मलापकर्षणं स्नानं कृत्वा मन्त्रस्नानं चरेत्। तत्र मृदा "ॐगांगूं गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धुकावेरि जलेऽस्मिन् संनिधिं कुरु" ॥ इत्यङ्कुशमुद्रयावाह्य, मृदा मूलं "देवेश भक्तिसुलभ परिवारसमन्वित। यावत् त्वां तर्पयिष्यामि तावद् देव इहावह" ॥ इत्यावाहनादिमुद्राः प्रदर्श्य धेनुयोनिमत्स्यमुद्राः प्रदर्श्य मृदमङ्गे विलिप्य, जले त्र्यश्रं विभाव्य, त्र्यश्रे मूलं विलिख्य, तत्र मूलमुच्चरंस्त्रिरन्मज्जेत्। ततः सूर्यार्घ्यत्रयं दद्यात्, "ॐह्रींहंसः श्रीसूर्याय एष तेऽर्घो नमः" इत्यर्घ्यत्रयं दत्त्वा जलादुत्थ, वासांसि[1] परिधाप्य, देहशुद्धिं विधाय, मूलर्षिन्यासादि विधाय, मूलं यथाशक्त्या जप्त्वाऽघमर्षणं कुर्यात्। वामहस्ते जलं धृत्वा, दक्षहस्तेनाच्छाद्य, यंरंवंलंहं इति सप्तधाभिमन्त्र्य, तद्गलितोदकबिन्दुभिर्मूलमुच्चरंश्चतुर्दशधा शिरः प्रोक्षयावशिष्टजलं दक्षहस्ते धृत्वेक्षयान्तर्मीत्वा पापं प्रक्षाल्य, तज्जलं कलुषं वामनासापुटेन बहीरेचयित्वा वाममार्गस्थैशिलायामास्फालयेदित्यघमर्षणम्।

ततः पूर्ववन्न्यासं विधाय गायत्रीं जपेत् "ॐह्रीं लक्ष्मीनारायणाय विद्महे हंसौः परब्रह्मणे धीमहि ह्रींश्रीं तन्नः परमात्मा प्रचोदयात् ३। इति यथाशक्त्या जप्त्वा, अनया श्रीगायत्र्या साङ्गाय सवाहनाय सपरिच्छदाय सशक्तिकाय श्रीलक्ष्मीनारायणाय एष तेऽर्घो नमः, इत्यर्घ्यत्रयं दत्त्वा, प्राणायामत्रयं कृत्वा, "इडया पिब षोडशभिः पवनं कुरु षष्टिचतुष्टयमन्तरगम्[2]। त्यज पिङ्गलया शनकैः शनकैर्दशभिर्दशभिर्दशभिर्धिकैः[3]॥" इथं प्राणायामत्रयं विधाय, ॐह्रीं आत्मतत्त्वं शोधयामि स्वाहा, ॐह्रीं विद्यातत्त्वं शोधयामि स्वाहा, ॐह्रीं शिवतत्त्वं शोधयामि स्वाहा, इत्याचम्य, पूर्ववत् सूर्यार्घ्यत्रयं दत्त्वा जले यन्त्रं ध्यात्वा तत्र यथाशक्त्या तर्पणं कुर्यात्। मूलमुच्चार्यं

---

१ 'वाससी' क. ख. पाठः। २ 'भागस्थ' ख पाठः। ३ 'चतुरस्तष्टि ततो अधिकम्' घ. ङ पाठः। ४ 'सहितम्' घ ङ पाठः।

श्रीसाङ्गः सवाहनः सपरिवारः सदेवीकः लक्ष्मीनारायणः तृप्यतामिति त्रिः सन्तर्प्य, मूलविद्याक्षरमुच्चार्य एकैकाञ्जलिना परिवारान् सन्तर्प्य, देवर्षिपितॄन् सन्तर्प्य, पूर्ववत् सूर्यायार्घ्यत्रयं दत्त्वा (संहारमुद्रया देवतां प्रणम्य) यागमण्डपं प्रविशेदिति सन्ध्याविधिः ॥

तत्र गृहमागत्य पादौ प्रक्षाल्य द्वारमभ्युक्ष्य, देहल्यग्रतश्चतुरश्रवृत्त-मण्डलं विलिख्य, तत्र क्षालिताधारं संस्थाप्य, अस्त्राय फडिति साधारं पात्रं संस्थाप्य, ॐ हृदयाय नमः इति हृन्मन्त्रेणापूर्य, ॐ लक्ष्मीनारायण-सामान्यार्घ्याय नमः इत्यभ्यर्च्य "गङ्गे इति" तीर्थमावाह्य धेनुमुद्रां प्रदर्श्य, द्वारमभिषेचयेदिति सामान्यार्घ्यविधिः ॥ पूर्वे गं गणपतये नमः, दक्षिणे वां वटुकाय नमः, पश्चिमे क्षां क्षेत्रपालाय नमः, उत्तरे यां योगि-नीभ्यो नमः, दक्षे गां गङ्गायै नमः, वामे यं यमुनायै नमः, ऊर्ध्वं सं सरस्वत्यै नमः, अधो देहल्यां अस्त्राय फट् इति द्वारदेवीः संपूज्य, द्वारान्तः प्रविश्य विहितासने उपविश्य मूलेन निरीक्ष्य कवचेनाभ्युक्ष्य, अस्त्राय फडिति सन्ताड्य, पूजामण्डपं सधूपितं कृत्वा विघ्नशुद्धिं कुर्यात् । ॐ ह्रां आसनशोधनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतल छन्दः कूर्मो देवता आसनशोधने विनियोगः । ह्रीं पृथिव्यै नमः, ॐ मही त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां लोकं पवित्रं कुरु चासनम् ॥ ॐ ह्रां आधारशक्तिकमलासनाय नमः, अनन्ताय नमः, पद्माय नमः, पद्मनालाय नमः, तत्रोपविश्य, तालत्रयं दत्त्वा, अपस-र्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ इति वामपार्ष्णिघातत्रयेण विघ्नानुत्सार्य, नाराचमुद्रां प्रद-र्शयेत्, इति आसनं संशोध्य गुरुं प्रणमेत् । अखण्डमण्डलाकारं व्याप्तं येन चराचरम् । तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ गुरुभ्यो नमः परमगुरुभ्यो नमः परापरगुरुभ्यो नमः परमेष्ठिगुरुभ्यो नमः इति शिरसि संपूज्य, देवं प्रणम्य, इडामित्याकुञ्चनेन सुषुम्नावर्त्मना प्रदीपकलिकाकारां ब्रह्मपथान्तर्नीत्वा परमशिवेन सयोज्य तयोरैक्यं विभाव्य, तदुद्भतामृतधारया कुलगुरून् संतर्प्य, पुनस्तेनैव मार्गेण डाकिन्यादिशक्तीः प्रीणयन्तीं कुण्डलिनीं स्व पदं प्रापय्य वामकुक्षौ पापपुरुषमङ्गुष्ठमात्राकारं धूम्रवर्णं ध्यात्वा, यरवल इति शोषणदाहना-

---

१ 'देवि' इ. पाठः ।

स्रावनोत्पादनादि कुर्यात् । यं वायुबीजेन षोडशधा जप्तेन शोषयेत् । रं वह्निबीजेन चतुःषष्ट्या जप्तेन दाहयेत् । वं वरुणबीजेन द्वात्रिंशद्वारजप्तेना-स्रावयेत् । लमिति भूबीजेन दशधा जप्तेन शरीरं पिण्डीभूतं विधाय प्राणप्रतिष्ठां कुर्यादिति भूतशुद्धिः ॥ ॐह्रीं क्रों यंरंलंवं शंषंसंहं सोहंसः हंसः मम प्राणा इह प्राणाः, १ॅ मम जीव इह स्थितः, १ॅ सर्वेन्द्रि-याणि, १ॅं वाङ्मनश्चक्षु-श्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा, इति प्राणप्रतिष्ठाक्रमः ॥ प्राणान् समर्प्य प्राणायामत्रयं कृत्वा, पूर्ववदाचम्य सङ्कल्पपूर्वं न्यासं कुर्यात् ।

अस्य श्रीलक्ष्मीनारायणपूजामन्त्रस्य श्रीशिव ऋषिः, त्रिष्टुप् छन्दः, लक्ष्मीनारायणो देवता, श्रींबीजं, ह्रींशक्तिः, ॐकीलकं, भोगापवर्गसि-द्ध्यर्थे लक्ष्मीनारायणपूजायां विनियोगः । शिवऋषये नमः शिरसि, त्रिष्टुप्छन्दसे नमो मुखे, लक्ष्मीनारायणदेवतायै नमो हृदि, श्रींबीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, ॐ कीलकाय नमः सर्वाङ्गेषु, इति विन्यस्य षडङ्गादि कुर्यात् । ॐह्रांश्रां अङ्गुष्ठाभ्यां नमः । ॐह्रींश्रीं तर्जनीभ्यां नमः । ॐह्रूंश्रूं मध्यमाभ्यां नमः । ॐह्रैंश्रैं अनामिकाभ्यां नमः । ॐह्रौंश्रौं कनिष्ठिकाभ्यां नमः । ॐह्र-श्र- करतलकरपृष्ठाभ्यां नमः । एवं षडङ्गन्यासः ॥ अथ (पुनः) करशुद्धिः—ॐकामरूपपी-ठाय नमः अङ्गुष्ठाभ्यां नम । ह्रीं जालन्धरपीठाय नम- तर्जनीभ्यां नमः । ह्सौः पूर्णगिरिपीठाय नमः मध्यमाभ्यां नमः । ह्रीं अवन्तीपीठाय नमः अनामिकाभ्यां नमः । श्रीं सप्तपुरीपीठाय नमः कनिष्ठिकाभ्यां नमः । ॐह्रीं ह्सौः ह्रींश्रीं वाराणसीपीठाय नमः करतलपृष्ठाभ्यां नमः । इति कर शुद्धिः । एवं षडङ्गन्यासः । अंआंइंईं उंऊंऋंॠं वामपादादिगुल्फान्तम् । ऌंॡंएंऐं ओंऔंअंअः दक्षपादादिगुल्फान्तम् । कंखंगंघंङं गुल्फादिवाम-पादमूलान्तम् । चंछंजंझंञ गुल्फादिदक्षपादमूलान्तम् । टंठंडंढंणं नाभ्या-दिवामबाहुमूलान्तम् । तंथंदंधंनं नाभ्यादिदक्षबाहुमूलान्तम् । पंफंबंभंमं कट्यादिककुबन्तम् । यंरंलंवं वामस्कन्धादिवामकर्णान्तम् । शंषंसंहं दक्षस्कन्धादिदक्षकर्णान्तम् । ळंक्षः शिरसः पादपर्यन्तमिति त्रिर्व्यापयेत् ॥

अंकंपंगंघंङंआं अङ्गुष्ठाभ्यां नमः, इंचंछंजंझंञंईं तर्जनीभ्यां नमः, उंटंठंडंढंणंऊं मध्यमाभ्यां नमः, एंतंथंदंधंनंऐं अनामिकाभ्यां नमः, ओंपंफंबंभंमंऔं कनिष्ठिकाभ्यां नमः, अंयंरंलंवंशंषंसंहंळंक्षःअः

करतलकरपृष्ठाभ्यां नमः, इति करन्यासः । एवं हृदयादिषडङ्गन्यासः ॥

अथ मातृकान्यासः—अं नमः शिरसि, आं मुखवृत्ते, इं दक्षनेत्रे, ईं वामनेत्रे, उं दक्षकर्णे, ऊं वामकर्णे, ऋं दक्षनासापुटे, ॠं वामनासापुटे, ऌं दक्षगण्डे, ॡं वामगण्डे, एं ऊर्ध्वोष्ठे, ऐं अधरोष्ठे, ओं ऊर्ध्वदन्तपङ्क्तौ, औं अधोदन्तपङ्क्तौ, अं शिरसि, अः मुखे, कं खं गं घं ङं दक्षबाहुसन्धिषु, चं छं जं झं ञं वामबाहुसन्धिषु, टं ठं डं ढं णं दक्षपादसन्धिषु तं थं दं धं नं वामपादसन्धिषु, पं दक्षपार्श्वे, फं वामपार्श्वे, बं पृष्ठे, भं नाभौ, मं जठरे, यं हृदि, रं दक्षांसे, लं ककुदि, वं वामांसे, शं हृदादिदक्षहस्ताग्रान्तं, षं हृदादिवामहस्ताग्रान्तं, सं हृदादिदक्षपादाग्रान्तं, हं हृदादिवामपादाग्रान्तं, ळं पादादिशिरःपर्यन्तं, क्षः शिरसः पादपर्यन्तमिति त्रिर्व्यापयेत् ॥ ततः अंऽओंअं इति क्षान्तं न्यसेत् । अंह्रींअमिति क्षान्तं मातृकास्थानेषु न्यसेत् । अंस्रौंअमिति क्षान्तं न्यसेत् । अंह्रौंअ इति क्षान्तं न्यसेत् । अंश्रौंअं इति क्षान्तं न्यसेत् । केवलं मातृकास्थानेषु मूलं न्यसेदिति षोढा न्यासं विधाय, मूलमुच्चरन् देहशुद्धिं कृत्वा घटपूजां कुर्यात् । तत्र सामान्यार्घ्यस्य धामे बिन्दुषट्कोणवृत्तचतुरश्रं विलिख्य, तत्र "ओं पीठेभ्यो नमः" इत्यभ्यर्च्य, तत्र क्षालिताधारं संस्थाप्य रं वह्निमण्डलाय दशकलात्मने नमः इत्यक्षतैः संपूज्य, तत्र श्रीघटं संस्थाप्य, ब्रह्मणा च यथापूर्वं विष्णुना च यथा पुरा । शम्भुना च यथा देवि तथा त्वां स्थापयाम्यहम् ॥ इति संस्थाप्य, अं अर्कमण्डलाय द्वादशकलात्मने नमः, इति गन्धपुष्पैरभ्यर्च्य, मूलं विलोममातृकया परमामृतेनापूर्य, सौः सोममण्डलाय षोडशकलात्मने नमः इति संपूज्य, अस्त्रायफडिति कुम्भे द्रव्यं संताड्य मूलमुच्चरन् नाम्या त्रिर्गन्धं गृह्णीयात् । तत्र त्रिकोणं विलिख्य, मूले त्रिरिष्ट्वा मूलेन संपूज्य, "ओंह्रांह्रींह्रूंह्रैंह्रौंह्रः सुधे शुक्रशापं मोचय मोचय अमृतं स्रावय स्रावय स्वाहा" इति द्रव्योपरि दशधा संजप्य, "ओं सूर्यमण्डलसंभूते वरुणालयसम्भवे । अमावीजमये देवि शुक्रशापाद्विमुच्यताम् ॥ [1]वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि । तेन सत्येन ते देवि ब्रह्महत्यां व्यपोहतु ॥ पवमानः परानन्दः पवमानः परो रसः । पवमानं परं ज्ञानं तेन त्वां

---

१ 'देवानां' क. ल. पाठः ।

पावयाम्यहम् ॥" इति त्रिर्जप्त्वा, ओंअंआंइं अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय स्रावय अंह्रीं अमृतेश्वर्यै नमः, इति द्रव्योपरि दशधा जप्त्वा, आनन्दभैरवभैरव्यौ ध्यात्वा हृसक्षमलवर-यऊं आनन्दभैरवाय वषट्, इति दशधा जपेत् । ईँ सुधोदर्व्यै वौषट्, इति द्रव्योपरि दशधा जप्त्वा, तत्र त्रिकोणं विलिख्य "गङ्गे च यमुने चैव" इत्यादिना तीर्थमावाह्य, अकारादिषोडश ककारादिषोडश थकारादिषोडश पूर्वादित्रिकोणे न्यसेत् । मध्ये हंळक्षं विलिख्य, मूलं दशधा जप्त्वा गन्धपुष्पदूर्वाक्षतैः संपूज्य, मत्स्यमुद्रादीन् शोधयेदिति द्रव्यशुद्धिः ॥

मीनोपरि धेनुयोनिमत्स्यमुद्राः प्रदर्श्य "ओं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ इति मूलं त्रिर्जप्त्वा मीनं शोधयेदिति मीनशुद्धिः ॥

मांसोपरि मुद्रात्रयं प्रदर्श्य, ओं प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ इति, मूलं त्रिर्जप्त्वा मांसं शोधयेदिति मांसशुद्धिः ॥

ॐ सुधार्णवाय नमः, ॐ मणिमयद्वीपाय नमः । अष्टदिक्षु ॐ नवरत्नखण्डेभ्यो नमः, ॐ सुवर्णपर्वताय नमः, ॐ नन्दनोद्यानाय नमः, ॐ कल्पवनाय नमः, ॐ पद्मवनाय नमः, ॐ विचित्ररत्नखचितभूमिकायै नमः, ॐ चिन्तामणिमण्डपाय नमः, ॐ नवरत्नवेदिकायै०, ॐ रत्नसिंहासनाय०, ॐ उच्चैःश्वेतच्छत्राय नमः, पूर्वादिदिक्षु ॐ धर्मज्ञानवैराग्यैश्वर्येभ्यो०, विदिक्षु ॐ अधर्माज्ञानावैराग्यानैश्वर्येभ्यो०, ॐ सं सत्त्वाय०, ॐ रं रजसे०, ॐ तं तमसे०, ॐ तत्त्वेभ्यो नमः, ॐ ऐँह्रींहंसौः मन्त्रवर्णभूषितकर्णिकायै०, प्रकृतिमयपत्रेभ्यो०, विकृतिमयकेसरेभ्यो नमः, गरुडाय नमः, पञ्चाशद्वर्णविभूषितपद्मासनाय नमः, मूलं सर्वतत्त्वात्मकाय श्रीयोगपीठाय नमः, इति संपूज्य देवं ध्यात्वा, त्रिखण्डां पुष्पगर्भितां निवद्य्य "देवेश भक्तिसुलभ परिवारसमन्वित । यावत् त्वां पूजयिष्यामि तावद् देव इहावह" ॥ इति पुष्पाञ्जलिं दत्त्वा आवाहनादिका मुद्राः प्रदर्श्य, मूलं साङ्ग सदेवीक श्रीलक्ष्मीनारायणदेव इहागच्छ २ इह संतिष्ठ २ इह संनिधत्स्व २ मूलं ऊँह्रीं ह्सौः ऐंह्रींक्रों हंसः लक्ष्मीनारायणप्राणा इह प्राणा ॐ लक्ष्मीनारायणजीव इह स्थितः ॐ लक्ष्मीनारायणसर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा, इति लेलिहानमुद्रया प्राणान् दत्त्वा, मूलं सदेवीक-लक्ष्मीनारायण इदमासनमास्यता, मूल विद्यान्ते पाद्याचमनीयमधुपर्काचमनीयार्घ्यगन्धपुष्पाक्षत-स्नानालङ्काररत्नपीठगन्धपुष्पाक्षत-धूपदीपनवेद्याचमनीयताम्बूलच्छत्रचामरारात्रिकादीन्निवेद्य प्रणम्य, मूलेन कलशामृतेन तत्त्वमुद्रया साङ्गं सायुधं सदेवीकं सपरिच्छदं लक्ष्मीनारायणं पूजयामि नमः तर्पयामि नमः, इति त्रिः सन्तर्प्य, देवाज्ञामादाय परिवारदेवताः पूजयेत् । पुष्पाञ्जलिं दत्त्वा मूलं महालक्ष्मीश्रीपादुकां पूजयामि तर्पयामि नमः, मू० राज्यलक्ष्मीश्रीपा०, मू० सिद्धलक्ष्मीश्री०, इति बिन्दौ प्रथमावरणम् । ऊँह्रींह्सौः गं गङ्गाश्रीपादुकां०, ऊँह्रींह्सौः यं यमुनाश्री०, ऊँह्रींह्सौः सं सरस्वतीश्री०, इति त्र्यश्रे द्वितीयावरणम् । ऊँह्रींह्सौः शंखश्री०, ऊँह्रींह्सौः चक्रश्री०, ऊँह्रींह्सौः गदाश्री०, ऊँह्रींह्सौः पद्मश्री०, इति बिन्दौ तृतीयावरणम् । मूल लक्ष्मीविष्णुश्रीपा०

ॐह्रींह्सौः लक्ष्मीवासुदेवश्री०, ॐह्रींह्सौः लक्ष्मीदामोदरश्री०, ॐह्रींह्सौः लक्ष्मीनृसिंहश्री०, ॐह्रींह्सौः लक्ष्मीसङ्कर्षणश्री०, ॐह्रींह्सौः लक्ष्मीत्रिविक्रमश्रीपादु०, ॐह्रींह्सौः लक्ष्मीअनिरुद्धश्री०, ॐह्रींह्सौः लक्ष्मीविश्वक्सेनश्री०, इति वसुकोणे चतुर्थावरणम् । ॐह्रींह्सौः महाभैरवश्रीपा०, ३ रुरुभैरवश्री०, ३ चण्डभैरवश्री०, ३ भूतेशभैरवश्री०, ३ कालभैरवश्री०, ३ कपालिभैरवश्री०, ३ भीषणभैरवश्री०, ३ श्मशानभैरवश्री० इत्यष्टदलेषु पञ्चमावरणम् । ॐह्रींह्सौः असिताङ्गभैरवश्री०, ३ हंसकेतुभैरवश्री०, ३ वंशीपाणिश्री०, ३ स्वगुरुश्री०, ३ परमगुरुश्री०, ३ परापरगुरुश्री०, ३ परमेष्ठिगुरुश्री०, इति वायव्यादीशान्तं अन्तर्वृत्तत्रये षष्ठावरणम् । ॐह्रींह्सौः केशवश्री०, ३ माधवश्री०, ३ कृष्णश्री०, ३ गोविन्दश्री, ३ मधुसूदनश्री०, ३ गदाधरश्री०, ३ शंखपाणिश्री०, ३ चक्रपाणिश्री०, ३ चतुर्भुजश्री०, ३ पद्मायुधश्री०, ३ कैटभारिश्री०, ३ घोरदंष्ट्रश्री०, ३ जनार्दनश्री०, ३ वैकुण्ठश्री०, ३ वामनश्री०, ३ गरुडध्वजश्री०, इति षोडशदलेषु सप्तमावरणम् । ॐह्रींह्सौः लं इन्द्रश्री०, ३ रं वह्निश्री०, ३ टं यमश्री०, ३ क्षं निर्ऋतिश्री०, ३ वं वरुणश्री०, ३ यं वायुश्री०, ३ सं सोमश्री०, ३ हं ईशानश्री०, ३ ह्रीं अनन्तश्री० ३ ह्रीं ब्रह्मश्री०, इति चतुरस्रेऽष्टमावरणम् । ॐह्रींह्सौः वज्रश्री०, ३ शक्तिश्री०, ३ दण्डश्री०, ३ खड्गश्री०, ३ पाशश्री०, ३ ध्वजश्री०, ३ यष्टिश्री०, ३ शूलश्री०, इति बाह्यद्वारचक्रेषु नवमावरणम् । मूलं त्रिरुच्चार्य साङ्गं सवाहनं सायुधं सपरिच्छदं सलक्ष्मीकं लक्ष्मीनारायणं देवं पूजयामि नमः तर्पयामि नमः, इति संपूज्य, त्रिः संतर्प्य योनिमुद्रया प्रणमेदिति दशमावरणम् ॥ ततः पुनर्देवायाचमनीयताम्मूलच्छत्रादीन् निवेद्य देवाग्रे मालां मूलेन संपूज्य, यथाशक्त्या मूलं जप्त्वा गुह्यातिगुह्य गोप्ता त्वं" इत्यादिना देवाय जपं समर्प्य, तदग्रे कवच-सहस्रनाम-स्तवपाठान् कृत्वा तदपि देवीदेवयोः समर्प्य, साधकैः सह साधकः पात्रचन्दनं कुर्यात् । "यावन्न चलते दृष्टिर्यावन्न चलते

मनः । तावत् पाने प्रकर्तव्यं पशुपानमतः परम्" इति पूर्णपात्रं हुत्वा शान्तिस्तोत्रं पठित्वा, पुष्पाञ्जलिं दत्त्वा नासया पुष्पमाघ्राय, करन्यासं सदेवीकं देवं प्रार्च्य, पुनर्हृत्कमलमानीय स्वयमपि लक्ष्मीनारायण-विहितविग्रहो भूत्वा बाह्यतो वैष्णवाचारपरायणः सुखं विहरेत् । संहारमुद्रया च प्रणमेत् ।

इति श्रीदेवदेवस्य लक्ष्मीनारायणस्य ते ।
पद्धतिर्नित्यपूजाया वर्णिता, गोपितां कुरु ॥
गुह्यं गोप्यमिदं तत्त्वं पूजासारं महेश्वरि ।
गोपयेद् वैष्णवः सत्यमित्याज्ञा पारमेश्वरी ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये लक्ष्मीनारायणपूजापद्धतिनिरूपणं सप्तत्रिंश पटलः ॥ ३७ ॥



अथ

अष्टात्रिंशः पटलः ।

—०-❀-०—

श्रीभैरव उवाच ।

अधुना देवि वक्ष्यामि लक्ष्मीनारायणस्य ते ।
कवचं मन्त्रगर्भं च वज्रपञ्जरकाख्यया ॥ १ ॥
श्रीवज्रपञ्जरं नाम कवचं परमाद्भुतम् ।
रहस्यं सर्वदेवानां साधकानां विशेषतः ॥ २ ॥
यं धृत्वा भगवान् देवः प्रसीदति परः पुमान् ।

यस्य धारणमात्रेण ब्रह्मा लोकपितामहः ॥ ३ ॥
ईश्वरोऽहं शिवो भीमो वासवोऽपि दिवस्पतिः ।
सूर्यस्तेजोनिधिर्देवि चन्द्रमास्तारकेश्वरः ॥ ४ ॥
वायुश्च बलवांल्लोके वरुणो यादसांपतिः ।
कुबेरोऽपि धनाध्यक्षो धर्मराजो यमः स्मृतः ॥ ५ ॥
यं धृत्वा सहमा विष्णुः संहरिष्यति दानवान् ।
जघान रावणादींश्च किं वक्ष्येऽहमतः परम् ॥ ६ ॥
कवचस्यास्य सुभगे कथितोऽयं मुनिः शिवः ।
त्रिष्टुप् छन्दो देवता च लक्ष्मीनारायणो मतः ॥ ७ ॥
रमा बीजं परा शक्तिस्तारं कीलकमीश्वरि ।
भोगापवर्गसिद्ध्यर्थं विनियोग इति स्मृतः ॥ ८ ॥
पूर्णेन्दुवदनं पीतवसनं कमलासनम् ।
लक्ष्म्या श्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥ ९ ॥
ॐनमोवासुदेवोऽवतु मे मस्तकं सशिरोरुहम् ।
ह्रींललाटं सदा पातु लक्ष्मीविष्णुः समन्ततः ॥ १० ॥
हसौंः नेत्रेऽवताल्लक्ष्मीगोविन्दो जगतां पतिः ।
ह्रीं नासां सर्वदा पातु लक्ष्मीदामोदरः प्रभुः ॥ ११ ॥
श्रीं मुखं सततं पातु देवो लक्ष्मीत्रिविक्रमः ।
लक्ष्मी कण्ठं सदा पातु देवो लक्ष्मीजनार्दनः ॥ १२ ॥
नारायणाय बाहू मे पातु लक्ष्मीगदाग्रजः ।
नमः पार्श्वौ सदा पातु लक्ष्मीनन्दैकनन्दनः ॥ १३ ॥
ॐआंईं पातु वक्षो ॐ लक्ष्मीत्रिपुरेश्वरः ।
ॐऊंऋंॠं पातु बुद्धिं ह्रीं लक्ष्मीगरुडध्वजः ॥ १४ ॥
ऌंॡंएंऐं पातु पृष्ठं हसौंः लक्ष्मीनृसिंहकः ।
ॐॐअंअः पातु नाभिं ह्रीं लक्ष्मीविष्टरश्रवः ॥ १५ ॥

कंखंगंघं गुदं पातु श्रीं लक्ष्मीकैटभान्तकः ।
चंछंजंझं पातु शिश्नं लक्ष्मी लक्ष्मीश्वरः प्रभुः ॥ १६ ॥
टंठंडंढं कटिं पातु नारायणाय नायकः ।
तंथंदंधं पातु चोरू नमो लक्ष्मीजगत्पतिः ॥ १७ ॥
पंफंबंभं पातु जानू ऊँह्रीं लक्ष्मीचतुर्भुजः ।
यंरंलंवं पातु जङ्घे हसौः लक्ष्मीगदाधरः ॥ १८ ॥
शंषंसंहं पातु गुल्फौ ह्रींश्रीं लक्ष्मीरथाङ्गभृत् ।
ळंक्षः पादौ सदा पातु मूलं लक्ष्मीसहस्रपात् ॥ १९ ॥
ङंञंणंनंमं मे पातु लक्ष्मीशः सकलं वपुः ।
इन्द्रो मां पूर्वतः पातु वह्निर्वह्नौ सदावतु ॥ २० ॥
यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च माम् ।
वरुणः पश्चिमेऽव्यान्मां वायव्येऽवतु मां मरुत् ॥ २१ ॥
उत्तरे धनदः पायादैशान्यामीश्वरोऽवतु ।
वज्रशक्तिदण्डखड्ग-पाशयष्टिध्वजाङ्किताः ॥ २२ ॥
सशूलाः सर्वदा पान्तु दिगीशाः परमार्थदाः ।
अनन्तः पातलधो नित्यमूर्ध्वं ब्रह्मावताच्च माम् ॥ २३ ॥
दशदिक्षु सदा पातु लक्ष्मीनारायणः प्रभुः ।
प्रभाते पातु मां विष्णुर्मध्याह्ने वासुदेवकः ॥ २४ ॥
दामोदरोऽवतात् सायं निशादौ नरसिंहकः ।
सङ्कर्षणोऽर्धरात्रेऽव्यात् प्रभातेऽव्यात् त्रिविक्रमः ॥ २५ ॥
अनिरुद्धः सर्वकालं विश्वक्सेनश्च सर्वतः ।
रणे राजकुले द्यूते विवादे शत्रुसङ्कटे ।
ऊँह्रींहसौः ह्रींश्रींमूलं लक्ष्मीनारायणोऽवतु ॥ २६ ॥
ऊँऊँऊँरणराजचौरारिपुतः पायाच्च मां केशवः
ह्रींह्रींह्रींहरहरहसौः हसहसौ वह्नेर्वतान्माधवः ।

ह्रींह्रींह्रींजलपर्वताग्रेभयतः पायादनन्तो विभुः
श्रींश्रींश्रींशशशालिलं प्रतिदिनं लक्ष्मीधवः पातु माम् ॥

इतीदं कवचं दिव्यं वज्रपञ्जरकाभिधम् ।
लक्ष्मीनारायणस्येष्टं चतुर्वर्गफलप्रदम् ॥ २८ ॥
सर्वसौभाग्यनिलयं सर्वसारस्वतप्रदम् ।
लक्ष्मीसंवननं तत्त्वं परमार्थरसायनम् ॥ २९ ॥
मन्त्रगर्भं जगत्सारं रहस्यं त्रिदिवौकसाम् ।
दशवारं पठेद्रात्रौ रतान्ते वैष्णवोत्तमः ॥ ३० ॥
स्वप्ने वरप्रदं पश्येल्लक्ष्मीनारायणं सुधीः ।
त्रिसन्ध्यं यः पठेन्नित्यं कवचं मन्मुखोदितम् ॥ ३१ ॥
स याति परमं धाम वैष्णवं वैष्णवोत्तमैः ।
महाधीनपदस्थोऽपि यः पठेदात्मचिन्तकः ॥ ३२ ॥
आनन्दपूरितस्तूर्णं लभेद् मोक्षं स साधकः ।
गन्धाष्टकेन विलिखेद्रवौ भूर्जे जपन्मनुम् ॥ ३३ ॥
पीतसूत्रेण संवेष्ट्य सौवर्णेनाथ वेष्टयेत् ।
धारयेद्गुटिकां मूर्ध्नि लक्ष्मीनारायणं स्मरन् ॥ ३४ ॥
रणे रिपून् विजित्याशु कल्याणी गृहमाविशेत् ।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना ॥ ३५ ॥
सा वशीयान् कण्ठदेशे लभेत् पुत्रांश्चिरायुषः ।
गुरूपदेशतो भूत्वा गुरुं ध्यात्वा मनुं जपन् ॥ ३६ ॥
वर्णलक्षपुरश्चर्याफलमाप्नोति साधकः ।
बहुनोक्तेन किं देवि कवचस्यास्य पार्वति ॥ ३७ ॥
विनानेन न सिद्धिः स्यान्मन्त्रस्यास्य महेश्वरि ।
सर्वागमरहस्याढ्यं तत्त्वात् तत्त्वं परात् परम् ॥ ३८ ॥

---

१ 'पर्वताग्नि' घ पाठः । २ 'वैष्णवेश्वरः' ङ पाठः ।

अभक्ताय न दातव्यं शुचैलाय दुरात्मने ।
दीक्षिताय कुलीनाय स्वशिष्याय महात्मने ॥ ३९ ॥
महाचीनपदस्थाय दातव्यं कवचोत्तमम् ।
गुह्यं गोप्यं महादेवि लक्ष्मीनारायणप्रियम् ।
वज्रपञ्जरकं वर्म गोपनीयं स्वयोनिवत् ॥ ४० ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये लक्ष्मीनारायण-कवचनिरूपणमष्टात्रिंशः पटलः ॥ ३८ ॥

अथ

एकोनचत्वारिंशः पटलः ।

श्रीभैरव उवाच ।
अधुना कथयिष्यामि विद्यां साहस्रनामिकीम् ।
भोगदां मोक्षदां लोके लक्ष्मीनारायणस्य ते ॥ १

श्रीभैरवी ।
भगवन् करुणाम्भोधे लक्ष्मीनारायणस्य मे ।
भोगापवर्गदं दिव्यं वद नामसहस्रकम् ॥ २ ॥
सर्वमन्त्रमयं तत्त्वं सर्वपूजाफलप्रदम् ।

सर्वागमरहस्याढ्यं सर्वदेवैकवन्दितम् ॥ ३ ॥

श्रीभैरव उवाच ।

एतद्रहस्यं परमं मन्त्रनामसहस्रकम् ।
लक्ष्मीनारायणस्येष्टं सर्वस्वं तत्त्वतो मम ॥ ४ ॥
गुह्यं गोप्यतमं देवि सुखदं धर्मवर्धनम् ।
लक्ष्मीसंयनंनं[1] लोके परत्र परमार्थदम् ॥ ५ ॥
महाचीनपदस्थानां कौलिकानामभीष्टदम् ।
उपपातकपापानां शमनं दमकारकम् ॥ ६ ॥
सर्वतीर्थफलोद्रिक्तं सर्वयज्ञफलप्रदम् ।
सर्वदेवस्तुतं साध्यं चतुर्वर्गफलप्रदम् ॥ ७ ॥
अवाच्यं मार्गहीनानामश्रव्यं दुष्टचेतसाम् ।
वैष्णवः कौलिकश्रेष्ठः पठेन्नामसहस्रकम् ।
गुरूपदेशतो देवि सर्वसिद्धिमवाप्नुयात् ॥ ८ ॥

अस्य श्रीलक्ष्मीनारायणसहस्रनामपाठस्य, श्रीशिव ऋषिः, त्रिष्टुप् छन्दः, श्रीलक्ष्मीनारायणो देवता, श्रीं बीजं, ह्रीं शक्तिः, ऊँ कीलकं, धर्मार्थकाममोक्षार्थे सहस्रनामपाठे विनियोगः । ध्यानम्—

वेदानुद्धरते जगन्ति वहते भूगोलमुद्बिभ्रते
दैत्यान् दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

ऊँलक्ष्मीविष्णुरीशानो लक्ष्मीकान्तो विनायकः ।
विश्वम्भरो विश्वनाथो विश्वभूर्विश्वमूदनः ॥ १ ॥
लक्ष्मीराजो महात्मा च परमात्मा परापरः ।
अपारविभवो भव्यो भवभूतिमयो भवः ॥ २ ॥

---

१ 'संपर्धनं' ख. पाठ । २ 'लोक' ख. पाठ.।

लक्ष्मीधवो महांल्लक्ष्मीदेवो लक्ष्मीभवोत्तमः ।
लक्ष्मीधराधरो लक्ष्मीधाराधरसमद्युतिः ॥ ३ ॥
विश्रुतो विकलो व्यग्रो ⊛ विलासी गीतवल्लभः ।
विद्याधरप्रियो विद्यावादी विद्याविशारदः ॥ ४ ॥
पट्टभृत् पाटलद्योतः पीतपट्टधरो भगः ।
भाग्यवान् भोगदो भार्गो भृगुभावविवर्धनः ॥ ५ ॥
लक्ष्मीकौलेश्वरो लक्ष्मीगुह्यो लक्ष्मीविभावसुः ।
लक्ष्मीवीरेश्वरो लक्ष्मीधन्यो लक्ष्मीविभाकरः ॥ ६ ॥
अचिन्त्यो नित्यसंयोगी संयमी यमभीविहृत् ।
यामिनीशप्रियकरो राहुध्वंसी विषापहः ॥ ७ ॥
धीरो भ्रमहरो भीमो भीमास्यो भीमवल्लभः ।
हारकङ्कणभूषाढ्यो मौलिमान् नूपुरान्वितः ॥ ८ ॥
किङ्किणीरवसन्तुष्टो वंशीवादनतत्परः ।
स्थाणुरूपश्वरगतिश्चारुवक्त्रो जयी नयी ॥ ९ ॥
लक्ष्मीविनयवाँल्लक्ष्मीजयवाँल्ललिताकृतिः ।
लक्ष्मीनेत्रवशी लक्ष्मीहासवश्यो विनर्तकः ॥ १० ॥
नाट्यप्रियो नटो नन्दी सर्वविद् सर्वसारभृत् ।
वासवो गोप्यमार्गेष्टो वैष्णवाचारतत्परः ॥ ११ ॥
आत्मा परात्मा ज्ञानात्मा लोकाध्यक्षः सुरेश्वरः ।
सत्यः स्तुत्यः शुचिर्नित्यो नित्यात्मा नित्यदर्शनः ॥ १२ ॥
पञ्चनादमयोऽनन्तः पञ्चमाचारवल्लभः ।
पञ्चमस्वरसङ्गीतः कीर्तिदो मोहनाशनः ॥ १३ ॥

---

१ 'महाभयभी' ख पाठः । २ 'नटी नन्दी' ख. पाठः ।

⊛ अत्र रेखाङ्कितमेकमेव नाम ज्ञेयम् ।

लक्ष्मीपरः पुमॉल्लक्ष्मीशक्तिभृद् भक्तितोषितः ।
लक्ष्मीयोगीश्वरो[1] लक्ष्मीयोगदो भोगिनायकः ॥ १४ ॥
लक्ष्मीलोकेश्वरो लक्ष्मीवसुर्लक्ष्मीमनोहरः ।
अचिन्त्यमहिमा(१००)ऽचिन्त्यगरिमा घोरनिस्वनः ॥ १५ ॥
सुखी सुखप्रदो दिव्यरूपो देवेश्वरेश्वरः ।
कामदेवो वैद्यवैद्यो[2] वेदविद् वेदनायकः ॥ १६ ॥
ऋग्रूपः सामगीतज्ञो यजुर्यज्ञभुजां-पतिः ।
याज्ञिको यमिनां-त्राता त्रिलोकजनकोऽजरः ॥ १७ ॥
कामप्रदः कामिवरः कमनीयाकृतिः कुरुः ।
लक्ष्मीपृथुर्वसुप्रीतो लक्ष्मीश्रीदः श्रियःपतिः ॥ १८ ॥
लक्ष्मीकामो लक्ष्मणेशो लक्ष्मीरामोऽतिसुन्दरः ।
अनिर्वर्ती च निःसङ्गो निर्भयो निरुपद्रवः ॥ १९ ॥
निराभासो निराधारो निर्लेपो निरहङ्कृतिः ।
निराश्रयो निर्गुणश्च गुणातीतो गणेश्वरः ॥ २० ॥
ब्रह्मस्वरूपो ब्रह्मज्ञो बृंहणो ब्रह्मवर्धनः ।
महाक्रतुर्यज्ञवपुर्वराहो यज्ञनायकः ॥ २१ ॥
महारुद्रो महादेवो माधवो मधुसूदनः ।
लक्ष्मीनिरञ्जनो लक्ष्मीसिद्धिदः सिद्धिवर्धनः ॥ २२ ॥
लक्ष्मीश्रीवत्सवक्षाश्च लक्ष्मीकौस्तुभभूषितः ।
सर्वलोकधरो दान्तो दन्तिदन्तायुधो दमी ॥ २३ ॥
अप्रमेयगतिः शान्तः शमी कामी कृतागमः ।
महाकर्मा महाचीनो मकारशिवपूजितः ॥ २४ ॥
वाममार्गरतोद्रिक्तः सर्वाचारैकमध्यगः ।

---

१ 'योगेश्वरः' ख. पाठः । २ 'विश्ववेद्यो' ङ. पाठः । ३ 'वामाचारै' ख. पाठः

मांसाहारी नित्यसङ्गी मीनासवरसाकुलः ॥ २५ ॥
मुद्राप्रियो रतानन्दरतो रतिपतिप्रियः ।
अघोरदेवो दैत्यारिर्जितदेवो दिवाकरः ॥ २६ ॥
निशानाथोऽमृतमयो नवग्रहसमर्चितः ।
सत्स्वरूपो विरूपाक्षो विभाकरशतप्रभः ॥ २७ ॥
निग्रहो विग्रही वामो वारांनिधिनिवासकः ।
पीनबाहुः स्थूलपादो दीर्घचक्षुरलंभुजः ॥ २८ ॥
पादाभितक्रमातीतः सत्यसन्धः सनातनः ।
लक्ष्मीसनातनो लक्ष्मीधर्माध्यक्षो धनेश्वरः ॥ २९ ॥
लक्ष्मीधनप्रदो (२००) लक्ष्मीधर्मभागी च धर्मवान् ।
वीरहा पुण्डरीकाक्षः पद्मनाभो जगत्प्रभुः ॥ ३० ॥
पद्मासनो ब्रह्ममयो विश्वपी विगतज्वरः ।
समानः समदृष्टिश्च विषमो विषमेक्षणः ॥ ३१ ॥
चतुर्मूर्तिस्त्रिमूर्तिश्च चिन्तितश्चिन्तणीपतिः ।
सहस्रबाहुः धनेशो ब्राह्मणो वणिजां पतिः ॥ ३२ ॥
सर्वव्यापी सर्वमुखः सर्वमध्यगतः सखा ।
चक्रार्चितो नक्रपतिर्वरुणः शक्रसोदरः ॥ ३३ ॥
दर्पहा सर्पशयनः सर्पाशनेश्वरप्रदः ।
अमानी मानदो मान्यो मानवेन्द्रो मनूत्तमः ॥ ३४ ॥
मनुवरदोऽमराध्यक्षो लक्षपो लोकैकरक्षकः ।
शोकहा दुर्गमो दृप्तो बलिहा कलिनाशनः ॥ ३५ ॥
शुभाङ्गो मदिराक्षीवः शुभकृत् शोभनाकृतिः ।
अतिथिस्तिथिनाथश्च नक्षत्रपरिवेषणः ॥ ३६ ॥

---

१ 'विषमोऽक्षः' ङ पाठ २ 'सरासनधर' ङ पाठः ।

चतुर्बाहुश्चतुःश्रोत्रो विश्वधा विलयप्रदः ।
प्रलयान्तकरः प्राज्यो जननीजनकप्रियः ॥ ३७ ॥
यशस्वी श्रीधरः शान्तः शङ्काशतविनाशकः ।
अक्रूरवरदः क्रूरः कीरवाग् गणनायकः ॥ ३८ ॥
सुवर्णमुकुटो मारो मारवर्मणिभूषणः ।
मान्त्रिको मञ्जुलो मन्त्री मान्त्रिकेष्टवरप्रदः ॥ ३९ ॥
लक्ष्मीवितर्कवाँल्लक्ष्मीसुन्दरो बन्धुरोऽभयः ।
अर्जितः सुखितस्तारस्तार्तीयः कार्तवीर्यकः ॥ ४० ॥
लक्ष्मीपद्मधरो लक्ष्मीचन्द्रहासो विकत्थनः ।
लक्ष्मीगोवर्धनधरो लक्ष्मीकम्बुधरो विराट् ॥ ४१ ॥
स्कन्दाश्रयो रिपुध्वंसी देवसेनाधिनायकः ।
अनुकूलोऽनुकूटश्च सानुमान् सोमसुन्दरः ॥ ४२ ॥
तामसः सात्त्विकः सभ्यः (३००) सोमराजो मरीचिमान् ।
अर्चिष्मान् विकलः कुल्यकल्पः सज्जनपोषकः[1] ॥ ४३ ॥
विराजो वामनो वेणुर्वानरो वारिवाहनः ।
वाल्मीकिवरदो वन्दी वन्द्यो बन्धूकसन्निभः ॥ ४४ ॥
वर्णेश्वरो वर्णमाली वनमालातिसुन्दरः ।
भृगुर्भास्वद्भृगुर्भोक्ता कर्ता हर्ता शतक्रतुः ॥ ४५ ॥
अतुल्यः कोमलः कोपी रमणो मणिकुण्डलः ।
लक्ष्मीकेयूरवाँल्लक्ष्मीमणिदामविराजितः ॥ ४६ ॥
लक्ष्मीनूपुरवाँल्लक्ष्मीमुक्तामाल्यविभूषणः ।
लक्ष्मीगोधाङ्गुलित्राणो लक्ष्मीसौवर्णकङ्कणः ॥ ४७ ॥
लक्ष्मीविराजितो लक्ष्मीविविधाभरणोज्ज्वलः ।

---

१ 'चतुर्भोगी' ट. पाठः । २ 'पूजकः' ट. पाठः ।

ककारादिसकारान्तविद्याभूषणभूषितः ॥ ४८ ॥
अकाराद्यक्षरस्फीतो निःशेषस्वरमण्डितः ।
वर्णमान्यो महाविद्यामातृकाक्षरतत्त्ववान् ॥ ४९ ॥
लक्ष्मीकामेश्वरो लक्ष्मीकामुको निर्जरेश्वरः ।
कलावान् कीर्तिमान् कृतः कुम्भाण्डप्राणहारकः ॥ ५० ॥
केशान्तकः कालमुश्च कारकः कष्टहा कठी ।
क्रीतः कुञ्जः कम्बुधरः कलकण्ठः कुलालकः ॥ ५१ ॥
कुलाध्यक्षः कुलाचारी कुलाकुलपदार्चितः ।
करञ्जकः कर्वरीशः कनकः कर्वरीकरः ॥ ५२ ॥
कलङ्करहितः कोकः कोकशोकनिवर्हणः ।
कपिलः कलशी कोलः कालिकः कुलमानसः ॥ ५३ ॥
लक्ष्मीकुलाकुलो लक्ष्मीकुलजः कर्मवर्धनः ।
लक्ष्मीकाशीश्वरो लक्ष्मीनवनाथविनायकः ॥ ५४ ॥
लक्ष्मीकनिष्ठो निष्पिष्टो लक्ष्मीयोगीन्द्रयोगदः ।
खपरः खेचरः खेटः खगगामी खलान्तकः ॥ ५५ ॥
खरूपः खगरूपश्च खनित्रः खेटनायकः ।
खगायुधः खण्डधारी खञ्जनेक्षणभञ्जनः ॥ ५६ ॥
खरध्वंसी खरारावः खर्वुराकारभीषणः ।
खंखटोलः खगगतिः खेचरेश्वरसेवितः ॥ ५७ ॥
खेचरीगणसेव्यश्च खण्डमुद्रानियन्त्रितः ।
खड्गहस्तः खड्गपालः खेतः खवर्णभूषणः (४००) ॥ ५८ ॥
लक्ष्मीखेशः खोकरूपो लक्ष्मीमाम्बरमूर्तिमान् ।
लक्ष्मीखट्वाङ्गभृल्लक्ष्मीखेचरः खारमलेपितैः ॥ ५९ ॥
लक्ष्मीचितामणिनिलयो लक्ष्मीभस्मीकृतानलः ।

---

१ 'भूषितः' क. पाठः । २ 'खेटः' क. ख पाठः । ३ 'खारमलीप्रियः' क. ख. पाठः ।

लक्ष्मीभूतिप्रदो लक्ष्मीज्योतिष्मान् गायराश्रितः ॥ ६० ॥
लक्ष्मीगीतः स्वरालापी गोपतिर्गोकुलेश्वरः ।
गङ्गाधरप्रियो गोष्ठी गोपालो गन्धवर्धनः ॥ ६१ ॥
गन्धवाहप्रियो गीतो गीतज्ञो गीतलालसः ।
गुञ्जाहारप्रियो गण्डी गुरुर्गोवाहनोऽगदः ॥ ६२ ॥
गाम्भीर्यवान् गुरुतरो गुरुशब्दविवर्धनः ।
गुरुभक्तिप्रियो गोलो गण्डशैलनिवासकः ॥ ६३ ॥
गर्जन्नादो गोत्रपतिर्गोलमार्गप्रियोऽङ्गवान् ।
निरङ्को गजवक्त्रेशो गणनायकनायकः ॥ ६४ ॥
गन्धर्वनाथवरदो गगनेचरपूजितः ।
गर्भहीनो गर्भवाही गुणेयो गुणसागरः ॥ ६५ ॥
गुणातीतवपुर्गुण्यो गुप्तमार्गप्रवर्तकः ।
गुप्तमन्त्रप्रियो गोप्यो गुह्यो गुह्यकवल्लभः ॥ ६६ ॥
गोपीतो गिरिनाथश्च गिरिधारी जगन्निधिः ।
लक्ष्मीप्रियः प्रियः प्रीतो लक्ष्मीगरुडवाहनः ॥ ६७ ॥
लक्ष्मीकपोतनिलयो लक्ष्मीकल्पद्रुमो रविः ।
लक्ष्मीसन्तानकः सारो लक्ष्मीसारो लतापतिः ॥ ६८ ॥
लक्ष्मीप्राप्योऽप्रुलक्ष्मा च लक्ष्मीसागरनन्दनः ।
घृणी घृणिमयो घृष्टो घुसृणारक्त ईश्वरः ॥ ६९ ॥
घृणामयोऽघहर्ता च घृणिनाथो घवर्णभाक् ।
लक्ष्मीचिन्तामणिः साधुर्लक्ष्मीवीरो वरोत्तमः ॥[1] ७० ॥
लक्ष्मीचतुर्भुजो लक्ष्मीविश्वनाथो विनायकः ।
ङवर्णोऽनन्तरूपश्च ज्ञानुज्ञो ङोणरूपवान् ॥ ७१ ॥

---

१. 'गव.' क. ख. 'गमः' घ. ङ. पाठः। २ 'लक्ष्मीचिन्तामणिसत्वः' ग. पाठः।
३ 'दान्तरूपश्च ज्ञाणज्ञो' क. पाठः।

जगन्नाथो जगद्भर्ता जगत्कर्ता जगत्स्थितिः ॥ ८३ ॥
जगत्त्रयकरो जेता जगतां पतिरुत्तमः ।
जगत्स्वामी जगद्धाता जगत्संहारकारकः ॥ ८४ ॥
जीवात्मा परमात्मा च जगद्भूतिप्रदो भवः ।
जगद्गुणी जगत्स्तुत्यो जगदानन्ददायकः ॥ ८५ ॥
जगत्सन्तोषभूतात्मा जगत्क्रोधदयान्वितः ।
जगद्दीप्तिकरो वेदोपासितो जगदीश्वरः ॥ ८६ ॥
जवी जवान्वितो जारो जगदाडम्बरप्रदः ।
जगत्सेव्यो जगत्प्रीतो जगदिष्टो जगन्मयः ॥ ८७ ॥
जृम्भणो जटिलो जीवो जम्भारातिवरप्रदः ।
जामाता जलधेर्जान्तो जटामुकुटमण्डितः ॥ ८८ ॥
जितारिर्जयदोऽजेयो जयकृद्वीरतापनः ।
लक्ष्मीकुचतटासीनो लक्ष्मीनयनगोचरः ॥ ८९ ॥
झल्लरीझोत्कृतो झाडी झण्डी शण्ठप्रतापनः ।
झाङ्कारी झङ्कृतिर्झिल्लीरवो झाङ्कारिनूपुरः ॥ ९० ॥
लक्ष्मीवरो (६००) महालक्ष्मीसेवितो देववन्दितः ।
ञकारो ञौरलो ञेशो ञवर्णामृतरूपवान् ॥ ९१ ॥
लक्ष्मीस्वभूः स्वर्गपतिर्लक्ष्मीवन्द्यो विधुन्तुदः ।
टैकारो टङ्कहस्तश्च टान्तष्टीत्कारकूजितः ॥ ९२ ॥
लक्ष्मीदेवो देवदेवो लक्ष्मीदान्तः कृपानिधिः ।
ठक्करो ठालको ठास्यो ठवर्णसुपमानिधिः ॥ ९३ ॥
लक्ष्मीविधुर्वितर्काख्यो वैनतेयध्वजो ध्वजः ।
डमरुर्डामरेशानो डकाराक्षरमंपुंतः ॥ ९४ ॥

---

१ 'ज्ञाता' क पाठः । २ 'ज्ञादरो' क पाठः । ३ 'टकारो' ङ. 'ञंकारो' ख. पाठः ।
४ 'सञ्ज्ञ' क ख. पाठः ।

लक्ष्मीपतिः पावराङ्को लक्ष्मीनायकनायकः ।
ढकारवाग् ढक्कमेधो ढक्कासुरनिषूदनः ॥ ९५ ॥
लक्ष्मीजेता जपकरो लक्ष्मीशो लम्बमूर्धजः ।
लक्ष्मीजगत्स्थितिर्लक्ष्मीशौरिर्लक्ष्मीगदाधरः ॥ ९६ ॥
णान्तो णवर्णको णेशो णषर्णामृतसाधितः ।
लक्ष्मीदामोदरो लक्ष्मीप्राणो लक्ष्मीरथाङ्गभृत् ॥ ९७ ॥
तुन्योऽतुन्यो महातुन्यचित्तस्तारार्णमण्डितः ।
वोतुलस्तुलसीनाथस्तथ्यो मन्त्रनायकः ॥ ९८ ॥
तपःफलप्रदस्ताम्ररूपोऽतुलपराक्रमः ।
तुटिरूपस्तुटिगतिस्तपस्वी तापसप्रियः ॥ ९९ ॥
तुहिनांशुस्तुहिनजस्तुषारकरशोभितः ।
तुरीसेन्यस्तुलाभश्च तकाराक्षरमण्डनः ॥ १०० ॥
लक्ष्मीशङ्खायुधो लक्ष्मीनन्दकेशस्तवर्णभृत् ।
स्थविरः स्थूलगात्रश्च स्थाणुसेन्यस्थशब्दकृत् ॥ १०१ ॥
स्थालीरसप्रियो स्थूलः स्थकारेश्वर ईश्वरः ।
लक्ष्मीजीवेश्वरो लक्ष्मीधरो लक्ष्मीनृसिंहकः ॥ १०२ ॥
दयावान् द्युपतिर्दघ्नो धृतो दम्भविवर्जितः ।
दारिद्र्यहा दुःखहर्ता दौर्भाग्यक्षयकृद् दयी ॥ १०२ ॥
दीनो दीनप्रभुर्दम्भी दयितोदयवाञ्छकः ।
दानकृद् दातृफलदो दनुजेन्द्रक्षयङ्करः ॥ १०३ ॥
दैत्यहा दैत्यदर्पघ्नो दर्पवादिक्षयंकरः ।
दारप्रियो दीर्घनखो दुष्टासुरनिषूदनः ॥ १०४ ॥
देवदेवो यशोवन्द्यो दकाराक्षरमण्डितः (७००) ।
लक्ष्मीदृगाकरो लक्ष्मीदेवो लक्ष्मीदयानिधिः ॥ १०५ ।

धनदो धनकृद्धन्यो धनदेशो धनप्रदः ।
धृतिमान् धर्मवान् धर्मी धर्मकर्मविचक्षणः ॥ १०६ ॥
धर्माध्यक्षो धनाध्यक्षो धवलो धैर्यवान् धनी ।
धीरो धैर्यकरो धर्मदक्षो धनदपूजितः ॥ १०७ ॥
लक्ष्मीधनी महालक्ष्मीधवो लक्ष्मीमनोभवः ।
नवीनो नूतनो नम्रो नटनो नाट्यतोषितः ॥ १०८ ॥
नगो नागनगश्रेष्ठो नृगम्यो नागमण्डनः ।
नृसिंहो नृवरोऽनन्तो नरनारायणो नवः ॥ १०९ ॥
नागराजो नागपतिर्नागान्तकध्वजोऽनलः ।
नगारूढो निम्ननाभिर्नन्दिसेव्यो नटेश्वरः ॥ ११० ॥
नलिनाक्षो नृवन्द्योऽपि नायको नागनायकः ।
नर्मदातीरक्रीडाकृन्नलिनीपतिलोचनः ॥ १११ ॥
नरेशो नृपपूज्यश्च नागशायी नगोत्तमः ।
नारायणो निष्कलङ्को नवर्णाकृतिरात्मवान् ॥ ११२ ॥
लक्ष्मीनागो नगधरो लक्ष्मीनाथो नरूपवान् ।
पुष्पप्रियः पुष्पशय्याशयानः पुष्पशेखरः ॥ ११३ ॥
पुष्पधन्वा प्रद्युम्नश्च पुष्पेषुपुष्पपूजितः ।
पूज्यः पवित्रं परमं परमेष्ठी पितामहः ॥ ११४ ॥
परं पदं परं पुण्यं परमायुः परात्परः ।
पारावारसुताभर्ता परमेशः परं महः ॥ ११५ ॥
पुण्यदः पुण्यकृत् पूतः पुराणागमपूजितः ।
पुराणपुरुषः पीनः पीनवक्षा जितेन्द्रियः ॥ ११६ ॥
पीतवासाः पीतमालः पीतवर्णः पराङ्कुशः ।

'भर्तृनामिः' क. पाठः ।

रेवतीरमणो राकापतिः सर्वकलाधरः ॥ १२९ ॥
लक्ष्मीरामो महालक्ष्मीराजा लक्ष्मीत्रिविक्रमः ।
लाक्षारुणो लीतराधो ललज्जिह्वो ललापतिः ॥ १३० ॥
लङ्केशो लासिको लान्तो लम्बोदरप्रियः परः ।
लक्ष्मीलीनोऽलिवर्णश्च लकाराकार ईश्वरः ॥ १३१ ॥
वान्तदो वारसेनानीर्वराहो विग्रही विराट् ।
विष्णुर्वसुन्धरानाथो वसुदो वसुधाधिपः ॥ १३२ ॥
वागीश्वरो वेणुहस्तो वेतालो विरसो विपत् ।
विद्वान् विशालनयनो विकारोऽविकृतिः पुमान् ॥ १३३

सप्तस्वरमयः सप्तधातालतलवासकः ।
सात्त्विकः सत्त्वसंपन्नः समस्तदुरितापहः ॥ १४१ ॥
समस्तरिपुविध्वंसी समस्तासुरघातनः ।
समस्तपातकध्वंसी समस्तसुरवन्दितः ॥ १४२ ॥
लक्ष्मीसनातनो लक्ष्मीप्तनकः साधुपूजितः ।
हरिर्हरो हरिद्धरो हाटकेशो हटापहः ॥ १४३ ॥
हरिद्रवर्णो हसितो हारी हरितलोचनः ।
लक्ष्मीहरिर्हृषीकेशो लक्ष्मीहारधरोऽनघः ॥ १४४ ॥
क्षमी क्षमापतिः क्षत्ता क्षमेशश्च क्षवर्णभाक् ।
क्षणकृत् क्षणदानाथः क्षमावान् क्षुभितासुरः ॥ १४५ ॥
लक्ष्मीक्षमापुतो लक्ष्मीक्षत्ता लक्ष्मीक्षवर्णभृत् ।
अनन्तोऽनन्तपूज्यश्चाप्यादिरादित्यसंनिभः ॥ १४६ ॥
इन्दिरावल्लभो देव ईश्वरश्चोग्ररूपवान् ।
ऊष्मोज्ज्वलोऽपि ऋणहा ऋकारोज्ज्वलमातृकः ॥ १४७ ॥
ऌवर्णवर्णो ऌकार एनवर्णसमन्वितः ।
ऐश्वर्यसहितश्चोग्रस्तथौन्मत्तस्वरार्चितः ॥ १४८ ॥
अंकारश्चैवमःकारस्वरूपः स्वरभूषितः ।
ॐह्रींहसौः ह्रींश्रींदेवो लक्ष्मीनारायणः शिवः (१०००) ॥१४९॥
इति मन्त्रमयं नाम्नां सहस्रं तत्त्वमुत्तमम् ।
अकारादिचकारान्त-विद्यानिलयमीश्वरि ॥ १५० ॥
सर्वतीर्थमयं सर्वदेवदानवपूजितम् ।
अश्वमेधसहस्राणि वाजिपेयस्य कोटयः ॥ १५१ ॥
चान्द्रायणायुतं देवि महादानान्यनेकशः ।

---

१ 'मेधः सरवर्णं' क. ग घ. पाठः । २ 'नन्दिवल्लभ' ख. पाठः ।

रेवतीरमणो राकापतिः सर्वकलाधरः ॥ १२९ ॥
लक्ष्मीरामो महालक्ष्मीराजा लक्ष्मीत्रिविक्रमः ।
लाक्षारुणो लीलरावो ललज्जिह्वो लतापतिः ॥ १३० ॥
लङ्केशो लासिको लान्तो लम्बोदरप्रियः परः ।
लक्ष्मीलीनोऽलिवर्णश्च लकाराकार ईश्वरः ॥ १३१ ॥
वान्तदो वारसेनानीर्वराहो विग्रही विराट् ।
विष्णुर्वसुन्धरानाथो वसुदो वसुधाधिपः ॥ १३२ ॥
वागीश्वरो वेणुहस्तो वेतालो विरसो वियत् ।
विद्वान् विशालनयनो विकारोऽविकृतिः पुमान् ॥ १३३ ॥
वितर्की (९००) विनयी श्रियाराजमान्यो विचारकः ।
वाग्मी वानीरमूलस्थो वाचाटो वीरनायकः ॥ १३४ ॥
लक्ष्मीवराहो वीरेशो लक्ष्मीवीरो वनेचरः ।
शङ्करः श्रीधरः श्रीलः श्रमी शीतांशुशीतलः ॥ १३५ ॥
शशिमौलिः शरत्यागः शम्भुः शङ्खनिसूदनः ।
शक्रः शत्रुक्षयकरः शत्रुकालकरः शिवः ॥ १३६ ॥
लक्ष्मीशिवः श्रीपतिः श्रीवरो लक्ष्मीशिवप्रदः ।
षोडशस्वररूपश्च षोडशार्णविभूषणः ॥ १३७ ॥
षडङ्गविद्यावेत्ता च षकाराक्षरभूषितः ।
लक्ष्मीषडङ्गधारी च लक्ष्मीषोडशवर्णभृत् ॥ १३८ ॥
सुन्दरः स्वर्गवसतिः सर्वेशः सर्वतोमुखः ।
सप्तसप्तिः सदाचारः साधुः साधुजनप्रियः ॥ १३९ ॥
सरमः सरलः सालः सुखी सुखविर्धनः ।
सप्तद्वीपवतीनाथः सप्तसागरनायकः ॥ १४० ॥

---

१ 'वराहविग्रहो' ख. ग पाठः । २ 'सासः सारङ्ग. पारः' क ङ पाठः ।

सप्तस्वरमयः सप्तपातालतलवासकः ।
सात्त्विकः सत्त्वसंपन्नः समस्तदुरितापहः ॥ १४१ ॥
समस्तरिपुविध्वंसी समस्तासुरघातनः ।
समस्तपातकध्वंसी समस्तसुरवन्दितः ॥ १४२ ॥
लक्ष्मीसनातनो लक्ष्मीसनकः साधुपूजितः ।
हारिर्हरो हरिहरो हाटकेशो हृदापहः ॥ १४३ ॥
हरिद्रवर्णो हसितो हारी हरितलोचनः ।
लक्ष्मीहरिर्हृषीकेशो लक्ष्मीहारधरोऽघहः ॥ १४४ ॥
क्षमी क्षमापतिः क्षत्ता क्षमेशश्च क्षवर्णभाक् ।
क्षणकृत् क्षणदानाथः क्षमावान् क्षुभितासुरः ॥ १४५ ॥
लक्ष्मीक्षमापुतो लक्ष्मीक्षत्ता लक्ष्मीक्षवर्णभृत् ।
अनन्तोऽनन्तपूज्यश्चाप्यादिरादित्यसंनिभः ॥ १४६ ॥
इन्दिरावल्लभो देव ईश्वरश्चोग्ररूपवान् ।
ऊर्मोज्ज्वलोऽपि ऋणहा ॠकारोज्ज्वलमातृकः ॥ १४७ ॥
ऌवर्णवर्णो ॡकार एनवर्णसमन्वितः ।
ऐश्वर्यसहितश्चोग्रस्तर्पोन्मत्तस्वरार्चितः ॥ १४८ ॥
अंकारश्चैवमःकारस्वरूपः स्वरभूषितः ।
ॐह्रींश्रींदेवो लक्ष्मीनारायणः शिवः (१०००) ॥१४९॥
इति मन्त्रमयं नाम्ना सहस्रं तत्त्वमुत्तमम् ।
अकारादिक्षकारान्त-विद्यानिलयमीश्वरि ॥ १५० ॥
सर्वतीर्थमयं सर्वदेवदानवपूजितम् ।
अश्वमेधमहस्राणि वाजिपेयस्य कोटयः ॥ १५१ ॥
चान्द्रायणायुतं देवि महादानान्यनेकशः ।

---

१ 'मेधः परत्व' क ख ग. पाठः । २ 'नन्दिरेव' ख. पाठः ।

मन्त्रनामसहस्रस्य कलां नार्घन्ति षोडशीम् ॥ १५२ ॥
अर्धरात्रे पठेद्वीरः शक्तिवक्षःस्थितः शनैः ।
स्वप्ने लक्ष्मीप्रियं देवं वरदं सोऽपि पश्यति ॥ १५३ ॥
महाचीनार्चनं कृत्वा पठेद्वीरार्चने सकृत् ।
शतवर्षसहस्राणि पूजायाः फलमाप्नुयात् ॥ १५४ ॥
एकवारं पठेद्यस्तु संपूज्य गुरुमंनिधौ ।
स भवेत् साधकः श्रीमान् परत्र त्रिदिवं व्रजेत् ॥ १५५ ॥
पुण्यदं वरदं नुत्यं[1] तीर्थसाधनमुत्तमम् ।
योगिनां योगदं पूज्यं भोगिनां भोगवर्धनम्[2] ॥ १५६ ॥
रोगिणां रोगशमनं सर्वदुष्कृतनाशनम् ।
वैष्णवानां प्रियतरं मुक्तानां परमार्थदम् ॥ १५७ ॥
अदातव्यमश्रोतव्यमन्यशिष्याय पार्वति ।
विना दानं न गृह्णीयान्न दद्याद् दक्षिणां विना ॥ १५८ ॥
दत्त्वा गृहीत्वाप्युभयोः सिद्धिहानिर्भवेद् ध्रुवम् ।
इदं नामसहस्रं तु लक्ष्मीनारायणस्य ते ।
तव भक्त्या मयाख्यातं गोपनीयं स्वयोनिवत् ॥ १५९ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीवेणीरहस्ये लक्ष्मीनारायणसहस्रनाम-निरूपणमेकोनचत्वारिंशः पटलः ॥ ३९ ॥

---

[1] 'नित्यं' क. पाठः । [2] 'पुण्यं' क. पाठः ।

अथ

चत्वारिंशः पटलः ।

श्रीभैरव उवाच ।

अथाहं तत्त्वसर्वस्व रहस्यं परमार्थदम् ।
मन्त्रस्तोत्रं प्रवक्ष्यामि लक्ष्मीनारायणस्य वै ॥ १ ॥
पञ्चमाङ्गं महादेवि परमार्थप्रकाशकम् ।
चतुर्वेदागमस्तुत्यं भोगमोक्षैककारणम् ॥ २ ॥
गुह्यं गुप्ततरं तत्त्वं मन्त्रराजस्य पार्वति ।
कौलिकानां सदा सच्चिदानन्दरसकारणम् ॥ ३ ॥

अस्य श्रीलक्ष्मीनारायणमन्त्रस्तोत्रराजस्य, शिव ऋषिः, विष्टुप् छन्दः श्रीलक्ष्मीनारायणो देवता, श्रीं बीजं, ह्रीं शक्तिः, ओं कीलकं, भोगापवर्गसिध्यर्थे पाठे विनियोगः । ध्यानम्—

पूर्णेन्दुवदनं पीतवसनं कमलासनम् ।
लक्ष्म्या श्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥ ४ ॥
किरीटिनं कुण्डलहारमण्डितं
पद्मासनं श्यामसुखं चतुर्भुजम् ।
पीताम्बरं शङ्खगदाब्जचक्र-
पाणिं पुराणं पुरुषं भजे विभुम् ॥ ५ ॥
प्रणवं यदि मानवो जपेद्धरिपादाम्बुजसेवनाकुलः ।
दनुजान्तकधाम याति नूनं परमानन्दमयो गतक्लमः ॥ ६ ॥
पराबीजं नुत्य यदि जपति जन्तुर्जपविधि
स्मराक्रान्तः सार्वागमकुटिलमार्गोज्झितभयः ।

---

[1] अम्बायाः पुरतश्चमीश पुरतः क, ख, पाठः ।

भवेत् कौलेशानः सकलरिपुदावाग्निजलदः
सुरस्त्रीभिः सार्धं सुरविटपिवाटीषु रमते ॥ ७ ॥
त्रिबीजं यो महामन्त्रं जपेदानन्दनिर्भरः ।
आनन्दरूपो भविता लक्ष्मीनारायणप्रियः ॥ ८ ॥
विभूतिबीजं मनुराजतत्त्वं
जपेद्रतान्ते यदि कौलिकेन्द्रः ।
स याति देवासुरपूजिताङ्घ्रिः
परं पदं सर्वसुरैरलभ्यम् ॥ ९ ॥
माबीजमन्तः परमार्थतत्त्वं
सत्त्वैकरूपं मनसा जपेद् यः ।
स कामिनीकामरसप्रवीणो
भवेदरीणामुरुदर्पहारी ॥ १० ॥
रमाबीजं नामाक्षरपदमयं मन्त्रमुकुटं
जपेद्यो यत्राग्रे हरिचरणपद्मार्पितमनाः ।
भवेद् भूभृन्मौलिस्फुरितमणिमालाशुनिवह-
प्रभाभास्वत्पादः स धरणिधरेन्द्रो विजयवान् ॥ ११ ॥
नारायणायेति जपेन्मनुं यो
रात्रौ प्रभाते परमार्थबीजम् ।
स वैरिदावानलवारिवाहो
भवेत् स गीर्भिर्गुरुगर्वहारी ॥ १२ ॥
विश्वं जपेद्यो हृदि विश्वसारं
विश्वम्भरध्यानपरः प्रभाते ।
साम्राज्यलक्ष्मीं स रिपून् विजित्य
लभेत् भुवि स्वर्गमतः परासुः ॥ १३ ॥

चतुरश्रवृत्तषोडशार-वसुपत्राञ्चितकाश्रराश्रविन्दौ ।
कमलाश्रितमीश्वरं निविष्टं परमानन्दमयं भजाम्यनन्तम् ॥१४॥
इति मन्त्रमयं पठेत् स्तवं यो
हृदि नारायणवल्लभं प्रभाते ।
कमला विमलाशयस्य तस्य
श्रुतिशीलस्य वशीभवत्यवश्यम् ॥ १५ ॥
इतीदं स्तोत्रमीशानि मूलमन्त्रमयं परम् ।
तव भक्त्या मयाख्यातं नाख्येयं मुमुक्षुभिः ॥ १६ ॥
पञ्चाङ्गमिदमाद्यन्तं लक्ष्मीनारायणस्य ते ।
वर्णितं गोप्यमर्चाढ्यं गोपनीयं स्वयोनिवत् ॥ १७ ॥
श्रीदेव्युवाच ।
भगवन् सर्वतत्त्वज्ञ सर्वलोकहितेरत ।
क्रीतास्मि भवतानेन कथनेनास्य शङ्कर ॥ १८ ॥
लक्ष्मीनारायणस्याद्य श्रुता पञ्चाङ्गमुत्तमम् ।
मयाप्तः परमानन्दो दासहं ते ब्रवीमि किम् ॥ १९ ॥
श्रीभैरव उवाच ।
एतद्रहस्यमखिलं सर्वतन्त्रेषु गोपितम् ।
वेदानालोड्य तत्त्वार्थ देवि ते कथितं मया ॥ २० ॥
देवानां दुर्लभं तत्त्वं पञ्चाङ्गं वैष्णवार्चिते ।
रहस्यं सर्वलोकानां सर्वस्वं मम पार्वति ॥ २१ ॥
अभक्तायमवक्तव्यमदातव्यं दुरात्मने ।
देयं शिष्याय शान्ताय पुरुभक्तिपराय च ॥ २२ ॥
दानशीलाय भक्ताय कौलमार्गरताय च ।
महाचीनपदस्थाय वैष्णवाय महात्मने ॥ २३ ॥
दत्त्वा मुक्तिं लभेद् देवि भक्तानां सुखदायिनीम् ।

इतीदं परमं तत्त्वं तत्त्वात्तत्त्वं परात्परम् ॥ २४ ॥
गोप्यं गुह्यं गोपनीयं चेत्याज्ञा पारमेश्वरी ।

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये लक्ष्मीनारायण-स्तवाख्यानं चत्वारिंशः पटलः ॥ ४० ॥

समाप्तं लक्ष्मीनारायणपञ्चाङ्गम् ।

अथ

एकचत्वारिंशः पटलः ।

मृत्युञ्जयपञ्चाङ्गम् ।

श्रीभैरव उवाच ।
कैलासशिखरे रम्ये मणिमालातिभास्वरे ।
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥ १ ॥
विचित्ररत्नखचित-शिलामण्डपमण्डिते ।
किन्नरीमधुरालाप-मुखरीकृतदिङ्मुखे ॥ २ ॥
भगवन्तमुमानाथमुपविष्टमुमाश्रितम् ।
ब्रह्मोपेन्द्रेन्द्रचन्द्रार्क-गुरुशुक्रसमन्वितम् ॥ ३ ॥
ब्रह्मर्षिवसुसिद्धौघ-गणगन्धर्वसेवितम् ।

चन्द्रार्धमुकुटोपेतं शूलखट्वाङ्गधारिणम् ॥ ४ ॥
वराभयकरं शान्तं कुन्तबाणासिसंयुतम् ।
खड्गखेटकहस्तं च पाशतोमरकायुधम् ॥ ५ ॥
भिण्डिपालकरं प्रासपरिघायुधधारिणम् ।
गदाडमरुहस्तं च शतघ्नीचक्रसंयुतम् ॥ ६ ॥
अष्टादशभुजं देवं भूतिभूषितविग्रहम् ।
दिगम्बरं विशालाक्षं त्रिनेत्रं पञ्चवक्त्रकम् ॥ ७ ॥
आनन्दमुदितं विश्वं विश्वनायकमीश्वरम् ।
जपन्तं प्रहसन्तं च गौर्यालिङ्गितविग्रहम् ॥ ८ ॥
पन्नगाभरणोपेतं महादेवं महेश्वरम् ।
बद्धपद्मासनं शंभुं शरणागतवत्सलम् ॥ ९ ॥
प्रसन्नवदनं दृष्ट्वा प्रणम्योत्थाय पार्वती ।
गिरा मधुरया देवं प्रोवाच परमेश्वरम् ॥ १० ॥

श्रीदेव्युवाच ।

भगवन् यः शिवो देवो महामृत्युञ्जयः परः ।
आदिनाथो जगत्त्राता दीक्षानायक ईश्वरः ॥ ११ ॥
वर्णितः प्राङ् महादेवो गुणातीतश्चिदीश्वरः ।
भवता तस्य देवस्य परब्रह्मस्वरूपिणः ॥ १२ ॥
पञ्चाङ्गं श्रोतुमिच्छामि वक्तुमर्हसि मे प्रभो ।

श्रीभैरव उवाच ।

परमेश्वरदेवस्य महामृत्युञ्जयस्य ते ।
भक्त्या वक्ष्यामि पञ्चाङ्गं नाख्येयं यस्य कस्यचित् ॥ १३ ॥
पटलं पद्धतिं वर्म मन्त्रनामसहस्रकम् ।
स्तोत्रं पञ्चाङ्गभूतं च गोपयेद्यः स साधकः ॥ १४ ॥

---

१ 'शक्तिं' क. पुस्तकः । २ 'तातो' ङ पाठः ।

वक्ष्यादौ पटलं वक्ष्ये दीक्षानायकवल्लभम् ।
गुह्यं परमगुह्यं च गोपनीयं तु मुमुक्षुभिः ॥ १५ ॥
मन्त्रोद्धारं महादेवि दीक्षाफलविवृद्धये ।
दिव्यं सुखकरं साध्यं सिद्धं वक्ष्यामि सिद्धये ॥ १६ ॥

तारं हृन्नवतार्तिकं शिवशरन्मण्डूकबीजं ततो
वाच्यं पालय पालयेति च पुनः शक्तिः शिवः शाक्तिकम् ।
हृज्जं तारकभूषणं निगदितस्तन्मन्त्रिकेहेतोर्मया
दीक्षानायकवल्लभो मनुरयं त्रैलोक्यचिन्तामणिः ॥ १७ ॥

नास्यान्तरायबाहुल्यं सिद्धसाध्यारिदूषणम् ।
न कायक्लेशदौर्बल्यं नाचारनियमभ्रमः ॥ १८ ॥
न पञ्चदोषशङ्कापि नोत्तमर्णाधमर्णकौ ।
केवलं परमानन्दवर्धनो रिपुमर्दनः ॥ १९ ॥
मन्त्रोऽयं मन्त्रराजेन्द्रो दीक्षाफलसुरद्रुमः ।
विना पुरस्क्रियामेष मन्त्रराजो न सिध्यति ॥ २० ॥
तस्मात् पुरस्क्रियाहेतोर्गुरुं संप्रार्थयेच्छिवे ।
गुरुहस्तेव यः कुर्यान्मन्त्रस्यास्य पुरस्क्रियाम् ॥ २१ ॥
तस्यायं मन्त्रराजेन्द्रो भवेत् कल्पद्रुमोपमः ।
वर्णलक्षं पुरश्चर्या तदर्धं वा महेश्वरि ॥ २२ ॥
एकलक्षावधि कुर्यान्नातो न्यूनं कदाचन ।
जपाद् दशांशतो होमस्तद्दशांशेन तर्पणम् ॥ २३ ॥
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम् ।
एवं विधाय मन्त्रस्य पुरश्चर्यां च साधकः ॥ २४ ॥
गुरवे दक्षिणां दत्त्वा यथावित्तमवैभवमीश्वरि ।
ततो जपो भवेद् देवि सर्वसिद्धिप्रदायकः ॥ २५ ॥

---

१ 'च' क. पाठः ।

अन्यथा न भवेत् सिद्धिर्दीक्षायाः सुमनोरपि ।
यन्त्रोद्धारविधिं वक्ष्ये देवदेवस्य पार्वति ॥ २६ ॥
सर्वसंमोहनं दिव्यं सर्वाशापरिपूरकम् ।
बिन्दुत्रिकोणषट्कोण-वृत्ताष्टदलमण्डितम् ॥ २७ ॥
वृत्तत्रयं धरासद्म श्रीचक्रं शैवमीरितम् ।
लयाङ्गमस्य वक्ष्यामि यन्त्रराजस्य पार्वति ॥ २८ ॥
यस्य श्रवणमात्रेण दीक्षाफलमवाप्नुयात् ।
इन्द्राद्या दश दिक्पालाः सायुधा भूगृहे शिवे ॥ २९ ॥
दिव्यसिद्धौघमर्त्यौघा गुरवोऽप्यारणत्रये ।
असिताङ्गो रुरुश्चण्डक्रोधेशोन्मत्तभैरवाः ॥ ३० ॥
कपालीशो भीषणाख्यः संहारेशोऽष्टमः शिवे ।
पूजनीया वसुदले साधकैस्तु मुमुक्षुभिः ॥ ३१ ॥
कालाग्निरुद्रं नेत्रेशं विश्वनाथं महेश्वरम् ।
सद्योजात वामदेवं पूजयेत् कामयोनिषु ॥ ३२ ॥
कामेश्वरं महाकाल देव स्वच्छन्दभैरवम् ।
त्रिकोणे पूजयेद् देवि स्वाग्नेशानाग्निभागतः ॥ ३३ ॥
बिन्दौ मृत्युञ्जयं देवं स्वशक्त्या सहितं शिवे ।
अमृतेश्वरमीशानमीश्वरं भुवनेश्वरम् ॥ ३४ ॥
त्रिखण्डा पाशमीशानि सुधाकलशमुत्तमम् ।
मुक्ताचमूत्रं देवाङ्गे पूजयेत् साधकोत्तमः ॥ ३५ ॥
सम्पूज्य विधिवद् देवि गन्धाक्षतप्रसूनकैः ।
धूपदीपादिनैवेद्यैस्ताम्बूलैरछत्रचामरैः ॥ ३६ ॥
लयाङ्गमिदमाख्यातं सर्वतन्त्रेषु गोपितम् ।
सर्वसिद्धिप्रदं देवि गोपनीयं विशेषतः ॥ ३७ ॥
मन्त्रसास्य महादेवि महाचम-पदादिकः ।

सकहोल ऋषिरछन्दो गायत्री देवता तथा ॥ ३८ ॥
महामृत्युञ्जयो रुद्रो महादेवोऽधिदेवता ।
बीजं च प्रणवो देवि शक्तिर्हृज्जाख्यबीजकम् ॥ ३९ ॥
कीलकं शरदीशानि दिग्बन्धोऽस्त्यस्त्रमीश्वरि ।
चतुर्वर्गेषु विद्याया विनियोगः प्रकीर्तितः ॥ ४० ॥
तारहृज्जशरद्बीजैः षड्दीर्घैः प्राण(न्याम)माचरेत् ।
करयोर्हृदयादीनामङ्गानां साधकोत्तमः ॥ ४१ ॥
मूलादिबीजमात्रेण प्राणायामत्रयं चरेत् ।
तत्त्वत्रयेणाचमनमात्मविद्याशिवादिना ॥ ४२ ॥
अथ ध्यानं प्रवक्ष्यामि देवदेवेश्वरस्य हि ।
येनैव ध्यानमात्रेण मन्त्री शैवं पदं व्रजेत् ॥ ४३ ॥

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
*मुद्रापाशसुधाचषत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत् ॥ ४४ ॥

चन्द्रमण्डलमध्यस्थे रुद्रभालेऽतिविस्तृते ।
तत्रस्थं चिन्तयेत् साध्यं मृत्युं प्राप्तोऽपि[2] जीवति ॥ ४५ ॥
इति साध्यं परावीजमस्त्रावयवभूषितम् ।
रुद्रभालस्थमीशानि गोपनीयं विशेषतः ॥ ४६ ॥
प्रयोगानष्ट वक्ष्यामि दुर्लभान् परमार्थदान् ।
यान् विधाय शिवे मन्त्री भवेद् भैरवसन्निभः ॥ ४७ ॥
स्तम्भनं मोहनं चैव मारणाकर्षणे ततः ।
वशीकारं तथोच्चाटं शान्तिकं पौष्टिकं तथा ॥ ४८ ॥

---

* मुद्रा त्रिसरदाख्या, इत्यर्थः । १ 'कोटीचन्द्रगलत्सुधाद्रुत' ङ पाठ ।
२ 'प्राप्नोति' ङ पाठ ।

एतेषां साधनं वक्ष्ये सर्वसौख्यैककारणम् ।
येन साधनमात्रेण सर्वसिद्धिर्भवेत् कलौ ॥ ४९ ॥
(१) रवौ स्नानं शिवे कृत्वा नित्यकर्म समाप्य च ।
संकल्पपूर्वं मन्त्रं च जपेदयुतसंख्यया ॥ ५० ॥
होमो दशांशतः सर्पिर्यवाकनकबीजकैः ।
स्तम्भनं जायते वादिमुखदस्युविवस्वताम् ॥ ५१ ॥
(२) चन्द्रे संपूज्य देवेशं जपेदयुतसंख्यया ।
होमो घृतपलाशाजशाकपत्रैर्दशांशतः ॥ ५२ ॥
तद्वत्सतिलकेनैव मोहनं जगतां भवेत् ।
(३) मङ्गले साधकः स्नात्वा गत्वा श्मशानमण्डलम् ॥ ५३ ॥
अयुतं प्रजपेन्मन्त्रं होमो घृतविशालया ।
श्रीपर्णीमधुकोन्मिश्रैः श्रीफलैर्श्विनीफलैः ॥ ५४ ॥
मृत्युं याति रिपुर्देवि दशाहाद्वाधि मत्समः ।
(४) बुधे स्नात्वार्चयेद् देवं श्रीचक्राग्रे जपेन्मनुम् ॥ ५५ ॥
अयुतं तद्दशांशेन हुनेत् सर्पिः शतावरीम् ।
त्रिकण्टकं विल्वकं च स्त्रीणामाकर्षणं भवेत् ॥ ५६ ॥
(५) गुरौ स्नात्वा जपेद्विद्यां परामयुतसंख्यया ।
होमो दशांशतः कार्यो घृतपद्माब्जचन्दनैः ॥ ५७ ॥
आरग्वधेन कणया वरयामृतया शिवे ।
रिपू राजा धनी वीरो जिष्णुर्दासत्वमेष्यति ॥ ५८ ॥
(६) शुक्रे श्मशाने वीरेशो जपेदयुतसंख्यया ।
चिताग्रे मूलविद्यां तु तद्दशांशं हुनेद् घृतम् ॥ ५९ ॥
समण्डूकं शम्भूकं च रिपुमुच्चाटयेद् ध्रुवम् ।
(७) शनौ स्नात्वा चरेत् पूजां जपेद्विद्यां तथायुतम् ॥ ६० ॥
हुनेदाज्यपयोमृत्स्ना-वार्ताकमृदुशाद्वलान् ।

धत्तूरपुष्पसहितान् सर्वशान्तिः प्रजायते ॥ ६१ ॥
(८) सर्वदा सर्ववारेषु जपेदयुतसंख्यया ।
होमो दशांशतः कार्यो घृतपायसपङ्कजैः ॥ ६२ ॥
छागैणकूर्मवाराहपलपुङ्कैः समक्तकैः ।
पितृणा देवताना च भूभृतां रोगिणां तथा ॥ ६३ ॥
दशांशं विधिवद् दत्त्वा महापुष्टिः प्रजायते ।
इतीदं परमं तत्त्वं मन्त्रस्यास्य मयेरितम् ।
अदातव्यमभक्तेभ्यो गोपनीयं स्वयोनिवत् ॥ ६४ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये मृत्युञ्जयपटलनिरूपण एकचत्वारिंश. पटल ॥ ४१ ॥

अथ

द्वाचत्वारिंशः पटलः ।

श्रीभैरव उवाच ।
अधुना देवि वक्ष्यामि पूजापद्धतिमुत्तमाम् ।
गद्यपद्यमयीं दिव्या कोटियज्ञफलप्रदाम् ॥ १ ॥
प्रातःकृत्यमकृत्वा तु यः शिवं भक्तितोऽर्चयेत् ।
तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥ २ ॥

१ ' भूताना क ख ग पाठ ।

ब्राह्मे मुहूर्ते उत्थाय बद्धपद्मासनः स्वशिरःस्थसहस्रारपद्मोपरिस्थसकमलकर्णिकान्तर्गतं निजगुरुं ध्यायेत् । "श्रीगुरुं परमानन्दं वन्दे स्वानन्दविग्रहम् । यस्य सन्निधिमात्रेण चिदानन्दायते वपुः ॥" इति नत्वा,

श्रीगुरुं द्विभुजं शान्तं वराभयकराम्बुजम् ।
पूर्णेन्दुवदनाम्भोजं हसन्तं शक्तिसंयुतम् ॥
श्वेतवस्त्रपरीधानं नानालङ्कारभूषितम् ।
आनन्दमुदितं देवं ध्यायेत् पङ्कजविष्टरम् ॥

पञ्चभूतमन्त्रेण सप्तधारमभिमन्त्र्य दक्षहस्ते धृत्वा, वामनासिकाङ्गुष्ठयोगेन तन्नलितोदकबिन्दुभिः स्वशिरो मूलमुच्चरन् दशधा प्रोक्ष्य पुनर्यामलं विधाय, इडयान्तर्नीत्वा देहान्तः पापं प्रक्षाल्य, पिङ्गलया तज्जलं सकलुषं दक्षहस्ते धृत्वा स्वयामभागस्थकल्पितवज्रशिलायामास्फालयेदित्यघमर्षणं विधाय, पूर्ववत् षडङ्गं कृत्वा, ॐजुंसः परमहंसाय विद्महे सोऽहंसः मृत्युञ्जयाय धीमहि जुंॐतन्नोऽमृतेश्वरः प्रचोदयात् । इति दशधा प्रजप्य मूलं च यथाशक्त्या जप्त्वा, गायत्र्या देवीदेवयोरर्घ्यत्रयं दद्यात् । ॐजुंसः साङ्गायामृतेश्वरीसहिताय मृत्युञ्जयाय एष ते अर्घो नमः । तथा पूर्ववत् सूर्यायार्घ्यत्रयं दत्त्वा, जले चतुरस्रं सत्र्यस्रं विभाव्य मूलमुच्चरन् सप्तधा सदेवीकं देवं तर्पयेत् । मृ० साङ्गः सवाहनः सायुधः सपरिच्छदः सदेवीको मृत्युञ्जयो भगवांस्तृप्यतामिति सन्तर्प्य, परिवारानेकैकाञ्जलिना सन्तर्प्य, ब्रह्मादिकीटपर्यन्तं सन्तर्प्य, पित्रादितर्पणं विधाय, पूर्ववद् देवं संहारमुद्रया स्वहृदि समानीय शिवोऽहमिति भावयन् यागमण्डपमागच्छेदिति संध्याविधिः ॥

ततो गृहमागत्य पादौ प्रक्षाल्य, द्वारदेवताः पूजयेत् । हूंफडिति द्वारं प्रक्षाल्य, ऊर्ध्वे गां गणेशाय नमः, वामदक्षिणक्रमेण महालक्ष्म्यै नमः, सरस्वत्यै नमः, गङ्गायै नमः, यमुनायै नमः, धात्रे नमः, विधात्रे नमः, नन्दाय नमः सुनन्दाय नमः, प्रचण्डाय नमः, चण्डाय नमः, क्षेत्रपालाय नमः, वेतालाय नमः, अग्निवेतालाय नमः, इति संपूज्य, तत्रासने मन्त्रेण पुष्पं दत्त्वा अनन्तासनाय नमः, विमलासनाय नमः, पद्मासनाय नमः । ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां लोके पवित्रं कुरु चासनम् ॥ त्रिर्वामपार्ष्णिघातं दत्त्वा, अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ इति विघ्नानुत्सार्य, हूं अघोराय फट् इति दश दिशो बद्ध्वा भूतशुद्धिं कुर्यात् ।

अथाहं भूतशुद्धिं करिष्ये इति सङ्कल्प्य, वामे गुरुभ्यो नमः, दक्षिणे गणेशाय नमः, अग्रे शिवाय नमः, पृष्ठे क्षेत्रपालाय नमः, इति नमस्कृत्य, प्रणवेन प्राणायामत्रयं कृत्वा हूमिति मूलाधारात्

---

१ 'सप्तदशधा' ङ. पाठः । २ 'निधाय' ङ. पाठः ३ 'सप्तदशधा' ङ. पाठः ।

४ 'तत आसनमन्त्रेण' ङ. पाठः ।

कुण्डलिनीमुत्थाप्य सुषुम्नावर्त्मना हृत्पद्मजीवमादाय ब्रह्मरन्ध्रगतां विभाव्य हंस इति ब्रह्मणि योजयेत् ।, ततः पादादिजानुपर्यन्तं पृथिवीं जान्वादिनाभ्यन्तं जलं, नाभ्यादिहृदयान्तं वह्निं, हृदयादिभ्रूमध्यान्तं वायुं, भ्रूमध्यादिब्रह्मरन्ध्रान्तमाकाशं प्रत्येकं प्रविलाप्य, आकाशमहङ्कारेऽहङ्कारं महत्तत्त्वे तदहंप्रकृतौ तां सच्चिदानन्दरूपे ब्रह्मणि विलाप्य, स्वात्मानं ब्रह्ममयं विभाव्य ।

अहं देवो नचान्योऽस्ति ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥

एवं विभाव्य, स्वशरीरदक्षकुक्षौ पापपुरुषं ध्यायेत् ।

ब्रह्महत्याशिरस्कं च सुवर्णस्तेयभुजद्वयम् ।
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ॥
तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ।
उपपातकलोमानं रक्तश्मश्रुविलोचनम् ॥
खड्गचर्मधरं कृष्णं कुक्षौ पापं विचिन्तयेत् ।

इति ध्यात्वा, शरीरं सकलुषं मलिनं विचिन्त्य प्राणायामपूर्वकं पञ्चभूतमन्त्रैर्निष्पापं कुर्यात् । हृदादिभ्रूमध्यात् पंबीजेन षोडशधा जप्तेन वायुमापूर्य पापं संशोष्य, नाभ्यादिकण्ठपर्यन्तान्तर्गतमग्निमग्निबीजेन चतुष्पिष्टवारजप्तेन सन्दीप्य पापं निर्दह्य, जान्वादिनाभ्यन्तं जलं वमिति वरुणबीजेन द्वात्रिंशद्वारजप्तेनादाय पापमम्भसाप्लाव्य, लमिति भूबीजेन षोडशधा जप्तेन पादादिजानुपर्यन्तं पृथिवीं विचिन्त्य पिण्डीभूतं स्वात्मकं ध्यात्वा, हमित्याकाशबीजेन सकृज्जप्तेन चैतन्यं संभाव्य चिदानन्दमयं स्वशरीरमुत्थाप्य प्राणान् धारयेदिति भूतशुद्धिः ॥

ॐजुंसः शिवाय प्राणात्मने 'नमः, इति स्वहृदि पुष्पं दत्त्वा आह्रीक्रोंयरंवलंहशंषसह हंसः सोहं जुंसः ॐ मम प्राणा इह प्राणाः, १ँ मम जीव इह स्थित., १ँ मम सर्वेन्द्रियाणि, १ँ मम वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा, इति प्राणान् धृत्वा, मूलं स्वहृदि विलिख्य सशिवं शिवं संपूज्य, शिवोऽहमिति विचिन्त्य मन्त्रसङ्कल्पं कुर्यात् । अस्य श्रीमहामृत्युञ्ज-

यपूजामन्त्रस्य महाचमसकहोल ऋषिः, देवीगायत्री छन्दः, श्रीमृत्युञ्जयरुद्रो महादेवो देवता, ॐ बीजं, जुं शक्तिः, सः कीलकम्, धर्मार्थकाममोक्षार्थे पूजायां विनियोगः । अथ न्यासः । महाचमसकहोलऋषये नमः शिरसि, देवीगायत्रीच्छन्दसे नमो मुखे, श्रीमृत्युञ्जयरुद्रमहादेवदेवतायै नमो हृदि, ॐ बीजाय नमो नाभौ, जुं शक्तये नमो गुह्ये, सः कीलकाय नमः पादयोः, जपे (पूजायां) विनियोगाय नमः सर्वाङ्गेषु ॥ अथ करन्यासः । ॐ अङ्गुष्ठाभ्यां नमः, जुं तर्जनीभ्यां नमः, सः मध्यमाभ्यां नमः, ॐ अनामिकाभ्यां नमः, जुं कनिष्ठिकाभ्यां नमः, सः करतलकरपृष्ठाभ्यां नमः, इति करन्यासः ॥ अथ षडङ्गन्यासः । ॐ हृदयाय नमः, जुं शिरसे स्वाहा, सः शिखायै वषट्, ॐ कवचाय हुं, जुं नेत्रेभ्यो वौषट्, सः अस्त्राय फट् ॥

अथ मातृकान्यासः । अं नमः शिरसि । आं नमो मुखवृत्ते । इं नमो दक्षनेत्रे । ईं वामनेत्रे । उं दक्षकर्णे । ऊं वामकर्णे । ऋं दक्षनासापुटे । ॠं वामनासापुटे । ऌं दक्षगण्डे । ॡं वामगण्डे । एं ऊर्ध्वोष्ठे । ऐं अधरोष्ठे । ओं ऊर्ध्वदन्तपङ्क्तौ । औं अधोदन्तपङ्क्तौ । अं ललाटे । अः जिह्वायां । कं दक्षबाहुमूले । खं कुर्परे । गं मणिबन्धे घ अङ्गुलिमूले । ङं अङ्गुल्यग्रे । चं वामबाहुमूले । छं कुर्परे । जं मणिबन्धे । झं अङ्गुलिमूले । ञं 'अङ्गुल्यग्रे । टं दक्षपादमूले । ठं जानुनि । डं गुल्फे । ढं अङ्गुलिमूले । णं अङ्गुल्यग्रे । तं वामपादमूले । थं जानुनि । दं गुल्फे । धं अङ्गुलिमूले । नं अङ्गुल्यग्रे । पं दक्षपार्श्वे । फं वामपार्श्वे । बं पृष्ठे । भं नाभौ । मं जठरे । यं हृदि । रं दक्षांसे । लं ककुदि । वं वामांसे । शं हृदादिदक्षहस्ताग्रान्तं । षं हृदादिवामहस्ताग्रान्तं । सं हृदादिदक्षपादाग्रान्तं । हं हृदादिवामपादाग्रान्तं । ळं पादादिशिरःपर्यन्तं । क्षं नमः शिरसः पादपर्यन्तम् । इति त्रिर्व्यापयेदिति मातृकान्यासः ॥

ॐ ह्सौः श्रं श्रीकण्ठपूर्णोदरीभ्यां नमः शिरसि । ॐ ह्सौः आं अनन्तेशविरजाभ्यां नमो मुखवृत्ते । ॐ ह्सौः इं सूक्ष्मेशशाल्मलीभ्यां नमो दक्षनेत्रे । ॐ ह्सौः ईं त्रिमूर्तीशलोलाक्षीभ्यां नमो वामनेत्रे ।

---

१ 'देवीगायत्री' ख. पाठः । २ 'अ शिरसि, यः मुखान्तः' ङ. पाठः ।

ॐह्सौः उं अमरेशवसुलाक्षीभ्यां नमो दक्षकर्णे । ॐह्सौः ऊ अर्घेशदीर्घघोणाभ्यां नमो वामकर्णे । ॐह्सौः ऋं भावभूतीशदीर्घमुखीभ्यां नमो दक्षनासापुटे । ॐह्सौः ॠं तिथीशगोमुखीभ्यां नमो वामनासापुटे । ॐह्सौः लृं स्थाणुकेशदीर्घजिह्वाभ्यां नमो दक्षगण्डे । ॐह्सौः ॡं हरेशकुण्डोदरीभ्यां नमो वामगण्डे । ॐह्सौः एं झिण्टीशोर्ध्वकेशीभ्यां नमः ऊर्ध्वोष्ठे । ॐह्सौः ऐं भौतिकेशविकृतमुखीभ्यां नमः अधरोष्ठे । ॐह्सौः ओं सद्योजातेशज्वालामुखीभ्यां नमः ऊर्ध्वदन्तपंक्तौ । ॐह्सौः औं अनुग्रहेशोल्कामुखीभ्यां नमः अधोदन्तपंक्तौ । ॐह्सौः अं अक्रूरेशधीमुखीभ्यां नमो ललाटे । ॐह्सौः अः महासेनेशविद्यामुखीभ्यां नमो जिह्वायां । ॐह्सौः कं क्रोधीशमहाकालीभ्यां नमो दक्षबाहुमूले । ॐह्सौः खं चण्डीशसरस्वतीभ्यां नमः कूर्परे । ॐह्सौः गं पञ्चान्तकेशसर्वसिद्धिभ्यां नमो मणिबन्धे । ॐह्सौः घं शिवोत्तमेशत्रिलोकविद्याभ्यां नमः अङ्गुलिमूले । ॐह्सौः ङं एकरुद्रेशमन्त्रशक्तिभ्यां नमः अङ्गुल्यग्रे । ॐह्सौः चं कूर्मेशात्मशक्तिभ्यां नमो वामबाहुमूले । ॐह्सौः छं एकनेत्रेशभूतमातृभ्यां नमः कूर्परे । ॐह्सौः जं चतुराननेशलम्बोदरीभ्यां नमो मणिबन्धे । ॐह्सौः झं अजेशद्राविणीभ्यां नमः अङ्गुलिमूले । ञं सर्वेशनागरीभ्यां नमः अङ्गुल्यग्रे । टं सोमेशखेचरीभ्यां नमो दक्षपादमूले । ठं लाङ्गलीशमञ्जरीभ्यां नमो जानुनि । डं दारुकेशरूपिणीभ्यां नमो गुल्फे । ढं अर्धनारीशधीरिणीभ्यां नमः अङ्गुलिमूले । णं उमाकान्तेशकाकोदरीभ्यां नमः अङ्गुल्यग्रे । तं आषाढीशपूतनाभ्यां नमो वामपादमूले । थं दण्डीशभद्रकालीभ्यां नमो जानुनि । दं अद्रीशयोगिनीभ्यां नमो गुल्फे । धं मीनेशशङ्खिनीभ्यां नमः अङ्गुलिमूले । नं मेषेशगर्जिनीभ्यां नमः अङ्गुल्यग्रे । पं लोहितेशकालरात्रिभ्यां नमो दक्षपार्श्वे । फं शिखीशकुर्दिनीभ्यां नमो वामपार्श्वे । बं छगलाण्डेशकपर्दिनीभ्यां नमः पृष्ठे । (भं मं द्विरण्डेशवज्रिणीभ्यां नमो

---

१ 'शिखि' क, ख, ग, पाठः । २ 'मुखान्तो' क, ख पाठ । ३ 'पञ्चान्तक' ङ पाठ ।
४ 'त्रिमूर्ति' ङ पाठः । ५ 'दारुकेश' ङ, पाठ । ६ 'पूर्तिनी' ङ पाठ ।

नाभौ । २ँ मं महाकालेशजयाभ्यां नमो जठरे । २ँ यं त्वगात्मभ्यां कपालीशसुमुखीभ्यां नमो हृदये) । २ँ रं असृगात्मभ्यां भुजङ्गेश-रेवतीभ्यां नमो दक्षांसे । २ँ लं मांसात्मभ्यां पिनाकीशमाधवीभ्यां नमः ककुदि । २ँ वं मेदआत्मभ्यां खड्गीशवारुणीभ्यां नमो वामांसे । २ँ शं अस्थ्यात्मभ्यां वकेशयायवीभ्यां नमो हृदादिदक्षहस्ताग्रान्तं । २ँ षं मज्जात्मभ्यां श्वेतेशरक्षोयन्धिनीभ्यां नमो हृदादियामहस्ताग्रान्तं । २ँ सं शुक्रात्मभ्यां भृग्वीशसहजाभ्यां नमो हृदादिदक्षपादाग्रान्तं । २ँ हं प्राणात्मभ्यां नकुलीशलदमीभ्यां नमो हृदादियामपादाग्रान्तं । २ँ ळं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां नमः पादादिशिरःपर्यन्तं । २ँ क्षः क्रोधात्मभ्यां संवर्तेशमहामायाभ्यां नमः शिरसः पादपर्यन्तमिति श्रीकण्ठादिमातृकान्यासः ॥

अथ कलान्यासः । ॐ पँ द्रीं हृत्सौः सर्वज्ञाय अङ्गुष्ठाभ्यां नमः । ४ँ अमृतज्वालामालिने तर्जनीभ्यां नमः । ४ँ ज्वलितशिखिशिखाय मध्यमाभ्यां नमः । ४ँ वज्रिणे वज्रहस्ताय अनामिकाभ्यां नमः । ४ँ अलुप्तशक्तये कनिष्ठिकाभ्यां नमः । ४ँ पशुपतये करतलपृष्ठाभ्यां नमः । इति करन्यासः ॥

ॐ पँ द्रीं हृत्सौः सर्वज्ञाय हृदयाय नमः । ४ँ अमृतज्वालामालिने शिरसे स्वाहा । ४ँ ज्वलितशिखिशिखाय शिखायै वषट् । ४ँ वज्रिणे वज्रहस्ताय कवचाय हुं । ४ँ अलुप्तशक्तये नेत्राभ्यां वौषट् । ४ँ पशुपतये अस्त्राय फट् । इति हृदयादिन्यासः ॥

ॐ जुंसः निवृत्त्यात्मने शिवाय अङ्गुष्ठाभ्यां नमः । ३ँ प्रतिष्ठा-त्मने सदाशिवाय तर्जनीभ्यां नमः । ३ँ विद्याकलात्मने ईश्वराय मध्य-माभ्यां नमः । ३ँ शान्तिकलात्मने महारुद्राय अनामिकाभ्यां नमः । ३ँ शान्त्यतीताकलात्मने विष्णवे कनिष्ठिकाभ्यां नमः । ३ँ ज्योतिष्क-लात्मने परब्रह्मणे करतलकरपृष्ठाभ्यां नमः । इति करन्यासः ॥

ॐ जुंसः निवृत्त्यात्मने शिवाय हृदयाय नमः । ३ँ प्रतिष्ठात्मने

सदाशिवाय शिरसे स्वाहा । ॐ विद्याकलात्मने ईश्वराय शिखायै वषट् । ॐ शान्तिकलात्मने महारुद्राय कवचाय हुं । ॐ शान्त्यतीताकलात्मने विष्णवे नेत्राभ्यां वौषट् । ॐ ज्योतिष्कलात्मने परब्रह्मणे अस्त्राय फट् । इति कलान्यासः ॥

ॐजुंसः नेत्रनाथाय अङ्गुष्ठाभ्यां नमः । हंसः भगवन्नेत्राय तर्जनीभ्यां नमः । मां पालयपालय सोमसूर्याग्निनेत्राय मध्यमाभ्यां नमः । सोहंसः नेत्रनाथाय अनामिकाभ्यां नमः । जुंॐ भगवन्नेत्राय कनिष्ठिकाभ्यां नमः । ॐजुंसः हंस. मां पालयपालय सोहंसः जुंॐ सोमसूर्याग्निनेत्राय करतलपृष्ठाभ्यां नमः । एवं षडङ्गन्यासः । इति नेत्रन्यासः ॥

ॐ नमः शिरसि । जु भ्रूमध्ये । सः मुखे । हं कण्ठे । सः हृदि । मां हस्तयोः । पां स्तनयोः । लं कुक्षौ । यं पार्श्वयोः । पां पृष्ठे । ल नाभौ । य मेढ्रे । सॉ जान्वोः । हं जङ्घयोः । स. पादयोः । जु पादादिशिर.पर्यन्तं । ॐ शिरसः पादपर्यन्तमिति त्रिव्यापयेदिति मूलमन्त्रन्यासः ॥

ईशानतत्पुरुषयोरघोरकलितात्मनोः ।
सद्योजातेशवामेश-धृतयोर्न्यासमाचरेत् ॥

इति शिवशासनम् ॥ ॐ मूलाधारे । जु भ्रूमध्ये । सः करन्ध्रे । इमं न्यासं यथाशक्त्या विधाय दिव्यदेहं ध्यात्वा, हृदये ॐजुंसः अमृतेश्वरपीठाय नमः । हृदि गन्धाक्षतपुष्पैः संपूज्य. "ॐजुंसः हंसः धीकालाग्निरुद्रमूलप्रकृतिकूर्मानन्तवराहपृथिवीसुधार्णवरत्नद्वीपरत्नमण्डपरत्नसिंहासनस्थाग्निमण्डलार्कमण्डलामृतमरीचिमण्डलान्तर्गतसहस्रदलकमलकर्णिकाकेसरकणामृतधारामयाय योगपीठाय नमः" । इति स्वहृदये संपूज्य, अमृतीकरणमुद्रां बद्ध्वा पद्ममुद्रान्तर्गतं पुष्पं सन्निधाय, मूलाधारात् कुण्डलिनीं तडित्कोटिप्रद्योतनीं सूर्यकोटिप्रकाशां वह्निकोटिदुराधर्षां चन्द्रकोटिसुशीतलां प्रदीपकलिकाकारामुत्थाप्य सुषुम्नामार्गेण ब्रह्मपथान्तरस्थामृतेश्वरेण सह संयोज्य, सोममण्डलप्रच्युतामृतधारया संतर्प्य, पुनः स्वहृदि समानीय स्वस्थानं प्रापयित्वामृतशरीरीभूय शिवोऽहमिति भावयन् देवं भावयेत् ।

पीयूषांशुशिरोमणिः करतले पीयूषकुम्भं वहन्
पीयूषद्युतिसम्प्लुतान्तरगतः पीयूषधाराधरः ।
भां पीयूषमयूखसुन्दरवपुः पीयूषलक्ष्मीसखः
पीयूषद्रववर्षणोऽप्यहरहः प्रीणातु मृत्युञ्जयः ॥

एवं देवं ध्यात्वा मानसैरुपचारैः संपूज्य कलशस्थापनं कुर्यात् । स्वयामे त्रिकोणषट्कोणवृत्तचतुरश्रं विलिख्य शङ्खमुद्रां प्रदर्श्य मूलेन संपूज्य, "रं वह्निमण्डलाय दशकलात्मने नमः" इति संपूज्याधारं संस्थाप्य, तत्र पात्रमाधारे निधाय "अं अर्कमण्डलाय द्वादशकलात्मने नमः" इति पात्रान्तः संपूज्य, तत्र जलेन संपूर्य "सौः सोममण्डलाय षोडशकलात्मने नमः" इति संपूज्य तत्राङ्कुशमुद्रया "ॐगां गीं गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धुकावेरि जलेऽस्मिन् संनिधिं कुरु" ॥ इत्यादिना तीर्थमावाह्य मूलेनाष्टाभिमन्त्रितं कृत्वा धेनुयोनिकलशमुद्राः प्रदर्श्य फडिति क्षोटिकाभिः संरक्ष्य, हूमित्यवगुण्ठ्य शङ्खचक्रयोनिमुद्राः प्रदर्श्य प्रणमेत् । "दर्शनेनापि शङ्खस्य किं पुनः स्पर्शनेन च । विलयं यान्ति पापानि हिमवद्भास्करोदये ॥" इति सामान्यार्घ्यविधिः ॥

सामान्यार्घ्यस्य दक्षे विन्दुत्रिकोणषट्कोणवृत्तचतुरश्रं मण्डलं निर्माय "कामरूपोड्डीयानजालन्धरपूर्णगिरिपीठेभ्यो नमः" इति चतुरश्रेषु सम्पूज्य, षडश्रेषु षडङ्गमन्त्रान् संपूज्य, त्रिकोणे बीजत्रयं संपूज्य, विन्दौ मूलेन संपूज्य, "ॐरं अग्निमण्डलाय दशकलात्मने नमः" इति प्रक्षालितमाधारं संस्थाप्य, "अं अर्कमण्डलाय द्वादशकलात्मने नमः" इति कलशं कुम्भमुद्रया संस्थाप्य तत्र "ॐव्वांव्वीं व्वूंव्वैंव्वौंव्वः सः अमृतेश्वरभैरवाय मृत्युञ्जयाय नमः" इति मूलेन वा मूलविद्यया तत्त्वमुद्रया धारापातेन परमानन्दद्रव्यादिना कुम्भमापूर्य "ॐसौः सोममण्डलाय षोडशकलात्मने नमः" इति गन्धाद्यैः पुष्पैरभ्यर्च्य, हंसः इति मन्त्रेण दश दिशो बद्ध्वा क्षोटिकाभिः संरक्ष्य हूमित्यवगुण्ठ्य, नमः इत्यभ्युक्ष्य, मूलं दशधा जप्त्वामृतमुद्रां प्रदर्श्य, "ॐअंआंईंउंॐजुंसः अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २ ॐजुंसः अमृतेश्वर्यै नमः" इति दशधा जप्त्वा, ॐजुंसः

सूर्यमण्डलसंभूते वरुणालयसंभवे । अमाबीजमयि देवि शुक्रशापाद्विमुच्यताम् । ॐजुंसः "वेदानां[1] प्रणवो बीजं ब्रह्मानन्दमयं यदि । तेन सत्येन देवेशि ब्रह्महत्यां व्यपोहतु ।" ॐजुंसः "एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् । कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ।" ॐजुंसः "ब्रह्मशापाद्विनिर्मुक्ता त्वं मुक्ता विष्णुशापतः । विमुक्ता रुद्रशापेन पवित्रा भव सांप्रतम् ॥ ३ पवमानः परानन्दः पवमानः परो रसः । पवमानं परं ज्ञानं तेन त्वां पावयाम्यहम् ॥" इति त्रिर्जप्त्वा, ॐ ह्सक्षमलवरयूँ आनन्देश्वरभैरवाय वौषट् इति दशधा जप्त्वा, सह्क्षमलवरयूँ सुरानन्दाय वौषट् इति दशधा जप्त्वा, मूल त्रिर्जप्त्वा, "ॐ गङ्गे च यमुने चैव" इत्यादिना अङ्कुशमुद्रया तीर्थान्यावाह्य, कुण्डलिनीं ज्योतीरूपामुत्थाप्य षट्चक्रं भित्त्वा, ब्रह्मरन्ध्रस्थपरमशिवभट्टारकेण नियोज्य, "हंसः सोहं स्वाहा" इति विचिन्त्य, तयोः सामरस्योद्भवानन्दामृतवर्धमाननासापुटनिःसृतामृतधारया कलशमापूर्यामृतमयं ध्यात्वा गन्धाक्षतपुष्पैरभ्यर्च्य, धेनुयोनिमत्स्यमुद्राः प्रदर्श्य प्रणवेनेति द्रव्यशुद्धिः ॥

ततः "ॐ जुंसः ह्सः परमामृतेशधीश्रमृतेश्वरीश्वरमहामृत्युञ्जयपूजाद्रव्येभ्यो वौषट्" इति कलशादमृतमादाय, ॐ जुंसः हंसः सोहंसः जुंसो" इति दशाक्षरमूलेन "श्रीश्रमृतेश्वरीश्वरमहामृत्युञ्जयचन्द्रामृतमयेन कलशामृतेन यागद्रव्याणि पवित्रीकुरु २ सुधादिना पूरय २ ॐ द्रीं स्वाहा" इति यागवस्तूनि संशोध्य, सामान्यार्घ्यस्थाधस्त्रिकोणं सह्रं विभाव्य, मूलबीजत्रयेण त्रिकोणं संपूज्य मूलविद्यया बिन्दुमभ्यर्च्य, तत्राग्निसूर्यसोममण्डलानि संपूज्य, दिव्यं पात्रं संस्थाप्य कलशामृतेनापूर्य मूलविद्यया संपूज्य, पृथिव्यादिपदार्थांश्चतुरस्रानि संपूज्य, महामुद्रां प्रदर्श्य अग्निप्रकाशामृतमुद्राः प्रदर्श्य मातृकां देवीं संपूज्य, मूलवर्णांस्तत्रान्तः संपूज्य, गङ्गादितीर्थान्यावाह्य, ईशानकलाः संपूज्य तत्पुरुषाघोरसद्योजातवामदेवकलाः संपूज्य, शिवमयं ध्यात्वा परमामृतयुक्त्या बिन्दुपात्राग्निवह्नीपं प्रोक्ष्यावाह्य शिवमय जगद्भावयेदिति परमार्घ्यपात्रम् ॥

सामान्यार्घ्यस्य वामे गुरुशक्तियोगिनीवीरवटुकक्षेत्रपालपात्राणि संस्थाप्य, तयोत्तरे पाद्याचमनीयमधुपर्काचमनीयार्घ्यपात्राणि स्थाप-

---

१ 'वेदाना' ग. पाठः । २ 'सह मयोज्य' क. ज. पाठः ।

येदिति पात्रसंस्थापनम् ॥

पाद्यादिपात्रेषु पानीयं, गुरुपात्रादिषु दिव्यामृतं तत्रात्मानं मूलविद्यया संपूज्य, स्वाधारात् कुण्डलिनीमुत्थाप्य परमशिवेन संयोज्य चन्द्रमण्डलस्थमहामृत्युञ्जयललाटावतंसचन्द्रकलास्रुतामृतधारया स्वात्मानं संप्लाव्य, शिवोऽहमिति स्मृत्वा, विद्यानन्दमयो भूत्वा, विश्वं श्वेतमिव ध्यात्वा सवेषीकं शिवं हृत्कमले ध्यात्वा, यथोक्तं स्मृत्वा मानसैरुपचारैः संपूज्य, स्वात्मानं तन्मयं भावयित्वा, श्रीचक्रं पुरोक्तं चतुरश्रोद्भासितारणत्रयविराजित-वसुदलखचित-षडस्रमण्डित-त्रिकोणोल्लसित-बिन्दुमण्डलं श्रीयन्त्रराजं विलिख्य वा प्रक्षाल्य, श्रीरत्नपीठे संस्थाप्य योगपीठपूजां कुर्यात् ।

ॐ जुंसः हंसः सोहंसः जु ॐ अंआंइंईं उंऊंऋंॠं ऌंॡंएंऐं ओंऔंअंअः कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तथंदंधंनं पंफंबंभंमं यंरंलंवं शंषंसंहंळंक्षः ॐ शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्यहङ्कारबुद्धिमनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलपृथिव्यात्मने श्रीयोगपीठाय नमः, इति श्रीचक्रे संपूज्य, वसुपत्रेषु—वामायै नमः । ज्येष्ठायै० । रौद्र्यै० । काल्यै० । कलविकरण्यै० । बलविकरण्यै० । बलप्रमथन्यै० । सर्वभूतदमन्यै नमः । इत्यभ्यर्च्य, ॐ जुंसः नमो भगवते सकलगुणात्मशक्तियुक्ताय परानन्ताय योगपीठात्मने नमः, इति योगपीठं संपूज्य, अमृतीकरणमुद्रां बद्ध्वा मूलमन्त्रेण सङ्कल्यावाहयेत् । मूलेन सुषुम्नया हृत्कमलस्थं ज्योतिर्वामनासया निःसार्य करस्थपुष्पेषु स्थितं ध्यात्वा देवमावाहयेत् ।

"स्वात्मसंस्थमजं शुद्धं त्वामहं परमेश्वर ।
आरण्यमिव हव्याशं बिन्दावावाहयाम्यहम् ॥
देवेश भक्तिसुलभ परिवारसमन्वित ।
यावत् त्वां तर्पयिष्यामि[1] तावत् शिव इहावह ॥"

इति । मूलमुच्चार्य यन्त्रेषु पुष्पाणि दत्त्वावाह्य संस्थाप्य संनिरुध्य मूलेन दश मुद्राः प्रदर्श्य, ॐ जुंसः आंह्रींक्रों यरंलवं शंषंसह ॐ जुंसः

---

१ 'पूजयिष्यामि क. ख. ग पाठ. ।

हंसः अमृतेश्वरीसहितस्य मृत्युञ्जयदेवस्य प्राणाः इह प्राणाः, १ॐ जीव इह स्थितः, १ॐ सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा, इति देवीदेवयोः प्राणान् दत्त्वा, पञ्च मुद्राः प्रदर्श्य धेनुमुद्रयामृतीकृत्य महामुद्रया परमीकृत्य, षडङ्गैः सकलीकृत्य शङ्खचक्रत्रिशूलपाशकलशमालामुद्राः प्रदर्श्य, भगवन् अमृतेश्वरीसहित मृत्युञ्जय इदमासनं गृह्यतां । पुनः भगवन् स्वागतमित्युदीर्य नमस्कृत्य मुद्रया प्रणम्य । मू० भगवन् सदेवीक पाद्यं नमः । मू० भगवन् सदेवीकाचमनीयं स्वधा । मू० भगवन् सदेवीक मधुपर्कः स्वधा । मू० भगवन् सदेवीक इदमाचमनीयं नमः । मूलं भगवन् सदेवीक इदमर्घ्यं स्वाहा । मूल भगवन् सदेवीक एष गन्धो नमः । मू० भगवन् सदेवीकाक्षतपूर्वमेतानि पुष्पाणि वौषट् । श्यामाकदूर्वाकसर्षिवाक्रान्ताभिमन्त्रितं गङ्गोदकं समादाय मूलमन्त्रेण मन्त्रयेत् । मू० भगवन् सदेवीक सर्वाङ्गे गङ्गोदकस्नानीयं नमः । मूल भगवन् सदेवीक महाश्वेतमहार्घ्यवस्त्रयुग्मं नमः । मू० भगवन् सदेवीक मुक्ताभरणानि निवेदयामि नमः । मू० भगवन् सदेवीक रत्नसिंहासने उपविश्यताम् । मू० भगवन् सदेवीक गन्धाक्षतपुष्पाणि गृहाण वौषट् । मू० भगवन् सदेवीक धूपं गृहाण नमः । मू० भगवन् सदेवीक दीपं निवेदयामि नमः । धूपदीपौ दत्त्वा परमीकरणमुद्रां प्रदर्श्य त्रिकोणवृत्तमण्डलं विभाव्य साधारं पात्रं संस्थाप्य, दिव्यौदनं षड्रसोपेतं नानाव्यञ्जनान्वितं धेनुमुद्रयामृतीकृत्य, " ॐ अमृतोपस्तरणमसि स्वाहा " इति निवेद्य, मूलं दशधा जप्त्वा प्राणादिपञ्चग्रासमुद्राः प्रदर्श्य " ॐ अमृतापिधानमसि स्वाहा " इति भगवते शिवाय जलं दत्त्वा, मूलेन ताम्बूलं निवेद्य, दिव्यपात्रामृतेन दशधा सन्तर्प्य प्रणम्य, परिवारदेवता देवाज्ञात् निस्सृता ध्यात्वा यथोपचितस्थानेषु संस्थाप्य ध्यात्वा प्रणामपूर्वकं प्राणायामत्रयं विधाय यथाचक्रे परिवारदेवताः पूजयेत् ।

ॐ ज्रुंसः कामेश्वरश्रीपादुकां पूजयामि नमः तर्पयामि नमः, इति वीरपात्रामृतेनेशानाग्नेयाग्नेषु पूजयेत् । ॐ ज्रुंस. महाकालश्रीपादुकां पूजयामि नमस्तर्पयामि नमः । ॐ ज्रुंसः स्वच्छन्दश्री० । इति संपूज्य, मूलेन मूलदेवं संपूज्य सन्तर्प्य, इत्यग्रे प्रथमावरणम् ॥ ॐ ज्रुंस. कालाग्निरुद्रश्री० । ॐ नेत्रेशश्री० । ॐ विघ्ननाथश्री० । ॐ महेश्वरश्री० । ॐ सद्योजा-

तथी० । ३ वामदेवश्री० । इति संपूज्य, मूलेन मूलदेवं सन्तर्प्य पट्कोणेषु द्वितीयावरणम् ॥ ॐ जुंसः असिताङ्गभैरवश्री० । ३ रुरु-भैरवश्री० । ३ चण्डभैरवश्री० । ३ क्रोधराजभैरवश्री० । ३ उन्मत्त-भैरवश्री० । ३ कपालीशभैरवश्री० । ३ भीषणभैरवश्री० । ३ संहार-भैरवश्री० । इति संपूज्य मूलेन मूलदेवं संतर्प्य स्ववामावर्तेनाष्टदले तृतीयावरणम् ॥ ॐ जुंसः ब्रह्माणीश्री० । ३ माहेश्वरीश्री० । ३ वैष्णवीश्री० । ३ वाराहीश्री० । ३ नारसिंहीश्री० । ३ इन्द्राणीश्री० । ३ चामुण्डाश्री० । ३ महालक्ष्मीश्री० । इति योगिनीपात्रामृतेन सन्तर्प्य, दिव्यामृतेन मूलदेवं सदेवीकं सन्तर्प्य स्ववामावर्तेन वसुदले चतुर्थावरणम् ॥ ॐ जुंसः स्वगुरुश्री० । ३ परमगुरुश्री० । ३ परापर-गुरुश्री० । ३ परमेष्ठिगुरुश्री० । इति गुरुपात्रामृतेन सन्तर्प्य दिव्या-मृतेन सदेवीकं देवं बिन्दौ सन्तर्प्य वृत्तत्रये पञ्चमावरणम् ॥ ॐ लं इन्द्रश्री० । ॐ रं अग्निश्री० । ॐ टं यमश्री० । ॐ क्षं निर्ऋतिश्री० । ॐ वं वरुणश्री० । ॐ यं वायुश्री० । ॐ सं सोमश्री० । ॐ हं ईशा-नश्री० । ॐ ह्रीं अनन्तश्री० । ॐ ब्रह्मश्री० । इति वीरपात्रामृतेन संतर्प्य बिन्दौ देवं सन्तर्प्य, चतुरस्रे षष्ठावरणम् ॥ ॐ वज्रश्री० । शक्तिश्री० । दण्डश्री० । खड्गश्री० । पाशश्री० । ध्वजश्री० । गदाश्री० । त्रिशूलश्री० । चक्रश्री० । पद्मश्री० । इति वीरपात्रामृतेन संपूज्य संतर्प्य, दिव्यामृतेन बिन्दौ देवं संतर्प्य सप्तमावरणम् ॥ मू० श्रीम-मृतेश्वरीशक्तिसहित-श्रीमृत्युञ्जयश्रीपादुकां पू० त० । मूलं श्रीअमृतेश्वरश्री-पादुकां० । मूलं ईशानश्रीपा० । मूलं भुवनेश्वरश्रीपा० । मूलं श्रीमद-मृतेश्वरीसहितदीक्षानायक-श्रीमहामृत्युञ्जयश्रीपा० । इति दशधा संपूज्य सन्तर्प्य अष्टमावरणम् ॥ मूलं त्रिखण्डाश्री० । मूलं पाशश्री० । मूलं सुधाकलशश्री० । मूलं मुक्ताक्षसूत्रश्री० । इति परामृतेन बिन्दौ सन्तर्प्य सशक्तिकं देवं बिन्दौ संपूज्य नवमावरणम् ॥ मूल मुष्टिमुद्रा-श्री० । मूलं सारङ्गमुद्राश्री० । मूल लिङ्गमुद्राश्री० । मूलं योनिमुद्रा-श्री० । मूल पञ्चमुखमुद्राश्री० । इति बिन्दौ परमामृतेन सन्तर्प्य, मूलविद्यामुच्चार्य श्रीमदमृतेश्वरीशक्तिसहित-श्रीमहामृत्युञ्जयश्रीपादुकां पू० । इति बिन्दौ त्रिः संपूज्य दशमावरणम् ॥

इति नत्वा पुनर्नैवेद्यं "ओंरत्नपात्रस्थितं दिव्यं नानाव्यञ्जनसंयुतम् । दिव्यौदनं निवेद्याशु परमामृतसंप्लुतम्" इति मृगमुद्रया निवेद्य प्रणम्य, मूलान्ते आचमनीयताम्बूलारात्रिकाच्छत्रचामरादर्शप्रभृतीनि दिव्यानि वस्तूनि सदेवीकाय देवाय निवेद्य साष्टाङ्गं प्रणमेत् । देवाग्रे मालामादाय मूलं यथाशक्ति जप्त्वा "गुह्यातीति" जपं निवेद्य, देवाग्रे कवचसहस्रनामस्तवराजपाठं कृत्वा तदपि देवीदेवयोः समर्प्य, ओंक्षांक्षींक्षूंक्षैंक्षौंक्षः क्षेत्रपालेभ्यो वौषट्, इति बलिं निवेद्य, ओंयांर्यीं. यूंर्यैंर्योंयः ह्सौंःसःजुंसौं सर्वयोगिनीभ्यो बलिर्नमः, ओंह्रीं सर्वविघ्नकृद्भ्यो भूतेभ्यो बलिर्वषट् स्वाहा, इति बलिं दत्त्वा प्रणाममुद्रां प्रदर्श्य दण्डवत् प्रणमेत् । ततो वीरेन्द्रैः सह वीरपानं विधाय पूर्णपात्रं हुत्वा स्वशक्तिमानन्दनिर्भरां निर्माय रतेन संतर्प्य शिवोऽहं भावयन् देवं सदेवीकं ज्योतीरूपं संहृतिमुद्रया श्रीचक्रादुत्थाप्य वामनासयान्तर्नीत्वा तत्तेजः परमचैतन्यज्योतिषि ब्रह्मणि निलीनं ध्यात्वा "अहमेव परो हंसः शिवः परमकारणम् । मत्प्राणे स तु पञ्चात्मा लीनः सामरसीगतः ॥" इति ध्यात्वा, परमशिवो भूत्वा स्वशक्त्या सह सुखं विहरेत् । बाह्ये वैष्णवाचारपरायणः कालं नयेत् । ततः श्रीचक्रमुत्थाप्य मूलेन प्रक्षाल्य निर्माल्यं 'ओं जुंस हूं ओंस्वाहा' इतीशानदिशि निर्माल्यं क्षिपेत् ।

इतीदं देवदेवस्य महामृत्युञ्जयस्य ते ।
नित्यपूजाविधिः सम्यङ्निर्णीता कुलसुन्दरि ॥
गुह्यातिगुह्यगोप्त्री त्वं, पद्धतिर्नित्यकर्मणः ।
वर्णिता नेत्रनाथस्य नाख्येया ब्रह्मवादिभिः ॥
सर्वतन्त्रैकसर्वस्वं रहस्यं पारलौकिकम् ।
पूजातत्त्वं मयाख्यातं गोपनीयं मुमुक्षुभिः ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये श्रीमहामृत्युञ्जयपूजापद्धतिनिरूपणं द्वाचत्वारिंशः पटलः ॥ ४२ ॥

—※·०·※—

अथ

त्रयश्चत्वारिंशः पटलः ।

—:-❀:०:❀-:—

श्रीभैरव उवाच ।

शृणुष्व परमेशानि कवचं मन्मुखोदितम् ।
महामृत्युञ्जयस्यास्य न देयं परमाद्भुतम् ॥ १ ॥
यं धृत्वा यं पठित्वा च श्रुत्वा च कवचोत्तमम् ।
त्रैलोक्याधिपतिर्भूत्वा सुखितोऽस्मि महेश्वरि ॥ २ ॥
तदेव वर्णयिष्यामि तव प्रीत्या वरानने ।
तथापि[1] परमं तत्त्वं न दातव्यं दुरात्मने ॥ ३ ॥

अस्य श्रीमहामृत्युञ्जयकवचस्य श्रीभैरव ऋषिः, गायत्र्यं छन्दः श्रीमहामृत्युञ्जयो महारुद्रो देवता, ॐ बीजं, जुं शक्तिः, सः कीलकं, हमिति तत्त्वं, चतुर्वर्गसाधने मृत्युञ्जयकवचपाठे विनियोगः । (ध्यानम्—)

चन्द्रमण्डलमध्यस्थं रुद्रं भाले विचिन्त्य तम् ।
तन्नस्थं चिन्तयेत् साध्यं मृत्युं प्राप्तोऽपि जीवति ॥ १ ॥
ॐजुंसः हौं शिरः पातु देवो मृत्युञ्जयो मम ।
ॐश्रीं शिवो ललाटं मे ॐह्रौं भ्रुवौ सदाशिवः । २ ॥
नीलकण्ठोऽवतान्नेत्रे कपर्दी मेऽवताच्छ्रुती ।
त्रिलोचनोऽवताद् गण्डौ नासां मे त्रिपुरान्तकः ॥ ३ ॥
मुखं पीयूषघटभृदोष्ठौ मे कृत्तिकाम्बरः ।
हनुं मे हाटकेशानो मुखं वटुकभैरवः ॥ ४ ॥
कन्धरां कालमथनो गलं गणप्रियोऽवतु ।

---

१ ' त्वयापि ' ब. पाठः ।

स्कन्धौ स्कन्दपिता पातु हस्तौ मे गिरिशोऽवतु ॥ ५ ॥
नखान् मे गिरिजानाथः पायादङ्गुलिसंयुतान् ।
स्तनौ तारापतिः पातु वक्षः पशुपतिर्मम ॥ ६ ॥
कुक्षिं कुबेरवरदः पार्श्वौ मे मारशासनः ।
शर्वः पातु तथा नाभिं शूली पृष्ठं ममावतु ॥ ७ ॥
शिश्नं मे शङ्करः पातु गुह्यं गुह्यकवल्लभः ।
कटिं कालान्तकः पायादूरू मेऽन्धकघातकः ॥ ८ ॥
जागरूकोऽवताज्जानू जङ्घे मे कालभैरवः ।
गुल्फौ पायाज्जटाधारी पादौ मृत्युञ्जयोऽवतु ॥ ९ ॥
पादादिमूर्धपर्यन्तमघोरः पातु मे सदा ।
शिरसः पादपर्यन्तं सद्योजातो ममावतु ॥ १० ॥
रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः ।
पूर्वे बलविकरणो दक्षिणे कालशासनः ॥ ११ ॥
पश्चिमे पार्वतीनाथो ह्युत्तरे मां मनोन्मनः ।
ऐशान्यामीश्वरः पायादाग्नेय्यामग्निलोचनः ॥ १२ ॥
नैर्ऋत्यां शम्भुरव्यान्मां वायव्यां वायुवाहनः ।
ऊर्ध्वे बलप्रमथनः पाताले परमेश्वरः ॥ १३ ॥
दशदिक्षु सदा पातु महामृत्युञ्जयश्च माम् ।
रणे राजकुले द्यूते विषमे प्राणसंशये ॥ १४ ॥
पायाद् ॐ जुं महारुद्रो देवदेवो दशाक्षरः ।
प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु ॥ १५ ॥
सायं बलप्रमथनो निशायां नित्यचेतनः
अर्धरात्रे महादेवो निशान्ते मां महेश्वरः ॥ १६ ॥
सर्वदा सर्वतः पातु ॐजुंसः हौं मृत्युञ्जयः ।

---

१ 'मम' ङ. पाठ. । २ 'मनोन्मनः' क पाठ ।

इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम् ॥ १७ ॥
सर्वमन्त्रमयं गुह्यं सर्वतन्त्रेषु गोपितम् ।
पुण्यं पुण्यप्रदं दिव्यं देवदेवाधिदैवतम् ॥ १८ ॥
य इदं च पठेन्मन्त्री कवचं वार्तयेत् ततः ।
तस्य हस्ते महादेवि त्र्यम्बकस्याष्ट सिद्धयः ॥ १९ ॥
रणे धृत्वा चरेद्युद्धं हत्वा शत्रूञ्जयं लभेत् ।
जयं कृत्वा गृहं देवि संप्राप्स्यति सुखी पुनः ॥ २० ॥
महाभये महारोगे महामारीभये तथा ।
दुर्भिक्षे शत्रुसंहारे पठेत् कवचमादरात् ॥ २१ ॥
सर्वं तत् प्रशमं याति मृत्युञ्जयप्रसादतः ।
धनं पुत्रान् सुखं लक्ष्मीमारोग्यं सर्वसंपदः ॥ २२ ॥
प्राप्नोति साधकः सद्यो देवि सत्यं न संशयः ।
इतीदं कवचं पुण्यं महामृत्युञ्जयस्य तु ।
गोप्यं सिद्धिप्रदं गुह्यं गोपनीयं स्वयोनिवत् ॥ २३ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये मृत्युञ्जयकवचनिरूपणं
त्रयश्चत्वारिंशः पटलः ॥ ४३ ॥

अथ

चतुश्चत्वारिंशः पटलः ।

—०-:ङ:-०—

श्रीभैरव उवाच ।

अधुना शृणु देवेशि सहस्रास्यस्तवोत्तमम् ।
महामृत्युञ्जयस्यास्य सारात् सारोत्तमोत्तमम् ॥ १ ॥

अस्य श्रीमहामृत्युञ्जयसहस्रनामस्तोत्रमन्त्रस्य, मैरव ऋषिः, उष्णिक् छन्दः, श्रीमहामृत्युञ्जयो देवता, ॐ बीजं, जुं शक्तिः, सः कीलकं, पुरुषार्थसिद्धये सहस्रनामपाठे विनियोगः । ध्यानम्

उद्यच्चन्द्रसमानदीप्तिममृतानन्दैकहेतुं शिवं
ओंजुंसःभुवनैकसृष्टिप्रलयोद्भूत्येकरक्षाकरम् ।
श्रीमच्चारदशार्णमण्डिततनुं त्र्यक्षं द्विबाहुं परं
श्रीमृत्युञ्जयमीड्यविक्रमगुणैः पूर्णं हृदन्जे भजे ॥

ओंजुंसःहौं महादेवो मन्त्रज्ञो मानदायकः ।
मानी मनोरमाङ्गश्च मनस्वी मानवर्धनः ॥ १ ॥
मायाकर्ता मल्लरूपो मल्लो मारान्तको मुनिः ।
महेश्वरो महामान्यो मत्री मन्त्रिजनप्रियः ॥ २ ॥
मारुतो मरुतां श्रेष्ठो मासिकः पक्षिकोऽमृतः ।
मातङ्गको मत्तचित्तो मत्तचित्तमभावनः ॥ ३ ॥
मानवेष्टप्रदो मेषो मेनकापतिवल्लभः ।
मानकायो मानस्तेयी[1] मारयुक्तो जितेन्द्रियः ॥ ४ ॥
जपो विजयदो जेता जयेशो जयवल्लभः ।

---

१ 'मनुस्तेयी' ख. 'मनुस्तेयी' ङ, च. पाठः ।

डामरेशो विरूपाक्षो विश्वभोक्ता विभावसुः ॥ ५ ॥
विश्वेशो विश्वनाथश्च विश्वसृग्विश्वनायकः ।
विनेता विनयी वादी वान्तदो वाग्भवो[1] वटुः ॥ ६ ॥
स्थूलः सूक्ष्मोऽचलो लोलो लोलजिह्वः करालकः ।
विराधेयो विरागीनो विलासी लास्यलालसः ॥ ७ ॥
लोलाक्षो लोलधीर्धर्मी धनदो धनदार्चितः ।
धनी ध्येयोऽप्यध्येयश्च धर्म्यो धर्ममयो दयः ॥ ८ ॥
दयावान् देवजनको देवसेव्यो[2] दयापतिः ।
डुलिचच्चुर्दरीवासो दम्भी देवमयात्मकः ॥ ९ ॥
कुरूपः कीर्तिदः कान्तः क्लीवोऽक्लीवात्मकः कुजः ।
बुधो विद्यामयः कामी कामकालान्धकान्तकः * ॥ १० ॥
जीवो जीवप्रदः शुक्रः शुद्धः शर्मप्रदोऽनघः ।
शनैश्चरो वेगगति(१००)र्गोचालो राहुरव्ययः ॥ ११ ॥
केतुः कारापतिः कालः सूर्योऽमितपराक्रमः ।
चन्द्रो भद्रप्रदो[3] भास्वान् भाग्यदो भर्गरूपभृत् ॥ १२ ॥
क्रूरो धूर्तो वियोगी च सङ्गी गङ्गाधरो गजः ।
गजाननप्रियो गीतो गानी स्नानार्चनप्रियः ॥ १३ ॥
परमः पीवराङ्गश्च पार्वतीवल्लभो महान् ।
परात्मको विराड्वासो[4] वानरोऽमितकर्मकृत् ॥ १४ ॥
चिदानन्दी चारुरूपो गारुडो गरुडप्रियः ।
नन्दीश्वरो नयो नागो नागालङ्कारमण्डितः ॥ १५ ॥
नागहारो महानागो गोधरो गोपतिस्तपः ।

---

१ 'वाक्प्रदो' ख. पाठः । २ 'सेवो' ग. ङ. पाठः । * इदं नाम्ना अष्टकम् ।
३ 'रुद्रपतिः' क. 'रुद्रपदो' ग पाठः । ४ 'विराड्धौम्यः ङ. पाठः ।

त्रिलोचनस्त्रिलोकेशस्त्रिमूर्तिस्त्रिपुरान्तकः ॥ १६ ॥
त्रिधामयो लोकमयो लोकैकव्यसनापहः ।
व्यसनी तोषितः शम्भुस्त्रिधारूपस्त्रिवर्गभाक् ॥ १७ ॥
त्रिज्योतिस्त्रिपुरीनाथस्त्रिधाशान्तस्त्रिधागतिः ।
त्रिधागुणी विश्वकर्ता विश्वभर्ताऽऽधिपूरुषः ॥ १८ ॥
उमेशो वासुकिर्वीरो वैनतेयो विचारकृत् ।
विवेकाब्जो विशालाक्षोऽविधिर्विधिरनुत्तमः ॥ १९ ॥
विद्यानिधिः सरोजाक्षो निःस्मरः स्मरनाशनः ।
स्मृतिमान् स्मृतिदः स्मार्तो ब्रह्मा ब्रह्मविदां वरः ॥ २० ॥
ब्राह्मव्रती ब्रह्मचारी चतुरश्चतुराननः ।
चलाचलोऽचलगतिर्वेगी वीराधिपो वरः ॥ २१ ॥
सर्ववासः सर्वगतिः सर्वमान्यः सनातनः ।
सर्वव्यापी सर्वरूपः सागरश्च समेश्वरः (२००) ॥ २२ ॥
समनेत्रः समद्युतिः समकायः सरोवरः ।
सरस्वान् सत्यवाक् सत्यः सत्यरूपः सुधीः सुखी ॥ २३ ॥
सुराट् सत्यः सत्यमती रुद्रो रौद्रवपुर्वसुः ।
वसुमान् वसुधानाथो वसुरूपो वसुप्रदः ॥ २४ ॥
ईशानः सर्वदेवानामीशानः सर्वयोधिनाम् ।
ईशोऽवशेषोऽव्ययवी शेषशायी श्रियः पतिः ॥ २५ ॥
इन्द्रश्चन्द्रावतंसी च चराचरजगत्स्थितिः ।
स्थिरः स्थाणुरणुः पीनः पीनवक्षाः परात्परः ॥ २६ ॥
पीनरूपो जटाधारी जटाजूटसमाकुलः ।
पशुरूपः पशुपतिः पशुज्ञानी पयोनिधिः ॥ २७ ॥
वेद्यो वैद्यो वेदपयो विधिज्ञो विधिमान् मृडः ।

---

१ 'सर्वदामः' क. ख पाठः ।

शूली शुभङ्करः शोभ्यः शुभकर्ता शचीपतिः ॥ २८ ॥
शशाङ्कधवलः स्वामी वज्री शङ्खी गदाधरः ।
चतुर्भुजश्चाष्टभुजः सहस्रभुजमण्डितः ॥ २९ ॥
चुवहस्तो दीर्घकेशो दीर्घो दम्भविवर्जितः ।
देवो महोदधिर्दिव्यो दिव्यकीर्तिर्दिवाकरः ॥ ३० ॥
उग्ररूप उग्रपतिरुग्रवक्त्रास्तपोमयः ।
तपस्वी जटिलस्तापी तापहा तापवर्जितः ॥ ३१ ॥
हविर्हरो हयपतिर्हयदो हरिमण्डितः ।
हरिवाही महौजस्को नित्यो नित्यात्मकोऽनलः ॥ ३२ ॥
संमानी संस्तुतिर्हारी सर्गी संनिधिरन्वयः ।
विद्याधरो विमानी च वैमानिकवरप्रदः ॥ ३३ ॥
वाचस्पति(३००)र्वसासारो वामाचारी बलन्धरः ।
वाग्भवो वासवो वायुर्वासनाबीजमण्डितः ॥ ३४ ॥
वासी कोलश्रुतिर्दक्षो दक्षयज्ञविनाशनः ।
दाक्षो दौर्भाग्यहा दैत्यमर्दनो भोगवर्धनः ॥ ३५ ॥
भोगी रोगहरो हेयो हारी हरिविभूषणः ।
बहुरूपो बहुमतिर्बहुवित्तो विचक्षणः ॥ ३६ ॥
नृत्तकृच्चित्तसंतोषो नृत्तगीतविशारदः ।
शरद्वर्णविभूषाढ्यो गलदघोऽघनाशनः ॥ ३७ ॥
नागी नागमयोऽनन्तोऽनन्तरूपः पिनाकभृत् ।
नटनो हाटकेशानो वरीयाश्च त्रिवर्णभृत् ॥ ३८ ॥
कङ्काही टङ्कहस्तश्च पाशी शार्ङ्गी शशिप्रभः ।
सहस्रमूर्धा समगुः साधूनामभयप्रदः ॥ ३९ ॥
साधुसेव्यः साधुगतिः सेवाफलप्रदो विभुः ।
सुमठा मठपो मत्तो मत्तमूर्तिः सुमन्तकः ॥ ४० ॥

कीली लीलाकरो लूतो भवबन्धैकमोचनः ।
रोचिष्णुर्विष्णुरच्युतश्चूतनो नूतनो नवः ॥ ४१ ॥
न्यग्रोधरूपो भयदो भयहाऽभीतिधारणः ।
धरणीधरसेव्यश्च धराधरसुतापतिः ॥ ४२ ॥
धराधरोऽन्धकारिपुर्विज्ञानी मोहवर्जितः ।
स्थाणुकेशो जटी ग्राम्यो ग्रामारामो रमाप्रियः ॥ ४३ ॥
प्रियकृत् प्रियरूपश्च विप्रयोगी प्रतापनः ।
प्रभाकरः प्रभादीप्तो मन्युमान् मानवेष्टदः ॥ ४४ ॥
तीक्ष्णबाहुस्तीक्ष्णकरस्तीक्ष्णांशुस्तीक्ष्णलोचनः ।
तीक्ष्णचित्तस्त्रयीरूपस्त्रयीमूर्तिस्त्रयीतनुः ॥ ४५ ॥
हविर्भुग् हविषां ज्योतिर्हालाहलो (४००) हलीपतिः ।
हविष्मल्लोचनो हालामयो हरितरूपभृत् ॥ ४६ ॥
आदिमाऽऽश्रमपो वृद्धो हुताशो हुतभुग् गुणी ।
गुणज्ञो गरुडो गानतत्परो विक्रमी क्रमी ॥ ४७ ॥
क्रमेश्वरः क्रमपरः क्रमिकृत् क्लान्तमानसः ।
महातेजा महामारो मोहितो मोहवल्लभः ॥ ४८ ॥
महस्वी त्रिदशो बालो बालापतिरघापहः ।
वान्यो रिपुहरो हार्दी गोविर्गविमतोऽगुणः ॥ ४९ ॥
सगुणो वित्तराड् वीर्यो विरोचनो विभावसुः ।
मालामयो माधवश्च विकर्तनो विकत्थनः ॥ ५० ॥
मानकृन्मुक्तिदोऽतुल्यो मुख्यः शत्रुभयङ्करः ।
हिरण्यरेताः सुभगः सतीनाथः सितापतिः ॥ ५१ ॥
मेद्री मैनाकभगिनीपतिरुत्तमरूपभृत् ।
आदित्यो दितिजेशानो दितिपुत्रक्षयङ्करः ॥ ५२ ॥

---

१ 'क्षान्तः' ङ. पाठः । २ 'अवनीशः' ग. घ पाठः । ३ 'क्रमदः' क ख. पाठः ।

वसुदेवो महाभाग्यो विश्ववसुर्वसुप्रियः ।
समुद्रोऽमिततेजाश्च खगेन्द्रो विशिखी शिखी ॥ ५३ ॥
गरुत्मान् वज्रहस्तश्च पौलोमीनाथ ईश्वरः ।
यज्ञपेयो वाजपेयः शतक्रतुः शताननः ॥ ५४ ॥
प्रतिघुस्तीव्रविस्रम्भी गम्भीरो भाववर्धनः ।
गायिष्ठो मधुरालापो मधुमत्तश्च माधवः ॥ ५५ ॥
मायात्मा भोगिनां त्राता नाकिनामिष्टदायकः ।
नाकीन्द्रो जनको जन्यः स्तम्भनो रम्भनाशनः ॥ ५६
शङ्कर ईश्वर ईशः शर्वरीपतिशेखरः ।
लिङ्गाध्यक्षः सुराध्यक्षो वेदाध्यक्षो विचारकः ॥ ५७ ॥
भर्गो(५००)ऽनर्घ्यो नरेशानो नरवाहनसेवितः ।
चतुरो भविता भावी भावदो भवभीतिहा ॥ ५८ ॥
भूतेशो महितो[1] रामो विरामो रात्रिवल्लभः ।
मङ्गलो धरणीपुत्रो धन्यो बुद्धिविवर्धनः ॥ ५९ ॥
जयी जीवेश्वरो जारो जाठरो जह्नुतापनः ।
जह्नुकन्याधरः कन्यो वत्सरो मासरूपधृत् ॥ ६० ॥
ऋतुर्ऋभूसुताध्यक्षो विहारी विहगाधिपः ।
शुक्लाम्बरो नीलकण्ठः शुक्रो भृगुसुतो भगः ॥ ६१ ॥
शान्तः शिवप्रदोऽभेद्योऽभेदकृच्छान्तकृत् पतिः ।
नाथो दान्तो भिक्षुरूपी दातृश्रेष्ठो विशांपतिः ॥ ६२ ॥
कुमारः क्रोधनः क्रोधी विरोधी विग्रही रसः ।
नीरसः सरसः सिद्धो वृषणी वृषघातनः ॥ ६३ ॥
पञ्चास्यः षण्मुखश्चैव विमुखः सुमुखीप्रियः ।
दुर्मुखो दुर्जयो दुःखी सुखी सुखविलासदः ॥ ६४ ॥

---

[1] 'ईशानोसहितः' क ख. पाठः ।

पात्री पौत्री पवित्रश्च भूतात्मा पूतनान्तकः ।
अक्षरं परमं तत्त्वं बलवान् बलघातनः ॥ ६५ ॥
भङ्गी भौलिर्भवाभावो भावाभावविमोचनः ।
नारायणो मुक्तकेशो दिग्देवो धर्मनायकः ॥ ६६ ॥
कारामोक्षप्रदोऽजेयो महाङ्गः सामगायनः ।
तत्सङ्गमो नामकारी चारी स्मरनिसूदनः ॥ ६७ ॥
कृष्णः कृष्णाम्बरः स्तुत्यस्तारावर्णस्वपाकुलः ।
त्रपावान् दुर्गतित्राता दुर्गमो दुर्गघातनः (६००) ॥ ६८ ॥
महापादो विषादश्च विपदां नाशको नरः ।
महाबाहुर्महोरस्को महानन्दप्रदायकः ॥ ६९ ॥
महानेत्रो महादाता नानाशास्त्रविचक्षणः ।
महामूर्धा महादन्तो महाकर्णो महोरगः ॥ ७० ॥
महाचञ्चुर्महानासो महाग्रीवो दिगालयः ।
दिग्वासा दितिजेशानो मुण्डी मुण्डाचलत्रभृत् ॥ ७१ ॥
श्मशाननिलयोऽरागी महाकटिरनूतनः ।
पुराणपुरुषोऽपारः परमात्मा महाकरः ॥ ७२ ॥
महालस्यो महाकेशो महोष्ठो मोहनो विराट् ।
महामुखो महाजङ्घो मण्डली कुण्डली नटः ॥ ७३ ॥
असपत्नः पत्रकरः पात्रहस्तश्च पाटवः ।
लालसः सालसः सालः कन्पवृक्षश्च कम्पितः ॥ ७४ ॥
कम्पहा कल्पनाहारी महाकेतुः कठोरकः ।
अनलः पवनः पाठः पीठस्थः पीठरूपकः ॥ ७५ ॥
पाठीनः कुलिशी पीनो मेरुधामा महागुणी ।
महातूणीरसंयुक्तो देवदानवदर्पहा ॥ ७६ ॥
अथर्वशीर्षः सोम्यास्यः ऋग्सहस्रामितेक्षणः ।

यजुःसाममुखो गुह्यो यजुर्वेदविचक्षणः ॥ ७७ ॥
याज्ञिको यज्ञरूपश्च यज्ञज्ञो धरणीपतिः ।
जङ्गमो भङ्गदो भापादचोऽभिगमदर्शनः ॥ ७८ ॥
अगम्यः सुगमः खर्वः खेटी खेटाननो[1] नयः ।
अमोघार्थः सिन्धुपतिः सैन्धवः सानुमध्यगः ॥ ७९ ॥
प्रतापी प्रजयी प्रातर्मध्याह्नसायमध्वरः ।
त्रिकालज्ञः सुगणकः पुष्करस्थः परोपकृत् ॥ ८० ॥
उपकर्तापहर्ता च घृणी रणजयप्रदः (७००) ।
धर्मी चर्माम्बरश्चारुरूपश्चारुविभूषणः[2] ॥ ८१ ॥
नक्षत्रश्वरः कालवशी वशी वशिवरोऽवशः ।
वश्यो वश्यकरो भस्मशायी भस्मविलेपनः ॥ ८२ ॥
भस्माङ्गी मलिनाङ्गश्च मालामण्डितमूर्धजः ।
गणकार्यः कुलाचारः सर्वाचारः सखा समः ॥ ८३ ॥
साकारो[3] गोत्रभिद् गोप्ता भीमरूपो भयानकः ।
अरुणश्चैकचिन्त्यश्च त्रिशङ्कुः शङ्कुधारणः ॥ ८४ ॥
आश्रमी ब्राह्मणो वह्नी क्षत्रियः कार्यहेतुकः ।
वैश्यः शूद्रः कपोतस्थः स्रष्टा तुष्टो रुषाकुलः ॥ ८५ ॥
रोगी रोगापहः शूरः कपिलः कपिनायकः ।
पिनाकी चाष्टमूर्तिश्च क्षितिमान् धृतिमांस्तथा ॥ ८६ ॥
जलमूर्तिर्वायुमूर्तिर्हुताशः सोममूर्तिमान् ।
सूर्यदेवो यजमान आकाशः परमेश्वरः ॥ ८७ ॥
भवहा भवमूर्तिश्च भूतात्मा भूतभावनः ।
भवः शर्वस्तथा रुद्रः पशुनाथश्च शङ्करः ॥ ८८ ॥

---

१ 'खट्वाननः' क पाठः । २ 'विशोषण' ङ पाठः । ३ 'सुकर' ङ. पाठ ।

गिरिजो गिरिजानाथो गिरीन्द्रश्च महेश्वरः ।
गिरीशः खण्डहस्तश्च महानुग्रो गणेश्वरः ॥ ८९ ॥
भीमः कपर्दी भीतिघ्नः खण्डपश्चण्डविक्रमः ।
खण्डभृत्[1] खण्डपरशुः कृत्तिवासा विषापहः ॥ ९० ॥
कङ्कालः कलनाकारः श्रीकण्ठो नीललोहितः ।
गणेश्वरो गुणी नन्दी धर्मराजो दुरन्तकः ॥ ९१ ॥
भृङ्गिरीटी रसासारो दयालू रूपमण्डितः ।
अमृतः कालरुद्रश्च कालाग्निः शशिशेखरः (८००) ॥ ९२ ॥
(सद्योजातः सुवर्णमुञ्जमेखली दुर्निमित्तहृत् ।
दुःखमहृत् प्रसहनो गुणिनादप्रतिष्ठितः ॥ ९३ ॥
शुक्रस्त्रिशुक्रः संपन्नः शुचिर्भूतनिषेवितः ।
यज्ञरूपो यज्ञमुखो यजमानेष्टदः शुचिः ॥ ९४ ॥
धृतिमान् मतिमान् दक्षो दक्षयज्ञविघातकः ।
नागहारी भस्मधारी भूतिभूषितविग्रहः ॥ ९५ ॥
कपाली कुण्डली भर्गः भक्तार्तिभञ्जनो विभुः ।
वृषध्वजो वृषारूढो धर्मवृषविवर्धकः ॥ ९६ ॥
महाबलः सर्वतीर्थः सर्वलक्षणलक्षितः ।
सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ॥ ९७ ॥
पवित्रस्त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः ।
ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान् ॥ ९८ ॥
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ।
देवासुरविनिर्माता देवासुरपरायणः ॥ ९९ ॥
देवासुरगुरुर्देवो देवासुरनमस्कृतः ।

---

[1] खट्वाङ्ग ' क. पाठ. ।

गुहप्रियो गणसेव्यः पवित्रः सर्वपावनः ॥ १०० ॥
ललाटाक्षो विश्वदेवो दमनः श्वेतपिङ्गलः ।
विमुक्तिर्मुक्ततेजस्को भक्तानां परमा गतिः ॥ १०१ ॥
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ।
कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ॥ १०२ ॥
नाथपूज्यः सिद्धनुत्यो नवनाथसमर्चितः ।
कपर्दी कल्पकृद् रुद्रः सुमना धर्मवत्सलः ॥ १०३ ॥
वृषाकपिः कल्पकर्ता नियतात्मा निराकुलः ।
नीलकण्ठो धनाध्यक्षो नाथः प्रमथनायकः ॥ १०४ ॥
अनादिरन्तरहितो भूतिदो भूतिविग्रहः ।
सेनाकल्पो महाकल्पो योगो युगकरो हरिः ॥ १०५ ॥
युगरूपो महारूपो महागीतो महागुणः ।

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यश्च ।
सर्वतः शर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ॥ ११३ ॥
वामदेवस्तथा ज्येष्ठः श्रेष्ठः कालः करालकः ।
महाकालो भैरवेशो वेशी कलविकरणः ॥ ११४ ॥
बलविकरणो बालो बलप्रमथनस्तथा ।
सर्वभूतादिदमनो देवदेवो मनोन्मनः ॥ ११५ ॥
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।
भवे भवे नातिभवे भजस्व मां भवोद्भवः ॥ ११६ ॥
भावनो भवनो भाव्यो बलकारी परं पदम् ।
परः शिवः परो ध्येयः परं ज्ञानं परात्परः ॥ ११७ ॥
पारावारः पलाशी च मांसाशी वैष्णवोत्तमः ।
ॐऐंह्रींश्रींह्सौः देवो ॐश्रींह्रीं भैरवोत्तमः ॥ ११८ ॥
ॐह्रां नमः शिवायेति मन्त्रो वटुर्वरायुधः ।
ॐह्रीं सदाशिवः ॐह्रीं आपदुद्धारणो मनुः ॥ ११९ ॥
ॐह्रीं महाकरालास्यः ॐह्रीं वटुकभैरवः ।
भगवांस्त्र्यम्बक ॐह्रीं ॐह्रीं चन्द्रार्धशेखरः ॥ १२० ॥
ॐह्रीं सज्जटिलो धूम्रो ॐह्रीं त्रिपुरघातनः ।
ह्रांह्रींह्रूं हरिवामाङ्ग ॐह्रींह्रूं त्रिलोचनः ॥ १२१ ॥
ॐ वेदरूपो वेदज्ञ ऋग्यजुःसामसूर्तिमान् ।
रुद्रो घोररवोऽघोरो ॐ चम्पुं अघोरभैरवः ॥ १२२ ॥
ॐजुंसः पीयूषसङ्कोऽमृताध्यक्षोऽमृतालसः ।
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ॥ १२३ ॥
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।
ॐह्रौंजुंसः ॐभूर्भुवः स्वः ॐजुंसः मन्त्रजपः (१०००) ॥१२४॥

इदं नाम्नां सहस्रं तु रहस्यं परमाद्भुतम् ।
सर्वस्वं नाकिनां देवि जन्तूनां भुवि का कथा ॥ १२५ ॥
तव भक्त्या मयाख्यातं त्रिषु लोकेषु दुर्लभम् ।
गोप्यं सहस्रनामेदं साक्षादमृतरूपकम् ॥ १२६ ॥
यः पठेत् पाठयेद्वापि श्रावयेच्छृणुयात् तथा ।
मृत्युञ्जयस्य देवस्य फलं तस्य शिवे शृणु ॥ १२७ ॥
लक्ष्म्या कृष्णो धिया जीवो प्रतापेन दिवाकरः ।
तेजसा वह्निदेवस्तु कविले चैव भार्गवः ॥ १२८ ॥
शौर्येण हरिसङ्काशो नीत्या द्वहिणसन्निभः ।
ईश्वरत्वेन देवेशि मत्समः किमतः परम् ॥ १२९ ॥
यः पठेदर्धरात्रे च साधको धैर्यसंयुतः ।
पठेत् सहस्रनामेदं सिद्धिमाप्नोति साधकः ॥ १३० ॥
चतुष्पथे चैकलिङ्गे मरुदेशे वनेऽजने ।
श्मशाने प्रान्तरे दुर्गे पाठात् सिद्धिर्न संशयः ॥ १३१ ॥
नौकायां चौरसङ्के च सङ्कटे प्राणसंक्षये ।
यत्र यत्र भये प्राप्ते विषवह्निभयादिषु ॥ १३२ ॥
पठेत् सहस्रनाम्नश्च मुच्यते नात्र संशयः ।
भौमावस्यां निशीथे च गत्वा प्रेतालयं सुधीः ॥ १३३ ॥
पठित्वा स भवेद् देवि साक्षादिन्द्रोऽर्चितः सुरैः ।
शनौ दर्शदिने देवि निशायां सरितस्तटे ॥ १३४ ॥
पठेन्नाममहस्रं वै जपेदष्टोत्तरं शतम् ।
सुदर्शनो भवेदाशु मृत्युञ्जयप्रसादतः ॥ १३५ ॥
दिगम्बरो मुक्तकेशः साधको दशधा पठेत् ।
इह लोके भवेद्राजा परे मुक्तिर्भविष्यति ॥ १३६ ॥
इदं रहस्यं परम भक्त्या तव मयोदितम् ।

मन्त्रगर्भं मनुमयं न चाख्येयं दुरात्मने ॥ १३७ ॥
नो दद्यात् परशिष्येभ्यः पुत्रेभ्योऽपि विशेषतः ।
रहस्यं मम सर्वस्वं गोप्यं गुप्ततरं कलौ ॥ १३८ ॥
षण्मुखस्यापि नो वाच्यं गोपनीयं तथात्मनः ।
दुर्जनाद् रक्षणीयं च पठनीयमहर्निशम् ॥ १३९ ॥
श्रोतव्यं साधकमुखाद्रक्षणीयं स्वपुत्रवत् ।

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये मृत्युञ्जयसद्मनाम-निरूपणं चतुश्चत्वारिंश. पटलः ॥ ४४ ॥

अथ

पञ्चचत्वारिंशः पटलः ।

श्रीभैरव उवाच ।
देवि वक्ष्यामि ते स्तोत्रं सर्वसिद्धिप्रदायकम् ।
मूलमन्त्रैकसर्वस्वं रक्षणीयं प्रयत्नतः ॥ १ ॥
दीक्षाकाले च पूजाया जपान्ते च पठेच्छिवे ।
विसर्जने तथाह्वाने स दीक्षाफलमाप्नुयात् ॥ २ ॥
अस्य वै स्तोत्रराजस्य ऋषिर्भैरव ईश्वरि ।
गायत्र्यं छन्द इत्युक्तं महामृत्युञ्जयः शिवे ॥ ३ ॥

देवता प्रणवो बीजं शक्तिः शक्तिः स्मृता शिवे ।
हृज्जं कीलकमित्युक्तं सूर्यो दिग्बन्धनं तथा ॥
भोगापवर्गासिद्ध्यर्थे विनियोगः प्रकीर्तितः ॥ ४ ॥

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
मुद्रापाशसुधाचषत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥ ५ ॥'

पीयूषांशुसुधामणिः करतले पीयूषकुम्भं वहन्
पीयूषद्युतिसंपुटान्तरगतः पीयूषधाराधरः ।
मां पीयूषमयूखसुन्दरवपुः पीयूषलक्ष्मीसखः
पीयूषद्रववर्षणोऽप्यहरहः प्रीणातु मृत्युञ्जयः ॥ ६ ॥

देवं दिनेशाग्निशशाङ्कनेत्रं
पीयूषपात्रं कलशं दधानम् ।
दोर्भ्यां सुधांशुद्युतिमिन्दुचूडं
नमामि मृत्युञ्जयमादिदेवम् ॥ ७ ॥

चन्द्रमण्डलमध्यस्थं रुद्रं बालेन्दुशेखरम् ।
(भद्रामेनं स्मरेद्रात्रौ मृत्युं प्राप्तोऽपि जीवति ॥ ८ ॥
चन्द्रमण्डलमध्यस्थं रुद्रं भालेऽतिविस्तृते ।)
तत्रस्थं चिन्तयेत् साध्यं मृत्युं प्राप्तोऽपि जीवति ॥ ९ ॥
मात्राद्यं मातृकामौलिवेदकल्पतरोः फलम् ।
यो जपेत् स भवेद्विश्वैभवास्पदमीश्वरि ॥ १० ॥
हृज्जबीजं कुलाचारविचारकुशलः शिवः ।
यो जपेत् तस्य वक्त्राब्जे नरीनर्ति हि भारती ॥ ११ ॥

---

* 'तिविस्तृते' क. पाठः । २ 'बन्धविद्रुत्य' क. ख. ग. पुस्तकेषु नास्ति

(सविसर्गं शक्तिबीजं यो जपेत् साधकः शिव ।
स भवेदचिरादेव विश्वैश्वर्यस्य भाजनम् ॥ १२ ॥)
देवेशाकाशबीजं ते बिन्दुबिम्बेन्दुमण्डितम् ।
चिन्तयन् यो भवेच्चित्ते स शिवाद्वयतां लभेत् ॥ १३ ॥
सविसर्गं भृगुं भर्ग सर्गप्रलयकारणम् ।
निसर्गतो भजेद्योऽन्तर्लीयते स परे पदे ॥ १४ ॥
लक्ष्मीशब्दाक्षरं बिन्दुभूषणं यो जपेत् तव ।
करे लक्ष्मीर्मुखे वाणी तस्य शम्भो रणे जयः ॥ १५ ॥
पालयेति युगं देव यो जपेद्वीरसन्निधौ ।
स सार्वभौमसाम्राज्यं भजेदन्ते सलोकताम् ॥ १६ ॥
शरदं वरदा वीरसाधनीं सविसर्गकाम् ।
जपेद्यः शरदम्भोदधवलं तद्यशो भ्रमेत् ॥ १७ ॥
आकाशबीजं साकाशं जपेद्यः कुशसंस्तरे ।
स कौलिकशिरोरत्न-रञ्जिताङ्घ्रियुगो भवेत् ॥ १८ ॥
शङ्काबीजं सरेफं ते शम्भो पद्मासने जपेत् ।
कङ्कालमालाभरणो भविता भैरवोपमः ॥ १९ ॥
हृज्जबीजं जगद्बीजं तेजोरूप च यो जपेत् ।
तस्मै दास्यसि भोः शम्भो निजं धाम सनातनम् ॥ २० ॥

ओंकारं माकारं गिरिश तव मन्त्रान्तरगतं
जपेद् यो हृत्पद्मे निरुपमपरानन्दमुदितः ।
स साम्राज्यं भूमौ भजति रजनीनायककला-
लसन्मौलिः प्रान्ते व्रजति शिवसायुज्यपदवीम् ॥२१॥

बिन्दुभूषणरक्तोष्णरसार-सारणस्फुरदारणवृत्ते ।

---

१ 'धरा' क ख ग पाठ ।

भूगृहाढ्य इति चक्रमण्डले त्वां निषण्णमुपसि स्मराम्यहम् ॥ २२ ॥

नानाविधानार्घ्यविभूषणाढ्यं
निःशेषपीयूषमयूखबिम्बे ।
निषण्णमीशानमशेषशेष-
वाणीतनुं मृत्युहरं नमामि ॥ २३ ॥

इति स्तोत्रं दिव्यं सकलमनुराजैकनिकषं
पठेद्यः पूजान्ते शिव शिवगृहे वार्चनविधौ ।
रणे जित्वा वैरीन् भजति नृपलक्ष्मीं स्वमहसा
भवेदन्ते वीरः सकलसुरसेव्यः शिवसमः ॥ २४ ॥

इतीदं परमं स्तोत्रं महामृत्युञ्जयप्रियम् ।
पठेद्वा पाठयेन्नित्यं सर्वस्वं देवदुर्लभम् ॥ २५ ॥
अदेयं परमं तत्त्वं महापातकनाशनम् ।
महामन्त्रमयं दिव्यं साधनैर्धनसाधनम् ॥ २६ ॥
त्रैलोक्यसारभूतं च त्रैलोक्याभयदायकम् ।
पठेन्निशीथे मन्त्री तु सद्यः सिद्धिर्भवेत् कलौ ॥ २७ ॥
चतुष्पथेऽर्धरात्रे तु ब्राह्म्ये वापि मुहूर्तके ।
पठित्वा कौलिको देवि भवेद् भैरवसन्निभः ॥ २८ ॥
इतीदं मम सर्वस्वं रहस्यं परमाद्भुतम् ।
यस्य कस्य न वक्तव्यमित्याज्ञा पारमेश्वरी ॥ २९ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये मृत्युञ्जयस्तोत्रनिरूपणं पञ्चचत्वारिंशः पटलः ॥ ४५ ॥

समाप्तं मृत्युञ्जयपञ्चाङ्गम् ॥

अथ

षट्चत्वारिंशः पटलः ।

अथ श्रीदुर्गापञ्चाङ्गम् ।

श्रीदेव्युवाच ।

भगवन् सर्वतत्त्वज्ञ साधकानां जयावह ।
यत् पुरा सूचितं देव दुर्गापञ्चाङ्गमुत्तमम् ॥ १ ॥
सर्वस्वं सर्वदेवानां रहस्यं सर्वमन्त्रिणाम् ।
तदद्य कृपया ब्रूहि यद्यस्ति मयि ते दया ॥ २ ॥

श्रीभैरव उवाच ।

एतद् गुह्यतमं देवि पञ्चाङ्गं तत्त्वलक्षणम् ।
दुर्गायाः सारसर्वस्वं न कस्य कथितं मया ॥ ३ ॥
तव स्नेहात् प्रवक्ष्यामि दुर्गापञ्चाङ्गमीश्वरि ।
गुह्यं गोप्यतमं दिव्यं न देयं मन्त्रवादिभिः ॥ ४ ॥
या देवी दैत्यदमनी दुर्गेत्यष्टाक्षरा शिवा ।
देवैराराधिता पूर्वं ब्रह्मविष्ण्वनुपूरःसरैः ॥ ५ ॥
पुरन्दरहितार्थाय वधार्थाय सुरद्विषाम् ।
सैवं सृजति भूतानि राजसी परमेश्वरी ॥ ६ ॥
सात्त्विकी रक्षति प्रान्ते संहरिष्यति तामसी ।
इत्थं गुणत्रयीरूपा सृष्टिस्थितिलयात्मिका ॥ ७ ॥
अष्टाक्षरी महाविद्या मंत्रध्यानैक्य परात्मिका ।

तस्याः पश्चाङ्गमधुना रहस्यं त्रिदिवौकसाम् ॥ ८ ॥
वक्ष्यामि परमप्रीत्या न चाख्येयं दुरात्मने ।
पटलं तव वक्ष्यामि दुर्गायास्तत्त्वमुत्तमम् ॥ ९ ॥
येन श्रवणमात्रेण कोटिपूजाफलं लभेत् ।
दुर्गाया देवि वक्ष्यामि मन्त्रोद्धारं पराश्रयम् ।
सर्वतन्त्रेष्वविख्यातं सर्वकामफलप्रदम् ॥ १० ॥

तारं माया चाक्रिकं चक्रिदूर्वा
वायव्यार्णं विश्वमन्ते भवानि ।
दुर्गायास्ते वर्णितो मूलविद्या-
मन्त्रोद्धारो गोपितोऽष्टाक्षरोऽयम्* ॥ ११ ॥

नास्यान्तरायबाहुल्यं नाप्यमित्रादिदूषणम्† ।
नो वा प्रयाससंयोगो नाचारयुगविप्लवः ॥ १२ ॥
साक्षात् सिद्धिप्रदो मन्त्रो दुर्गायाः कलिनाशनः ।
अष्टाक्षरोऽष्टसिद्धीशो गोपनीयो दिगम्बरैः ॥ १३ ॥
महाचीनक्रमस्थानां साधकानां जयावहः ।
मन्त्रराजो महादेवि सद्यो भोगापवर्गदः ॥ १४ ॥
वर्णलक्षं पुरश्चर्या तदर्धं वा महेश्वरि ।
एकलक्षावधिं कुर्यान्नातो न्यूनं कदाचन ॥ १५ ॥
मूलोत्कीलनमिदं तु सञ्जीवनसुसंस्कृतम् ।
पुरश्चर्यां चरेत् पश्चात् संपुटाढ्यं चरेन्मनुम् ॥ १६ ॥
ततो मन्त्रं जपेन्नित्यं दुर्गायास्त्वष्टसिद्धिदम् ।
यं जप्त्वा साधको भूमौ विचरेद्वैरयो यथा ॥ १७ ॥
ऋषिरस्य स्मृतो देवि मन्त्रस्याद्यो महेश्वरः ।
छन्दोऽनुष्टुप् देवता च श्रीदुर्गाष्टाक्षरा स्मृता ॥ १८ ॥

---

* स्पष्टम् ॐदुर्गायै नमः । † नास्मिन्नारिष्टदूषणम् इ पाठः ।

चाक्रिक बीजमीशानि माया शक्तिरिति स्मृता ।
तार कीलकमाशाना विश्व बन्धनमीश्वरि ॥ १९ ॥
धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः ।
तारमायाक्षरैर्देवि न्यास षड्दीर्घभागिभिः ॥ २० ॥
निहत्य षड्रिपून् देवि ध्यायेद् दुर्गां कुलेश्वरीम् ।
दुर्गानिभा त्रिनयना विलसत्किरीटा
शङ्खाब्जगद्गशरखेटकशूलचापान् ।
सतर्जनीं च दधती महिषासनस्था
दुर्गा नवारकुलपीठगता भजेऽहम् ॥ २१ ॥
यन्त्रोद्धार प्रवक्ष्यामि दुर्गायाः कुलमन्दिरम् ।
सर्वसिद्धिप्रद चक्र सर्वाशापरिपूरकम् ॥ २२ ॥
बिन्दुत्रिकोण वसुकोणसंयुत
दलाष्टपत्राश्रितवह्निवृत्तम् ।
धराग्रहोद्भासितमिन्दुचूडे

पूज्याः पृथक् पृथग् देवि गन्धपुष्पाक्षतैः शिवे ॥ २८ ॥
दत्त्वा पुष्पाञ्जलिं चक्रे मूलमुच्चार्य साधकः ।
पूजयेत् पद्मकिञ्जल्कैः षडश्रे षट् कुलाम्बिकाः ॥ २९ ॥
शैलपुत्रीं खड्गमाग्नात् पूजयेद् ब्रह्मचारिणीम् ।
चण्डघण्टां च कूष्माण्डां स्कन्दमातरमीश्वरि ॥ ३० ॥
कात्यायनीं च संपूज्य दूर्वागन्धाक्षतैः परम् ।
पुनः पुष्पाञ्जलिं दत्त्वा श्रीचक्रे परमार्थदे ॥ ३१ ॥
पूजयेद् देवतास्तिस्रः कुलस्थास्त्रिपुराम्बिकाः ।
कालरात्री महागौरी देवदूतीति पार्वति ॥ ३२ ॥
त्रिकोणाग्राच्छिवे पूज्याः सिन्दूराक्षतपुष्पकैः ।
दूर्वादलाञ्जलिं दत्त्वा यन्त्रराजेऽष्टसिद्धिदे[1] ॥ ३३ ॥
पूजयेदम्बिकां दुर्गामष्टाक्षरविभूषणाम् ।
बिन्दौ देवीमष्टभुजां विद्यामष्टाक्षरीं शिवे ॥ ३४ ॥
नीलकण्ठं शिवं बिन्दौ पूजयेज्जगदम्बिकाम् ।
तत्रायुधानि देवेशि पूजयेदष्ट साधकः ॥ ३५ ॥
शङ्खं पद्ममसिं बाणान् धनुः खेटकमीश्वरि ।
शूलं संतर्जनीं दिव्यां नानापुष्पैः समर्चयेत् ॥ ३६ ॥
देवदेव्यौ बिन्दुपीठे पूजयेत् सर्वसिद्धये ।
अथ वक्ष्ये महादेवि प्रयोगानष्ट सिद्धये ॥ ३७ ॥
यान् विधाय कलौ मन्त्री भवेत् कल्पद्रुमोपमः ।
स्तम्भनं मोहनं चैव मारणाकर्षणे ततः ॥ ३८ ॥
वशीकारं तथोच्चाटं शान्तिकं पौष्टिकं तथा ।
एषां साधनमाचक्ष्व प्रयोगाणां महेश्वरि ॥ ३९ ॥
महाचीनक्रमस्थानां साधकानां हिताय च ।

---

[1] 'सिद्धये' ट. पाठः । [2] 'दुर्गा' ह. ख. पाठः ।

(१) अयुतं प्रजपेन्मूलं श्मशाने निशि साधकः ॥ ४० ॥
हुनेद् दशांशतः सर्पिर्यक्तान्मांसासृगच्युतान् ।
स्तम्भनं जायते क्षिप्रं वादिकामिजनाम्भसाम् ॥ ४१ ॥
(२) अयुतं प्रजपेद् देवि वटे रुद्राक्षमालया ।
होमो दशांशतः कार्यो घृतपायसषड्रसैः ॥ ४२ ॥
आरग्वधैः सुधामूलैर्मोहनं जायते क्षणात् ।
देवानां दानवानां च का कथाल्पधियां नृणाम् ॥ ४३ ॥
(३) अयुतं प्रजपेन्मूलं वने साधकसत्तमः ।
वेतसीमूलगो वापि हुनेत् तत्र दशांशतः ॥ ४४ ॥
घृतपायसशम्बूकान् रिपुर्मृत्युमुखं व्रजेत् ।
(४) अयुतं प्रजपेद्रात्रौ शून्यागारे कुलेश्वरि ॥ ४५ ॥
होमो दशांशतः कार्यो घृतव्योषशटीशरैः ।
कपिबीजैरपि प्रातर्भवेदाकर्षणं स्त्रियाम् ॥ ४६ ॥
(५) अयुतं प्रजपेन्मूलं चत्वरे सरितं हुनेत् ।
आज्यान्नजक्षुरपापाण्ड-रक्तपुष्पाणि पार्वति ॥ ४७ ॥
शक्रोऽपि वशतामेति किं पुनः क्षुद्रभूमिपः ।
(६) अयुतं प्रजपेन्मूलं साधकोऽश्वत्थमूलगः ॥ ४८ ॥
हुनेदाज्यं दशांशेन केशं स्त्रीणां लवं कणाः ।
रिपुमुच्चाटयेत् शीघ्रं यदि शक्रसमो भवेत् ॥ ४९ ॥
(७) अयुतं प्रजपेन्मूलं सुरदुर्गतले हुनेत् ।
घृताक्तैकुक्कुटाङ्गानि नानापुष्पाणि साधकः ॥ ५० ॥
रोगोपद्रवकालस्य सद्यः शान्तिर्भविष्यति ।
(८) अयुतं प्रजपेन्मूलं लीलोपवनमण्डले ॥ ५१ ॥
होमो दशांशतः कार्यो घृतमीनाजमस्तकैः ।

---

१ 'कापिबीजै' क ग पाठः । २ 'घृतायस' क पाठः । ३ 'अयुत०' ङ पाठः ।

पादैरष्टभिरीशानि सद्यः पुष्टिः प्रजायते ॥ ५२ ॥
इत्येष पटलो दिव्यो मन्त्रसर्वस्वरूपवान् ।
दुर्गारहस्यभूतोऽपि गोपनीयो मुमुक्षुभिः ॥ ५३ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये दुर्गापटलनिरूपणं षट्चत्वारिंशः पटलः ॥ ४६ ॥

अथ

सप्तचत्वारिंशः पटलः ।

श्रीभैरव उवाच ।
शृणु पार्वति तक्ष्यामि पद्धतिं गद्यरूपिणीम् ।
यस्याः श्रवणमात्रेण कोटियज्ञफलं लभेत् ॥ १ ॥

ब्राह्म्ये मुहूर्ते चोत्थाय, बद्धपद्मासनः स्वशिर स्थसहस्रारार्धेन्दुमध्य मलकर्णिकान्तर्गतं निजगुरुं श्वेतवर्णं श्वेतालङ्काराल कृत द्विभुज स्वशक्त श्वेताम्बरभूषितया वामाङ्के सहितं ध्यात्वा, मानसरुपचारै. सपूज्य दण्ड वत् प्रणमेत् ।

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः ।
गुरुरेव जगत् सर्वं तस्मै श्रीगुरवे नमः ॥

इति नत्वा तदाज्ञां गृहीत्वा बहिरागत्य मलमूत्रादि संत्यज्य, वर्णोक्तं शौचं विधाय नद्यादौ गत्वा सुकूचं द्वादशाङ्गुलं दन्तधावनं कुर्यात् । " ॐक्लीं कामदेवाय सर्वजनप्रियाय नमः " इति दन्तान् विशोध्य, चाक्रिकबीजेन गण्डूषषट्कं विधाय, प्रणवेन मुखं त्रिः प्रोक्ष्य " ॐह्रीं मणिधरि वज्रिणि शिखापरिसरे रक्ष रक्ष हुं फट् स्वाहा " इति शिखां बद्ध्वा तत्त्वत्रयेणाचम्य मूलेन प्राणायामं विधाय, मलापकर्षणं स्नानं कृत्वा मन्त्रस्नानं चरेत् । ततो मूलेन मृदमानीय जलं प्रोक्षयेत् । मन्त्रमृदा सूर्यमण्डलं विचिन्त्य, " गङ्गे च यमुने चेति " तीर्थान्यावाह्य जले यन्त्रं विभाव्य सनीलकण्ठां दुर्गामावाहयेत् । तत्र षडङ्गं विधाय देवीं सशिवां ध्यात्वा, मूलं यथाशक्त्या जप्त्वा त्रिर्निमज्ज्योन्मज्जेत् । तत्र कुम्भमुद्रां बद्ध्वा स्वमूर्ध्नि देवदेव्यौ जलेन स्नपयित्वा " ॐह्रांह्रौंसः मार्तण्डभैरवाय प्रकाशाशक्तिसहिताय एष तेऽर्घो नमः । इति सूर्यायार्घ्यत्रयं दत्त्वा वासोऽन्यत् परिधाप्य, तत्त्वत्रयेणाचम्य त्रिः प्राणायामं विधाय, पूर्वसंध्यां कृत्वा षडङ्गं कृत्वा, चुलकेन जलमादाय तत्त्वमुद्रयाच्छाद्य यंरंलंवंहं इति त्रिरभिमन्त्र्य मूलमुच्चरंस्तद्गलितोदकबिन्दुभिः ससप्तधा स्वशिरस्यभ्युक्ष्य, सव्यहस्ते शेषमुदकं धृत्वा इडयान्तर्नीत्वा देहान्तः पापं प्रक्षाल्य पिङ्गलया विरेच्य, पुरःकल्पितवज्रशिलायां वामतः फडिति निक्षिपेत् । इत्यघमर्षणं विधाय पूर्ववदाचम्य, जले यन्त्रं ध्यात्वा मूलं यथाशक्त्या जप्त्वा, मूलविद्यान्ते साङ्गे सवाहने सायुधे सपरिच्छदे श्रीनीलकण्ठसहिते मातर्दुर्गे तृप्यतामित्यष्टवारं संतर्प्य नीलकण्ठं त्रिः संतर्प्य, एकैकाञ्जलिना परिवारदेवताः संतर्प्य, देवदेव्यौ हृदि ध्यात्वा, जले चतुरश्रं विलिख्य, तत्रेशानादिक्रमेण गुरुपङ्क्तिं संतर्प्य देवीं गायत्रीं जपेत् । ॐह्रींदुं दुर्गायै विद्महे अष्टाक्षरायै धीमहि तन्नः चण्डी प्रचोदयात् । इति यथाशक्त्या प्रजप्य, गायत्र्यात्मया देवदेवयोरर्घ्यत्रयं दत्त्वा जपं समर्प्य, यागमण्डपमागच्छेदिति संध्याविधिः ॥

ततो गृहमागत्य पादौ प्रक्षाल्य द्वारदेवताः पूजयेत् । ॐगांगूं गणेशाय नमः पूर्वे । ॐक्षांह्रीं बटुकाय नमो दक्षिणे । ॐक्षांक्षेंक्षेत्रपालाय नमः पश्चिमे । ॐयांयूं योगिनीभ्यो नमः उत्तरे । गं गङ्गायै नमो देहल्यां । यां यमुनायै नमः अधः । सौः सरस्वत्यै नमो मध्ये । इति

संपूज्य, गृहान्तः प्रविश्य यथार्हमासनं शोधयेत्। ओं आसनशोधनमन्त्रस्य, मेरुपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता, आसनमन्त्रणे विनियोगः। ओंप्रीं पृथिव्यै नमः। "महि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥" (ओंध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विश्वामसि॥)" ओंह्रीं आधारशक्तये नमः। मं मूलप्रकृत्यै नमः। अं अनन्ताय नमः। पं पद्माय नमः। प्रीं पद्मनालाय नमः। तत्रोपविश्य तालत्रयं कुर्यात्। "अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥" इति तालत्रयं दत्त्वा, वामपार्ष्णिघातत्रयेण विघ्नानुत्सार्य नाराचमुद्रां प्रदर्श्य गुरुं प्रणमेत्। गुरुर्ब्रह्मा गुरुर्विष्णुरिति, अज्ञानतिमिरान्धस्येति, अखण्डमण्डलाकारमिति च पठित्वा, श्रीगुरवे नमः स्वधामे। गुं गुरुभ्यो नमः। परमगुरुभ्यो नमः। परापरगुरुभ्यो नमः। परमेष्ठिगुरुभ्यो नमः। इति गन्धाक्षतैरभ्यर्च्य न्यासपूर्वं संकल्पं कुर्यात्। अस्य श्रीदुर्गादेवी (योगपीठपूजा) मन्त्रस्य, महेश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीदुर्गा देवता, दुं बीजं, ह्रीं शक्तिः, ओं कीलकं, नमः इति दिग्बन्धः, धर्मार्थकाममोक्षार्थे दुर्गापूजायां विनियोगः। अथ न्यासः। महेश्वरऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमो मुखे। श्रीदुर्गादेवतायै नमो हृदि। दुं बीजाय नमो नाभौ। ह्रीं शक्तये नमो गुह्ये। ओं कीलकाय नमः पादयोः। नमो दिग्बन्धः इति सर्वाङ्गेषु। ओंह्रां अङ्गुष्ठाभ्यां नमः। ओंह्रीं तर्जनीभ्यां नमः। ओंह्रूं मध्यमाभ्यां नमः। ओंह्रैं अनामिकाभ्यां नमः। ओंह्रौं कनिष्ठिकाभ्यां नमः। ओंह्रः करतलपृष्ठाभ्यां नमः। इति करन्यासः॥ एवं हृदादिषडङ्गन्यासः॥

अथ मूलन्यासः। ओंनमः शिरसि। ह्रीं मुखे। दुं वक्षसि। दुं भुजयोः। गों नाभौ। यै पृष्ठे। नं जान्वोः। मः पादयोः। इति विन्यासयेत्। ओं आत्मतत्त्वाय नमः शिरसि। ह्रीं विद्यातत्त्वाय नमो मुखे। दुं शिवतत्त्वाय नमो हृदये। ओं गुरुतत्त्वाय नमो नाभौ। ओंह्रीं शक्तितत्त्वाय नमो जङ्घयोः। ओंदुं शिवशक्तितत्त्वाय नमः पादयोः।

---

१ 'यथोपचितम्' क. ख. ग पाठः। २ 'ओंह्रौं' क. ग. पाठः।

ॐ अंआंकंखंगंघंङंइंईं हृदयाय नमः । ह्रीं उंऊंचंछंजंझंञंऋंॠं शिरसे स्वाहा । दुं लृंटंठंडंढंणंलृं शिखायै वषट् । ॐ पंतंथंदंधंनंपैं कवचाय हुं । ह्रौं ॐपंफंबंभंमंॐौं नेत्रेभ्यो वौषट् । दुं अंयंरंलंवंशंषंसंहंळंक्षं-अः अस्त्राय फट् इति हृदयादिन्यासः । एवं करन्यासः । इति शुद्धमातृकान्यासः ॥

अथ मूलमातृकान्यासः । अं नमः शिरसि । आं नमो मुखवृत्ते । इं दक्षनेत्रे । ईं वामनेत्रे । उं दक्षकर्णे । ऊं वामकर्णे । ऋं दक्षगण्डे । ॠं वामगण्डे । लृं दक्षनासापुटे । लॄं वामनासापुटे । एं ऊर्ध्वोष्ठे । ऐं अधरोष्ठे । ओं ऊर्ध्वदन्तपंक्तौ । औं अधोदन्तपंक्तौ । अं ललाटे । अः जिह्वायाम् । कं नमो दक्षबाहुमूले । खं कूर्परे । गं मणिबन्धे । घं अङ्गुलिमूले । ङं अङ्गुल्यग्रे । चं वामबाहुमूले । छं कूर्परे । जं मणिबन्धे । झं अङ्गुलिमूले । ञं अङ्गुल्यग्रे । टं नमो दक्षपादमूले । ठं जानुनि । ड गुल्फे । ढं अङ्गुलिमूले । णं अङ्गुल्यग्रे । तं वामपादमूले । थं जानुनि । दं गुल्फे । धं अङ्गुलिमूले । नं अङ्गुल्यग्रे । पं दक्षपार्श्वे । फ वामपार्श्वे । ब पृष्ठे । भं नाभौ । मं जठरे । यं हृदि । रं दक्षांसे । लं ककुदि । वं वामांसे । शं हृदादिदक्षहस्ताग्रान्तं । षं हृदादिवामहस्ताग्रान्तं । सं हृदादिदक्षपादाग्रान्तं । हं हृदादिवामपादाग्रान्तं । ळं पादादिशिरःपर्यन्तम् । क्षः नमः शिरसः पादपर्यन्तमिति विन्यासयेत् । एवं न्यासं विधाय पूर्ववत् षडङ्गं कृत्वा प्रणवेन प्राणायामत्रयं विधाय, (पूरकं १२ कुम्भकं १६ रेचकं ३२) ॐह्रीं आत्मतत्त्वं शोधयामि स्वाहा । ॐह्रीं विद्यातत्त्वं शोधयामि स्वाहा, ॐह्रीं शिवतत्त्वं शोधयामि स्वाहा, इति विराचम्य, प्राणायामयोगेन भूतशुद्धिं कुर्यात् ।

ॐह्रूं आकुञ्चेन सुषुम्नावर्त्मना प्रदीपकलिकाकारं तेजो ब्रह्मपथान्तर्नीत्वा परमशिवे समानीय, तत्र सुधावृष्ट्यां कुलगुरून् ध्यात्वा तयैव संतर्प्य, पुनस्तेनैव मार्गेण षट्चक्रकुलं भित्त्वा तत्तेजः स्वस्थानमानीय, यमिति वायुबीजेन षोडशधा जप्तेन वामकुक्षिगतं पापपुरुषं कृष्णवर्णं रक्तश्मश्रुलमङ्गुष्ठमात्राकारं ध्यात्वा शोषयेत् । रमिति वह्निबीजेन षोडशधा जप्तेन तं दाहयेत् । वमित्यमृतबीजेन षोडशधा

---

१ 'अ शिरसि' 'अः मुखे' क. ख ग. पाठ. । २ 'अङ्गुष्ठेन' क ख ग. पाठः ।

जप्तेन गलघन्द्रामृतवृष्ट्याप्लावयेत् । लमितीन्द्रबीजेन षोडशपारजप्तेन (पिण्डीभूतं स्वात्मकं ध्यात्वा, हमित्याकाशबीजेन सकृज्जप्तेन) स्वात्मानं दिव्यदेहं विभावयेदिति भूतशुद्धिं कृत्वा, प्राणप्रतिष्ठां कुर्यात् । ॐह्रीं दुंआंक्रों सोऽहं हंसः मम प्राणा इह प्राणाः, एवं ँ मम जीव इह स्थितः, ँ मम सर्वेन्द्रियाणि इह स्थितानि, ँ मम वाङ्मनश्चक्षुस्त्वक्श्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा, इति प्राणप्रतिष्ठाक्रमः । एवं प्राणान् संस्थाप्य पूर्ववत् षडङ्गं विधायाचम्य मूलदेवीं ध्यायेत् ।

भूगेहनागदलवृत्तरसाररार-
विन्दुस्थसन्महिषपीठगतां भवानीम् ।
दूर्वादलाग्रसदृशच्छविमष्टबाहुं
दुर्गां भजे त्रिनयनां विलसत्त्रिबीजाम् ॥

इति ध्यात्वा मूलाङ्गन्यासौ विधाय, श्रीचक्रं चतुर्द्वारं त्रिवृत्तं साष्टदल वृत्तं षडश्रं त्रिकोणबिन्दु विचिन्त्य वा अष्टगन्धेन विलिख्य वा विभाव्य पीठपूजां कुर्यात् । ॐह्रीं मण्डूकाय नमः । ँ कालाग्निरुद्राय नमः । ँ मूलप्रकृत्यै नमः । ँ आधारशक्त्यै नमः । ँ कूर्माय नमः । ँ अनन्ताय० । ँ वराहाय० । ँ पृथिव्यै० । इत्युपर्युपरि संपूज्य, ँ क्षुधार्णवाय नमः मध्ये । ँ नवरत्नविराजितनवखण्डमयद्वीपाय नमः । ँ पद्मरागखण्डाय नमः । ँ स्वर्णगिरये० । ँ नन्दनोद्यानाय० । ँ कल्पवनाय० । ँ पद्मवनाय० । ँ विविधरत्नखचितभूमिकायै० । ँ चिन्तामणिमण्डपाय० । ँ नवरत्नखचितरत्नमयवेदिकायै० । ँ रत्नसिंहासनाय० । तन्मध्ये ँ सहस्रारपद्माय० । ँ प्रकृतिमयपत्रेभ्यो० । ँ विकृतिमयकेसरेभ्यो० । तन्मध्ये ँ अष्टबीजविभूषितकर्णिकायै० । तत्पार्श्वे ँ धर्माय० । ँ ज्ञानाय० । ँ वैराग्याय० । ँ ऐश्वर्याय० । वामतः ँ अधर्माय० । ँ अज्ञानाय० । ँ अवैराग्याय० । ँ अनैश्वर्याय० । मध्ये ँ सं सत्त्वाय० । ँ रं रजसे०

रैं त तमसे० । मूलविद्यामुच्चार्य महिषासनाय नम । मूलमुच्चार्य मातृकाः प्रोच्चार्य श्रीयोगपीठाय नम इत्यभ्यर्च्य पात्रार्चन कुर्यात् ।

तत स्वदेह गन्धादिना सपूज्य, तत्र स्ववामे वृत्तत्रिकोणचतुरश्रमण्डल विधाय मूलेनाभ्यर्च्य, मूल दुर्गासामान्यार्घ्याय नम । र वह्निमण्डलाय दशकलात्मने नम. इत्याधारे, तन्मण्डल पञ्चाङ्गेनाभ्यर्च्य, तत्राक्षत्तालित शङ्ख सस्थाप्य, शङ्खे अ अर्कमण्डलाय द्वादशकलात्मने नम इति सपूज्य, विलोममातृकया सपूर्य, सौ सोममण्डलाय षोडशकलात्मने नम इत्यभ्यर्च्य, मूलाष्टाभिमन्त्रित कृत्वा "गङ्गे च यमुने चैव" इत्यादिना तीर्थमावाह्य शुद्ध भावयेदिति सामान्यार्घ्यविधि ॥

सामान्यार्घ्यस्य वामे त्रिकोणषट्कोणवृत्तचतुरश्र मण्डल विधाय तन्मण्डल पञ्चाङ्गेनाभ्यर्च्य, मूलमुच्चार्य, श्रीमद्गोकलशमण्डलाय नम । ततः पूर्ववत् मूलेनाभ्यर्च्य तत्राक्षत्तालिता त्रिपादिका सस्थाप्य, र वह्निमण्डलाय दशकलात्मने नम इत्यभ्यर्च्य, तत्राक्षत्तालित कलश सस्थाप्य, अ अर्कमण्डलाय द्वादशकलात्मने नम इत्यक्षतपुष्पैरभ्यर्च्य, तत्रानामिकाङ्गुष्ठाभ्यामृतधारापातेन कलशमापूर्य, सौ. सोममण्डलाय षोडशकलात्मन नम इत्यभ्यर्च्य, ॐ ह्रौं दां दीं दूं दें दों द्रुम अमृत अमृतोद्भवे अमृतवर्षिणि अमृत स्रावय २ शुक्रशाप मोचय २ ॐ ह्रौं दुं सुरादेव्यै वौषट्, इति सप्तधाभिमन्त्र्य, दुह्रौं ॐ हसक्षमलवरयऊ आनन्दभैरवाय वौषट्, इति सप्तधाभिमन्त्र्य, ॐ ह्रौं दुं आनन्दभैरवसुरादेवीपादुकाभ्यो नम इति सपूज्य, धेनुयोनिमुद्रे प्रदर्श्य, ॐ सूर्यमण्डलसभूते वरुणालयसभवे० । अमावीजमये देवि शुक्रशापाद्विमुच्यताम् ॥ एकमेव पर ब्रह्म स्थूलसूक्ष्ममय ध्रुवम् । कक्षोद्भवा ब्रह्महत्या तेन ते नाशयाम्यहम् ॥ पवमान परानन्द पवमान परो रस । पवमानं पर ज्ञान तेन त्वा पावयाम्यहम् ॥ वेदाना प्रणवो बीज ब्रह्मानन्दमय यदि । तेन सत्यन त देवि ब्रह्महत्या व्यपोहतु ॥ कृष्ण शापविनिर्मुक्ता त्व मुक्ता ब्रह्मशापत । विमुक्ता मुनिशापैर्न पवित्रा भव सर्वदा ॥ इति कलश सपूज्य धनुर्योनिमत्स्यमुद्रा प्रदर्श्य गरुडमु

---

१ 'वषट' ख पाठ । २ विह-यतु ख पाठ । ३ 'रुद्रशापन' क पाठ । ४ सोमन' क पाठ ।

द्रयाच्छादयेदिति द्रव्यशुद्धिः ॥ ॐह्रींदुं कृतावतारो हरिणा कलिना पीडितं जगत् । बलिना निगृहीतं तु कौलिकानां हिताय च ॥ श्री-दुर्गापरितोषार्थं स्वयं मीनोऽभवत् प्रभुः । इति, मुद्रात्रयं प्रदर्श्य शुद्धिं शोधयेत् । ॐह्रींदुं छागलाद्यिगवान्तादिकृतरूपाय वै नमः । बल्यर्थं देवदेव्योश्च पवित्रीभव साम्प्रतम् ॥ मूलं त्रिधा जप्त्वा मुद्रात्रयं दर्शयेदिति । ॐह्रींदुं श्रीदुर्गार्चनकाले तु यानि यानीह सांप्रतम् । वस्तूनि सौरमेयाणि पवित्राणीह सिद्धये ॥ इति मूलं त्रिधा जपन् मुद्रात्रयं सर्वस्योपरि दर्शयेदिति कलशादिविधिः ॥

ततो मूलेनानन्दभैरवाद्युपविष्टां नीलकण्ठेशीं श्रीदेवीं ध्यात्वा मूलेनाचाह्य श्रीचक्रमर्चयेत् । तत्र मूलेन पाद्यार्घ्याचमनीयादि परिकल्पयेत् । मूलेन देवदेव्योर्मधुपर्काचमनीयादि निवेदयेत्[1] । मूलेन नैवेद्यं निवेद्य आचमनीयं नमः इति निवेद्य, गण्डूषत्रयं निवेद्य, मूलेन ताम्बूलादि समर्पयेत् । ततो मूलषडङ्गं विधाय चतुरश्रं पूजयेत् । ॐह्रींदुं सर्वसिद्धिप्रदाय चक्राय नमः इति पुष्पाञ्जलिं दत्त्वा, ॐह्रींदुं गणेशाय नमः पूर्वे । ३ ह्रौं कुमाराय नमः दक्षिणे । ३ प्रीं पुष्पदन्ताय नमः पश्चिमे । ३ वैं विकर्तनाय नमः उत्तरे । इति गन्धाक्षतपुष्पैरभ्यर्च्य प्रथमावरणम् ॥ ३ असिताङ्गभैरवयुत-ब्राह्मीश्रीपादु० । ३ रुरुभैरवयुत-नारायणीश्रीपा० । ३ चण्डभैरवयुत-चामुण्डाश्रीपा० । ३ क्रोधेशभैरवयुतापराजिताश्रीपा० । ३ उन्मत्तभैरवयुत-माहेश्वरीश्रीपा० । ३ कपालिभैरवयुत-कौमारीश्रीपा० । ३ भीषणभैरवयुत-वाराह्रीश्रीपा० । ३ संहारभैरवयुत-नारसिंहीश्रीपादु० । इति वामावर्तेन गन्धाक्षतपुष्पैरभ्यर्चयेत् । इति द्वितीयावरणम् ॥ ॐह्रींदुं सर्वाशापूरकचक्राय नमः, इति पुष्पाञ्जलिं दत्त्वा षट्कोणं पूजयेत् । ॐह्रींदुं शैलपुत्रीश्रीपा० । ३ ब्रह्मचारिणीश्री० । ३ चण्डघण्टाश्री० । ३ कूष्माण्डाश्री० । ३ स्कन्दमातृश्री० । ३ कात्यायनीश्री० । इति वामावर्तेन संपूजयेत् । इति तृतीयावरणम् ॥ ॐह्रींदुं सौभाग्यप्रदाय चक्राय नमः, इति पुष्पाञ्जलिं दत्त्वा त्रिकोणं पूजयेत् । ३ कालरात्रीश्रीपा० । ३ महागौरी-

---


१ 'सुरदेयानि' क. ख. पाठ । २ 'परिकल्पयेत्' क. ख. पाठः ।

र्थी० । ३ँ देवदूतीर्थी० । इति अग्नेशानाग्नेयतोऽभ्यर्चयेत् । इति चतुर्थावरणम् ॥ ॐ ह्रीं दुं अष्टासिद्धिप्रदाय चक्राय नमः इति पुष्पाञ्जलिं दत्त्वा मूलमुच्चार्य श्रीनीलकण्ठश्रीदुर्गाश्रीपा० इति सप्तवारं बिन्दौ अभ्यर्चयेत् । इति पञ्चमावरणम् ॥ बिन्दूपरि मूलं अम्बिकाश्रीपा० । ३ँ अष्टाक्षराश्रीपा० । ३ँ अष्टभुजाश्री० । ३ँ नीलकण्ठश्रीपा० । ३ँ जगदम्बिकाश्री० । इत्यभ्यर्चयेत् । इति षष्ठावरणम् ॥ बिन्दूपरि मू० शङ्खाय नमः । पद्माय० । खड्गाय० । बाणेभ्यो० । धनुषे० । खेटकाय० । शूलाय० । तर्जन्यै नमः । मूलविद्यां त्रिरुच्चार्य श्रीनीलकण्ठश्रीदुर्गाश्रीपा० पू० त० इति मूलेन गन्धाक्षतपुष्पधूपदीपनैवेद्याचमनीयताम्बूलच्छत्रचामरारात्रिकादीन् समर्पयेदिति सप्तमावरणम् ।

तत्र मूलेन बलिं निवेद्य सौः सर्वविघ्नरुद्भ्यो भूतेभ्यो नमः स्वाहा । यांयांयू योगिनीगणेभ्यो नमः स्वाहा । यांयीं देवीपुत्रबटुकनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख एह्येहि इमं बलिं यथोपाचितं गृह्ण २ स्वाहा । क्षांक्षीं क्षेत्रपालाय नमः । इति बलिं दत्त्वा, सङ्कल्पपूर्वं न्यासादि विधाय देव्यग्रे मालामादाय यथाशक्ति मूलविद्यां जप्त्वा "गुह्यातीं"[1]ति जपं समर्प्य, देव्यग्रे कवच-सहस्रनाम-स्तवपाठं विधाय तदपि देवदेव्योः समर्प्य, "प्रातः प्रभृति सायान्तं सायादि प्रातरन्ततः । यत्करोमि जगन्मातस्तदस्तु तव पूजनम् ॥" इति पुष्पाञ्जलिं दत्त्वा योनिमुद्रया प्रणम्य, संहारमुद्रया देवदेव्यौ हृदि विसृज्य स्वयमपि सदाशिवो भूत्वा स्वशक्त्या सह पात्रार्पणं विधाय सुखं विहरेदिति ॥

इति श्रीनित्यपूजायाः पद्धतिं गुह्यगोपिताम् ।
श्रीदुर्गासारसंभूतां गोपयेत् साधकेश्वरि ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये श्रीदुर्गापद्धतिनिरूपणं सप्तचत्वारिंश पटलः ॥ ४७ ॥



---

1 'ध्यान' ख. पाठ ।

अथ

अष्टाचत्वारिंशः पटलः ।

श्रीभैरव उवाच ।

अधुना देवि वक्ष्यामि[1] कवचं मन्त्रगर्भकम् ।
दुर्गायाः सारसर्वस्वं कवचेश्वरसंज्ञकम् ॥ १ ॥
परमार्थप्रदं दिव्यं[2] महापातकनाशनम् ।
योगिप्रियं योगगम्यं[3] देवानामपि दुर्लभम् ॥ २ ॥
विनानेन न मन्त्रस्य सिद्धिर्देवि कलौ भवेत् ।
धारणादस्य देवेशि शिवस्त्रैलोक्यनायकः ॥ ३ ॥
भैरवो भैरवेशानो विष्णुर्नारायणो बली ।
ब्रह्मा पार्वति लोकेशो विघ्नध्वंसी गजाननः ॥ ४ ॥
सेनानीश्च महासेनो जिष्णुर्लोकर्षभः प्रिये ।
सूर्यस्तमोपहश्चैव चन्द्रोऽमृतनिधिस्तथा ॥ ५ ॥
बहुनोक्तेन किं देवि दुर्गाकवचधारणात् ।
मर्त्योऽप्यमरतां याति साधको मन्त्रसाधकः ॥ ६ ॥
कवचस्यास्य देवेशि ऋषिः प्रोक्तो महेश्वरः ।
छन्दोऽनुष्टुप् प्रिये दुर्गा देवताष्टाक्षरा स्मृता ॥ ७ ॥
चक्रिबीजं च बीजं स्यान्माया शक्तिरितीरिता ।
तारं कीलकमीशानि दिग्बन्धो वर्णितोऽरमरी ।
धर्मार्थकाममोक्षार्थे विनियोग इति स्मृतः ॥ ८ ॥

अस्य श्रीदुर्गाकवचस्य महेश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीदुर्गा

---

१ 'वक्ष्येहं' ख पाठः । २ 'नित्य' क पाठः । ३ 'योगिगम्य' ख. पाठः ।
४ 'शानि' ख. पाठ. ।

देवता, दुं बीजं, ह्रीं शक्तिः, ॐ, कीलकं चतुर्वर्गसिद्धये पाठे विनियोगः । नम इति दिग्बन्धः । ध्यानम्—

दूर्वानिभां त्रिनयनां विलसत्किरीटां
शङ्खाब्जखड्गशरखेटकशूलचापान् ।
संतर्जनीं च दधतीं महिषासनस्थां
दुर्गां नवारकुलपीठगतां भजेऽहम् ॥

ॐ मे पातु शिरो दुर्गा ह्रीं मे पातु ललाटकम् ।
दुं नेत्रेऽष्टाक्षरा पातु चक्रीं पातु श्रुती मम ॥ ९ ॥
मठं गण्डौ च मे पातु देवेशी रक्तकुण्डला ।
वायुर्नासां सदा पातु रक्तबीजनिसूदिनी ॥ १० ॥
लवणं पातु मे चोष्ठौ चामुण्डा चण्डघातिनी ।
भेकीबीजं सदा पातु दन्तान् मे रक्तदन्तिका ॥ ११ ॥
ॐह्रींश्रीं पातु मे कण्ठं नीलकण्ठाङ्गवासिनी ।
ॐऐंक्रीं पातु मे स्कन्धौ स्कन्दमाता महेश्वरी ॥ १२ ॥
ॐसौः क्रीं मे पातु बाहू देवेशी बगलामुखी ।
ऐंश्रींह्रीं पातु मे हस्तौ शिवाशतनिनादिनी ॥ १३ ॥
सौः ऐंह्रीं पातु मे वक्षो देवता विन्ध्यवासिनी ।
ॐह्रींश्रींक्रीं पातु कुक्षिं मम मातङ्गिनी परा ॥ १४ ॥
श्रींह्रींऐं पातु मे पार्श्वौ हिमाचलनिवासिनी ।
ॐक्लींहूंऐं पातु पृष्ठं मम दुर्गातिहारिणी ॥ १५ ॥
ॐक्रींहूं पातु मे नाभिं देवी नारायणी सदा ।
ॐऐंक्रींसौः सदा पातु कटिं कात्यायनी मम ॥ १६ ॥
ॐह्रींश्रींह्रीं पातु शिश्नं देवी श्रीभगमालिनी ।
ऐंसौः क्रींसौः पातु गुह्यं गुह्यकेश्वरपूजिता ॥ १७ ॥
ॐऐंह्रींश्रींद्सौः पायाद्गुरू मम मनोन्मना ।

ओंजुंसःसौः पातु जानू जगदीश्वरपूजिता ॥ १८ ॥
ओंऐंक्लीं मे पातु जङ्घे मेरुपर्वतवासिनी ।
ओंह्रौंश्रींगों सदा पातु गुल्फौ मम गणेश्वरी ॥ १९ ॥
ओंह्रींदुं पातु मे पादौ पार्वती षोडशाक्षरी ।
पूर्वे मां पातु ब्रह्माणी वह्नौ मां वैष्णवी तथा ॥ २० ॥
दक्षिणे चण्डिका पातु नैर्ऋत्ये नारसिंहिका ।
पश्चिमे पातु वाराही वायव्ये माऽपराजिता ॥ २१ ॥
उत्तरे पातु कौमारी चैशान्यां शाम्भवी तथा ।
ऊर्ध्वं दुर्गा सदा पातु पातालस्ताच्छिवा सदा ॥ २२ ॥
प्रभाते त्रिपुरा पातु मध्याह्ने मां महेश्वरी ।
सायं सरस्वती पातु निशीथे च्छिन्नमस्तका ॥ २३ ॥
निशान्ते भैरवी पातु सर्वदा भद्रकालिका ।
अग्नेरम्बा च मां पातु जलान्मां जगदम्बिका ॥ २४ ॥
वायोर्मां पातु वाग्देवी वनाद् वनजलोचना ।
सिंहात् सिंहासना पातु सर्पात् सर्पान्तकासना ॥ २५ ॥
रोगान्मां राजमातङ्गी भूताद् भूतेशवल्लभा ।
यक्षेभ्यो यक्षिणी पातु रक्षोभ्यो राक्षसान्तका ॥ २६ ॥
भूतप्रेतपिशाचेभ्यः सुमुखी पातु मां सदा ।
सर्वत्र सर्वदा पातु ओंह्रीं दुर्गा नवाक्षरा ॥ २७ ॥
इतीदं कवचं गुह्यं दुर्गासर्वस्वमुत्तमम् ।
मन्त्रगर्भं महेशानि कवचेश्वरसंज्ञकम् ॥ २८ ॥
वित्तदं पुण्यदं पुण्यं वर्म सिद्धिप्रदं कलौ ।
अष्टसिद्धिप्रदं गोप्यं परापररहस्यकम् ॥ २९ ॥
श्रेयस्करं मनुमयं रोगनाशकरं परम् ।
महापातककोटिघ्नं मानदं च यशस्करम् ॥ ३० ॥

अश्वमेधमहस्रस्य फलदं परमार्थदम् ।
अत्यन्तगोप्यं देवेशि कवचं मन्त्रसिद्धिदम् ॥ ३१ ॥
पठनात् सिद्धिदं लोके धारणान्मुक्तिदं शिवे ।
रवौ भूर्जे लिखेद् धीमान् कृत्वा कर्माह्निकं प्रिये ॥ ३२ ॥
श्रीचक्राग्रेऽष्टगन्धेन साधको मन्त्रसिद्धये ।
लिखित्वा धारयेद् बाहौ गुटिकां पुण्यवर्धिनीम् ॥ ३३ ॥
किं किं न साधयेल्लोके गुटिका वर्मणोऽचिरात् ।
गुटिकां धारयेन्मूर्ध्नि राजानं वशमानयेत् ॥ ३४ ॥
धनार्थी[1] धारयेत् कण्ठे पुत्रार्थी[2] कुक्षिमण्डले ।
तामेवं धारयेद् देवि लिखित्वा भूर्जपत्रके ॥ ३५ ॥
श्वेतसूत्रेण संवेष्ट्य लाक्षया परिवेष्टयेत् ।
सुवर्णेनाथ संवेष्ट्य धारयेद् रक्तरज्जुना ॥ ३६ ॥
गुटिका कामदा देवि देवानामपि दुर्लभा ।
कवचस्यास्य[3] गुटिका धृता मुक्तिप्रदायिनी ॥ ३७ ॥
कवचस्यास्य देवेशि वर्णितुं नैव शक्यते ।
महिमा च महादेवि जिह्वाकोटिशतैरपि ॥ ३८ ॥
अदातव्यमिदं वर्म मन्त्रगर्भं रहस्यकम् ।
अवक्तव्यं महापुण्यं सर्वसारस्वतप्रदम् ॥ ३९ ॥
अदीक्षिताय नो दद्यात् कुचैलाय दुरात्मने ।
अन्यशिष्याय दुष्टाय निन्दकाय कुलार्थिनाम् ॥ ४० ॥
दीक्षिताय कुलीनाय गुरुभक्तिरताय च ।
शान्ताय कुलसक्ताय शाक्ताय कुलकामिने ॥ ४१ ॥
इदं वर्म शिवे दत्त्वा कुलभागी भवेन्नरः ।
इदं रहस्यं परमं दुर्गाकवचमुत्तमम् ।

---

१ 'धनार्थे' ख. पाठः । २ 'पुत्रार्थे' घ. पाठः । 'शु' ख. पाठः ।

गुह्यं गोप्यतमं गोप्यं गोपनीयं स्वयोनिवत् ॥ ४२ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये दुर्गाकवचनिरूपणं
नाम चत्वारिंशः पटलः ॥ ४८ ॥

—:※:—

अथ

एकोनपञ्चाशत्तमः पटलः ।



श्रीभैरव उवाच ।

अधुना शृणु वक्ष्यामि दुर्गासर्वस्वमीश्वरि ।
रहस्यं मम देवानां दुर्लभं जन्मिनामपि ॥ १ ॥
श्रीदुर्गातन्त्रमुद्दिष्टसारं त्रैलोक्यकारणम् ।
मन्त्रनामसहस्रं च दुर्गायाः पुण्यदं परम् ॥ २ ॥
यं पठित्वा शिवे धृत्वा देवीनामसहस्रकम् ।
इह भोगी परत्रापि जीवन्मुक्तो भवेन्नरः ॥ ३ ॥
इदं नामसहस्रं ते मन्त्रगर्भं रहस्यकम् ।
अश्वमेधायुतात् पुण्यं लोके सौभाग्यवर्धनम् ॥ ४ ॥
श्रेयस्करं विश्ववन्द्यं सर्वदेवनमस्कृतम् ।
गुह्यं गोप्यतमं देवि पठनात् सिद्धिदायकम् ॥ ५ ॥

अस्य श्रीदुर्गानामसहस्रपाठस्य, श्रीमहेश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीदुर्गा देवता, दुं बीजं, ह्रीं शक्तिः, ॐ कीलकं, धर्मार्थकाममोक्षार्थे

' १ ' सर्वदेवाना ' क. पाठः ।

सहस्रनामपाठे विनियोगः । ध्यानम्—

दूर्वानिभां त्रिनयनां विलसत्किरीटां
शङ्खाब्जखड्गशरखेटकशूलचापान् ।
संतर्जनीं च दधतीं महिषासनस्थां
दुर्गां नवारकुलपीठगतां भजेऽहम् ॥

ॐह्रींदुं जगदम्बा भा भद्रिका भद्रकालिका ।
अचण्डा चण्डिका चण्डी चण्डमुण्डनिषूदिनी ॥ ६ ॥
अनसूया तुटिस्तारा कृत्तिका कुब्जिका लया ।
प्रलया स्थितिः संभूतिर्विभूतिर्भयनाशिनी ॥ ७ ॥
महामाया महाविद्या मूलविद्या *चिदीश्वरी ।
मदालसा मदोत्तुङ्गा मदिरा मदनप्रिया ॥ ८ ॥
आलिर्व्यालप्रसूः पुण्या पवित्रा परमेश्वरी ।
आदिदेवी कला कान्ता त्रिपुरा जगदीश्वरी ॥ ९ ॥
मनोन्मना महालक्ष्मीः सिद्धलक्ष्मीः सरस्वती ।
सरित्कादम्बरी गोधा गुह्यकाली गणेश्वरी ॥ १० ॥
गणाम्बिका जया तापी तपना तापहारिणी ।
तपोमयी दुरालम्बा दुष्टग्रहनिवारिणी ॥ ११ ॥
दुःखहा सुखदा साध्वी परमामृतप्रसूः सुरा ।
सुधा सुधांशुनिलया प्रलयानलसंन्निभा ॥ १२ ॥
समस्ता संपदम्भोजनिलया कर्णिकालया ।
विद्येश्वरी विश्वमयी विराड् छन्दो गतिर्मतिः ॥ १३ ॥
धृतिर्दा दाम्भिकी दोला लोपामुद्रा पटीयसी ।
गरिष्ठारिष्टहाऽदुष्टा कृपा काशी कुलाकुला ॥ १४ ॥
अकुलस्था पदन्यासा न्यासरूपा निरूपिणी ।

---

* 'चिदे नमः' पृथक् नाम । १ प्रतिश्च क. पाठ ।

त्रिरूपाची कोटराची कुलकान्तापराजिता ॥ १५ ॥
अजिता कुलिका लम्पा लम्पटा त्रिपुरेश्वरी ।
त्रियी (१००) वेदविन्यासा संन्यासा सुमतिर्भया ॥ १६ ॥
अभया स्वर्मुखी[1] देवी महोपधिरलम्बुसा ।
चपला चन्द्रिका चण्डा चण्डमुण्डनिखूदिनी ॥ १७ ॥
चापलाची मदाविष्टा मदिरारुणलोचना ।
पुरी त्रिपुरसु[2] रम्भा रमा रामा मनोहरा[3] ॥ १८ ॥
संध्या संध्याभ्रशीला च शाला श्यामपयोधरा ।
शशाङ्कमुकुटा श्यामा सुरा सुन्दरलोचना ॥ १९ ॥
विषमाची विशालाची वाशा[4] वागीश्वरी शिला ।
मनःशिला च कस्तूरी मृगनाभिर्मृगेक्षणा ॥ २० ॥
मृगारिवाहना माध्वी[5] मानदा मत्तभाषिणी ।
नारसिंही वामदेवी वामा वामश्रुतिप्रिया ॥ २१ ॥
पुण्या पुण्यगतिः पुण्या पुत्री पुण्यजनप्रिया ।
चामुण्डा चोग्रचण्डा च महाचण्डाऽतमाऽतमाः ॥ २२ ॥
तमस्विनी प्रभा ज्योत्स्ना महज्ज्योतिःस्वरूपिणी ।
सुरूपा सद्गतिः सा[6]ध्वी सदसद्रूपराजिता ॥ २३ ॥
सृष्टिः स्थितिः क्षेमकरी क्षमा क्षामोन्नतस्तनी ।
क्षोणी क्षयकरी क्षीणा शर्वस्था[8] शिववल्लभा ॥ २४ ॥
दन्तुरा दाडिमप्रीतिर्दया दाम्भिकखूदिनी ।
राक्षसी डाकिनी योग्या योगिनी[9] योगवल्लभा ॥ २५ ॥
कबन्धा कन्धरा कृष्णा[10] कृत्तिका कण्टकान्तका ।

---

१ 'दुर्मुख' क पाठ । २ मनोरमा ङ पाठ । ३ 'वशा' क पाठ । ४ 'माध्वी' ङ पाठ । ५ 'सूत्र' क पाठ । ६ 'तपस्विनी महा' क. पाठ. । ७ स्वर्गति' क पाठ । ८ 'शवस्था' क ख. पाठ. । ९ 'योगि' ङ. पाठ । १० विद्या ङ पाठ ।

कलङ्करहिता काली कम्पा काश्मीरवल्लभा ॥ २६ ॥
काशी कीर्तिप्रदा काञ्ची काश्मीरी कोकिलस्वना ।
प्रभावती (२००) महारौद्री रुद्रपत्नी रुजापहा ॥ २७ ॥
रतिः स्तुतिस्तरीस्तुर्या तोतुलाऽतलवासिनी ।
तपःप्रिया शरच्छेष्टा पङ्कुपुत्री यमस्वसा ॥ २८ ॥
यामी यमान्तका याम्या यमुना स्वर्नदी तडित् ।
नारायणी विश्वमाता भवानी पापनाशिनी ॥ २९ ॥
विगता विगतप्रश्ना कृष्णा कृष्टासिधारिणी ।
वारी वारा वरधरा वरदा वीरसूदिनी ॥ ३० ॥
वीरसूर्वामनाकारा दीर्घसूत्रा दयावती ।
दरी धनप्रदा धात्री धात्रीवल्ली महोदरी ॥ ३१ ॥
गणेश्वरी गया काञ्ची काञ्चीकिङ्किणिघण्टिका ।
माया मायावती मत्ता प्रमत्ता प्रभेश्वरी ॥ ३२ ॥
पौरन्दरी शची शीता शीतातपस्वभावजा ।
स्वाभाविकगुणा गण्या गाम्भीर्यगुणभूषणा ॥ ३३ ॥
मूर्तिः सूर्यकला सुप्ता सप्तसप्तिस्वरूपिणी ।
तेजस्विनी सदानन्दा सभामन्तोपवर्धिनी ॥ ३४ ॥
तर्पणा कर्पणा होता सङ्कल्पा शुभमन्त्रिका ।
दर्भा द्रोणिकला श्रान्ता समिद्धा सुरवेदिका ॥ ३५ ॥
धूम्राहुतिश्चरमतिश्चामीकररुचिश्चिता ।
चिन्तानलेश्वरी नेलोकरा नीलसरस्वती ॥ ३६ ॥
अपर्णा सुफला चत्रा सभया निर्भयामया ।
भीमस्वना भर्गशिरा भास्वती भाकरा विभा ॥ ३७ ॥
विभावरी नदी नन्द्या नन्द्यावर्तप्रवर्तिनी ।

---

१ 'समिधा' = पाठ । २ 'नन्द्या कान्द्या' = पाठ ।

पृथ्वीधरा विश्वधरा (३००) विश्वगर्भा प्रवर्तिका ॥ ३८ ॥
विश्वमाया विश्वभाला विश्वम्भरविलासिनी ।
उरगेशा पद्मनागा पद्मनाभप्रसूः प्रजा ॥ ३९ ॥
तोरणा तुलसी दीक्षा दक्षा दाक्षायणी द्युतिः ।
संपुटा शयना शय्या शासना शमनान्तका ॥ ४० ॥
श्यामाकवर्णा शार्दूली शम्पा शीलांशुवल्लभा ।
स्तुत्या प्रणीता नियतिः कम्पना कम्पहारिणी ॥ ४१ ॥
चम्पकाभा चरा चीनादीना दीनजनप्रिया ।
वसुन्धरा वामवेशी वसुनाथा वटेश्वरी ॥ ४२ ॥
समुद्रा सङ्गमा पूर्णाऽन्तरालां तरुवासिनी ।
पार्वती पामरी मान्या माननीया मधुप्रिया ॥ ४३ ॥
माधवी मधुपानस्था मन्दिरा मन्दुरा मृगी ।
मोमुग्धां रूपा रेवा रेवती रमणी रमा ॥ ४४ ॥
ऋद्धिहस्ता सिद्धिहस्ता अन्नपूर्णा महेश्वरी ।
अन्नरूपा जगज्ज्योतिः समस्तासुरघातिनी ॥ ४५ ॥
गारुडी गगनालम्बा लम्बमानकचप्रिया ।
पीताम्बरा पीतपुष्पा पूतना गीतवल्लभा ॥ ४६ ॥
बलाका जगदन्ता च जरा जयवरप्रदा ।
प्रीतिः कटोरवदना करालरदना रमा ॥ ४७ ॥
जिह्वाहस्ता च बगला प्रणया विनयप्रदा ।
किरी करालवपुषी शेमुषी मक्षिका मषी ॥ ४८ ॥
उत्तीर्णा तर्णिका तीक्ष्णा श्लक्ष्णा कामेश्वरी शिवा ।
शिवपत्नी सरोजाक्षी पद्महस्ता (४००) सरस्वती ॥ ४९ ॥
कमलाक्षी कमलजा करवालविहारिणी ।

---

१ 'विश्वधरा' ख ङ पाठ । २ 'तरला' क ख पाठ । ३ 'सुमुखा' ङ पाठ ।

कविपूज्या कविगतिः कविरूपा कविप्रिया ॥ ५० ॥
कदली कदलीरूपा कदलीवनवासिनी ।
कलमीता कलहदा कलहा कलहातुरा ॥ ५१ ॥
कस्तूरीमृगसंस्था च कस्तूरीमृगरूपिणी ।
कठोरा करमाला च कठोरकुचधारिणी ॥ ५२ ॥
यज्ञमाता यज्ञभोक्त्री यज्ञेशी यज्ञसंभवा ।
यज्ञसिद्धिः क्रियासिद्धिर्यज्ञाङ्गी यज्ञरक्षिका ॥ ५३ ॥
वैष्णवी विष्णुरूपा च विष्णुमातृस्वरूपिणी ।
विष्णुमाया विशालाक्षी विशालनयनोज्ज्वला ॥ ५४ ॥
शिवमाता शिवाख्या च शिवदा शिवरूपिणी ।
गायत्री चैव सावित्री ब्रह्माणी ब्रह्मरूपिणी ॥ ५५ ॥
दुर्गस्था दुर्गरूपा च दुर्गा दुर्गतिनाशिनी ।
माहेश्वरी च सर्वाद्या शर्वाणी सर्वमङ्गला ॥ ५६ ॥
सूर्यकोटिसहस्राभा चन्द्रकोटिनिभानना ।
समुद्रकोटिगम्भीरा वायुकोटिमहाबला ॥ ५७ ॥
सोमसूर्याग्निमध्यस्था मणिमण्डलवासिनी ।
द्वादशारसरोजस्था सूर्यमण्डलवासिनी ॥ ५८ ॥
अकलङ्कशशाङ्काभा षोडशारनिवासिनी ।
हृत्पद्मनिलयाऽभीमा महाभैरवनादिनी ॥ ५९ ॥
वर्णाढ्या वर्णरहिता पञ्चाशद्वर्णभेदिनी ।
भवानी भूतिदा भूतिर्भूतिदात्री च भैरवी ॥ ६० ॥
भैरवाचारनिरता भूतभैरवसेविता ।
कामेश्वरी कामरूपा कामतापविमोचिनी ॥ ६१ ॥
गणेशजननी देवी गणेशवरदायिनी ।
गतिदा गतिदा गीता गौतमी गुरुसेविता ॥ ६२ ॥

दीनदुःखहरा दीनतापनिर्मूलकारिणी ।
दयाशीला दयासारा दयासागरसंस्थिता ॥ ६३ ॥
नृत्यप्रिया नृत्यरता नर्तकी नर्तकप्रिया ।
नारायणी नरेन्द्रस्था नरमुण्डास्थिमालिनी ॥ ६४ ॥
भैरवी भैरवाराध्या भीमा भीमवरप्रदा (५००) ।
भुवना भुवनाराध्या भवानी भूतिवर्धिनी ॥ ६५ ॥
महिषासुरहन्त्री च रक्तबीजविनाशिनी ।
धनुर्बाणधरा नित्या धूम्रलोचननाशिनी ॥ ६६ ॥
कुलीना कुलमार्गस्था कुलमार्गप्रकाशिनी ।
पञ्चाशद्वर्णबीजाढ्या पञ्चाशन्मुण्डमालिका ॥ ६७ ॥
षडङ्गयुवतीपूज्या षडङ्गरूपवर्जिता ।
कालमाता कालरात्रिः काली कमलवासिनी ॥ ६८ ॥
कमला कान्तिरूपा च कामराजेश्वरी क्रिया ।
माया मतिर्महामाया भयदा भयहारिका ॥ ६९ ॥
नारी नारायणी गण्या नारायणगृहप्रिया ।
मदिरापानसन्तुष्टा मदिरामोदधारिणी ॥ ७० ॥
तथ्या पथ्या कृती रथ्या रथस्था विततस्वरा ।
महती रागिणी भार्गी शुचिहासा हरीश्वरी ॥ ७१ ॥
हरिद्रांशुलसिता लक्ष्मीनायकसुन्दरी ।
अम्बालिकाम्बा देवेशी अनघाग्निशिखा श्रुतिः ॥ ७२ ॥
अलसान्पगतिश्चान्त्यानन्तानन्तगुणाश्रया ।
आद्या चादित्यसङ्काशा आदित्यकुलसुन्दरी ॥ ७३ ॥
आत्मरूपाधिशमनी आदिमायादिदेवता ।
इन्द्रभस्मरिनद्योतिरिनाग्निशशिलोचना ॥ ७४ ॥
इन्द्रावरजसंस्तुत्या इला चेच्छुरमप्रिया ।

ईश्वरी ईशवनिता ईशा केशववल्लभा ॥ ७५ ॥
उमा उर्वी उरुभुजा उत्तुङ्गा चोच्चवाहना ।
उत्तङ्गा चोत्तमा ध्येया उल्लासा चोरुगर्विणी ॥ ७६ ॥
ऊष्मा ऊणा च गुर्वङ्गी ऊर्ध्वार्ची ऊर्ध्वमस्तका ।
ऋद्धिर्ऋचा ऋवर्णेशी ऋणहर्त्री ऋवान्तिकी ॥ ७७ ॥
ऋद्धिजा चारुवस्त्रा च ऋणिवासा (६००) महालया ।
लृकारा लृक्कुरा लीना लृकारा वरधारिणी ॥ ७८ ॥
एणाङ्कमुकुटा चेहा चारुचन्द्रकला कला ।
ऐकारगतिरैश्वर्यदायिनी चैश्वरी गतिः ॥ ७९ ॥
ओंकारा बीजरूपा च औत्रिकी वेत्रधारिणी ।
अम्बिका लम्पिका पम्पा अःस्वरोद्धाररूपिणी ॥ ८० ॥
काली च भद्रकाली च कालिका कालवल्लभा ।
कदम्बनिलया कन्था काञ्चीमण्डनमण्डिता ॥ ८१ ॥
कलङ्करहिता कूर्मा काञ्चनाभा करीरगा ।
कनकाचलवासा च कारुण्याकुलमानसा ॥ ८२ ॥
कुलस्था कौलिनी कुल्या कुरुकुल्ला कपालिनी ।
कपालकुलनिर्विण्णा क्रींकारा कञ्जलोचना ॥ ८३ ॥
खञ्जनाक्षी खड्गधरा खेटकायुधभूषणा ।
खर्पराढ्या च खलहा खेटिनी खेचरी खगा ॥ ८४ ॥
खगायुधा खगगतिः खकाराक्षरभूषणा ।
गणाम्बा च गजगतिर्गणेशजननी गदा ॥ ८५ ॥
गोधा गदाधरा माज्या गगनेशी मही मला ।
घृणिर्घा घण्टभूषाङ्गी घुसृणाभा गणेश्वरी ॥ ८६ ॥

अचामुण्डो ' ह पाठः । २ ' ऋद्धिजाभा ' ३ पाठः । ३ ' गदापरमाज्या ' पाठः । ४ ' घृणा ' ५ पाठः ।

घनसारप्रिया सान्या घवर्णकृतभूषणा ।
ङान्ता ङवर्णमुकुटा कवर्गकृतभूषणा ॥ ८७ ॥
चान्द्री चान्द्रिस्तुता चार्वी चन्द्रिका चण्डनिःस्वना ।
चञ्चरीकस्वना देवी चञ्चच्चामीकराङ्गदा ॥ ८८ ॥
छत्रिका छुरिका छन्दा छत्रचामरभूषणा ।
जंकारी जलजिह्वा च जृम्भिका जलयोगिनी ॥ ८९ ॥
जटाजूटधरा जातिर्जातीपुष्पसमानना ।
जलेश्वरी जगद्ध्येया जानकी जननी जटा ॥ ९० ॥
झङ्झा झरी झरत्कारी (७००) झरत्काञ्चीरकिङ्किणी ।
ञिण्टिठका झम्पकृद् झम्पा झम्पत्रासनिवारिणी ॥ ९१ ॥
टाणुरूपा टङ्कहस्ता टवर्णोच्चरसंमता ।
टङ्कायुधा महातथ्या टङ्कारकरणा टसी ॥ ९२ ॥
ठक्कुरा ठत्करा ठानी डिण्डीरवसना ढली ।
ढण्ढानिलमयी ढक्का ढक्कारकरा ढसा ॥ ९३ ॥
णान्ता णीलायुधा नम्रा णवर्णोच्चरभूषणा ।
तरुणी तुन्दिला तोन्दा तामसी तामसप्रिया ॥ ९४ ॥
ताम्रानना ताम्रकरा ताम्राम्बरधरा तुला ।
तापत्रयहरा तापी तैलासक्ता तिलोत्तमा ॥ ९५ ॥
स्थाणुपत्नी स्थली स्थूला स्थितिः स्थैर्यधरा स्थुला ।
दन्तिनी दन्तुरा दात्री देवकी देवनायिका ॥ ९६ ॥
दमिनी शमिनी दण्ड्या दण्डहस्ता दुरानतिः ।
दुर्वारा दुर्गविद्रावी द्राक्षा द्राविडवासिनी ॥ ९७ ॥
दुरस्था दुन्दुभिध्वाना दरदा दरनाशिनी ।
दुःखघ्नी दुर्भगाऽदुष्टा दया दाम्भिकभयनाशिनी ॥ ९८ ॥

---

१ 'अकाराक्षर' क. ख. पाठ । २ 'घनसारकृता' ङ. पाठ । ३ 'नीलायुधा' ख ग पाठ ।

धर्म्या धर्मप्रसूर्धन्या धनदा धातुवल्लभा ।
धनुर्धरा धनुर्वल्ली धातुष्कवरदायिनी ॥ ९९ ॥
धूमाली धूम्रवदना धूमश्रीर्धूम्रलोचना ।
नलिनी नर्तकी नान्ता नग्ना नलिनलोचना ॥ १०० ॥
निर्मला निगमाचारा निम्नगा नगजा निमिः ।
नीलग्रीवा निरीहा च नीपोपवनवासिनी ॥ १०१ ॥
निरञ्जना जनी जन्या (८००) निद्रालुर्नीरवासिनी ।
नटिनी नाट्यनिरता नवनीतप्रियाऽनिला ॥ १०२ ॥
नारायणी निराकारा निर्लेपा नित्यवल्लभा ।
पद्मावती पद्मकरा पुत्रदा पुत्रवत्सला ॥ १०३ ॥
परोक्षरा पुरी पाठा पीनश्रोत्रा पुलोमजा ।
पुष्पिणी पुस्तकधरा पटुः पाठीनवाहना ॥ १०४ ॥
पापघ्नी शंखिनी[1] पाली पत्नी परमसुन्दरी ।
पिशाची च पिशाचघ्नी पानपात्रधरा पुटा ॥ १०५ ॥
पूर्णिमा पञ्चमी पौत्री पुरुषवरप्रदा ।
पञ्चयज्ञा पञ्चशरी पञ्चाशतिमनुप्रिया ॥ १०६ ॥
पाञ्चाली पञ्चमुद्रा च पूजा पूर्णमनोरथा ।
फलिनी फलदात्री च फल्गुहस्ता फणिप्रिया ॥ १०७ ॥
फिरङ्गहा स्फीतमतिः स्फीतिः स्फीतिमती स्फुरा ।
बलमाया बलस्तुत्या बिन्दुसेना बलाबला ॥ १०८ ॥
बगलेश्वरपूज्या च बलिनी बलवर्धिनी ।
बुद्धमाता बौद्धमतिर्बन्दा बन्धनमोचिनी ॥ १०९ ॥
भगिनी भगमाला च भगलिङ्गामृतद्रवा ।

---

१ 'शिखा' ग. पाठः । २ 'पलिनी' ख. ग. पाठः । ३ 'तुरा च' ङ. पाठः ।
४ 'बलस्तम्भा' ङ. पाठः ।

भीमेश्वरी च भेरुण्डा भगेशी भगसर्पिणी ॥ ११० ॥
भगलिङ्गस्थिता भग्या भाग्यदा भगमालिनी ।
मत्ता मनोहरा मीना मैनाकजननी मुरी ॥ १११ ॥
मुरली मानवी होत्री महाम्बिजनमोदिता ।
मत्तमातङ्गगा मांद्री मरालगतिरञ्चला ॥ ११२ ॥
यज्ञेश्वरेश्वरी यज्ञा यजुर्वेदप्रियाश्रिता ।
यशोवती यतिस्था च यतात्मा यतिवल्लभा ॥ ११३ ॥
यवनी यौवनस्था च यवा यज्ञजनाश्रया ।
यज्ञसूत्रप्रदा ज्येष्ठा यज्ञभू(९००)र्यूपमूलिनी ॥ ११४ ॥
रञ्जिता राजपत्नी च राजभूषफलप्रदा ।
रजोवती रजश्चित्रा राज्यदा राज्यवर्धिनी ॥ ११५ ॥
रात्री रात्रिञ्चरेशानी रोगघ्नी त्रिपुरेश्वरी ।
लुलिता लतिका लाप्या लोपा ललनलालसा ॥ ११६ ॥
लाटीरद्रुमवासा च पाटीरद्रुमवर्तिनी ।
लङ्का ललज्जटाजूटा लक्षिता लोकसुन्दरी ॥ ११७ ॥
लोकेशवरदा लेयाँ लयकर्त्री महालया ।
वेदिर्विलग्ना वाणी च वीणा वेणुर्वनेश्वरी ॥ ११८ ॥
वन्दमाना ववर्णाढ्या वाराही वीरमातृका ।
शङ्खिनी शङ्खवलया शङ्खायुधधरा शमा ॥ ११९ ॥
शशिमण्डलमध्यस्था शीतलाम्बुनिवासिनी ।
श्मशानस्था महाघोरा श्मशाननिलनेश्वरी ॥ १२० ॥
सिन्धुः सूत्रधरा सत्रा समस्तकुलचारिणी ।
सप्तमी सात्त्विकी सत्या सत्रम्याऽसृक्सुदिनी ॥ १२१ ॥

१ 'भागेश्वरी' ङ. पाठः । २ 'मीठी' ग. पाठः । ३ 'दृता' क. ख. पाठौ ।
४ 'लीया' ङ. पाठः ।

सुरेश्वरी सम्पदाद्या समस्ताचलचारिणी ।
समदा संमितिः संमा सवना सवनेश्वरी ॥ १२२ ॥
हंसी हरप्रिया हास्या हरिनेत्रा हराम्बिका ।
हेषा हटेश्वरी हेरा हलिनी हलदायिनी ॥ १२३ ॥
हेहा हाहारवा हाला हालाहलहताशया ।
क्षमा क्षेमप्रदा क्षामा क्षौमाम्बरधरा क्षया ॥ १२३ ॥
क्षितिः क्षीरप्रिया लक्ष्मीः क्षितिभृत्तनया क्षुधा ।
क्षत्रियी ब्राह्मणी क्षेत्रा क्षपा क्षःबीजमण्डिता ॥ १२४ ॥
क्षंक्षःबीजस्वरूपा च क्षकाराद्यैरमातृका ।
दुर्गन्धनाशिनी दूर्वा दुर्गमा दुर्गवासिनी ॥ १२५ ॥
दुर्गा दुर्गार्तिशमनी ऊँदूंदुंबीजमण्डिता (१०००) ।
इति नामसहस्रं तु मन्त्रगर्भं महाफलम् ॥ १२६ ॥
दुर्गाया दुर्गतिहरं सर्वदेवनमस्कृतम् ।
सर्वमन्त्रमयं दिव्यं देवदानवपूजितम् ॥ १२७ ॥
श्रेयस्करं महापुण्यं महापातकनाशनम् ।
यः पठेत् पाठयेद्वापि शृणोति श्रावयेदपि ॥ १२८ ॥
स महापातकैर्मुक्तो देवदानवसेवितः ।
इह लोके श्रियं भुक्त्वा परत्र त्रिदिवं व्रजेत् ॥ १२९ ॥
दुर्गानामसहस्रं तु मूलमन्त्रैकसाधनम् ।
अर्धरात्रे पठेद्वीरो मधुरस्त्रयसेवितः ॥ १३० ॥
त्रिवारं वर्मपूर्वं तु भवेद्वागीशसंनिभः ।
यः पठेद् देवि मध्याह्ने स्त्रीपुत्रो मुक्तकुन्तलः ॥ १३१ ॥
तस्य वैरिकुलं त्रस्येद् दर्शनाद् दैत्यसूदिनि ।

---

१ 'क्षरया' ङ. पाठः । २ 'राकारमातृका' ङ पाठः । ३ 'पूजितः' क, ख. पाठः । ४ 'मर्दिनि' क ख. पाठः ।

दहनादेव देवेशि पतङ्गकुलमद्रिजे ॥ १३२ ॥
यः पठेद्वेतसीमूले सायं पूजितभैरवः ।
तस्यास्यकुहराद् वाणी निःसरेद्वद्यपद्यभाक्[1] ॥ १३३ ॥
यः पठेत् सततं देवि शयने क्षीरताकुलः ।
स भवेद्वैरिविद्वंसी धनेन धनदोपमः ॥ १३४ ॥
वाग्भिर्वागीशसदृशः कवित्वेन सितोपमः ।
तेजसा सूर्यसङ्काशो यशसा शशिसन्निभः ॥ १३५ ॥
बलेन वायुतुल्योऽपि लक्ष्म्या गीर्वाणनायकः ।
देवि किं बहुनोक्तेन स भवेद्भैरवोपमः ॥ १३६ ॥
स्तम्भनाकर्षणोच्चाट-वशीकरणकक्षमः ।
रवौ भूर्जे लिखेद् देवि निशीथे वाष्टगन्धकैः ॥ १३७ ॥
मस्तन्यरेतोराजस्कैः साधको मन्त्रसाधकः ।
लिखित्वा वेष्टयेन्नामसहस्रमणिमीश्वरि ॥ १३८ ॥
श्वेतसूत्रेण संवेष्ट्य लाक्षया परिवेष्टयेत् ।
सुवर्णरजताद्यैश्च वेष्टयेत् पीतसूत्रकैः ॥ १३९ ॥
संपूज्य गुटिकां देवि शुभेऽह्नि साधकोत्तमः ।
धारयेन्मूर्ध्नि वा बाहौ गुटिकां कामदायिनीम् ॥ १४० ॥
रणे रिपून् विजित्याशु कल्याणी गृहमाविशेत् ।
वन्ध्या वामभुजे धृत्वा कृत्वा साधकपूजनम् ॥ १४१ ॥
पुत्रान् लभेन्महादेवि साक्षाद्वैश्रवणोपमान् ।
गुटिकैषा महादिव्या गोप्या कामफलप्रदा ॥ १४२ ॥
साधकैः सततं पूज्या साक्षाद् दुर्गास्वरूपिणी ।
योऽर्चयेत् साधको दुर्गां गुटिका धारयेत् प्रिये ॥ १४३ ॥
पठेद्धर्म शिवे मन्त्रनामसाहस्रिकीं पराम् ।

---

१ 'पद्यभा' इति पाठः ।

अङ्गस्तोत्रं फलं तस्य देवि वक्ष्येऽधुना शृणु ॥ १४४ ॥
वने राजकुले वापि दुर्भिक्षे शत्रुसङ्कटे ।
अरण्ये प्रान्तरे दुर्गे श्मशाने सिन्धुसङ्कटे ॥ १४५ ॥
बाल्ये यक्षपिशाचादिभूतप्रेतभये तथा ।
वीरो विगतभीर्देवि सर्वत्र विजयी भवेत् ॥ १४६ ॥
स्तम्भयेद्वातसूर्याम्बुचन्द्रादीन् साधकोत्तमः ।
मोहयेत् त्रिजगत् सद्यः कान्ताश्चाकर्षयेद् ध्रुवम् ॥ १४७ ॥
मारयेदखिलाञ्छत्रूनुच्चाटयति वैरिणः ।
वशयेद् देवताः सद्यः किं पुनर्मानवांस्त्रिये ॥ १४८ ॥
शमयेदखिलान् रोगान् महोत्पातानुपद्रवान् ।
किं किं न लभते वीरो दुर्गापञ्चाङ्गपूजनात् ॥ १४९ ॥
इदं रहस्यं दुर्गाया अष्टाचर्या महेश्वरि ।
सर्वस्वं सारतत्त्वं च मूलविद्यामयं परम् ॥ १५० ॥
महाचीनक्रमस्थानां साधकानां यशस्करम् ।
पठेत् संपूजयेद् देव्या मन्त्रनामसहस्रकम् ॥ १५१ ॥
इदं सारं हि तन्त्राणां तत्त्वानां तत्त्वमुत्तमम् ।
दुर्गानामसहस्रं तु तव भक्त्या प्रकाशितम् ॥ १५२ ॥
अभक्ताय न दातव्यं गोप्तव्यं पशुसङ्कटे ।
अभक्तेभ्योऽपि पुत्रेभ्यो दत्त्वा नरकमाप्नुयात् ॥ १५३ ॥
दीक्षिताय कुलीनाय गुरुभक्तिरताय च ।
शान्ताय भक्तियुक्ताय देयं नामसहस्रकम् ॥ १५४ ॥
विना दानं न गृह्णीयान्न दद्याद् दक्षिणां विना ।
दत्त्वा गृहीत्वाप्युभयोः सिद्धिर्नास्ति ध्रुवम् ॥ १५५ ॥
इदं नामसहस्रं ते गुह्यं गोप्यतमं शिवे ।

---

* 'वशुपतिपो' इ पाठः ।

तत्त्वं भक्त्या मयाख्यातं गोपनीयं स्वयोनिवत् ॥ १५६ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये दुर्गासहस्रनामनिरूपण-मेकोनपञ्चाशत्तमः पटलः ॥ ४९ ॥

अथ

पञ्चाशत्तमः पटलः ।

श्रीभैरव उवाच ।

अधुना देवि वक्ष्यामि दुर्गास्तोत्रं मनोहरम् ।
मूलमन्त्रमयं दिव्यं सर्वसारस्वतप्रदम् ॥ १ ॥
दुःखार्तिशमनं पुण्यं साधकानां जयप्रदम् ।
दुर्गाया अङ्गभूतं तु स्तोत्रराजं परात्परम् ॥ २ ॥
श्रीदुर्गास्तोत्रराजस्य ऋषिर्देवो महेश्वरः ।
छन्दोऽनुष्टुप् देवता च श्रीदुर्गाष्टाक्षरा शिवे ॥ ३ ॥
दुं बीजं च परा शक्तिर्विश्वं कीलकमद्रिजे ।
धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः ॥ ४ ॥

अस्य श्रीदुर्गास्तोत्रराजस्य, श्रीमहेश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीदुर्गाष्टाक्षरा देवता, दुं बीजं, ह्रीं शक्तिः, नमः कीलकम्, धर्मार्थ-काममोक्षार्थे पाठे विनियोगः । ध्यानम्-

दूर्वानिभां त्रिनयनां विलसत्किरीटां
शङ्खाब्जखड्गशरखेटकशूलचापान् ।

सन्तर्जनीं च दधतीं महिषासनस्थां
दुर्गां नवारकुलपीठगतां भजेऽहम् ॥ ५ ॥
तारं हारं मन्त्रमालासु बीजं ध्यायेदन्तर्योऽम्ब लम्बालकान्तः ।
तस्य स्मारं स्मारमाद्विद्वयीं द्राग् रम्भायाति स्वर्गता कामवश्या ॥६॥
मायां जपेद्यस्तव मन्त्रमध्ये दुर्गे सदा दुर्गतिखेदखिन्नः ।
भवेत् स भूमौ नृपमौलिमालामाणिक्यनिर्घृष्टपदारविन्दः ॥७॥
चाक्रिकं यदि जपेत्तवाम्बिके चक्रमध्यगत ईश्वरेश्वरि ।
साधको भवति चक्रवर्तिनां नायको नयविलासकोविदः ॥८॥
चक्रिबीजमपरं स्मरेच्छिवे योऽरिवर्गविहिताहितव्ययः ।
आजिमण्डलगतो जयेद्रिपून् वाजिवारणरथाश्रितो नरः ॥ ९ ॥
दुर्गाबीजं यो जपेत् प्रेतभूमौ साय मायाभस्मना लिप्तकायः ।
गीर्वाणाना नायको देवि मन्त्री भूत्वा राज्यं प्राज्यमाढ्यं करोति ।१०।
वाग्भवबीजं यदि साधको जपेत् प्रियाकुचद्वन्द्वविमर्दनक्षमः ।
समस्तकान्ताजननेत्रवागुराविलासहंसो भविता स पार्वति ॥११॥
विश्वं विश्वेश्वरि यदि जपेत् कामकेलीकलान्ते
रात्रौ मात्राक्षरविलसितन्यास ईशानिवासः ।
तस्य स्मेराननसरसिजा भ्राजमानाङ्गलक्ष्मी-
र्वश्यावश्यं सुरपुरवधूमौलिमालोर्वशी सा ॥ १२ ॥
भूगेहाश्रितवह्निपूतविलसन्नागारवृत्ताश्रित-
भ्रम्यारोल्लसितात्रिकोणविलसच्छ्रीबिन्दुपीठस्थिताम् ।
ध्यायेच्चेतसि शर्वपत्नि भवतीं माध्वीरसाघूर्णितां
यो मन्त्री स भविष्यति स्मरसमः क्षीणा धरण्यां दिवि ।१३।
दुर्गास्तवं मनुमय मनुराजमौलि
माणिक्यमुत्तमशिवाङ्गरहस्यभूतम् ।

---

१ 'नि वास' क पाठः 'निवास' ङ पाठः ।

प्रातः पठेद्यदि जपावसरेऽर्चनायां
भूमौ भवेत् स नृपतिर्दिवि देवनाथः ॥ १४ ॥
इति स्तोत्रं महापुण्यं पञ्चाङ्गैकशिरोमणिम् ।
यः पठेदर्धरात्रे तु तस्य वश्यं जगत्त्रयम् ॥ १५ ॥
इदं पञ्चाङ्गमखिलं श्रीदुर्गाया रहस्यकम् ।
सर्वसिद्धिप्रदं गुह्यं सर्वाशापरिपूरकम् ॥ १६ ॥
गुह्यं मन्त्ररहस्यं तु तव भक्त्या प्रकाशितम् ।
अभक्तायाप्रदातव्यमित्याज्ञा पारमेश्वरी ॥ १७ ॥

श्रीदेव्युवाच ।

भगवन् भवतानेन कथनेन महेश्वर ।
श्रीपञ्चाङ्गस्य दुर्गाया ह्यद्य क्रीतास्म्यहं परम् ॥ १८ ॥

श्रीभैरव उवाच ।

इदं रहस्यं परमं दुर्गासर्वस्वमुत्तमम् ।
पञ्चाङ्गं वर्णितं गोप्यं गोपनीयं स्वयोनिवत् ॥ १९ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये दुर्गास्तोत्रनिरूपणं पञ्चाशत्तमः पटलः ॥ ५० ॥

* समाप्तं श्रीदुर्गापञ्चाङ्गम् । *

अथ

एकपञ्चाशत्तमः पटलः ।

—※※:०:※※—

अथ दुर्गारहस्यम् ।

श्रीशैलराजशिखरे नानाद्रुमसमाकुले ।
वसन्तलक्ष्मीनिलये समासीनमुमापतिम् ॥ १ ॥
एकदा देवमीशानं शशिशेखरमीश्वरम् ।
उमाश्लिष्टार्धवपुषं देवदानवसेवितम् ॥ २ ॥
ध्यानासक्तान्तश्चित्तयं जटाजूटलतारुणम् ।
भस्माङ्गरागधवलं नारायणनमस्कृतम् ॥ ३ ॥
ब्रह्मादिदेवप्रणतं गान्धर्वजनवन्दितम् ।
यक्षराक्षसनागेन्द्र-नगेन्द्रकुलपूजितम् ॥ ४ ॥
भैरवं भैरवाकारं गिरीशं परमेश्वरम् ।
उत्थाय विनता भूत्वा पर्यपृच्छत पार्वती ॥ ५ ॥
भगवन् सर्वलोकेश सर्वलोकनमस्कृत ।
गुणातीत गुणाध्यक्ष भूतेश्वर महेश्वर ॥ ६ ॥
सृजत्यवति नित्यान्ते संहरत्यमितं जगत् ।
चराचरं भवानेव किं पुनर्जपसि प्रभो ॥ ७ ॥
किं ध्यायसि महादेव सततं भक्तवत्सल ।
वद शीघ्रं दयाम्भोधे यद्यहं प्रेयसी तव ॥ ८ ॥

श्रीभैरव उवाच ।

देवि किं ते प्रवक्ष्यामि रहस्यमिदमद्भुतम् ।
सर्वस्वं सारभूतं मे सर्वेषां तन्त्रमुत्तमम् ॥ ९ ॥
लक्षवारसहस्राणि वारितासि पुनः पुनः ।
स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ॥ १० ॥
अद्य भक्त्या तव स्नेहाद्वक्ष्यामि परमाद्भुतम् ।
देवीरहस्यतन्त्राख्यं तन्त्रराजं महेश्वरि ॥ ११ ॥
सर्वागमैकमुकुटं सर्वसारमयं ध्रुवम् ।
सर्वमन्त्रमयं दिव्यं पटलैर्दशभिर्युतम् ॥ १२ ॥
अनुक्रमणिकां दिव्यां शृणु तत्रस्थ पार्वति ।
यस्याः श्रवणमात्रेण कोटिपूजाफलं लभेत् ॥ १३ ॥
श्रीविद्यानिर्णयो देवि मन्त्रसाधनकोऽपरः ।
शिवमन्त्रप्रकाशाख्यो दीक्षाविधिरनुत्तमः ॥ १४ ॥
पुरश्चर्याविधिर्देवि पञ्चरत्नेश्वरीक्रमः ।
होमसाधनकश्चैव चक्रपूजाविधिः परः ॥ १५ ॥
आचारनिर्णयो देवि दशमो दशमीविधिः ।
तत्रादौ देवि वक्ष्येऽहं दुर्गाभुवनमद्भुतम् ॥ १६ ॥
जयं नाम महादिव्यं बहुविस्तारविस्तृतम् ।
नानारत्नसमाकीर्णं सूर्यकोटिसमप्रभम् ॥ १७ ॥
इन्द्रगोपकवर्णं च चन्द्रकोटिमनोहरम् ।
अप्रमेयमसंख्येयमगम्यं सर्ववादिनाम् ॥ १८ ॥
इदं दिव्यं जयं नाम भुवनं परमेश्वरि ।
तत्रैव वसते दुर्गा नवरूपात्मिका परा ॥ १९ ॥
या देवदेवी वरदा सर्वलोकैकसुन्दरी ।
या दुर्गेति स्मृता लोके ब्रह्माण्डोदरवर्तिनी ॥ २० ॥
विष्णुना तपसा पूर्वमाराध्य परमेश्वरीम् ।

महिषस्यासुरेन्द्रस्य वधार्थायावतारिता ॥ २१ ॥
योगमाया महामाया सर्वदा परमेश्वरी ।
तामेवाहर्निशं ध्याये श्रीविद्या परमां जपे ॥ २२ ॥
तामद्याहं प्रवक्ष्यामि विद्याचरणदायिनीम् ।
यां श्रुत्वा स शिवो जातः पञ्चनादात्मकः शिवः ॥ २३ ॥
यदाभूद्वरिहीना सा दुर्गा निष्कलरूपिणी ।
साद्याभुवनरूपापि महाज्योतिःस्वरूपिणी ॥ २४ ॥
तदा शङ्कैकाले तु ज्योतीरूपो महेश्वरि ।
शिवः प्रभामण्डलतो निर्गतोऽचेतनो विभुः ॥ २५ ॥
अशृणोन्नादमाधारं जगतां बीजमुत्तमम् ।
अपि सस्मर मायां स्वं सृष्टोऽग्रमनुनायकः ॥ २६ ॥
इति श्रुत्वा परानादं तारमित्यभिधीयते ।
शिवो जजाप सहसा बीजं त्रिजगतां शिवे ॥ २७ ॥
तेन मायेतिशब्दं स शुश्राव गगनात्ततः ।
दुर्गां भज महेशान सदानन्दालयं परम् ॥ २८ ॥
बिन्दुनादमयो देवः शिवोऽभूत् परमेश्वरः ।
ततो नादं स शुश्राव दुष्टवर्णविवर्जितम् ॥ २९ ॥
दुर्गां भजेति स शिवः पञ्चनादात्मकोऽभवत् ।
ततो जप्त्वा परा विद्यामसृजज्जगदम्बिके ॥ ३० ॥
आदौ वायुं शिवः सृष्ट्वा ततः सृष्टिर्यथेच्छया ।
इच्छामात्रं शिवे विश्वं विश्वेश्वरि चराचरम् ॥ ३१ ॥
ससर्ज लवमात्रं स शितिकण्ठः शिवः शिवे ।

---

१ 'शङ्क' ङ पाठः । २ 'अव' क ग च पाठ । ३ 'अग्रे-मनुनायक' ख पाठ । ४ 'दाम भज' क ङ ग पाठ. । ५ 'दुर्गां जपे' ख पाठ ।

इतीमां गुप्तविद्यां तु लब्ध्वा गुरुपदार्चनात् ॥ ३२ ॥
किंकिं न साधयेल्लोके साधको मन्त्रसाधकः ।
वस्त्रं वह्निं च कामं च धनं वृत्तं च साधकः ॥ ३३ ॥
वशीकुर्याद्यथायुद्ध्या येन तुर्याकुलं भवेत् ।
श्रीचक्रमिदमाधारं देव्या विभवकारणम् ॥ ३४ ॥
गुह्यं सर्वस्वमम्नायाः, पूज्यं साधकसत्तमैः ।
चक्रं लिखेन्महादेवि पूज्यमब्जार्कयोर्दलैः ॥ ३५ ॥
येन देवी महामाया श्रीदुर्गाशु प्रसीदति ।
चक्रे संपूजयेद्यस्तु नीलाभा दाहनीं द्युतिम् ॥ ३६ ॥
वह्नीन्दुसूर्याम्बरज मण्डलाकारमर्चयेत् ।
लसन्मुकुटरोचिष्णुः स भवेत् साधकोत्तमः ॥ ३७ ॥
तस्य शङ्खनिभा कीर्तिर्भ्रमते भुवनत्रये ।
[2]ससुरासुरगन्धर्वं वशं याति महेश्वरि ॥ ३८ ॥
[3]शरासवरसानन्दमयो भूत्वा जपेन्मनुम् ।
खेटकास्तस्य तुष्यन्ति साधकस्याङ्गपूजनात् ॥ ३९ ॥
तस्य रोगा विनश्यन्ति सर्वे शूलादयोऽचिरात् ।
तर्जनीं तस्य वीक्ष्यापि रिपवो यान्ति विद्रुताः ॥ ४० ॥
तस्य गेहे धनं गावो महिष्या विष्टर गजाः ।
दुर्गा रत्नवती भूमिस्तस्य पीठं मनोहरम् ॥ ४१ ॥
साधकस्य भवेदेवं सपत्तिर्बहुधार्चनात् ।
एवं ध्यायेन्महादेवीं दुर्गां दुर्गतिनाशिनीम् ॥ ४२ ॥
ध्यानेन येन देवेन्द्रो भविष्यति हि साधकः ।
इतीदं देवि तत्त्व ते कथितं परमाद्भुतम् ।
अवक्तव्यमदातव्य गोपनीयं स्वयोनिवत् ॥ ४३ ॥

---

१ 'राचिष्क' ख पाठ । २ 'महासिद्धि. सता हस्ते' ख पाठः ।
३ 'मारावद' ख पाठ । ४ 'तव कथयामि' क ग ङ पाठ ।

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये मन्त्रविधाननिरूपणमेकपञ्चाशत्तमः पटलः ॥ ५१ ॥

—:※:०:※:—

अथ

द्विपञ्चाशत्तमः पटलः ।

श्रीभैरव उवाच ।

मन्त्रसाधनकं वक्ष्ये रहस्यं सर्वमन्त्रिणाम् ।
येन साधनमात्रेण मन्त्रः सिद्धिमुपैष्यति ॥ १ ॥
विनोत्कीलनमन्त्रेण न मन्त्रः सिद्धिदायकः ।
विना सञ्जीवनेनापि संपुटेन विना शिवे ॥ २ ॥
विश्वमादौ मनोर्दद्यात् तारं दद्यात् तथाञ्जले ।
मनुरुत्कीलनाख्योऽयं सर्वसिद्धिप्रदः[1] शिवे ॥ ३ ॥
चाक्रिकं नाम बीजं तु दद्यादादौ मनोः शिवे ।
तदग्रे नाम विन्यस्य तारमाये तदग्रतः ॥ ४ ॥
मनोरन्तेऽस्त्रमरीं दद्यान्मनुः सञ्जीवनाभिधः[2] ।
ततः सिद्धमनुं देवि जपेन्मान्त्रिकसत्तमः ॥ ५ ॥
यथाशक्त्या ततो दद्यात् संपुटं साधकोत्तमैः[3] ।
तारं परां चाक्रिबीजं विश्वमन्तेऽभिधं न्यसेत् ॥ ६ ॥

---

[1] 'मनुः' ख. पाठः । २ 'मथः' ख. पाठः । ३ 'साधकेश्वरः' ख. पाठः

संपुटाख्योऽस्त्ययं मन्त्रः सर्वाशापूरकः स्मृतः ।
एवं संस्कृतमीशानि मनुं देव्या जपेत् सदा ॥ ७ ॥
सर्वसिद्धिमवाप्नोति साधको मन्त्रसाधकः ।
इतीदं मन्त्रतत्त्वं ते साधनाख्यं महेश्वरि ।
गुह्यातिगुह्यगुप्तं च गोप्तव्यं साधकोत्तमैः ॥ ८ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये मन्त्रसाधननिरूपणं द्विपञ्चाशत्तमः पटलः ॥ ५२ ॥

अथ

त्रिपञ्चाशत्तमः पटलः ।

श्रीभैरव उवाच ।
अधुना शिवविद्यां ते वक्ष्यामि परमार्थदाम् ।
सर्वविद्यामयीं साध्यां सर्वतन्त्रेषु गोपिताम् ॥ १ ॥
केवलं यो जपेच्छाक्तं मनुं शैवं तु नो जपेत् ।
जन्मकोटिषु जप्तोऽपि नं मनुः सिद्धिभाग्भवेत् ॥ २ ॥
यस्या देव्यास्तु यो देवः शिवस्तस्याः शिवो भवेत् ।
तेन विद्या महादेवि कलौ सिद्ध्यति सत्वरम् ॥ ३ ॥
कालिकाया महाकालः सुमुख्या अमृतेश्वरः ।
कामेश्वरस्त्रिकूटायाः शिव इत्येवमीश्वरि ॥ ४ ॥
छिन्नायाः कालरुद्रस्तु शारदायाः शिवः शिवः ।

---

१ 'सर्वसिद्धि' ख. पाठ. । २ 'सिद्धिदो' ख. पाठ. । ३ 'शिव' क. ख. ग. पाठः ।

श्रीभैरवः कालराज्याः शिव इत्येवमीश्वरि ॥ ५ ॥
ज्वालामुख्या महादेवो वाग्देव्या विजयेश्वरः ।
ईश्वरो भुवनेश्वर्याः शिव इत्येवमीश्वरि ॥ ६ ॥
विश्वनाथस्तु पार्वत्या राज्ञ्या भूतेश्वरः शिवः ।
मीडायास्तु विरूपाक्षः शिव इत्येवमीश्वरि ॥ ७ ॥
नीलकण्ठस्तु दुर्गायाः शिव इत्येवमीश्वरि ।
शिलाया वामदेवस्तु शिवः प्रोक्तः सुरेश्वरि ॥ ८ ॥
सद्योजातस्तु तारायाः शिव इत्येवमीश्वरि ।
अथ दुर्गाशिवस्यादौ वक्ष्ये मूलमनुं परम् ॥ ९ ॥
यं ज्ञात्वा परमेशानि विद्या सिद्ध्यति सत्वरम् ।
श्रीनीलकण्ठमन्त्रस्य दक्षिणामूर्तिरीश्वरः ॥ १० ॥
ऋषिरुक्तो मयानुष्टुब् वर्णितो वीरवन्दिते ।
दुर्गेश्वरो नीलकण्ठो देवता कथितो मया ॥ ११ ॥
हरितं बीजमीशानि तारं शक्तिः स्मृता शिवे ।
कीलकं विश्वमाख्यातं नियोगो मनुसिद्धये ॥ १२ ॥
तारचन्द्रकडिम्बाद्यैः[1] षड्दीर्घैर्न्यासमाचरेत् ।
ध्यानमस्य शिवस्याद्य शृणु गुप्ततमं शुभे ॥ १३ ॥

बन्धूककाञ्चननिभं रुचिराक्षमालां
पाशाङ्कुशौ वरमभीतिमपि दधानम् ।
हस्तैः शशाङ्कशकलाभरणं त्रिनेत्रं
श्रीनीलकण्ठमुमया श्रितमाश्रयामि ॥ १४ ॥

मन्त्रोद्धारं प्रवक्ष्यामि सर्वसिद्धिमयं परम् ।
दुर्गारहस्यभूतं च शृणु पार्वति सत्वरम् ॥ १५ ॥
प्रणवं हरितं व्योमं नीलकण्ठाय चोद्धरेत् ।

---

१ 'डिम्बाद्यैः' ख. घ. ङ पाठः ।

दुर्गेशनीलकण्ठस्य मन्त्रोद्धारो दशाक्षरः ॥ १६ ॥
अनेन मन्त्रराजेन जप्तमात्रेण पार्वति ।
दुर्गायाः परमा विद्या कलौ सिद्ध्यति सत्वरम् ॥ १७
इतीदं गुह्यगुप्तातिगुह्यं सर्वस्वमीश्वरि ।
रहस्यं नीलकण्ठस्य गोपनीयं मुमुक्षुभिः ॥ १८ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये शिवविद्यानिरूपणं त्रिपञ्चाशत्तमः पटलः ॥ ५३ ॥

—⟨⟩—

अथ

चतुष्पञ्चाशत्तमः पटलः ।

———:※:———

श्रीभैरव उवाच ।
दीक्षाविधिं प्रवक्ष्यामि साधकानां हितेच्छया ।
विधाय विधिवद् दीक्षां पशुत्वात् स विमुच्यते ॥ १ ॥
दीयते परमा सिद्धिः क्षीयते कर्मवासना ।
प्राप्यते परमं धाम तेन दीक्षा स्मृता शिवे ॥ २ ॥
ब्रह्मादिकीटपर्यन्तं जगत् सर्वं महेश्वरि ।
पशुत्वान्मोहितं देव्या तस्माद् दीक्षां चरेत् कलौ ॥ ३ ॥
श्रीदेव्याः सेवया देवि चक्रार्चनपुरःसरम् ।
साधकः पशुभावेन मुक्तो ज्ञानं भजेत् ततः ॥ ४ ॥

---

१ 'गुह्यगुह्याति' ख. पाठः ।

दीक्षितो याति चरणं दीक्षाहीनो भवेत् पशुः ।
दीक्षितस्तु भवेज्ज्ञानी पशुभावोज्झितो विभुः ॥ ५ ॥
सर्वपातकमुक्तो हि लभेत् स परमां गतिम् ।
यस्य दीक्षा शिवे नास्ति जीवनान्तं च जन्मिनः ॥ ६ ॥
स जातु नोत्तरेद् देवि निरयाम्बुनिधेः क्वचित् ।
दीक्षाहीनस्य देवेशि पशोः कुत्सितजन्मनः ॥ ७ ॥
पापौघोऽन्तिकमायाति पुण्यं दूरं पलायते ।
तस्माद्यत्नेन दीक्षैषा ग्राह्या कृतिभिरुत्तमैः ॥ ८ ॥
बाल्ये वा यौवने वापि वार्धक्येऽपि सुरेश्वरि ।
अन्यथा निरयी पापी पितॄन् क्षान्निरयं नयेत् ॥ ९ ॥
अन्ते पशुर्मनुष्यः सन् पशुयोनिं व्रजेच्छिवे ।
पूर्वपुण्यार्जितां प्राप्य वासनां परमार्थदाम् ॥ १० ॥
गुरुं कुलीनं तन्त्रज्ञं सर्वाङ्गैः सुमनोहरम् ।
लब्ध्वा भक्त्या प्रसन्नादौ तोषयित्वा विशेषतः ॥ ११ ॥
प्रणामैर्वन्दनैर्देवि दक्षिणाम्बरपूर्वकम् ।
सिद्धसाध्यारिनिर्णीतां दीक्षां देव्या यथाविधि ॥ १२ ॥
गृह्णीयात् परया भक्त्या साधको येन जायते ।
गुरुश्च शिष्यं रम्याङ्गं सर्वाङ्गैः सुमनोहरम् ॥ १३ ॥
गुरुभक्तिरतं बालं कुलीनं गर्भदीक्षितम् ।
देवीभक्तिरतं भक्तं पापभीतं कृतात्मकम् ॥ १४ ॥
दृष्ट्वा दीक्षां परां दद्यात् कृतभागी भवेत् ततः ।

श्रीदेव्युवाच ।

भगवन् करुणाम्भोधे साधकानां हितेच्छया ।
कदा दीक्षा परा ग्राह्या साधकैस्तद्वदस्व मे ॥ १५ ॥

---

१ 'यमा' ख. पाठः । २ 'पशुर्मनुष्य. स' ख. पाठः । ३ 'भक्ता' ख. पाठः ।

श्रीभैरव उवाच ।


सुदिने शुभनक्षत्रे सङ्क्रान्तावयनद्वये ।
नवरात्रिदिने पित्रोः श्राद्धे स्वजनिवासरे ॥ १६ ॥
नववर्षदिने देवि चन्द्रसूर्योपरागके ।
शिवरात्र्यां स्वजन्मर्क्षे दीक्षां कुर्याद्विचक्षणः ॥ १७ ॥
तत्रादौ शुभनक्षत्रे स्नात्वा संपूज्य भैरवम् ।
गत्वा नदीतटं देवि तथा देवालयं क्वचित् ॥ १८ ॥
देवताग्रे गुरुं नत्वा नत्वा सन्तोषहेतवे ।
द्वीपं वोपवनं[1] पुण्यं देवानामपि दुर्लभम् ॥ १९ ॥
देवतायतनं वापि प्राप्याशु प्रणमेत् ततः ।
तत्रादावासनं देवि संशोध्य गुरुमर्चयेत् ॥ २० ॥
भूताग्निःसार्यं देवेशि स्वाङ्गन्यासं चरेत् ततः ।
प्राङ्मुखो गुरुरासीनश्चोत्तराभिमुखं शिशुम् ॥ २१ ॥
संस्थाप्य विधिवद् देवि देवीं स्मृत्वा परामयः[2] ।
देवताग्रे पराप्रीत्यै दीक्षां दद्याद्यथाविधि ॥ २२ ॥
कर्णमूले महाविद्या श्रीविद्या साधकेश्वरैः[3] ।
आनन्दसङ्कुलहृदयः शनैस्त्रिस्त्रिः समर्पयेत् ॥ २३ ॥
गणेशस्य च गायत्र्यास्ततो मृत्युञ्जयस्य च ।
इष्टदेव्याः शिवस्यापि ततो विद्या समर्पयेत् ॥ २४ ॥
शिष्यो दीक्षां तु संप्राप्य गुरुमभ्यर्च्य शक्तितः ।
तोषयित्वा प्रणामैश्च दक्षिणाभिः शुभाम्बरैः ॥ २५ ॥
तदाज्ञां सहसादाय पूजायै परमेश्वरि ।
यन्त्रं मन्त्रं च मालां च पञ्चाङ्गं परमेश्वरि ॥ २६ ॥

---

१ 'दद्यात्' ख पाठ । २ 'वा परम' ङ पाठ । ३ 'साधकोत्तम' ङ पाठ । ४ 'जपाय' ङ ।

पुनर्जातु शिवे शिष्यो गुरवेऽपि न शंसेत् ।
इति दीक्षाविधेः सारभूतं गुह्यं रहस्यकम् ।
गुह्यातिगुह्यगुप्तं तु न प्रकाश्यं मुमुक्षुभिः ॥ २७ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये दीक्षानिरूपणं
चतुष्पञ्चाशत्तमः पटलः ॥ ५४ ॥



अथ

पञ्चपञ्चाशत्तमः पटलः ।



श्रीभैरव उवाच ।

अधुना मन्त्रराजस्य पुरश्चरणमुत्तमम् ।
वक्ष्ये सिद्धिप्रदो येन मन्त्रः कल्पद्रुमो भवेत् ॥ १ ॥
एकदा सुदिने देवि सुनक्षत्रे सुपर्वणि ।
पुरश्चरणकर्मादौ आरभेत् साधकोत्तमः ॥ २ ॥
वर्णलक्षं जपेन्मन्त्रं तदर्धं वा महेश्वरि[1] ।
एकलक्षावधि कुर्यान्नातो न्यूनं कदाचन ॥ ३ ॥
लक्षसंख्या प्रकर्तव्या साधकैश्चेन्न शक्यते ।
एकलक्षं प्रजप्तव्यं नातो न्यूनं कदाचन ॥ ४ ॥

श्रीदेव्युवाच ।

लक्षजप्तो मनुर्देव यदि कल्पद्रुमो भवेत् ।

---

१ 'सुरेश्वरि' ङ. पाठः ।

तदा किं साधको लोके लभतत्त्वं वदस्व मे ॥ ५ ॥
कस्य हस्तेन मन्त्रस्य पुरश्चरणकक्रियाम् ।
कारयेत् साधकश्चैतत् संशयं छिन्धि धूर्जटे ॥ ६ ॥

श्रीभैरव उवाच ।

साधु पृष्टं त्वया देवि शृणु वक्ष्यामि पार्वति ।
न कदाचित् स्वयं कुर्यादादौ मन्त्रपुरस्क्रियाम् ॥ ७ ॥
गुरुहस्तेन देवेशि साधकस्य करेण वा ।
कुर्यान्मन्त्रवरस्यास्य पुरश्चरणकक्रियाम् ॥ ८ ॥
जीवहीनो यथा देहो सर्वकर्मसु न क्षमः ।
पुरश्चरणहीनोऽपि[1] न मन्त्रः फलदायकः ॥ ९ ॥
जपाद् दशांशतो होमस्तद्दशांशेन तर्पणम् ।
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम् ॥ १० ॥
मन्त्रस्यादौ प्रमादाच्चेत् स्वयं कुर्यात् पुरस्क्रियाम् ।
तदा जाप्यं भवेद् व्यर्थं क्षेत्रेष्विव घृतं यथा ॥ ११ ॥
तस्माच्च गुरुहस्तेन साधकस्य करेण वा ।
पुरश्चर्यां स्वमन्त्रस्य कारयेत् साधकोत्तमः ॥ १२ ॥
पुरश्चरणसङ्कल्पं दत्त्वादौ गुरवे शिवे ।
जपं यथाविधि कुर्याद् गुरुः कुलमनोः प्रिये ॥ १३ ॥
गुरोः पादप्रसादेन पुरश्चर्याफलं शिवे ।
गृह्णीयात् साधको देवि गुरुं सन्तोषयेत् ततः ॥ १४ ॥
येन मन्त्रः कलौ शीघ्रमिष्टसिद्धिप्रदो भवेत् ।
दक्षिणाभिः शुभैर्वस्त्रैर्यथाविभवमात्मनः ॥ १५ ॥
ततः स्वयं पुरश्चर्यां वह्नीः कुर्यात् तु साधकः ।
पर्वताग्रे नदीतीरे देवतायतने तथा ॥ १६ ॥

---

१ 'पो हि' ङ. पाठः । २ 'मष्ट' । ग पाठः ।

एकान्ते च शुचौ देशे जपेन्नियतमानसः ।
ब्रह्मचर्यधरो वीरो मिताहारो जितेन्द्रियः ॥ १७ ॥
अनृतं मत्सरं दम्भं त्यजेत् प्रतिग्रहं तथा ।
पुरश्चरणकाले तु तद्धोमावसरे तथा ॥ १८ ॥
मूलं जप्त्वैकलक्षं तु कृत्वा होमं दशांशतः ।
साधकैः क्षत्रियेणापि दशांशं होममाचरेत् ॥ १९ ॥
तर्पयेत् सुहितो देवीं भोजयेत् साधकांस्ततः ।
पुरश्चर्याविधिश्चैष वर्णितः कुलसुन्दरि ॥ २० ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
अष्टम्यां वा चतुर्दश्यां पक्षयोरुभयोरपि ॥ २१ ॥
सूर्योदयात् समारभ्य यावत् सूर्योदयो भवेत् ।
तावज्जप्त्वा निरातङ्को मन्त्रः कल्पद्रुमो भवेत् ॥ २२ ॥
चन्द्रसूर्यग्रहे वापि प्रासादधि विमुक्तितः ।
यावत्संख्यामनुर्जप्तस्तावद्धोमादिकं चरेत् ॥ २३ ॥
सर्वसिद्धीश्वरो मन्त्रो भवेत् साधकवन्दिते ।
शरत्काले रवौ देवि जपेन्मन्त्रं यथाविधि ॥ २४ ॥
निशीथे रचयेद्धोमं स्वयंन्यस्ताहुतिं शिवे ।
तत्क्षणात् साधको देवि क्षत्रियोऽपि शुभं लभेत् ॥ २५ ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
गुरुमानीय संस्थाप्य देवतापूजनं चरेत् ॥ २६ ॥
वस्त्रालङ्कारहेमाद्यैः सन्तोष्य गुरुमेव च ।
तत्सुतं तत्सुतां चैव तस्य पत्नीं तथैव च ॥ २७ ॥
पूजयित्वा मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥ २८ ॥

---

१ 'दत्तन्यस्ता' क. ख. पाठः ।

सहस्रारे गुरोः पादपद्मं ध्यात्वा प्रपूज्य च ।
केवलं देवभावेन सर्वसिद्धीश्वरो भवेत् ॥ २९ ॥
गुरवे दक्षिणां दद्याद् यथाविभवमात्मनः ।
गुरोरनुज्ञामात्रेण दुष्टमन्त्रोऽपि सिद्ध्यति ॥ ३० ॥
इत्येष पटलो गुह्यो मन्त्रसारमयो ध्रुवः ।
अप्रकाश्यो न दातव्यो नाख्येयो ब्रह्मवादिभिः ॥ ३१ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये पुरश्चर्याविधिनिरूपणं पञ्चपञ्चाशत्तमः पटलः ॥ ५५ ॥

—.०❀०❀०:—

अथ

षट्पञ्चाशत्तमः पटलः ।

श्रीभैरव उवाच ।
अधुना देवि वक्ष्येऽहं[1] पञ्जरेश्वरीविधिम् ।
येन श्रवणमात्रेण विद्या सिद्ध्यति सत्वरम् ॥ १ ॥
विना पञ्जरेश्वरीमन्त्रजाप्यं
न सिद्धिर्भवेत् साधकस्योत्तमस्य ।
ततः पूजयेद् दीक्षितः श्रीगुरुं स्वं
समस्ताष्टसिद्धीश्वरं देवदेवि ॥ २ ॥
दुर्गायाः परमं तत्त्वं पञ्जरेश्वरीमयम् ।
शृणुष्वावहितो भूत्वा येन मुक्तिर्भवेत् क्षणे ॥ ३ ॥
श्रीदुर्गा शारदा शारी सुमुखी मङ्गलाह्वया ।

१ 'देवि' इ पाठः । २ 'भक्तिः' ख पाठः ।

पञ्चरत्नेश्वरी विद्या दुर्गायाः कथिता मया ॥ ४ ॥
सुदिने देवि दुर्गायाः पञ्चरत्नेश्वरीं जपेत् ।
वर्णलक्षपुरश्चर्याफलमाप्नोति साधकः ॥ ५ ॥
साधकेषु चतुर्ष्वेवं श्रीदुर्गासाधकः शिवे ।
श्रीगुरु वन्दनैः स्तुत्या तोषयित्वा धनैरपि ॥ ६ ॥
दीक्षामन्येषु शि[1]ष्ये तु दापयेत् साधकोत्तमः ।
येन मन्त्रो हि दुर्गायाः सद्यः स्फुरति भारती " ७ ॥
पञ्चस्वपि महादेवि साधकेषु कलौ युगे ।
पञ्चरत्नेश्वरीं दत्त्वा पुरश्चर्याफलं लभेत् ॥ ८ ॥
श्रीदुर्गोपासकश्चैकः शारदोपासकः परः ।
शारिकोपासकस्त्वन्यो मातङ्गास्तपरः शिवे ॥ ९ ॥
पञ्चमो बगलामुरुपाश्चैकत्र मिलिताश्च ते ।
पूजयेयुर्गुरुं देवि पञ्चरत्नेश्वरीं जपेत् ॥ १० ॥
अन्योन्य साधकाः पञ्च श्रीगुरोः पुरतः शिवे ।
पुरश्चर्याफल सिद्धं[1] प्रार्थयेयुर्गुरोस्ततः ॥ ११ ॥
एव सिद्धमनुर्लोके सर्वसिद्धिं प्रयच्छति ।

(१) तार माया चाक्रिक चक्रिदूर्वा-
वायव्यार्द्धेय विश्वमन्ते भवानि ।
दुर्गायास्ते वर्णितो मूलविद्या-
मन्त्रोद्धारो[2] गोपितोऽष्टाक्षरोऽयम् ॥ १२ ॥

(२) तार माया कामराजश्च शक्तिः
स्तम्भ तस्माद्भगवत्यै च नाम ।
भूतिस्तस्मादञ्जले ठद्वय स्यात्
प्रोक्त मुक्त्यै शारदा-मन्त्र एव ॥ १३ ॥

---

१ 'सिद्धिं' ख पाठः । २ 'वायव्यार्द्धं' ख पाठः ।

(३) तारं परा मातटसिन्धुराणाः
खं शर्म[1] तन्मध्यगतं च नाम ।
अन्तेऽस्मरी पार्वति शारिकाया-
स्त्रयोदशार्णो मनुरस्ति गोप्यः ॥ १४ ॥
(४) वाक् कामैमुच्छिष्टपदं त्रिमाय्य
चण्डालिनी[2] वै सुमुखी[3] च देवि ।
महापिशाची सकलात्रयाञ्जं
वनं मनुः स्यात् सुमुखीप्रियोऽयम्[4] ॥ १५ ॥
(५) तारं मठं बगलामुखि सर्व-
दुष्टानां वाचं मुखं स्तम्भय द्विः ।
पदं जिह्वां कीलय द्विर्मठं वा
तारं नीरं ब्रह्मणोऽस्त्यस्त्रविद्या ॥ १६ ॥
इत्येषा गुप्तविद्येयं प्रभावसहिता कलौ ।
पञ्चरत्नेश्वरी ग्राह्या पुरश्चरणसिद्धये ॥ १७ ॥
इतीदं तत्त्वमीशानि पुरश्चर्यारहस्यकम् ।
अनन्तफलदं गुह्यं गोपनीयं मुमुक्षुभिः ॥ १८ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये पञ्चरत्नेश्वरीविद्यानिरूपण षट्पञ्चाशत्तमः पटलः ॥ ५६ ॥

—:=०:*:=:—

१ 'शर्मतो मध्य' ख. पाठः । २ 'काम उच्छिष्ट' ख. पाठः । ३ 'चण्डालिनि वै सुमुखि च देवि महापिशाचि क. पाठः । ४ 'स्या' ख. पाठः ।

अथ

सप्तपञ्चाशत्तमः पटलः ।

श्रीभैरव उवाच ।

अथ होमविधिं वक्ष्ये सर्वतन्त्रेषु गोपितम् ।
दुर्गारहस्यकं सारं मन्त्रराजस्य पार्वति ॥ १ ॥
ध्यात्वा देवीं परां दुर्गां गुरुं ध्यात्वा सशाङ्किकम् ।
जपेच्छ्रीचक्रपुरतो निशीथे मन्त्रमीश्वरि ॥ २ ॥
अयुतं लक्षमेकं वा दशांशं होममाचरेत् ।
कोटिलक्षप्रजप्तस्य मन्त्रस्य सुरसुन्दरि ॥ ३ ॥
विना दशांशहोमेन न तत्फलमवाप्नुयात् ।
विना श्मशानगमनं नित्यहोमजपादयः ॥ ४ ॥
न सिद्ध्यन्ति वरारोहे कलौ भैरवशापतः ।
घृतपायसमृद्वीका-गुडपुष्पासिताक्षतैः ॥ ५ ॥
होमो दशांशतः कार्यो जपस्य सुरवन्दिते ।
पञ्चामृतेन देवेशि तद्दशांशेन तर्पयेत् ॥ ६ ॥
तर्पयित्वा दशांशेन पञ्चामृतमुखं सुधीः ।
तद्दशांशेन देवेशि इष्टगन्धेन मार्जयेत् ॥ ७ ॥
भोजयित्वा दशांशेन दीक्षितांश्च द्विजोत्तमान् ।
ततो देवि पुरश्चर्याफलमाप्नोति साधकः ॥ ८ ॥
अन्यथा सिद्धिहानिः स्याज्जप्तस्यापि मनोः सदा ।

श्रीदेव्युवाच ।

यस्य नो भवति शक्तिर्होमं कर्तुं दशांशतः ।
स कथं क्रियते होमं तद्वदस्व महेश्वर ॥ ९ ॥

श्रीभैरव उवाच

यस्य होमं शिवे कर्तुं शक्तिर्नास्ति दशांशतः ।
तस्य युक्तिं ब्रवीम्यद्य कौलिकानां हिताय च ॥ १० ॥
शुभेऽह्नि सारं देवेशि गत्वोपवनमण्डलम् ।
श्मशानं संमुखं धृत्वा पृष्ठे वा परमेश्वरि ॥ ११ ॥
श्मशानं प्रणमेद्भक्त्या साधकः साधकैः समम् ।
ज्वालाकरालवदने कल्पान्तदहनप्रिये ॥ १२ ॥
प्राणिप्राणालयोद्भूते चिते मेऽनुग्रहं कुरु ।
इति नत्वा महादेवि ज्ञात्वा दिग्भूतभैरवान् ॥ १३ ॥
निवसेत तत्र रात्रौ तु कुर्याद्धोमं कुलेश्वरि ।
ऐशान्यां दिशि देवेशि श्रीचक्रं तु विभावयेत् ॥ १४ ॥
संपूज्य विधिवन्मन्त्रैर्दिक्पालांस्तत्र पार्वति ।
गणेशं पूजयेत्तत्र पूजयेत् कुलयोगिनीः ॥ १५ ॥
तत्पूर्वतः खनेत् कुण्डं हुनेदाज्यं च विद्यया ।
त्रिकोणं कुण्डमीशानि हस्ताधोगाधमद्रिजे ॥ १६ ॥
हस्तैकविस्तृतं विश्वक् तस्मिंश्चक्रं विभावयेत् ।
बिन्दुं त्रिकोणं षट्कोणं वसुपत्रं त्रिवर्तुलम् ॥ १७ ॥
भूगृहाङ्गं मयाख्यातं वह्निचक्रं कुलार्चिते ।
गणेशधर्मवरुणाः कुबेरसहितास्ततः ॥ १८ ॥
पूजनीया विशेषेण गन्धाक्षतप्रसूनकैः ।
ब्राह्म्यादिमातरः पूज्या असिताद्याश्च भैरवाः ॥ १९ ॥
वसुपत्रेषु संपूज्या वह्निचक्रे महेश्वरि ।
माया च मोहिनी चैव तृतीया च मनोन्मना ॥ २० ॥

---

१ 'वेलावती शक्तिः' ख. पाठ. ।

मुक्तकेशी च मातङ्गी मदिराक्षो षडश्रके ।
त्रिकोणे यमुना गङ्गा सपूज्या च सरस्वती ॥ २१ ॥
बिन्दौ दुर्गा च सपूज्या गन्धपुष्पाक्षतैः शिवे ।
बिन्दावरणिमामन्त्र्य[1] मूलमन्त्रेण मान्त्रिकः ॥ २२ ॥
वह्निमावाह्य मूलेन तदावाहनमुद्रया ।
ओंरूरामप्रये स्वाहा मन्त्रेणेति सुरेश्वरि ॥ २३ ॥
वह्निं मूलेन संस्कृत्य कृत्वाज्यं घृतमीश्वरि ।
दशाशहोमसङ्ख्यं कुर्यान्मन्त्रस्य[2] साधकः ॥ २४ ॥
मालया दहने दद्यादाहुतीना शतत्रयम् ।
आहुतीः क्षत्रियन्यस्तास्तत्र वह्नौ हुनेत् प्रिये ॥ २५ ॥
पुष्पैः फलैराज्यमिश्रैस्ततो दद्याद् बलिं प्रिये ।
मकारैः पञ्चभिर्देवि पुनर्जप्त्वा च[3] पूर्ववत् ॥ २६ ॥
आहुतीना शतं दद्यादष्टोत्तरमधोमुखः ।
ततः साधकचक्रस्य क्षत्रियस्य च पार्वति ॥ २७ ॥
पूजा विधाय चक्रेऽस्मिंस्तोषयेन्नुतिभिर्गुरुम् ।
आशीर्भिर्वर्धयेत् क्षत्र येनाशु क्षोणिपो भवेत् ॥ २८ ॥
क्षत्रियोऽपि वदेत् तत्र पुरश्चर्याफल मनोः ।
लभस्व साधकश्रेष्ठ ततः पूर्णाहुतिं हुनेत् ॥ २९ ॥
ततो वर्म पठेद् देवि येन देवीमयो भवेत् ।
ततो देवीं च सशिवा मन्त्री सहारमुद्रया ॥ ३० ॥
साधकास्तर्पयित्वादौ मद्यपानादिभिः प्रिये ।
विसृज्य साधकान् देवीं सशिवां सपरिच्छदाम् ॥ ३१ ॥
पुरश्चर्याफलं प्राप्य साधको मुक्तिभाग् भवेत् ।
इत्येष पटलो दिव्यो मन्त्रपूजामयो ध्रुवः ।

---

१ 'बिन्दावावरणैवेव' क पाठः । २ 'मूलस्य' ख पाठ । ३ 'तु' ख ङ, पाठः ।

सर्वतन्त्रैकनिलयो गोपनीयो मुमुक्षुभिः ॥ ३२ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये होमविधिनिरूपणं सप्तपञ्चाशत्तमः पटलः ॥ ५७ ॥

—:※:—

अथ

अष्टापञ्चाशत्तमः पटलः ।

श्रीभैरव उवाच ।

अधुना चक्रपूजां ते वक्ष्यामि नगनन्दिनि ।
येन दुर्गा कलौ शीघ्रं वरदा भवति प्रिये ॥ १ ॥
एकादशावधि देवि साधकाः परमार्थदाः ।
एकादशापि चक्रे तु वर्णिताः साधकाः शुभाः ॥ २ ॥
उत्तमा नव देवेशि मध्यमाः पञ्च साधकाः ।
अधमास्तु त्रयो देवि न पूज्याश्चक्रमध्यगाः ॥ ३ ॥
विना चक्रार्चनं नैव नित्यपूजाजपादयः ।
फलदा योगिनीशापात् तस्माच्चक्रं प्रपूजयेत् ॥ ४ ॥
कुहूपूर्णेन्दुसंक्रान्ति-चतुर्दश्यष्टमीषु च ।
नवम्यां मङ्गले मन्दे चक्रपूजा शुभप्रदा ॥ ५ ॥
साधकाश्च सुतीर्थ्याश्च मिलिताः शिवमन्दिरे ।
देवतायतने वापि शून्ये गृह्यगटकेऽथ वा ॥ ६ ॥

---

३ ' पिकाः च. ट. पाठः ।

दिग्भूतभैरवान् देवि विचार्य पुरसाधकः ।
उपविश्यासने देवि संशोध्य वीरमण्डले ॥ ७ ॥
साधकानुपविश्याग्र कुर्यात् संकल्पमादरात् ।
न्यासं विधाय सर्वाङ्गे भूतशुद्ध्यादिकं चरेत् ॥ ८ ॥
तत्र प्राणान् प्रतिष्ठाप्य श्रीचक्रं पूजयेच्छिवे ।
आत्मश्रीचक्रयोर्मध्ये कुम्भस्थापनमाचरेत् ॥ ९ ॥
गौडी माध्वी तथा पैष्टी चासवं पूजयेच्छिवे ।
एतेषां रसमादाय तत्त्वतो भैरवार्चने ॥ १० ॥
आनन्दरसपूजायां तुष्यते परमेश्वरी ।
विप्राश्च क्षत्रिया वैश्याः शूद्राः पूज्याश्च पार्वति ॥ ११ ॥
गौडी विप्रेषु शुभदा माध्वी क्षत्रेषु चोत्तमा ।
वैश्येषु शुभदा पैष्टी शूद्रेषु शुभमासवम् ॥ १२ ॥
ब्रह्मक्षत्रियवैश्यानामानन्दस्तु शुभावहः ।
आसवं दूरतस्त्याज्यं साधकैस्तु मुमुक्षुभिः ॥ १३ ॥
अभावे तु सुरानन्दरसानां परमेश्वरि ।
मधुना पूजयेद् देवि देवमानन्दभैरवम् ॥ १४ ॥
द्रव्यं संशोध्य देवेशि मकारान् पञ्च शोधयेत् ।
श्रीचक्राग्रेऽर्चयेत् तत्र साधकान् भैरवागमे ॥ १५ ॥
तत्र संपूज्य यन्त्रेशं देवमानन्दभैरवम् ।
योगिनीः पूजयेत् तत्र वटुकं पूजयेत् ततः ॥ १६ ॥
गणेशं क्षेत्रपालांश्च पूजयेच्चक्रनायिकाम् ।
सन्तर्प्य देवान् पितॄंश्च मुनीन् वेदान् महेश्वरि ॥ १७ ॥
श्रीचक्राग्रे जपेन्मूलं पठेत् कवचमीश्वरि ।

---

१ 'परिसाधक.' ख पाठः । २ 'पूजासु पावना' ङ. पाठः । ३ 'शिवं' ङ. पाठः । ४ 'रसानन्द' ङ पाठ. । ५ 'नायकान्' ख. ग पाठः ।

मन्त्रनामसहस्रं च स्तोत्रं पुण्यं पठेत्ततः ॥ १८ ॥
ततो देव्यै बलिं दत्त्वा साधकांस्तर्पयेत्क्रमे ।
भैरवांस्तर्पयेच्चाष्टौ दीक्षितांस्तर्पयेत् ततः ॥ १९ ॥
उत्तमं नव पात्राणि पञ्च पात्राणि मध्यमम् ।
अधमं त्रीणि पात्राणि चैकपात्रं न पूजयेत् ॥ २० ॥
प्रवृत्ते भैरवे तन्त्रे सर्वे वर्णा द्विजातयः ।
निवृत्ते भैरवे तन्त्रे सर्वे वर्णाः पृथक् पृथक् ॥ २१ ॥
नव कन्याः समभ्यर्च्य वीरेशो भैरवार्चने ।
रेतसा तर्पयेद् देवीं कुलकोटिं समुद्धरेत् ॥ २२ ॥
शक्त्युच्छिष्टं पिबेद् द्रव्यं वीरोच्छिष्टं तु चर्वणम् ।
मकारपञ्चसंयुक्तं कुर्याच्छ्रीचक्रमण्डलम् ॥ २३ ॥
स्वगुरुं पूजयेत् तत्र तर्पयेच्चक्रितः परम् ।
तोषयित्वा गुरुं देवि दक्षिणाभिश्च वन्दनैः ॥ २४ ॥
तदाज्ञां शिरसादाय कुर्यादानन्दमात्मनः ।
वामे रामा रमणकुशला दक्षिणे चालिपात्र-
मग्रे मुद्रा चणकचटुकौ सूकरस्योष्णशुद्धिः ।
तन्त्री वीणा सरसमधुरा सद्गुरोः सत्कथायां
वामाचारः परमगहनो योगिनामप्यगम्यः ॥ २५ ॥
इतीदं चक्रसर्वस्वं गुह्यं तत्त्वात्मकं परम् ।
तव भक्त्या मयाख्यातं गोपनीयं मुमुक्षुभिः ॥ २६ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये चक्रपूजानिरूपण-
मष्टपञ्चाशत्तमः पटलः ॥ ५८ ॥

अथ

एकोनषष्टितमः पटलः ।



श्रीभैरव उवाच ।

अधुना देवि वक्ष्यामि दुर्गायास्तत्त्वमुत्तमम् ।
आचाराणां विधिं येन कलौ दुर्गा प्रसीदति[1] ॥ १ ॥
द्वौ मार्गौ चागमे स्यातां वामाचारस्तु दक्षिणः ।
तयोस्तत्त्वं कुलाचारः शृणु तेषां विधिं शिवे ॥ २ ॥
साधको दीक्षितो भूत्वा केन सिद्धिमवाप्नुयात् ।
तद्वदामि तव स्नेहान्नचाख्येयं दुरात्मने ॥ ३ ॥
त्रीणि बीजानि दुर्गायास्तदाचारास्त्रयः स्मृताः ।
प्रथमो दक्षिणाचारो वामाचारो द्वितीयकः ॥ ४ ॥
तृतीयस्तु कुलाचारो विधिं तेषां शृणु प्रिये ।
प्रभाते स्नानसन्ध्यादि मध्याह्ने जपमीश्वरि ॥ ५ ॥
और्णमासनमाख्यातं भक्ष्यं पायसशर्कराः ।
माला रुद्राक्षसंभूता पात्रं पाषाणसंभवम् ॥ ६ ॥
भोगः स्वकीयकान्ताभिर्दक्षिणाचार इत्ययम् ।
द्रव्येण मधुना देवि सिद्धिहानिकरो मतः ॥ ७ ॥
वामाचारं प्रवक्ष्यामि श्रीदुर्गासाधनं परम् ।
यं विधाय कलौ शीघ्रं मान्त्रिकः सिद्धिभाग्भवेत् ॥ ८ ॥
माला नृदन्तसंभूता पात्रं पाषाणमुण्डकम् ।
आसनं सिंहचर्मादि कङ्कणं स्त्रीकचोद्भवम् ॥ ९ ॥

---

[1] 'प्रसिद्ध्यति' ग. घ पाठ ।

द्रव्यमासवतत्त्वाढ्यं भक्ष्यं मांसादिकं शिवे ।
चर्वणं बालमत्स्यादि मुद्रा वीणारवः कथा ॥ १० ॥
मैथुनं वरकान्ताभिः सर्ववर्णसमानतः ।
वामाचार इति प्रोक्तः सर्वसिद्धिप्रदः शिवे ॥ ११ ॥
अन्यथा सिद्धिहानिः स्यान्मन्त्रस्यास्य महेश्वरि ।
तस्माद्वामं भजेन्नित्यं वाम एव परा गतिः ॥ १२ ॥
दक्षिणं च कुलं चैव वीरैः साधकसत्तमैः ।
त्याज्यं दूरात् कलौ देवि वाममेव भजेत् कलौ ॥ १३ ॥
कुलाचारं प्रवक्ष्यामि सेव्यं योगिभिरुत्तमैः ।
कुलस्त्रियं कुलगुरुं कुलदेवीं महेश्वरि ॥ १४ ॥
नित्यं यत् पूजयेदित्थं स कुलाचार उच्यते ।
कुलस्त्रियं शिवे ज्ञात्वा नुत्वा नुत्वा महेश्वरि ॥ १५ ॥
हठादानीय संपूज्य तथा भोगं विधाय च ।
रेतसा तर्पयेद् देवीं श्रीदुर्गां चक्रनायिकाम् ॥ १६ ॥
नीलकण्ठं च विधिना जपं कुर्याद्विशेषतः ।
तत्पूर्वकं चरेद्धोमं कुलकान्तां विभूषयेत् ॥ १७ ॥
पानैः पेयैस्तथा भक्ष्यैः सन्तर्प्य कुलयोषितम् ।
प्रत्यहं वै चरेदेवं कुलाचार इति स्मृतः ॥ १८ ॥
इत्याचारपरः श्रीमान् कुलस्त्रीगुरुपूजकः ।
वामाचारपरो मन्त्री मुक्तिभाग् भविता ध्रुवम् ॥ १९ ॥
इत्येष पटलो गुह्यो देव्याश्चाचारवल्लभः ।
अदातव्योऽप्यभक्तेभ्यो न प्रकाश्यो मुमुक्षुभिः ॥ २० ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये आचारनिरूपण-
मेकोनषष्टितमः पटलः ॥ ५९ ॥

—:※: ✕ .※.—

अथ

षष्टितमः पटलः ।



श्रीभैरव उवाच ।

अधुना कथयिष्यामि श्रीदुर्गाया रहस्यकम् ।
तत्त्वं मन्त्रस्य देवेशि दशमीपूजनं परम् ॥ १ ॥
दीक्षागुरुः शिवे यस्तु दशमी स प्रकीर्तितः ।
पूजनं तस्य वक्ष्यामि सर्वतन्त्रेषु गोपितम् ॥ २ ॥
दीक्षां गृहीत्वा विधिवद् गुरोः कुलविचक्षणाद् ।
तदाज्ञां शिरसादाय साधयेत् स्वमनुं ततः ॥ ३ ॥
एकदा पुण्यदिवसे मुहूर्ते शुभदे तथा ।
गुरुमानीय देवेशि शून्यगेहे चतुष्पथे ॥ ४ ॥
श्मशाने वा वने वापि स्वगृहे वापि पार्वति ।
तत्र भूमौ लिखेद्यन्त्रं यथावद् वर्ण्यते मया ॥ ५ ॥

विन्दुत्रिकोणं वसुकोणबिम्बं
वृत्ताष्टपत्रं शिखिवृत्तयुक्तम् ।
धरागृहं वह्नितुटीभिरीड्यं
यन्त्रं गुरोर्देवि मया प्रदिष्टम् ॥ ६ ॥

सिन्दूरेण विलिख्यार्तः[1] पूजयेच्चक्रमीश्वरि ।
गणेशधर्मवरुणाः कुबेरसहिताः शिवे ॥ ७ ॥
पूज्या द्वाःस्थाः सुपुष्पैश्च गन्धाक्षतपुरःसरैः ।
असिताङ्गो रुरुश्चण्डो क्रोधेशोन्मत्तभैरवौ ॥ ८ ॥

---

१ 'विलिख्यादौ' ड. पाठः । २ 'दौः तु' ड. पाठः ।

कपाली भीषणो देवि संहारोऽर्च्योऽष्टपत्रके ।
परमानन्दनाथं च प्रकाशानन्दनाथकम् ॥ ९ ॥
श्रीभोगानन्दनाथं च समयानन्दनाथकम् ।
भुवनानन्दनाथं च सुमनानन्दनाथकम् ॥ १० ॥
गगनानन्दनाथं च श्रीविश्वानन्दनाथकम् ।
अष्टौ कुलगुरून् देवि पूजयेद् वसुपत्रके ॥ ११ ॥
मदनानन्दनाथं च श्रीलीलानन्दनाथकम् ।
महेश्वरानन्दनाथं पूजयेद्वै त्रिकोणके ॥ १२ ॥
विन्दौ गुरुं च संपूज्य गन्धाक्षतप्रसूनकैः ।
तत्र विन्दौ गुरुं देवि स्थापयेद् भक्तिपूर्वकम् ॥ १३ ॥
संपूजयेत् स्वमूलेन दक्षिणां कालिकां यजेत् ।
महाकालं यजेत् तत्र कामं कामेश्वरीं तथा ॥ १४ ॥
गुरुं च परमं देवि परापरगुरुं तथा ।
परमेष्ठिगुरुं चैव स्वगुरोर्मूर्ध्नि पूजयेत् ॥ १५ ॥
संपूज्य विविधैः पुष्पैर्माल्यैराभरणोत्तमैः ।
दक्षिणाभिर्महेशानि भक्ष्यैर्भोज्यैश्च लेह्यकैः ॥ १६ ॥
चोष्यैः पेयैश्च खाद्यैश्च बलिं दत्त्वा च तर्पयेत् ।
आनन्दरससंपूर्णं गुरुं दृष्ट्वा[3] महेश्वरि ॥ १७ ॥
ततो देवि गुरुं नत्वा प्रार्थयेत् स्वमनोरथम् ।
य एवं पूजयेद् देवि स्वगुरुं पुण्यवासरे ॥ १८ ॥
स एव भैरवः साक्षाद्विचरेद् भुवनत्रये ।
गुरुरेव परो मन्त्रो गुरुरेव परो जपः ॥ १९ ॥
गुरुरेव परा विद्या नास्ति किञ्चिद्गुरुं विना ।

---

१ 'श्रीस्वात्मानन्द' ङ. पाठः । २ 'भजेत्' ङ. पाठ. । ३ 'बुद्ध्या क. ख. पाठः । ४ 'तत्र' ङ. पाठ ।

यस्य तुष्टो गुरुर्देवि तस्य तुष्टा महेश्वरी ॥ २० ॥
येन संतोषितो देवि गुरुः स हि सदाशिवः ।
यत्नं दृष्ट्वापि वै ब्रूयाद्गुरुस्तन्न समाचरेत् ॥ २१ ॥
पुण्यं वापुण्यमीशानि त्याज्यं ग्राह्यं कुलार्चिते ।
गुरुर्वदति यत् सद्यस्तत् कुर्यात् साधकोत्तमः ॥ २२ ॥
विना गुरूपदेशेन न सिद्ध्यति कलौ मनुः ।
तस्माद् गुरुं भजेद् भक्त्या तोषयेत् सततं गुरुम् ॥ २३ ॥
गुरोर्यत्र परीवादो निन्दा यत्र प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ नो वा दूरं पलायनम् ॥ २४ ॥
गुरुर्देवि परो धर्मो गुरोरेव परा गतिः ।
गुरुमभ्यर्चयेन्नित्यं येन देवी प्रसीदति ॥ २५ ॥
इतीदं दशमीतन्त्रं सर्वागमरहस्यकम् ।
सारात्सारतरं देवि गोपनीयं मुमुक्षुभिः ॥ २६ ॥
इतीदं परमं तन्त्रं तन्त्रं सर्वस्वमुत्तमम् ।
दुर्गारहस्यसाराढ्यं गुह्यं गोप्यं च साधकैः ॥ २७ ॥
इति देवीरहस्याख्यस्तन्त्रोऽयं तन्त्रसागरः ।
सर्वस्वं मे रहस्यं मे सर्वागमनिधिः परः[3] ॥ २८ ॥
श्रीदुर्गायास्तत्त्वभूतो मन्त्रराजमयो ध्रुवः ।
सिद्धिप्रदो महादेवि पूजनीयोऽस्ति साधकैः ॥ २९ ॥

श्रीदेव्युवाच ।

भगवन् भवता भक्त्या प्रसादोऽयं मयि कृतः ।
यत्त्वया वर्णितस्तन्त्रः श्रीदुर्गायाः कुलेश्वर ॥ ३० ॥
क्रीतास्मि तव दास्यस्मि भक्तास्मि त्रिपुरान्तक ।
सर्वथा रक्षणीयास्मि किमन्यत् कथयामि ते ॥ ३१ ॥

यत्र···न ··गुरुस्तन्त्र' ङ पाठः । २ 'दुर्गा येन' ङ. पाठः । ३ 'रहस्यक.' क. ख. पाठः ।

श्रीभैरव उवाच ।

इदं देवीरहस्याख्यं तन्त्रराजं महेश्वरि ।
अदातव्यमभक्तेभ्यो दुरात्मभ्यो महेश्वरि ॥ ३२ ॥
स्वपुत्रेभ्योऽन्यशिष्येभ्यो न देयं तु मुमुक्षुभिः ।
इदं हि सारं तन्त्राणां तत्त्वं सर्वस्वमुत्तमम् ॥ ३३ ॥
रहस्यं देवि दुर्गाया गोपनीयं स्वयोनिवत् ।

इति श्रीरुद्रयामलतन्त्रान्तर्गत-श्रीदेवीरहस्ये दशमीविधिनिरूपणं षष्टितमः पटलः ॥ ६० ॥

समाप्तं चेदं देवीरहस्यतन्त्रम् ।

पञ्चाङ्कनन्दशशि (१९९५) संमितवैक्रमेऽब्दे
देवीरहस्यकमशेषसुतन्त्रसारम् ।
श्रीरुद्रयामलमहाब्धिमहार्घरत्नं
संस्कृत्य शुद्धपदपाठसुमेलनाद्यैः ॥ १ ॥
प्राचीनहस्तलिखितानपि जीर्णभूयो-
ग्रन्थान् प्रयत्नवशतोऽनुविधृत्य लब्धान् ।
औदार्यवीर्यसुभगत्वगुणस्फुरच्छ्री-
राजाधिराज-हरिसिंहनृपानुशिष्या ॥ २ ॥
उच्चैःपदाधिकृतिभाजन-काकजाति-
श्रीरामचन्द्रविबुधाधिकृतिप्रबन्धे ।
संपाद्य सूरि शिवनाथसहायभाजा
प्राकाशि शास्त्रिहरभट्ट-विपश्चितेदम् ॥ ३ ॥

॥ श्रीः ॥

अथ

परिशिष्टम् ।

ज्वालामुखीपञ्चाङ्गम् ।

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि भैरवि[1] प्राणवल्लभे ।
ज्वालामुख्यास्तु सर्वस्वं पटलं देवदुर्लभम् ॥ १ ॥

श्रीदेव्युवाच ।

भगवंस्त्वं हि सर्वस्य ज्ञाता शास्त्रस्य धूर्जटे ।
श्रुतानि तन्मुखाम्भोजाद् ग्रन्थानि[2] विविधानि च ॥ २ ॥
ज्वालामुख्या महामन्त्रं यन्त्रं पूजा विधानतः ।
तथाङ्गं वद मे नाथ यद्यहं प्रेयसी तव ॥ ३ ॥

श्रीभैरव उवाच ।

शृणु देवि मनुं यन्त्रं तथाङ्गं भैरवेश्वरि ।
प्रयोगसाधनं वक्ष्ये गोप्याद् गोप्यतरं मम ॥ ४ ॥
इदं विश्वमहो क्रूरं भक्तिहीनं महेश्वरि ।
एकदा हंसरूपेण मनुनाहं जगत्त्वरम् ॥ ५ ॥
देवेशि सप्तधानिशं ज्वालामुख्याः प्रसादतः ।
ज्वालामुख्या तया मन्त्रो वर्णितो नाममानवः ॥ ६ ॥
तदा प्रभृति तन्मन्त्राज्जगत्स्थावरजङ्गमम् ।
सृजामि संहरिष्यामि रक्षामि च दिवानिशम् ॥ ७ ॥

---

१ ' भैरवश्राव ' ब पाठ. । २ ' तन्त्राणि ' ब. पाठः । ३ ' शीघ्र ' पाठः । ४ ' वाद ' ब पाठ. ।

यस्या मन्त्रप्रभावेण प्राप्तमैश्वर्यमुत्तमम् ।
ज्वालामुखी जगन्माता सैव स्यात् त्रिगुणात्मिका ॥ ८ ॥
सत्त्वेन सृज्यते विश्वं रजसा चैव पाल्यते ।
तमसा जीर्यते[1] यस्या गुणत्रयप्रभावतः ॥ ९ ॥
त्रिलोकजननी माता सैव मेऽपीष्टदेवता ।
तस्या यन्त्रं च मन्त्रं च ध्यानं लयाङ्गसंयुतम् ॥ १० ॥
प्रयोगान् परमेशानि शृणु त्वं सावधानतः ।
तन्त्रादौ तु मनूद्धारं सर्वागमविनिश्चितम् ॥ ११ ॥
प्रवक्ष्यामि महादेवि न प्रकाश्यं मुमुक्षुभिः ।
आदौ प्रणवमुद्धृत्य मायां च कमलां तथा ॥ १२ ॥
ज्वालामुखि ममेत्यत्र सर्वशत्रून् समुच्चरेत् ।
भक्षय-द्वयमुद्धृत्य कूर्चं तुरगसंयुतम् ॥ १३ ॥
ठद्वयेन समायुक्तो ज्वालामुख्या ह्ययं मनुः ।
मन्त्रोऽयं परमेशानि कलावीप्सितदायकः ॥ १४ ॥
ब्रह्महत्या गुरोर्हत्या स्त्रीहत्याभक्ष्यभक्षणम् ।
अगम्यगमनं पापं मातृ-स्वसृ[2]गमोद्भवम् ॥ १५ ॥
तत् क्षालयति मन्त्रोऽयं देवि सत्यं न संशयः ।
अधुना शृणु देवेशि यन्त्रोद्धारं परात्परम् ॥ १६ ॥
भुक्तिदं मुक्तिदं गोप्यं गीतवादित्रतोषितम् ।
आनन्दसुन्दरं स्तुत्यं यन्त्रोद्धारं ब्रवीम्यहम् ॥ १७ ॥
मत्सर्वस्वं न देयं सारात्सारोत्तमोत्तमम् ।
आदौ षट्कोणमुद्धृत्य चोर्ध्वरेखां निकर्षयेत् ॥ १८ ॥
अधोरेखां समाकृष्य पार्श्वाभ्यां च निकर्षयेत् ।
अधोरेखां क्षिपेदूर्ध्वमूर्ध्वरेखां क्षिपेदधः ॥ १९ ॥

---

१ 'लीयते' ख. पाठ । २ 'हत्यासमुद्भवम्' ख पाठ ।

मध्ये कुर्यात् त्रिकोणैक न्यसेद्विन्दुं शिवालयम् ।
मध्ये यत् तु त्रिकोणं स्यात् सुन्दरीभवनं स्मृतम् ॥ २० ॥
ऊर्ध्वत्रिकोणमन्यत् स्याद् दक्षिणाकालिकालयम् ।
मध्ये त्रिकोणबिन्दौ श्रीज्वालामुख्या महालयम् ॥ २१ ॥
ततो वृत्तैकमालिख्य लिखेदष्टारमुत्तमम् ।
षोडशारं समुद्धृत्य वृत्तैकोपरि पार्वति ॥ २२ ॥
वृत्तत्रयं पुनर्न्यस्य लिखेद् भूपुरकं पुनः ।
ज्वालामुख्या इदं यन्त्रं त्रैलोक्योद्धरणक्षमम् ॥ २३ ॥
न देष्टव्योऽन्यशिष्येभ्यो दित्वा तु ब्रह्महा भवेत् ।
तथाङ्गं शृणु देवेशि ब्रह्मविष्णुसमर्चितम् ॥ २४ ॥
यन्त्रराजस्य देवेशि समासेन यथार्थतः ।
गणेशो धर्मराजश्च वासुकिर्नरसिंहकः ॥ २५ ॥
चतुर्द्वारेषु संपूज्याश्चत्वारो द्वारपालकाः ।
पूर्वे च गणनाथस्तु दक्षिणे धर्मराजकः ॥ २६ ॥
पश्चिमे वासुकिः पूज्य उत्तरे नरसिंहकः ।
ततोऽष्टदलपत्रेषु पूज्या ज्वालाश्च षोडश ॥ २७ ॥
वामावर्तक्रमाद् देवि नानापूजाफलं लभेत्[1] ।
वारुणी चैव वात्याली वाराही कुलसुन्दरी ॥ २८ ॥
कूर्वरी कुलिका कुण्ठी कुत्सिता कुटिला कुहूः[2] ।
कुन्ती कुम्भेश्वरी कुन्ता कूचरी कारुणी कृतिः ॥ २९ ॥
इति षोडश ज्वालाः स्युस्तस्यास्तु सकलाङ्गाः ।
ततोऽष्टदलपत्रेषु पूज्या ह्यष्टौ तु कन्यकाः ॥ ३० ॥
माया च मोहिनी चैव बाला च भगरूपिणी ।
भगावासा च भीरुण्डा मृडानी चैन्दवेश्वरी ॥ ३१ ॥

---

१ 'ततु पूजाफलं होत्' ख पाठः । २ 'कूर्वरी' ख पाठः ।

अष्टौ कन्याः समाख्याताः संपूज्याश्चाष्टपत्रके ।
ततस्तु ज्वालामुख्यास्तु सुखदा दश पार्वति ॥ ३२ ॥
वामावर्तक्रमेणैव पूजासिद्धिर्भवेद् ध्रुवम् ।
ब्राह्मी च शाम्भवी दुर्गा वाराही कुलकामिनी ॥ ३३ ॥
नारसिंही च कौमारी मातङ्गी भद्रकालिका ।
उग्रतारा समाख्याता ज्वालादशकला इमाः ॥ ३४ ॥
संपूज्या दशपत्रेषु साधकैश्च सुसिद्धये ।
तत ऊर्ध्वे समभ्यर्च्य देवीं त्रिपुरसुन्दरीम् ॥ ३५ ॥
तन्मध्येऽधःस्थिता पूज्या देवी दक्षिणकालिका ।
तन्मध्ये पूजनीया च देवी ज्वालामुखी तथा ॥ ३६ ॥
ज्वलिनी जटिनी चैव जाती जालन्धरी तथा ।
बिन्दौ त्रिकोणमध्यस्थे यन्त्रस्य परमेश्वरी ॥ ३७ ॥
देव्याश्चायुधपूजां च कुर्याच्च चतुरश्रके ।
यन्त्रमध्यस्थिते देवि चतुरश्रे विदिग्गते ॥ ३८ ॥
अभयं वरदं पद्मं पाशं (शरं) संपूजयेत् सुधीः ।
ईशानानुक्रमेणैव पूजयेदायुधांस्तथा ॥ ३९ ॥
लयाङ्गमिति ते प्रोक्तं ध्यानं शृणु महेश्वरि ।
ध्यात्वा देवीं महादेवि मन्त्री स्याद् भैरवोपमः ॥ ४० ॥

ज्वालापर्वतसंस्थितां त्रिनयनां पीठत्रयाधिष्ठितां
ज्वालाडम्बरभूषितां सुवदनां नित्यामदृश्यां जनैः ।
षट्चक्राम्बुजमध्यगां वरशराम्भोजाभयान् बिभ्रतीं
चिद्रूपां सकलार्थदीपनकरीं ज्वालामुखीं नौम्यहम् ॥ ४१ ॥
उद्यच्छीतकरांशुसंनिभमुखीमापीनतुङ्गस्तनीं
सद्यः फुल्लसरोजपाशममलं वामे करे बिभ्रतीम् ।

---

१ 'मुखगा' ख, पाठः । २ 'नित्यामदृश्यां' ख, पाठः ।

दक्षेऽभीतिवरौ त्रिवर्णविलसद्गात्राङ्गयष्टिं परा
रुद्राब्जस्थत्रिकोणमध्यविगता ज्वालामुखीमाश्रये ॥ ४२ ॥
शीताशुद्युतिसन्निभां शशिकलाचूडां त्रिनेत्रां शिवां
द्विःषट्पारसरोजपीठविगतां माध्वीरसाघूर्णिताम् ।
त्र्यर्णोद्भासितसर्वगात्रलतिकां ज्वालादिकन्याकुलां
रज्यत्पादयुगां त्रिलोकजननीं ज्वालामुखीं नौम्यहम् ॥४३॥
इति ध्यानत्रयं प्रोक्तं तन्त्रमन्त्रविनिश्चितम् ।
प्रयोगान् शृणु देवेशि श्रुत्वा गोप्यतमान् कुरु ॥ ४४ ॥
स्तम्भनं मोहनं चैव मारणाकर्षणे तथा ।
विद्वेषण वशीकारमुच्चाटनमतः परम् ॥ ४५ ॥
मौक्तिकं शान्तिकं चैव पौष्टिक परमाद्भुतम् ।
शृणुष्वावहिता भूत्वा येन ज्वाला प्रसीदति ॥ ४६ ॥
(१) रात्रावुत्थाय मुहूर्ते ब्राह्मे वा चार्धरात्रके ।
गत्वा नदीतट कुर्याद्यथा नैमित्तिकीं क्रियाम् ॥ ४७ ॥
स्नानसन्ध्याविधिं कुर्याज्जपमष्टोत्तरं चरेत् ।
ज्वालादेव्या मनुं जप्त्वा व्रजेत् प्रेतालयं ततः ॥ ४८ ॥
तत आनीय देवेशि भस्ममुष्टिं च साधकः ।
निखनेत् कुण्डमेक तु त्रिकोण साधकोत्तमः ॥ ४९ ॥
भस्ममुष्टिं च तत्कुण्डे क्षिप्त्वा होम समाचरेत् ।
घृतेन तिलतैलेन पायसेन सुरेश्वरि ॥ ५० ॥
मूलेन चाचरेद्धोम यावन्माघाह्निक भवेत् ।
तस्योपरि पतेद् दण्डमैपिक परमेश्वरि ॥ ५१ ॥
होम सपात्रं देवेशि कुर्यात् कर्म पर सुधीः ।
(२) अर्धरात्रे समुत्थाय भस्मानीय च लेपयेत् ॥ ५२ ॥

---

१ 'कालीकुला' इ पाठ । २ 'मवादयद् दवि' इ पाठ ।

अङ्गेषु साधको धीमांल्ललाटे तिलकं चरेत् ।
प्रभाते तु व्रजेन्मन्त्री सभामध्ये सुरेश्वरि ॥ ५३ ॥
तस्य दर्शनमात्रेण इन्द्रो जीवः पितामहः ।
स्तम्भवाग्भगवान् विष्णुर्भविष्यति न संशयः ॥ ५४ ॥
(३) मङ्गलेऽह्नि समुत्थाय मध्याह्ने वार्धरात्रके ।
आनीय नूतनं कुम्भं पूरयेद् पयसा प्रिये ॥ ५५ ॥
तस्मिन्मध्ये चरेत् पूजां ज्वालामुख्या महेश्वरि ।
मन्त्री दिनाष्टकं तावद् गन्धार्घ्यकुसुमैस्तथा ॥ ५६ ॥
प्राप्तेऽन्यमङ्गलदिने दद्यान्मन्त्री बलिं शुभम् ।
कुक्कुटं च महेशानि तद्रक्तं च घटे क्षिपेत् ॥ ५७ ॥
ततो मूलेन नैवेद्यं दत्त्वा स्नानं समाचरेत् ।
तेन कुम्भस्य नीरेण साधको मन्त्रसाधकः ॥ ५८ ॥
कर्मणा मनसा वाचा मोहयेद् भुवनत्रयम् ।
सर्वज्ञस्य ममाप्येष करिष्यत्यन्यथा ध्रुवम्[1] ॥ ५९ ॥
(४) अन्यदा शनिवारे तु गत्वा प्रेतालयं शिवे ।
साशिवां देवतां ध्यात्वा कुर्यात् स्नानमनुत्तमम् ॥ ६० ॥
ततोऽष्टोत्तरवारैकशतमावर्त्य मालया ।
योनिमूर्तिं विधायैव त्यजेद्रेतः प्रयत्नतः ॥ ६१ ॥
रेतसश्चोपरि चौद्रं क्षिप्त्वा मद्यं क्षिपेत् सुधीः ।
स्तन्यं संक्षिप्य विश्वेशि गोमूत्रमुपरि क्षिपेत् ॥ ६२ ॥
नरमूत्रं च संक्षिप्य खरमूत्रं च निःक्षिपेत् ।
गजमूत्रं तथा मध्ये मीनमांसं महेश्वरि ॥ ६३ ॥
तिलतैलं च लवणमारणालसमन्वितम् ।
घटं संपूर्य विधिवत् साधकः प्रेतमन्दिरे ॥ ६४ ॥

---

[1] 'द्रुतम्' ख. पाठः ।


भूमौ क्षिप्त्वा चिरान्नित्यं जपेदष्टोत्तरं शतम् ।
मासमेकं समुल्लङ्घ्य दत्त्वा माहिषिकं बलिम् ॥ ६५ ॥
ततो विरचयेद्धोमं पायसेन च सर्पिषा ।
तथा विरीफलं हुत्वा जुहुयाच्च हरीतकीम् ॥ ६६ ॥
ततो मासे गते देवि साधको मन्त्रसाधकः ।
घटं निष्कर्षयेद्भूमौ प्रणम्य शिरसा पुनः ॥ ६७ ॥
जपेदेकसहस्रं तु मूलमन्त्रं यथार्थतः ।
अर्धरात्रे रिपोर्नाम गृहीत्वा तु चतुष्पथे ॥ ६८ ॥
कुम्भं च साधको भिन्द्यात् सद्यः शत्रुर्मरिष्यति ।
(५) अथाकर्षणकं वक्ष्ये प्रभाते गुरुवासरे ॥ ६९ ॥
गत्वा रहःस्थलं देवि कुर्यान्नैमित्तिकीं क्रियाम् ।
ततः क्षीरं समानीय माहिष्यस्तन्यमेव च ॥ ७० ॥
एकीकृत्य चरेद्धोमं सर्पिषा पायसेन च ।
कृत्वा चैव प्रियाभोगं रेतः क्षीरे विनिःक्षिपेत् ॥ ७१ ॥
होमयेत् पुष्पसङ्घातं पीतं रक्तं च पाण्डुरम् ।
अन्येद्युरथ देवेशि शीतलं भस्म चोद्धरेत् ॥ ७२ ॥
योजयेद्रेतसा साकं क्षिपेन्मन्त्री चतुष्पथे ।
उर्वशी स्वर्गसंस्थापि प्रायः प्रादुर्भविष्यति ॥ ७३ ॥
(६) चन्द्रवारे समुत्थाय गत्वा प्रेतालयं सुधीः ।
मध्याह्ने नूतने कुम्भे क्षिपेद् भस्मास्थिसञ्चयम् ॥ ७४ ॥
घटमाच्छाद्य वस्त्रेण क्षिपेद् भूमौ च मान्त्रिकः ।
जपेद् दिनाष्टकं यावद् मूलमन्त्रमनुस्मरन् ॥ ७५ ॥
अष्टमे दिवसे प्राप्ते कुम्भमाहृत्य मान्त्रिकः ।
अर्धरात्रे रिपोर्द्वारि घटं तत् स्फोटयेच्छनैः ॥ ७६ ॥

---


१ 'माहिष्य' इ. पाठः ।

पादप्रहारदशभिः शत्रोर्विद्वेषणं भवेत् ।
(७) बुधवारे सुनक्षत्रे पश्चगव्यं समानयेत् ॥ ७७ ॥
लिखा भूमिं त्रिकोणं तु कुण्डं लिखय महामनुम् ।
तन्मध्ये पूरयेद्यन्त्रं होमयेन्मूलजाचरैः ॥ ७८ ॥
बलिं दत्वा बिडालं च साधको मूलमन्त्रतः ।
जपेत् सप्तसहस्रं तु साङ्गं च निधिमन्नरः ॥ ७९ ॥
यस्य नाम च सङ्गृह्य स्त्रियो वा पुरुषस्य च ।
सप्तधारं सुरेन्द्रोऽपि वशीभवति नान्यथा ॥ ८० ॥
ब्रह्माद्या निर्जराः सर्वे रम्भाद्या ह्यप्सरोगणाः ।
वशमायान्ति देवेशि मन्त्रस्यास्य प्रसादतः ॥ ८१ ॥
(८) शनिवारे खरं कृष्णं वनं गत्वा निशीथके ।
यन्त्रं संपूज्य तस्याग्रे बलिं दद्यात् स्वमूलतः ॥ ८२ ॥
जपं च दशसाहस्रं कृत्वा कुण्ड खनेत् पथि ।
तद्रक्तं होमयेत् सर्पिः शत्रोर्नाम समुच्चरेत् ॥ ८३ ॥
तेनैव सर्वरिपवः संक्षयं यान्त्यसंशयः ।
(९) शुभेऽह्नि शुभनक्षत्रे गत्वा सिन्धुतटे शुभे ॥ ८४ ॥
मूलेनैवाचरेद्धोमं शमीपत्रैस्तु साधकः ।
क्षन्यादिक्षीरखण्डाद्यैः सर्पिषा तद्दशांशतः ॥ ८५ ॥
होमं संपाद्य देवेशि दद्यात् पूर्णाहुतिं ततः ।
तस्माच्च जायते पुष्टिर्देवानामपि दुर्लभा ॥ ८६ ॥
इदं पटलमाख्यातं ज्वालाया ह्युत्तम मया ।
रहस्यं परमं देवि सर्वस्व सारमुत्तमम् ॥ ८७ ॥
दुर्लभं त्रिदिवे देवि न दातव्यं हि कस्यचित् ।
निन्दकाय च दुष्टाय द्वेषिणे भक्तिवर्जिते ।
गोप्य गुप्ततमं भूमौ कलाविष्टफलप्रदम् ॥ ८८ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीज्वालामुखीपटलम् ॥



अथ पूजापद्धतिः ।



अधुना देवि वक्ष्यामि ज्वालापद्धतिमुत्तमाम् ।
गद्यपद्यमयीं गुह्यां कोटियज्ञफलप्रदाम् ॥ १ ॥
प्रातः कृत्यमकृत्वा तु श्रीज्वाला पूजयेत् तु यः ।
तस्य पूजा च विफला शौचहीना यथा क्रिया ॥ २ ॥

प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
सरोरुहिरसि हंसगं तदभिधानपूर्वं गुरुम् ॥ १ ॥

इति ध्यात्वा प्रणाममन्त्रान् पठेत् ।

नमामि सद्गुरुं शान्तं सत्यज्ञं शिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ॥ २ ॥
श्रीगुरुं परमानन्दं वन्दाम्यानन्दविग्रहम् ।
यस्य सान्निध्यमात्रेण चिदानन्दायते परम् ॥ ३ ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ४ ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ५ ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः ।
गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ ६ ॥
नमस्ते नाथ भगवञ्छिवाय गुरुरूपिणे ।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ॥ ७ ॥
नवाय नवरूपाय परमार्थैकरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥ ८ ॥
स्वतन्त्राय दयावल्लसविग्रहाय परात्मने ।
परतन्त्राय भक्ताना भव्याना भव्यरूपिणे ॥ ९ ॥
प्रकाशिना प्रकाशाय विवेकाय विवेकिनाम् ।
ज्ञानिना ज्ञानरूपाय विमर्शाय विमर्शिनाम् ॥ १० ॥
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।
सदा सच्चित्तरूपेण विधेहि भवदासनम् ॥ ११ ॥

इति श्रीगुरु प्रणम्य, सुप्रसन्न विभाव्य मनसा तदाज्ञा गृहीत्वा,

मूलाधारे स्वर्णवर्णचतुर्दलकमलकर्णिकान्तर्गतत्रिकोणचक्रान्तर्गतस्वयम्भूलिङ्गकोटिकोपरि परां शक्तिं कुण्डलिनीमुद्यद्दिनकरसहस्रभास्वरां विद्युत्कोटिसदृशां सकलमन्त्रमातरं पञ्चाशद्वर्णविग्रहामष्टात्रिंशत्कलारूपिणीं सर्वप्राणिजीवां त्रिधामधामानं सर्पाकारामूर्ध्वमुखीं साधित्रिवलयां विसतन्तुतनीयसीं सुप्तां विभाव्य गुरूपदिष्टनिजसहजनादेन सचैतन्यां विधाय, तत्र चतुर्दलेषु वं नमः, शं नमः, षं नमः, सं नमः इति पत्रेषु प्रादक्षिण्येन मध्ये मूलेन च संपूज्य, ह्रंसः इति मन्त्रेण सर्वमुत्थाप्य, ततो विद्रुमवर्णं स्वाधिष्ठाने लिङ्गमूले षड्दलकमले तां नीत्वा, तत्र बं नमः, भं नमः, मं नमः, यं नमः, रं नमः, लं नमः, इति पत्रेषु मध्ये मूलेन च संपूज्य, ततो मणिपूरके नाभौ नीलवर्णे दशदलकमले तां नीत्वा तत्र डं नमः, ढं नमः, णं नमः, तं नमः, थं नमः, दं नमः, धं नमः, नं नमः, पं नमः, फं नमः, इति पत्रेषु मध्ये मूलेन च संपूज्य, ततो वक्षस्यनाहते पिङ्गलवर्णे द्वादशदलकमले तां नीत्वा तत्र कं नमः, खं नमः, गं नमः, घं नमः, ङं नमः, चं नमः, छं नमः, जं नमः, झं नमः, ञं नमः, टं नमः, ठं नमः, इति पत्रेषु मध्ये मूलेन च संपूज्य, ततो विशुद्धौ कण्ठे धूम्रवर्णे षोडशदलकमले तां नीत्वा तत्र अं नमः, आं नमः, इं नमः, ईं नमः, उं नमः, ऊं नमः, ऋं नमः, ॠं नमः, ऌं नमः, ॡं नमः, एं नमः, ऐं नमः, ओं नमः, औं नमः, अं नमः, अः नमः, इति पत्रेषु मध्ये मूलेन च संपूज्य, तत आज्ञाचक्रे भ्रूमध्ये विद्युद्वर्णे द्विदलकमले तां नीत्वा तत्र हं नमः, क्षं नमः, इति पत्रयोर्मध्ये मूलेन च संपूज्य, ततो ब्रह्मरन्ध्रगतद्वादशान्तचक्रं प्रापय्य तत्र सहस्रदलकमलकर्णिकान्तर्वर्तिविन्दुरूपतेजोमयपरमशिवेन सहैकतां नीत्वा, ततः स्रवता परमामृतेन तां सन्तर्प्य तत्र नादश्रवणतत्परो मुहूर्तं लयं विभाव्य, ततोऽवरोहे सर्वत्र सोऽहमिति मन्त्रेण कमलात्कमलेऽवरोह्यमाणामाज्ञाचक्रादिक्रमेण तेषु तेषु कमलेषु तैस्तैरक्षरैः संपूज्यमानां तत्तदाधार-तत्तद्धातु-तत्तद्वर्ण-तत्तदधिदेवताः सन्तर्पयन्तीं मूलाधारं प्रापय्य तत्रैव स्वस्थाने संस्थापयेत् । इत्यारोहावरोहक्रमेण परां शक्तिं कुण्डलिनीं ध्यात्वा

---

१ " षड्दलकान्तर्गतत्रिकोणपीठोपरि परां " इति ख पाठः ।

प्रकाशमानां प्रथमे प्रयाणेऽप्यमृतायमानाम् ।
अन्तःपदव्यामनुसञ्चरन्तीमानन्दरूपामनघां प्रपद्ये ॥

इति स्तुत्वा,

नाहमस्मि न चान्योऽस्ति ध्येयं चात्र न विद्यते ।
आनन्दपदसंलीन मनः समरसीगतम् ॥
अहं देवी न चान्योऽस्ति ब्रह्मैवाहं न शोकभाक् ।

त्रिनेत्रमिन्दूर्धकिरीटरत्नं कल्पान्तसूर्यप्रभमिन्दुहासम् ।
वृषासनं शूलकपालहस्तं वन्दे महादेवमहं चिदीशम् ॥ १ ॥
ज्वालापर्वतसंस्थितां त्रिनयनां पीठत्रयाधिष्ठितां
ज्वालाडम्बरभूषितां सुवदनां नित्यमदृश्यां जनैः ।
षट्चक्राम्बुजमध्यगां वरशराम्भोजाभयान् बिभ्रतीं
चिद्रूपां सकलार्थदीपनकरीं ज्वालामुखीं नौम्यहम् ॥ २ ॥

इति ध्यात्वा मानसोपचारैराराध्य, ॐमिति सेतुं हृदि दशधा विन्यस्य, स्त्रीमिति महासेतुं विशुद्धौ सहस्रारे च दशधा विन्यस्य, ॐश्रंमूलं ऐंश्रंश्रामित्यादि क्षः इत्यन्तम् । ॐमिति मणिपूरके निर्वाणं दशधा जपेत् । ततो मन्त्रसंस्कारं कुर्यात् । यथा "श्रींॐ ज्वालामुखि मम सर्वशत्रून् भक्षय २ हूं फट् स्वाहा ह्रीं" इति त्रिर्जपेत्, इत्युत्कीलनम् । हूॐह्रींश्रीं ज्वालामुखि मम सर्वशत्रून् भक्षय २ स्वाहा, इति त्रि.सञ्जीवनम् । वंछंजं मूलं झंजं इति त्रिर्जपेत्, इति तौटिल्यम् । ॐह्रींश्रीं ज्वालामुखि भैरवशापं मोचय २ हूं फट् स्वाहा, इति शापहरीं दशधा जपेत् । ॐह्रींश्रीं कुरुकुल्लायै स्वाहा, इति कुरुकुल्लां दशधा जपेत् । ॐह्रींश्रीं नमो ज्वालामुख्यस्त्राय दहदह दुरितं हूं फट् हन २ कीलान् स्वाहा ज्वालामुखीं ह्रीं स्वाहा, इत्यस्त्रमन्त्रं त्रिर्जपेत् । ॐ मूलं ॐ इत्यशौचद्वयनिवारणार्थं सप्तधा जपेत् । ॐज्वालामुख्यै विद्महे ह्रीं जगद्धात्र्यै धीमहि श्रीं तन्नो ज्वाले प्रचोदयात्, इति मूलगायत्रीं दशधा जप्त्वा, मालामादाय ॐ मां माले महामाले सर्वशक्तिस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ ॐह्रीं सिद्ध्यै नमः, इति मनसा गन्धादिना तां संपूज्य, ॐग अविघ्नं कुरु माले त्वं सर्वभावेषु सर्वदा । इति मनसा पूजिता दक्षकरेण मालामादाय शिरसि श्रीगुरु शुक्लवर्णं कण्ठे स्वर्णवर्णां मूलविद्यां हृदि श्रीपरदेवीं यथोक्तरूपां ध्यायन् यथाशक्ति जपं कृत्वा, जपान्ते

त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव ।
शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥

इति पठित्वा मालां शिरसि संस्थाप्य, ॐह्राह्रौं महादेवाय नमः इति भैरवमन्त्रं यथोक्तविधिना संजप्य, मूलं ससंपुटं त्रिर्जप्त्वा पुन

रपि प्राणायामादिन्यासान् विधाय,

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥

इत्यनेन तेजोमयं जपं श्रीदेव्यावामहस्ते समर्प्य योनिमुद्रया प्रणमेत् ।

प्रातः प्रभृति सायान्तं सायादि प्रातरन्ततः ।
यत्करोमि जगद्योने तदस्तु तव पूजनम् ॥

इति निजकृत्यं समर्प्य, स्वकार्यानुष्ठानाय,

त्रैलोक्यचैतन्यमयि मुरेशि श्रीज्वालिके त्वच्चरणाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥
संसारयात्रामनुवर्तमानं ज्वालामुखि त्वच्चरणाश्रयालम् ।
स्पर्धातिरस्कारकलिप्रमादभयानि मां माभिभवन्तु मातः ॥
जानाम्यधर्मं नच मे निवृत्तिर्जानामि धर्मं नच मे प्रवृत्तिः ।
त्वया हृषीकेशि हृदिस्थयाहं यथा नियुक्तोऽस्मि तथा करोमि ॥

इति श्रीदेव्याज्ञां धार्य्य, मूलाधारादिद्वादशान्तचक्रपर्यन्तस्थिताभ्यो महागणपतिप्रभृतिदेवताभ्यः श्रीगुरूपदेशप्राप्तं सहजसिद्धमजपाजपं सङ्कल्प्य समर्पयेत् । यथा अद्य पूर्वेद्युरहोरात्राचरितमुच्छ्वासनिःश्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजप मूलाधार-स्वाधिष्ठान-मणिपूरानाहत-विशुद्धाज्ञा-ब्रह्मरन्ध्रेषु चतुर्दल-षड्दल-दशदल-द्वादशदल-षोडशदल-द्विदल-सहस्रदलेषु स्वर्णविद्रुमनीलपिङ्गलधूम्रविद्युत्कर्बुरवर्णेषु स्थिताभ्यो गणपतिब्रह्मविष्णुरुद्र-जीवात्मपरमात्मश्रीगुरुपादुकाभ्यो यथा भागशः समर्पयामि, इति स्मृत्वा कृताञ्जलिर्न्यसेत् । यथा-ॐ ह्रीं श्रीं मूलाधारचक्रस्थाय श्रीगणपतये अजपाजपाना षट्शतानि समर्पयामि नमः । ॐ स्वाधिष्ठानचक्रस्थाय ब्रह्मणेऽजपाजपाना षट्सहस्राणि समर्प० । ॐ मणिपूरचक्रस्थाय विष्णवेऽजपाजपाना षट्सहस्राणि समर्पया० । ॐ अनाहतचक्रस्थाय रुद्रायाजपाजपानां षट्सहस्राणि समर्पया० । ॐ विशुद्धचक्रस्थाय जीवात्मनऽजपाजपाना सहस्रं समर्पया० । ॐ आज्ञाचक्रस्थाय परमात्मनेऽजपाजपाना सहस्र समर्प० । ॐ सहस्र-

दलकमलकर्णिकामध्यवर्तिन्यै श्रीगुरुपादुकायै अजपाजपाख्यं सहस्र समर्पयामि नम । इत्यजपाजप समर्प्य, अजपामन्त्रेण प्राणायाम कृत्वा सकल्प कुर्यात् । यथा—

ॐअस्य श्रीअजपागायत्रीमन्त्रस्य, हस ऋषि., अव्यक्तगायत्री छन्द., श्रीपरमात्मा परमहसो देवता, ह बीज स शक्ति, सोऽह कीलक, ॐकारस्तत्त्व, उदात्त स्वर, नभ स्थान, हैमो वर्ण., मम मुक्तिसाधनार्थे अजपाजपे विनियोग । ॐ हसऋषये नमः शिरसि । ॐ अव्यक्तगायत्रीच्छन्दसे नमो मुखे । ॐ श्रीपरमहसदेवतायै नमो हृदि । ॐ ह बीजाय नमो गुह्ये । ॐस शक्तये नम. पादयो । ॐ सोऽह कीलकाय नमो नाभौ । ॐ ॐकारतत्त्वाय नमो हृदये । ॐ उदात्तस्वराय नम कण्ठे । ॐ नभसे स्थानाय नमो मूर्ध्नि । ॐ हैमाय वर्णाय नमः सर्वाङ्गेषु, इति विन्यस्य मम मोक्षार्थेऽजपाजपे विनियोगः इति कृताञ्जलि पठत् । इति ऋष्यादिन्यासः । ॐ हसा सूर्यात्मने स्वाहा अङ्गुष्ठाभ्या नम । ॐ हसीं सोमात्मने स्वाहा तर्जनीभ्या स्वाहा । ॐ हसू निरञ्जनात्मने स्वाहा मध्यमाभ्या वषट् । ॐ हसैं निराभासात्मने स्वाहा अनामिकाभ्या हु । ॐ हसौं अनन्ततनु सूक्ष्मदेवी प्रचोदयात् स्वाहा कनिष्ठिकाभ्या वौषट् । ॐ हस अव्यक्तबोधात्मने स्वाहा करतलकरपृष्ठाभ्या फट् । एव हृदयादिन्यास । ततो ध्यानम्—

द्यौ मूर्धान यस्य विप्रा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे ।
दिग्भिः श्रोत्रे यस्य पादौ क्षितिश्च ध्यातव्योऽसौ सर्वभूतान्तरात्मा ॥

इति विराट्स्वरूप स्वात्मान ध्यात्वा तदनुसन्धायिन प्राणवायोर्निगमप्रवेशात्मकमजपामन्त्र पञ्चविंशतिवार जप्त्वा समर्प्य, श्रीगुरूपदिष्टमार्गेण नादानुसन्धानपूर्वक निरस्तसमस्तोपाधिना केनापि चिच्चिलासेन प्रवर्तमानोऽस्मीति विभाव्य स्वकार्यानुष्ठानाय

समुद्रमेखले देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्य पादस्पर्श क्षमस्व मे ॥

इति भूमिं प्रार्थ्य, श्वासानुसारेण तस्यां पादं निधाय, "नन्दन्तु साधकाः सर्वे" इत्यादि पठन् बहिर्निर्गत्य मलमूत्रोत्सर्गशौचाचमनं विधाय, क्लीं कामदेवाय सर्वजनमनोहराय नमः, इति दन्तधावनं कुर्यात्। ततो नद्यादौ गत्वा वैदिकस्नानं निर्वर्त्य तान्त्रिकस्नानमारभेत्। यथा—तत्रादौ मूलेन करचरणमुखानि प्रक्षाल्य, ॐमणिधरि वज्रिणि महाप्रतिसरे रक्ष २ हुं फट् स्वाहा, इति शिखां बद्ध्वा, मूलविद्यया त्रिराचम्य, मूल आं ह्रीं इति गणेशषडक्षरं कृत्वा, ह्रीं वैश्वानरमृषये नमः पुष्पार्घ्यधूपदीपादिना तुष्टो भव स्नानकाले विघ्नान्निवारय २ स्वाहा, इति दशधाभ्युक्ष्य मूलेन तटान्मृदं गृहीत्वा स्वाहेति शिलां प्रक्षाल्य, तत्र मृदं संस्थाप्य स्नानं कुर्यात्। तत्रादौ मूलं आत्मतत्त्वं शोधयामि स्वाहा, मू० विद्यातत्त्वं शोधयामि स्वाहा, मू० शिवतत्त्वं शोधयामि स्वाहा, इत्याचम्य ऋष्यादिकरषडङ्गन्यासं च कृत्वा, ॐह्रींश्रीं ज्वालामुखि ह्रीं फट् स्वाहा, इति मृदो भागत्रयं कृत्वा ॐमित्येकां मृदं शोधयेत्। तत एकां मृदं गृहीत्वा अद्येत्यादि स्नानसङ्कल्पं कुर्यात्। ततो नद्यां नाभिमात्रे जले स्थित्वा स्वपुरतो जले हस्तमात्रं चतुरस्रं तीर्थं परिकल्प्य,

ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे।
तेन सत्येन देवेश तीर्थान् देहि दिवाकर॥

इति सूर्यात्तीर्थं प्रार्थ्य, क्रोमिति अङ्कुशमुद्रया सूर्यमण्डलं भित्त्वा,

ॐगां गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु॥

इति सूर्यमण्डलात्तीर्थान्यावाह्य पुरः कल्पिततीर्थे नियोज्य, पुनः सूर्यमण्डलादेव ह्रांह्रींह्रूंह्रैंह्रौंह्रः सर्वानन्दमयि तीर्थशक्ते एह्येहि स्वाहा, इति तीर्थशक्तिमावाह्य तस्मिंस्तीर्थमण्डले तां ध्यायेत्। यथा—

सर्वानन्दमयीमशेषदुरितध्वंसां मृगाङ्कप्रभां
त्र्यक्षां चोर्ध्वकरद्वयेन दधतीं पाशं सृणिं च क्रमात्।

---

१ 'प्रियाय' ख. पाठ.।

दोर्भ्यां चामृतपूर्णहेमकलशं शुक्लाब्जमालाम्बरां
गङ्गासिन्धुसरिद्द्वयादिसहितां श्रीतीर्थशक्तिं भजे ॥

इति ध्यात्वा योनिमुद्रया मूलेन तज्जलमष्टधाभिमन्त्र्य ह्रीमित्यालोड्य, वमिति धेनुमुद्रयामृतीकृत्य, ॐआत्मतत्त्वाय नमः, ॐविद्यातत्त्वाय नमः ॐशिवतत्त्वाय नमः, इति तत्त्वत्रयं जले विन्यस्य तेन निजशिरस्त्रिः प्रोक्ष्य, एकां मृदं जले क्षिप्त्वा द्वितीयमृदाङ्गानि संशोध्य तृतीयां गृहीत्वा देवतावाहनं कुर्यात् । यथा—

ज्वालामुखि शिवारूढे ॐह्रींश्रींबीजत्रयान्विते ।
परिवारयुते देवि जलेऽस्मिन् सन्निधिं कुरु ॥

इति तृतीयया मुद्रा देवतामावाह्य तत्र जले यन्त्रं विभाव्य, ॐह्रींश्रीं ज्वालामुखि मम शत्रूनुत्सारय २, इति ज्वालामुखीं त्रिरभिषिच्य, मूलेन स्वात्मानं पूर्ववत् त्रिराचम्य मूलं स्मरन् श्रवणादिसप्तच्छिद्राणि निरुध्य त्रिर्निमज्ज्योन्मज्जेत् । ततः ' ह्रांह्रींसः सूर्याय एष ते जलाञ्जलिः ' इति सूर्याय जलाञ्जलिं दत्त्वा त्रिराचम्य स्वशिरो मूलेन सप्तधाभ्युक्ष्य दशधा मूलं सजप्य, जलात्तीरमारुह्य धौते वाससी परिधाप्य मूलेन त्रिपुण्ड्रमूर्ध्वपुण्ड्रं वा तिलकं कुर्यात् । इति स्नानविधिः ।

ततः प्रथमं पैदिकीं संध्यां कृत्वा तान्त्रिकीमारभेत । यथा—पूर्ववदाचम्य प्राणायामर्ष्यादिकरषडङ्गन्यासान् विधाय स्वपुरतस्तीर्थजलं धेनुमुद्रयामृतीकृत्य मूलेनाष्टधाभिमन्त्र्य तेन जलेन " ॐ नमः " इत्यादि " क्षं नमः " इत्यन्तं मातृकया स्वशिरः प्रोक्ष्य, मूलेन च त्रिः संप्रोक्ष्य वामहस्ते जलमादाय दत्तहस्तेनाच्छाद्य, लंवंरंयंहं इति पाञ्चभौतिकैर्मन्त्रैः सप्तधाभिमन्त्र्य, मूलेन च त्रिरभिमन्त्र्य तज्जलबिन्दुभिस्तत्त्वमुद्रया मूलेन च स्वशिरस्त्रिः प्रोक्ष्यावशिष्टजलं दत्तहस्ते निधाय, तेजोरूपं तज्जलमिडयाकृष्य स्वदेहान्तःस्थितं सकलकलुषं मज्जाल्य, तज्जलं कृष्णवर्णं पिङ्गलया बहिर्निर्गतं मत्वा, पुनर्वामहस्ते कृत्वा स्ववामभागे ज्वलदग्निशिलां ध्यात्वा " ॐह्रींपशुहुं फट् " इति पाशुपतास्त्रमन्त्रेण तस्यां शिलायामास्फालयेत् । मूलेन जलमादाय प्रवहज्जाज्या सदृस्रुदलपरमामृतेनैकीभूतं विभाव्य निर्गमय्य

तेन जलेन "ॐअमृतमालिन्यै स्वाहा" इति कुशैः स्वशिरस्त्रिः प्रोक्ष्य, आत्मतत्त्वं शोधयामि स्वाहा, एवं विद्यातत्त्वं०, शिवतत्त्वं०, शिवतत्त्वं०, विद्यातत्त्वं०, आत्मतत्त्वं०, मूलं सर्वतत्त्वं शोधयामि० इति च त्रिराचम्य. एवं नवधाचम्य जलमञ्जलिनादायोत्थाय "ॐह्रां ह्रीं ह्रूं सः श्रीमार्तण्डभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं परिकल्पयामि स्वाहा" इति कुलसूर्याय त्रिरर्घ्यं दत्वा, ततो हृत्पद्मात् सूर्यमण्डले मूलदेवीं नीत्वा तत्र विधिवद् ध्यात्वा मानसोपचारैः संपूज्य, ॐ ज्वालारूपिण्यै विद्महे जगद्धारिण्यै धीमहि तन्नो ज्वाले प्रचोदयात्। अनया मूलगायत्र्या चतसृषु सन्ध्यासु श्रीदेव्यै अर्घ्यत्रयं दत्वा गायत्रीं मूलं यथाशक्ति जप्त्वा पुनरपि प्राणायामार्घ्यादिकरषडङ्गन्यासान् विधाय गुह्येति तर्पणं जपफलं च समर्प्य हृत्कमले श्रीदेवीं समानीय तीर्थं विसृजेत्। इति सन्ध्याविधिः॥ इत्थं सन्ध्याचतुष्टयं कृत्वा श्रीदेवीरूपः साधकः स्यात्, तस्मात् सन्ध्याचतुष्टयमवश्यं कर्तव्यम्। अथवा केवलां प्रातः सन्ध्यामेव कुर्यात् तां न संत्यजेदिति शिवशासनम्॥

ततस्तर्पणं विदध्यात्। तीर्थं पूर्ववदाचाह्य मूलेनामृतमुद्रया चामृतीकृत्य, तत्र जले यन्त्रं ध्यात्वा तत्र देवीं हृदयात् सपरिवारामानीय षडङ्गेन सकलीकृत्य, कुण्डलिनीप्रयोगेणामृतेनाभिषिच्य विधिवत् प्रपूज्य, ऐशान्यां ॐ श्रीमच्छ्रीगुरुमुकानन्दनाथभैरवस्तृप्यतां इति त्रिः सन्तर्प्य, ब्रह्मो ॐ परमगुरुस्तृप्यतां, नैर्ऋत्यां ॐ परमाचार्यगुरु०, वायव्ये ॐ परमेष्ठिगुरुः०, इति त्रिः सकृद्वा सन्तर्प्य, दिव्यौघ-सिद्धौघ-मानवौघगुरवस्तृप्यन्ताम्। ततो बिन्दौ मूलं श्रीमद्वादेवभैरवसहिता सपरिवारा सवाहना सायुधा समुद्रा श्रीज्वालामुखीदेवी तृप्यताम्। ह्रीं अखण्डभूतलभूर्भुवःस्वश्चारिण्यो योगिन्यो मातरस्तृप्यन्ताम् इति सन्तर्प्य, पुनर्बिन्दौ श्रीदेवीं सन्तर्प्य हृदि समानीय, तीर्थानि स्वस्थाने विसृज्य पुनरपि प्राणायामादि कृत्वा, मूलेन जलपूर्णं कमण्डलुं गृहीत्वा मूलं स्मरन् यागगेहं प्रविशेत्। तत्र द्वारदेवता जलादिना पूजयेत्। यथा—गं गणपतये नमः वामशाखायां, धं धर्माय नमः दक्षिणस्यां, ल्लूं वासुकये नमः ऊर्ध्वे, नरसिंहाय

नमः अधः, ॐसुमुख्यै नमः वामायां, ह्रीं सत्ये नमः दक्षिणस्यां, धीं उमायै नमः ऊर्ध्वे, ह्रीं देहल्यै नमः अधः, ह्रींश्रं अलिन्दायै नमः, ॐह्रींज्वां ज्वालिन्यै नमः, ॐह्रींह्रां द्वारश्रियै नमः इति संपूज्य, ॐ वास्तुपुरुषाय नमः इति मध्ये । ततो वामाङ्गसङ्कोचेनान्तः प्रविश्य मूलेन यागभूमिं संवीक्ष्य, तत्रासनमास्तीर्यासनशोधनं कुर्यात् । यथा—अस्य श्रीआसनशोधनमन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता, आसनशोधने विनियोगः । मेरुपृष्ठऋषये नमः शिरसि, सुतलच्छन्दसे नमो मुखे, कूर्माय देवतायै नमो हृदि, आसनशोधने विनियोगाय नमः सर्वाङ्गेषु । ॐप्रीं पृथ्वि त्वया धृता.० इति भूमिं प्रार्च्य, मण्डूकाय नमः, कालाग्निरुद्राय नमः, ह्रीं आधारशक्तिकमलासनाय नमः, ह्रीं पीठासनाय नमः, इत्यासनं संपूज्य, तदुपरि समुपविश्य, संविदं यथामन्त्रं स्वीकुर्यात् ।

संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे ।
ब्राह्मणानां च तृप्त्यर्थं पवित्रा भव सर्वदा ॥

ॐब्राह्मण्यै नमः स्वाहा । ॐ सिद्धिमूलकरे[1] देवि हीनबोधप्रबोधिनि । राजपूजाँवशङ्करि शत्रुपक्षनिसूदिनि ॥ ऐं क्षत्रियायै नमः स्वाहा । अज्ञानेन्धनदीप्ताग्ने ज्ञानाग्निब्रह्मरूपिणि । आनन्दस्याकृतिं प्रीतिं[2] सम्यग्ज्ञानं प्रयच्छ मे ॥ ह्रीं वैश्यायै नमः स्वाहा । नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि । त्रैलोक्यविजये मातः समाधिफलदा भव ॥ क्लीं शूद्रायै नमः स्वाहा । ॐअमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षय २ सिद्धिं देहि २ श्रीज्वालामुखीपदं मे वश्यमानय २ स्वाहा, इति तदुपरि मूलं च सप्तधा सञ्जप्य योनिमुद्रयामृतीकृत्य, आगच्छागच्छ संतिष्ठ २ संनिधत्स्व २ संनिरुद्धा भव २ संनिधेहि २ सर्वोपचारसहितां पूजां गृह्ण २ स्वाहा, इति मुद्राः प्रदर्श्य, च्छोटिकाभिर्दशदिग्बन्धनं विधाय, श्रीगुरुपादुकाविद्यया स्वशिरसि श्रीगुरुपरम्परां सप्तधा त्रिधा वा सन्तर्प्य मूलेन स्वहृदि श्रीदेवीं सायुधां सवाहनां सपरिवारां साशिवां सन्तर्प्य, ऐं वदवद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव सर्वसत्त्ववशङ्करि स्वाहा, इत्यनेन मुखे जुहुयात् । ततः आनन्दमयो भूत्वा,

---

१ 'सिद्धमूल्यरुये' क. पाठः । २ 'पुत्र' क पाठः । ३ 'मत्वा' क. पाठः ।

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
पापाण्डकारिणो भूता भूता भूम्यन्तरिक्षगाः ।
दिवि लोके स्थिता ये च ते नश्यन्तु शिवाज्ञया ॥

इति तर्जनीमध्यमाभ्यामूर्ध्वोर्ध्वं तालत्रयदानेन वामपार्ष्णिघातत्रयेण च दिग्बन्धं कृत्वा च त्रिविधविघ्नानुत्सार्य च्छोटिकाभिर्दशदिग्बन्धनं कृत्वा चतुर्दिक्षु वह्निप्राकारं सञ्चिन्त्य, प्राणायामं कुर्यात् । यथा—

इडया पिब षोडशभिः पवनं कुरु षष्टिचतुष्टयमन्तरगम् ।
त्यज पिङ्गलया शनकैः शनकैर्दशभिर्दशभिर्द्व्यधिकैः ॥

इति त्रिधा प्राणायामेन निरस्तसकलकलुषं स्वदेहं देवताराधनयोग्यं विभाव्य भूतशुद्धिं कुर्यात् । यथा—

मूलाधारात् हंस इति मन्त्रेण पृथिव्या सह कुण्डलिनीं स्वाधिष्ठाने समानीय तत्र जले पृथिवीं लीनां विभाव्य, तस्माज्जलेन सह मणिपूरे समानीय तत्र वह्नौ जलं लीनं विभाव्य, तस्माद्वह्निना सहानाहते समानीय तत्र वायौ वह्निं लीनं विभाव्य, तस्माद्वायुना सह विशुद्धौ समानीय तत्राकाशे वायुं लीनं विभाव्य, तस्मादाकाशेन सहाज्ञाचक्रे समानीय तत्रस्थमनस्याकाशं लीनं सञ्चिन्त्य, मनो नादे लीनं सञ्चिन्त्य, ध्वनौ ध्वनिं लीनं सञ्चिन्त्य, सहस्रदलकमलकर्णिकास्थचन्द्रमण्डलमध्यगततेजोमयबिन्दुरूपपरमशिवे तां समर्प्य तत्र केवलशरीरे

वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभम् ।
ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम् ॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ।
तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ॥
उपपातकरोमाणं रक्तश्मश्रुविलोचनम् ।
खड्गचर्मधरं क्रुद्धं पापं कुक्षौ विचिन्तयेत् ॥

इति पापपुरुषं ध्यात्वा, प्राणायामविधिना यमिति वायुबीजं धूम्रवर्णं षोडशवारं जपंस्तं पापपुरुषं संशोष्य, ततो रमिति वह्निबीजं रक्तवर्णं चतुष्षष्टिवारं जपंस्तमेव संदह्य, वमित्यमृतबीजं सहस्रारे विचिन्त्य

द्वात्रिंशद्वारं जपंस्तदुद्भवामृतधारया निष्पापं शरीरमुत्पाद्य, ललाटस्थ-लमिति पृथ्वीबीजेन पीतवर्णेन सुदृढीकृत्य, ह्रीमिति मूलस्थबीजेन सैश्वर्यं सोहमिति मन्त्रेण कुण्डलिनीममृतलोलीभूतां पञ्चभूतानि जीवात्मानं च ब्रह्मपथे स्वस्वस्थाने संयोजयेत् । इति भूतशुद्धिः ॥

ततो देवीरूपमात्मानं विचिन्त्य हृदि हस्तं निधाय प्राणप्रतिष्ठां कुर्यात् । यथा—ॐआंह्रींक्रों यंरंलंवं-शंषंसंहं-ळंक्षं हंसः सोहं मम प्राणा इह प्राणाः, १ँ मम जीव इह स्थितः, १ँ मम सर्वेन्द्रियाणि इह स्थितानि, १ँ मम वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । इति प्राणप्रतिष्ठां विधाय, स्वमूल-ऋष्यादिस्मरणं कुर्यात् । यथा—

ॐ अस्य श्रीज्वालामुखीमन्त्रराजस्य श्रीवैश्वानर ऋषिः, अनुष्टुप् छन्दः, श्रीमद्द्वैतरूपिणी ज्वालामुखी देवता, ह्रीं बीजं, श्रीं शक्तिः, हूं कीलकं मम धर्मार्थकाममोक्षार्थे जपे विनियोगः, इति कृताञ्जलिर्वदेत् । वैश्वानरऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, ज्वालामुखीदेवतायै नमो हृदि, ह्रीं बीजाय नमो गुह्ये, श्रीं शक्तये नमः पादयोः, हूं कीलकाय नमो नाभौ, जपे विनियोगाय नमः सर्वाङ्गेषु । ॐह्रांआं अङ्गुष्ठाभ्यां नमः, ह्रींश्रीं तर्जनी०, हूंश्रूं मध्यमा०, ह्रैंश्रैं अनामिका०, ह्रौंश्रौं कनिष्ठि०, ह्रःश्रः करतल० । एवं हृदयादिन्यासः ॥ ॐह्रींश्रीं नमः शिरसि, ज्वालामुखि हृदि, मम सर्वशत्रून् नाभौ, भक्षय २ लिङ्गे, हूं गुह्ये, फट् स्वाहा नमः सर्वाङ्गेषु । इति मन्त्रन्यासः ॥

अथ समन्त्रमातृकान्यासः । ॐअंकंखंगंघंङंॐ नमः शिरसि, एवं आं चं ५ ह्रीं ललाटे इं टं ५ श्रीं नेत्रयोः, ईं तं ५ ज्वां मुखे, उं पं ५ लां कण्ठे, ऊं यं मुं स्कन्धयोः, ऋं रं खिं पाणयोः, ॠं लं मम स्तनयोः, ऌं वं सर्वं हृदि, ॡं शं शत्रून् कुक्षौ, एं षं भक्षय पार्श्वयोः, ऐं सं भक्षय नाभौ, ओं हं ह लिङ्गे, औं ळं फट् गुह्ये, अं क्षः ते स्वाहा नमः पादयोः । इति समन्त्रमातृकान्यासः ॥

अथान्तर्मातृकान्यासः । तत्र स्वरैः पूरकः, वादिमान्तैः कुम्भकः, यादिभी रेचकः । ॐअस्य श्रीअन्तर्मातृकान्यासस्य, ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीअन्तर्मातृकासरस्वती देवता, हलो बीजानि, स्वराः शक्तयः, अव्यक्त कीलकं न्यासे विनियोगः इति कृताञ्जलिः स्मृत्वा

न्यसेत् । ब्रह्मऋषये शि० , गायत्रीछन्दसे मुखे , अन्तर्मातृकासरस्वती-देवतायै हृदि , हल्भ्यो बीजेभ्यो गुह्ये , स्वरेभ्यः शक्तिभ्यः पादयोः , अव्यक्तकीलकाय नाभौ , न्यासे विनियोगाय नमः सर्वाङ्गेषु , इति ऋष्यादिन्यासः ॥ ॐ ऐं ह्रीं श्रीं अं कं ५ आं अङ्गुष्ठाभ्यां नमः । एवं ४ इं चं ५ ईं तर्ज० , ४ उं टं ५ ऊं मध्यमा० , ४ एं तं ५ ए अनामिका० , ४ ओं पं ५ औं कनिष्ठिका० , ४ अं यं १० अः करतलपृष्ठाभ्यां० । एवं हृदादिन्यास ॥ ततो ध्यानम्—

शुद्धस्फटिकसङ्काशां शुद्धक्षौमविराजिताम् ।
मुक्तारत्नस्फुरद्रूपां जपमालां कमण्डलुम् ॥
पुस्तकं वरदानं च बिभ्रतीं परमेश्वरीम् ।
एवं ध्यात्वा हृदम्भोजे मातृकां विन्यसेत् सुधीः ॥

इति ध्यात्वा न्यासं कुर्यात् । अं १६ कण्ठे , कं १२ अनाहते , डं १० नाभौ , वं ६ स्वाधिष्ठाने , यं ४ मूलाधारे , क्षं भ्रूमध्ये , इत्यन्तर्मातृका । ततो बहिर्मातृकान्यासं यथोक्तं कुर्यात् ।

ततस्तत्त्वन्यासः । मूलं आत्मतत्त्वाय स्वाहा पादादिनाभ्यन्तम् । मू० विद्यातत्त्वा० नाभ्यादिभ्रूमध्यपर्यन्तम् । मू० शिवतत्त्वा० आज्ञादिशिरोऽन्तम् । मू० सर्वतत्त्वेभ्यः स्वाहा सर्वाङ्गेषु । इति तत्त्वन्यासः ॥ अथ मूलमन्त्रन्यासः । ॐ नमो मस्तके ह्रीं ललाटे , श्रीं भ्रूमध्ये ,

ज्वां नासिकायां, लां नेत्रयोः, मुं मुखे, खिं कण्ठे, मं स्कन्धयोः, मं स्तनयोः, सं वक्षसि, धें कुक्षौ, शं पार्श्वयोः, भ्रूं नाभौ, मं लिङ्गे, सं पृष्ठे, यं कट्यां, भं गुदे, सं मेढ्रे, यं ऊर्वोः, हं जानुनोः, फट् जङ्घयोः, स्वां गुल्फयोः, हां पादयोः, मूलं सर्वाङ्गेषु । इति मूलमन्त्रन्यासः ॥

अथ दैवतन्यासः । ॐ ह्रीं मायादेव्यै वारुणीवात्यालीसहिताये नमो मस्तके । ह्रीं मोहिन्यै श्रीवाराहीकुलसुन्दरीसहिताये नमो मुखे । ह्रीं बालादेव्यै श्रीकुवरीकौलिनीसहिताये नमो हृदि । श्रीं भगरूपिणीदेव्यै श्रीकुण्डीकुलिसतासहिताये नमः कुक्षौ । ह्रीं भगावासादेव्यै श्रीकुटिलाकुहूसहिताये नमो नाभौ । ह्रीं भेरुण्डादेव्यै श्रीकुन्तीकुम्भेश्वरीसहिताये नमो गुल्फे । ह्रीं मृडानीदेव्यै श्रीकुन्ताकूचरीसहिताये नमो गुल्फयोः । श्रीह्रीं धन्द्येश्वरीदेव्यै श्रीकारुणाकृतिसहिताये नमः पादयोः । इति दैवतन्यासः ॥

पूर्ववदृष्यादिन्यासं ? पीठन्यासं कुर्यात् । यथा—मण्डूकाय नमो मूलाधारे, कालाग्निरुद्राय नमः स्वाधिष्ठाने । आधारशक्त्यै नमो मणिपूरके । अनन्ताय नमो हृदये । कमठाय० शेषाय० सुधार्णवासनाय० पृथिव्यै० क्षीरसमुद्राय० मदिरासमुद्राय० घृतसमुद्राय० दुग्धसमुद्राय० दक्षांसे, धर्माय० वामांसे, ज्ञानाय० वामोरौ, वैराग्याय० दक्षोरौ, ऐश्वर्याय० मुखे, अधर्माय० वामपार्श्वे, अज्ञानाय० नाभौ, अवैराग्याय० दक्षपार्श्वे, अनैश्वर्याय० हृदि । पुनर्हृदि—मायायै० विद्यायै० अनन्ताय० धर्माय० आनन्दकन्दाय० संवित्प्रकाशाय० प्रकृतिमयपद्मेभ्यो० विकृतिमयकेसरेभ्यो० पञ्चाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै० अं अर्कमण्डलाय० सों सोममण्डलाय० रं वह्निमण्डलाय० आं आत्मने० अं अन्तरात्मने० पं परमात्मने० ह्रीं ज्ञानात्मने० ह्रीं पीठासनाय० ह्रीं षट्चक्रासनाय० ॐ ह्रं सदसद्दलकमलकर्णिकायै० ह्रीं शक्त्यासनाय० ह्रां पद्मासनाय० ह्रीं शक्त्यासनाय० ह्रीं वेदासनाय० ह्रींह्रः फट् स्वाहा रुद्राजपीठाय नमः इति पीठन्यासं कृत्वा, तत्रैव स्वाभेदेन श्रीज्वालामुखीदेवीं ध्यायेत् । यथा—

ज्वालापर्वतसंस्थितां त्रिनयनां पीठत्रयाधिष्ठितां
ज्वालाडम्बरभूषितां सुवदनां नित्यामदुग्धां जनैः ।

षट्चक्राम्बुजमध्यगां वरशराम्भोजाभयान् बिभ्रतीं
चिद्रूपां सकलार्थदीपनकरीं ज्वालामुखीं नौम्यहम् ॥

इति हृत्कमले श्रीदेवीं ध्यात्वा, स्वैक्येन विभाव्य मूलविद्यया स्वशिरसि पुष्पाञ्जलिं दत्त्वा, पुनर्हृदयकमले यथोक्तरूपां देवीं साङ्गां साबरणां सशिवां ध्यात्वा, वक्ष्यमाणप्रकारेण पीठपूजापूर्वकं मानसैरुपचारैः संपूज्य नैवेद्यं दत्त्वा भोजनावसरेऽन्तर्बहिर्देवं कुर्यात् । तत्र मूलाधारे आत्मान्तरात्मपरमात्मज्ञानात्मेत्यात्मचतुष्टयं सचतुरश्रं कुण्डलिन्यग्निसमुज्ज्वलं कुण्डं ध्यात्वा, तत्र श्रीपरदेवतां ध्यात्वा तन्मुखे मूलान्ते "अहन्तां जुहोमि स्वाहा" इत्थमहन्तासत्यपैशुन्यकामक्रोधलोभमोहमदमात्सर्याणि सुपुत्राच्युक्सङ्क्रमनस्रुवेण प्रत्येकं हुत्वा, धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा घृचा । सुषुम्नावर्त्मना नित्यमक्षतृप्तीर्जुहोम्यहम् स्वाहा ॥ प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचम् । धर्माधर्मकलाक्लेदपूर्णां वह्नौ जुहोम्यहम् स्वाहा ॥ इति हुत्वा, अथवा—

अन्तर्निरन्तरनिरिन्धनमेधमाने
मायान्धकारपरिपन्थिनि संविदग्नौ ।
कस्यांचिदद्भुतविकासिमरीचिभूम्नो
विश्वं जुहोमि वसुधादिशिवावसानम्, स्वाहा ॥

इति हुत्वा, पुनर्हृदयकमले श्रीदेवीं ध्यात्वा, उत्तरपोशनादिसर्वोपचारैराराध्य, मूलं यथाशक्ति जपित्वा, प्राणायामादिना जपं समर्प्य श्रीगुरुं प्रणम्य स्वदेहं गन्धादिना संभूष्य मनसा यथाशक्ति जपहोमादिकं च कृत्वा, स्वशरीरं कामकलारूपं ध्यायन् स्वदेहं पूजायोग्यं कृत्वा सामान्यार्घ्यं कुर्यात् । तत्र स्वदक्षे त्रिकोणवृत्तविम्बचक्रं विधाय, तत्र "आधारशक्तये नमः" इति संपूज्य तदुपरि त्रिपादिकां संस्थाप्य 'रवह्निमण्डलाय दशकलात्मने नमः" इति संपूज्य, तत्र अस्त्राय फडिति क्षालितपात्रं शङ्खादिकं वा संस्थाप्य, ("अ सूर्यमण्डलाय द्वादशकलात्मने नमः" इति संपूज्य शुद्धजलेन तत्पात्रमापूर्य 'सा सोममण्डलाय षोडशकलात्मने नमः' इति संपूज्य,) तत्र "गङ्गे च यमुने चैव इत्यादिना तीर्थान्यावाह्य गन्धाक्षतपुष्पाणि निक्षिपेत् । पश्चात् सूर्यसोमकलाः संपूज्य धेनुमुद्रां प्रदर्शयेदिति सामान्यार्घ्यविधिः ॥

ततः स्वधामे षट्कोणान्तर्गतत्रिकोणद्वयबिन्दुं बाह्यवृत्तबिम्ब मण्डल विरचय्य, तत्र "मण्डूकाय नमः" इत्यादिपीठपूजाक्रमेण पीठपूजामारभेत् । ततो नमः इत्याधार प्रक्षाल्य मण्डलोपरि संस्थाप्य "रं वह्निमण्डलाय दशकलात्मने नमः" इति संपूज्य, फडिति कलश प्रक्षाल्य कारणेन प्रपूर्य रक्तवस्त्रमाल्यादिना संभूष्य श्रींदेवीबुद्धया संस्थाप्य "अं अर्कमण्डलाय द्वादशकलात्मने नमः" इति कलशे संपूज्य, "सों चन्द्रमण्डलाय षोडशकलात्मने नमः" इति द्रव्य संपूज्य, फडिति संरक्ष्य हूमित्यवगुण्ठ्य मूलेन सवीक्ष्य मूलेन गन्धमाघ्राय, कुम्भे पुष्प दत्त्वा शापमोचन कुर्यात् । यथा—

ओं एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कवोद्भवा ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥ १ ॥
ओं सूर्यमण्डलसंभूते वरुणालयसंभवे ।
अमावीजमये देवि शुक्रशापाद् विमुच्यताम् ॥ २ ॥
ओं वेदानां प्रणवो बीज ब्रह्मानन्दमय यदि ।
तेन सत्येन देवेशि ब्रह्महत्या व्यपोहतु ॥ ३ ॥

इति त्रि., ततो घा वीं वूं वैं वों वः ब्रह्मशापमोचिताये सुरादेव्यै नमः इति त्रि, ह्रीं श्रीं क्रां क्रीं कूं क्रः क्रों क्रः कृष्णशाप मोचय २ अमृतं स्रावय स्रावय स्वाहा इत्यपि त्रि. पठित्वा । ओंह्रीं नमस्तेजोराशेऽशेषसत्त्वाह्लादिनि मयूरमुखि अमोघसिद्धिदायिनि महोत्साहनिमित्ते कपालिनि वर्ध २ रक्ष २ समय मे प्रयच्छ २ रुद्ररौद्रसुरासवे शुक्रशापनिकृन्तनि ब्रह्महत्याद्देरे ह्रीं ह्रूं लां लूं फट् फट् स्वाहा, इति शुक्रशापहरीविद्यां दशधा जपेत् । ओं हंस शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ इत्यपि त्रि पठेत् । ततः आनन्दभैरवं सुरादेवीं च ध्यायेत्। यथा—

सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
अष्टादशभुजं देवं पञ्चवक्त्रं त्रिलोचनम् ॥ १ ॥
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरि स्थितम् ।
वृषारूढं नीलकण्ठं सर्वाभरणभूषितम् ॥ २ ॥

कपालखट्वाङ्गधरं घण्टाडमरुवादिनम् ।
पाशाङ्कुशधरं देवं गदामुसलधारिणम् ॥ ३ ॥
खड्गखेटकपट्टीश-मुद्गरशूलकुन्तिनम् ।
विचित्रखेटकं मुण्डवरदाभयपाणिकम् ॥ ४ ॥
लोहितं देवदेवेशं भावयेत् साधकोत्तमः ।
दत्त्वा पुष्पाञ्जलिं कुम्भे जपेदानन्दभैरवम् ॥ ५ ॥

इत्यानन्दभैरव ध्यात्वा सुरादेवीं ध्यायेत् । यथा—

समुद्रे मथ्यमाने तु क्षीराब्धौ सागरोत्तमे ।
तत्रोत्पन्ना सुरादेवी कुमारीरूपधारिणी ॥ ६ ॥
भावयेच्च सुरादेवीं चन्द्रकोट्यर्बुतप्रभाम् ।
हिमकुन्देन्दुधवला पञ्चवक्त्रा त्रिलोचनाम् ॥ ७ ॥
अष्टादशभुजैर्युक्ता सर्वानन्दकरोद्यताम् ।
ग्रहसन्तीं विशालाक्षीं देवदेवस्य सम्मुखीम् ॥ ८ ॥

इति सुरादेवीं ध्यात्वा "ह्सरक्तमलवयऊ आनन्दभैरवाय वौषट्, सह्क्तमलवरयऊ सुरादेव्यै वौषट्" इति देवदेव्यौ त्रि सपूज्य, दशधा मूल सजप्य, दक्षिणावर्तेन त्रिपङ्क्त्या अ १६ क १६ थ १६ इत्य कथादिशक्तिचक्र विलिख्य, तन्मध्ये ह्क्ष च सालिख्य, एतत्समावेशाद् द्रव्यमध्येऽमृत विचिन्त्य, धेनुमुद्रयामृतीकृत्य वमिति सुधाबीज मूलमष्टधा घट धृत्वा पठित्वा, आत्मश्रीचक्रयोर्मध्ये त्रिकोणषट्कोणवृत्तचतुरस्र विलिख्य, चतुरस्रे -ॐ पूर्णगिरिपीठाय नम, ॐ उड्डीयाणपीठाय नम, ॐ कामरूपपीठाय नम, ॐ जालन्धरपीठाय नम इति सपूज्य, षडङ्गन षट्कोण प्रपूजय, त्रिकोणस्याग्र ॐ नम दक्षे ह्रीं नम वामे श्रीं नम, इति त्रिकोण सपूज्य, मध्ये ॐह्रीं आधारशक्तय नम इति सपूज्य, त्रिकोणगर्भ षट्कोणभूषिता यन्त्रिका सस्थाप्य सामान्यार्घ्यजलनाभ्युद्य पूजयेत् । यथा—य धूम्रार्चिष नम, र ऊष्मायै० ल ज्वालिन्यै०, व ज्वालिन्यै० श विस्फुलिङ्गिन्यै०, ष सुश्रियै० स सुरूपायै० ह कपिलायै०, ळ हव्यवाहायै०, क्ष

कव्यवाहाये नमः, इति संपूज्य, मध्ये "रं वह्निमण्डलाय दशकलात्मने नमः" इति प्रपूज्य, षट्कोणे षडङ्गं च संपूज्य, मध्ये मूलेन देवीं संपूज्य, हुहूं ब्रह्माण्डचषकाय फट् स्वाहा, इति नारिकेलपात्रं प्रक्षाल्य, यन्त्रकोपरि संस्थाप्य, तत्र—कं तपिन्यै नमः, खं तापिन्यै०, गफं धूम्रायै०, घं मरीच्यै०, ङं ज्वालिन्यै०, चं रुच्यै०, छं सुषुम्नायै०, जं भोगदायै०, झं विश्वायै०, ञं बोधिन्यै०, टं क्षमायै०, ठड धारिण्यै नमः, अ अर्कमण्डलाय द्वादशकलात्मने नमः इति संपूज्य, त्रिकोण षट्कोणं सचतुरस्रं पात्रे विलिख्य बीजत्रयेण त्रिकोणं संपूज्य, षडङ्गेन षट्कोणं संपूज्य, ततो विलोममातृकां पठन्नमृतेन त्रिकोणं प्रपूर्य जलेन च भागमेकं संपूर्य तत्र सुगन्धादि निक्षिप्य, अं अमृतायै नमः, आं मानदायै, इं पूषायै, ईं तुष्ट्यै, उं पुष्ट्यै, ऊं रत्यै, ऋं धृत्यै, ॠं शशिन्यै, लृं चन्द्रिकायै, लॄं कान्त्यै, एं ज्योत्स्नायै, ऐं श्रियै, ओं प्रीत्यै, औं अङ्गदायै, अं पूर्णायै, अः पूर्णामृतायै, सों षोडशकलात्मने सोममण्डलाय नमः इति संपूज्य, पूर्ववद् द्रव्ये यन्त्रं विलिख्य, बीजत्रयेण त्रिकोणं संपूज्य, षडङ्गेन षट्कोणं प्रपूज्य, गङ्गेत्यादिना तीर्थमावाह्य आनन्दभैरवभैरव्यौ स्वस्वमन्त्रेण संपूज्य, पूर्वे ग्लूं गगनरत्नेभ्यो नमः। दक्षे ग्लूं स्वर्गरत्नेभ्यो नमः। उत्तरे ग्लूं मर्त्यरत्नेभ्यो नमः। पश्चिमे ग्लूं पातालरत्नेभ्यो नमः। मध्ये ग्लूं नागरत्नेभ्यो नमः। इति संपूज्य, मांसादिकं संशोधयेत्। यथा—तत्र स्थाप्ये चतुरश्रं विधाय तत्र मांसादिपात्रं संस्थाप्य, यमिति संशोष्य, रमिति सन्दह्य, वमित्यमृतेनासाव्य, धेनुमुद्रयामृतीकृत्य, मूलं तदुपरि दशधा प्रजप्य, क्रमेण शोधयेत्। यथा—ओं प्र तद्विष्णु. स्तवते वीर्येण मृगो न भीम. कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा॥ इति द्वितीयशोधनम्। ओं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥ इति मीनशोधनम्। 'ओं तद्विष्णो. परमं पद" इत्यादिना मुद्राशोधनम्। ओं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा॥

इति पञ्चमं शोधयेत् । ततः पात्रोपरि हूमित्यवगुण्ठ्य वमित्यमृतीकृत्य तालत्रयेण दिशः संवदृष्य, तदुपरि मूलं सप्तधा प्रजप्य योनिमुद्रां प्रदर्शयेत् । ततः श्रीपात्रोपरि कुण्डलिन्याः प्रयोगेण राजदन्तवर्त्मना निःसृतामृतधारां योनिमुद्रोल्लासितेन करेणानीय, मूलं ओं ब्रह्माण्डखण्डसंभूतमशेषरससंभृतम् । आपूरितं महापात्रं पीयूषरसमावह ॥ पें अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय २ ओंजुंसः स्वाहा इत्यभिमन्त्र्य, सौः तद्रूपेणैकरस्यं च दत्त्वार्घ्यं तत्स्वरूपिणि । भूत्वा परामृताकार मयि चित्स्फुरणं कुरु ॥ इत्यभिमन्त्र्य, इदं नमः इति संपूज्य, शङ्खमुद्रां प्रदर्श्य षडङ्गेन सकलीकृत्य मत्स्यमुद्रया पात्रमाच्छाद्य मूलं दशधा संजप्य पात्रं देवीरूपं भावयेदिति श्रीपात्रस्थापनविधिः ॥

ततो देव्या आज्ञामादाय घटसमीपे गुरुपात्रं ततः शक्तिपात्र-भोगपात्र-स्वपात्र-योगिनीपात्र-वीरपात्र-बलिपात्र-पाद्यपात्रार्घ्यपात्राचमनीयपात्र-मधुपर्कपात्रमित्येतानि पात्राणि संस्थाप्य, ततश्चर्वणयुतकारणेन तत्त्वमुद्रया श्रीपात्रामृतबिन्दून् समुद्धृत्य, ढसरक्तमलवयऊं सुरादेव्यै वौषट् आनन्देश्वरभैरवं तर्पयामि नमः सुरादेवीं तर्पयामि नमः इति त्रिः सन्तर्प्य, ततो गुरुपात्रामृतेन श्रीपादुकामुच्चार्य श्रीमच्छ्री-अमुकानन्दनाथ-श्रीपादुकां पू० इति त्रिः सन्तर्प्य, एवं परमगुरुं परमाचार्यगुरुं परमेष्ठिगुरुं च श्रीगुरुपात्रामृतेन सन्तर्प्य, ततः श्रीपात्रामृतेन मूलं श्रीमच्छ्रीमहादेवभैरवसहितां सवाहनां समुद्रां सपरिकरां सायुधां श्रीज्वालामुखीं तर्पयामि नमः इति स्वहृदि सन्तर्प्य, प्रोक्षणीपात्रं संस्थाप्य श्रीपात्रामृतबिन्दुना संस्कृत्य मूलेन स्वात्मानं संप्रोक्षयेत् । अनेनैव जलेन यागभूमिवस्तूनि च प्रोक्षयेत् । इति कलशस्थापनविधिः ॥

ततः पूर्ववत् पीठन्यासक्रमेण श्रीचक्रपीठोपरि पीठपूजां विधाय कुसुमाञ्जलिं गृहीत्वा, श्रीदेवीं ध्यात्वा यमिति वायुबीजेन स्वहृदयादानसापुटेन श्रीदेवीं तेजोमयीं कुसुमाञ्जलौ समानीय, तत्र विधिवद् ध्यात्वा, ओं देवेशि भक्तिसुलभे परिवारसमन्विते । यावत् त्वां पूजयिष्यामि तावद् देवि इहावह ॥ इति पठित्वा कुसुमाञ्जलिं श्रीचक्रोपरि निक्षिपेत् । ततो मूल श्रीमहादेवसहिते ज्वालामुखि इहागच्छ २ इह संतिष्ठ २ इह सन्निधत्स्व २ इह सन्निरुद्धा भव २

---

१ 'त मया पात्र' ख पाठ ।

मम सर्वोपचारसहितां पूजां गृह्ण २ स्वाहा, इत्यावाहनादिमुद्राः प्रदर्श्य श्रीचक्रपीठोपरि लेलिहानमुद्रां प्रदर्श्य, प्राणप्रतिष्ठां कुर्यात् । ओं आह्रीं क्रों हंस. सोहं श्रीज्वालामुख्याः प्राणा इह प्राणाः १३ जीव इह स्थितः १३ सर्वेन्द्रियाणि इह स्थितानि १३ वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा, इति प्राणप्रतिष्ठां विधाय, दशदिग्बन्धनं च विधाय, हुमित्यवगुण्ठ्य, अमृतमुद्रयामृतीकृत्य, षडङ्गेन सकलीकृत्य, परमीकृत्य धेनुयोनिमुद्रे प्रदर्श्य, श्रीपात्रामृतेन मूलं श्रीमहादेवभैरवसहिता श्रीज्वालामुखीं तर्पयामि नम इति त्रि. सन्तर्प्य, मू० श्रीमहादेवभैरवसहितायै श्रीज्वालामुखीभगवत्यै एतत्पाद्यं नमः । एव मू० अर्घ्यं स्वाहा । मू० एतदाचमनाय स्वधा । एतन्मधुपर्कं सुधा । मू० पुनराचमनीय सुधा । मू० एतत्स्नानीयं नमः । इति गङ्गादिजलेन सर्वाङ्गे सस्नाप्य, शुद्धदुकूलेनाङ्गं प्रोञ्छ्य, विचित्रपट्टवस्त्रकुङ्कुमकस्तूरीचन्दनसिन्दूरमुकुटकुण्डलहारादिनानालङ्कारान् दत्त्वा, पुनराचमनीयं दद्यात् । ततो मध्यमानामाङ्गुष्ठैः, मूल एष गन्धो नम. इति तिलकं ललाटे कुर्यात् । अङ्गुष्ठतर्जनीभ्यां मूलं श्रीमहादेवभैरवसहितायै श्रीज्वालामुख्यै अक्षतपुष्पाणि वौषट् इति पुष्पैः सपूज्य, धूपपात्रं फडिति संपूज्य पुरत. स्थापयित्वा वामतर्जन्या स्पृशन् श्रीपात्रामृतेन धूप निवेदयामीति निवेद्य, " ओंजगद्धरनिमन्त्रमात. स्वाहा " इति घण्टां सपूज्य वामेन पाणिना तां वादयन् मध्यमानामाङ्गुष्ठै. पात्र धृत्वा, मूलं ओंज्वालारूपिण्यै विद्महे जगद्धरिण्यै धीमहि तन्नो ज्वालामुखी प्रचोदयात् । मू० " वनस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ " इति त्रिधोत्क्षिप्य देवीं धूपयेत् । ततो दीप समुपे संस्थाप्य पूर्ववत् प्रोक्षणपूजने कृत्वा वाममध्यमया दीपपात्र संस्पृशन् दीप निवेदयामीति निवेद्य, पूर्ववद् घण्टां वादयन् मध्यमानामामध्ये दीपपात्रमङ्गुष्ठेन धृत्वा दर्शयन् गायत्रीं च पठन् " ओंसुमपाणो महादीप. सर्वतस्तमनाशक. । प्रगृह्यतां मम देवेशि दीपोऽयं प्रतिगृह्यताम् ॥ " इति वीक्षयेत् । ततः स्वर्णादिपात्रे कुङ्कुमेन वसुपत्र चन्द्ररूपं चक्रं कृत्वा मध्ये दीपमेकमष्टपत्रेषु दीपाष्टकं संस्थाप्य, ओं सौं. ग्लूं स्लूं ग्लूं प्लूं ग्लूं सौं. ओं श्रीरत्नेभ्यो नम. इत्यभ्यर्च्य,

---

* दारणे ।

मूलेन चाभ्यर्च्य स्थालक्रमामस्तक्रमुद्धृत्य नववारं मूलं "समस्तच-क्रचक्रेशीयुते देवि नवात्मिके । आरात्रिकमिदं देवि गृहाण नम सिद्धये ॥" इति चक्रमुद्रया नीराजयेदिति नीराजनविधिः ॥

ततो नानानैवेद्यं स्वर्णपात्रे निःक्षिप्य हूमित्यवगुण्ठ्य वमित्यमृती-कृत्य, मूलं सप्तधा सञ्जप्य वामाङ्गुष्ठेन नैवेद्यपात्रं स्पृशन् मूलान्ते "हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम् । पञ्चधा षड्रसोपेतं गृहाण परमेश्वरि" नैवेद्यं निवेदयामीति दक्षानामाङ्गुष्ठाभ्यां निवेदयेत् । ततो मूलं अमृतोपस्तरणमसि स्वाहा इत्यपोशानं दत्त्वा, पञ्च प्राणादिमुद्राः प्रदर्श्य सुतृप्तां देवीं भावयित्वा, पुनराचमनीयं दत्त्वा मूलान्ते कर्पू-रादियुक्तं ताम्बूलं निवेदयामीति ताम्बूलं दद्यात् । ॐ नमः उच्छि-ष्टचाण्डालि मातङ्गिनि सर्ववशङ्करि स्वाहा श्रीशेषिकापादुकां पू० इदमुच्छिष्टभोजनं कल्पयित्वा देवी-ईशाने त्रिकोणे क्षिपेत् । ततः सर्वेषामर्घ्यपात्रजलेनोत्सर्गः कार्यः । ततस्तत्त्वमुद्रया श्रीपात्रामृतेन देवीं त्रिः सन्तर्प्य, हृदि क्षोभिणीं, मुखे द्राविणीं, भ्रूमध्ये आकर्षिणीं, ललाटे वशिनीं, ब्रह्मरन्ध्रे आह्लादिनीं, इति पञ्चमुद्रामयीं योनि-मुद्रां प्रदर्श्य, कृताञ्जलिः श्रीज्वालामुखि ते आवरणं पूजयामि, इत्याज्ञां गृहीत्वा आवरणपूजामारभेत । यथा—

तत्राद्यौ पूर्वत आरभ्य दक्षावर्तेन, ॐह्रींगांगींगूं गणेशश्रीपा० पूर्वे, ॐह्रीं धं धर्मराजश्रीपा० दक्षे, ॐह्रीं वं वासुकिश्रीपा० पश्चिमे, ॐह्रीं नं नरसिंहश्रीपा० उत्तरे, इति गन्धाक्षतपुष्पैः संपूज्य भूपुरे प्रथमावरणम् । तत्रैव गुरुपूजनम् ॥

ततः षोडशपत्रेषु षोडशज्वाला वामावर्तक्रमेण पूजयेत । यथा—ॐह्रीं चण्डीश्रीपा० । ॐह्रीं चात्यालीश्रीपा० । ॐह्रीं वाराह्रीश्रीपा० । ॐह्रीं कुलसुन्दरीश्रीपा० । ॐह्रैंक्लीं कूचरीश्रीपा० । ॐसौंःक्लीं कुलिका-श्रीपा० । ॐक्रीं कुण्ठीश्रीपा० । ॐक्रीं कुत्सिताश्रीपा० । ॐक्रींहूं कुटिलाश्रीपा० । ॐह्रींक्रीं कुहूश्रीपा० । ॐक्रीं कुन्तीश्रीपा० । ॐह्रैंक्लीं कुम्भेश्वरीश्रीपा० । ॐक्रीं कुन्ताश्रीपा० । ॐक्रीं कूचरीश्रीपा० । ॐक्रीं कारुणीश्रीपा० । ॐह्रींश्रींह्रैंक्लींसौंः कृतिश्रीपा० । इति गन्धपुष्पाक्षतैः संपूज्य षोडशदले द्वितीयावरणम् ॥

ततोऽष्टदलेषु अष्टौ कन्या वामावर्तेन पूजयेत् । यथा—ह्रीं माया-

श्रीपा० । ह्रीं मोहिनीश्रीपा० । ऐं क्लीं सौः बालाश्रीपा० । ॐ ह्रीं भैं भग-रूपिणीश्रीपा० । ॐ ह्रीं भैं भगावासाश्रीपा० । ॐ ह्रीं भैं भीरुण्डाश्रीपा० । ॐ ऐं सौः मृडानीश्रीपा० । ॐ ह्रीं श्रीं ऐं सौं क्लीं ब्लूं वैन्द्रवेश्वरीश्रीपा० । इति गन्धाक्षतपुष्पै. संपूज्य तृतीयावरणम् ॥

ततोऽन्तर्दशपत्रेषु दशज्वालाः पूजयेत् । यथा—ॐ ह्रीं ब्रां ब्राह्मी-श्रीपा० । रँ श्रा शाम्भवीश्रीपा० । रँ दुं दुर्गाश्रीपा० । रँ वां वारा-हीश्री० । रँ कुं कुलकामिनीश्रीपा० । रँ ना नारसिंहीश्रीपा० । रँ कौं कौमारीश्रीपा० । रँ मां मातङ्गीश्रीपा० । रँ भैं भद्रकालीश्रीपा० । रँ स्रीं उग्रताराश्रीपा० । इति गन्धाक्षतपुष्पैः संपूज्य चतुर्थावरणम् ॥

तत ऊर्ध्वत्रिकोणे ॐ श्रीं त्रिपुरासुन्दरीश्रीपा० । ततोऽधः ॐ क्रीं दक्षिणकालिकाश्रीपा० । ततो मध्ये बिन्दौ मूलं महादेवभैरवसहितश्री-ज्वालामुखीश्री० । ॐ ह्रीं ज्वालिनीश्री० । रँ जटिनीश्री० । रँ जाती-श्री० । रँ जालन्धरीश्री० । इति बिन्दौ संपूज्य सन्तर्प्य योनिमुद्रया प्रणमेदिति पञ्चमावरणम् ॥

ततश्चतु.समुद्रान् पूजयेत् । ॐ ह्रीं सः सुधासमुद्रश्री० । ॐ ह्रां क्षीरसमुद्रश्री० । ॐ ह्रां दधिसमुद्रश्री० । ॐ ह्रूं लवणसमुद्रश्री० । इति विदिग्गते चतुरस्रके चतुःसमुद्रान् संपूज्य संतर्प्य, अग्नेयायुधानि पूजयेत् । यथा—ॐ ह्रीं वज्रश्री० । रँ शं शक्तयश्री० । रँ त्रीं कम-लश्री० । रँ श्रीं शरश्री० । इत्यायुधानि संपूज्य सन्तर्प्य, अग्नेयास-

हृदयाय नमः स्वाहा, एवमस्त्रान्तं षडङ्गाहुतीर्हुत्वा, आवरणदेवता अपि हुत्वा देवीं स्वहृद्यानीयाग्निं विसर्जयेदिति नित्यहोमविधिः ॥

तत ईशाने मण्डलं कृत्वा "वां वटुकाय नमः, ॐह्रीं श्रीं एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख सर्वविघ्नान् नाशय २ सर्वोपचारसहितां पूजां बलिं गृह्ण २ स्वाहा" इति वामाङ्गुष्ठानामिकाभ्यां बलिं दद्यात् । तत आग्नेये यां योगिनीभ्यो नमः, "ऊर्ध्वे ब्रह्माण्डतो वा दिवि गगनतले भूतले निस्तले वा पाताले वानले वा पवनसलिलयोर्यत्र कुत्र स्थिता वा । क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपालिमांसैः प्रीता देव्यः सदा नः शुभबलिविधिना पान्तु वीरेन्द्रवन्द्याः" ॥ यां योगिनीभ्यो नमः "सर्वयोगिभ्यो हूंफट् स्वाहा" इति वामाङ्गुष्ठमध्यमाभिर्विसृजेत् । ततो नैर्ऋते "क्षां क्षेत्रपालाय नमः, ॐक्षांक्षींक्षूंक्षैंक्षौंक्षः क्षेत्रपालालिबलिसहितं बलिं गृह्ण २ स्वाहा, " योऽस्मिन् क्षेत्रे निवासी च क्षेत्रपालः सकिङ्करः । स प्रीतो बलिदानेन सर्वरक्षां करोतु मे ॥ " इति वामाङ्गुष्ठतर्जनीभ्यां बलिमुत्सृजेदिति । ततो वायव्ये "गांगींगूंगं गणपतये वर वरद सर्वजनं मे वशमानय बलिं गृह्ण २ स्वाहा" इति वामाङ्गुष्ठमध्यमाभ्या बलिमुत्सृजेदिति । तत उत्तरे ॐसर्वभूतेभ्यो नमः "ॐह्रीं सर्वविघ्नरुद्रयः सर्वभूतेभ्यो हूंस्वाहा एष बलिर्नमः" इति सर्वाङ्गुलीभिर्बलिमुत्सृजेदिति बलिपञ्चकं दद्यात् । अशक्त एकपात्र एव कुर्यात् । अस्मिन्नेवावसरे छागादिबलिं दद्यात् । तत्र मूलेन पशुं संप्राप्य गन्धपुष्पादिभिरलङ्कृत्य देव्यग्रे संस्थाप्य, मूलेन प्रोक्षणीजलेन प्रोक्षयास्त्राय फडिति सरक्ष्य हुमित्यवगुण्ठ्य मूलेन धेनुमुद्रयामृतीकृत्य "सर्वदेवतारूपिणे बलिरूपायामुकपशवे नमः" इति गन्धादिना त्रिः संपूज्य, तस्य दक्षकर्णे "ॐपशुपाशाय विद्महे विघ्नकर्णाय धीमहि तन्नो जीवः प्रचोदयात् ।" इति पशुगायत्रीं त्रिः पठित्वा, पुरतः खड्गं निधाय "ॐकालि कालि वज्रेश्वरि लोहदण्डाये नमः" इति गन्धादिना त्रिरभ्यर्च्य, तस्य मुष्टौ ॐपॅह्रींश्रीं वागीश्वरीब्रह्मभ्यां नमः, मध्ये ॐ लक्ष्मीनारायणाभ्या नमः, ॐ उमामहेश्वराभ्या नमः इति संपूज्य तं भूत्वा मन्त्रयेत् । "ॐखड्गायासुरनाशाय देवकार्यैकतत्पर । पशुश्चैव-त्वया शीघ्रं षडनाथ नमोऽस्तु ते ॥" इत्यभिमन्त्र्य, गन्धाक्षत-

जलादिकमादाय, मूले मासादिकमुत्कीर्यामुकगोत्रोऽमुकशर्मामुककामः श्रीज्वालामुख्या इमं पशुं तुभ्यमर्पयाम्यहं संप्रसीद, इति पठित्वा पशोः शिरसि निःक्षिपेत् । ततस्तच्छिरो भूत्वा, जॉयज्ञार्थं पशवः सृष्टा यज्ञार्थं पशुघातनम् । अतस्त्वां घातयिष्यामि तस्मायेऽ वधोऽवधः ॥ शिवायत्तमिदं पिण्डमतस्त्वं शिवतां गतः । उद्द्युभ्यस्व पशो त्वं हि नाशिवस्त्वं शिवोऽसि हि ॥ इति संबोधयित्वा खड्गमादाय "सौः अस्त्राय फट् छिन्धि २ स्वाहा" इति खड्गं तस्य स्कन्धे योजयेत् । ततः स्वयं देवीरूपो भूत्वा निर्विकल्पः एकेन प्रहारेण च्छिन्द्यात् । सविकल्पः परदस्तेन च्छेदयेत् । अत्रैव ब्राह्मणातिरिक्तैः स्वात्मादियलिर्देयः । इति बलिं दत्त्वा मूलदेवीं संपूज्य रक्तेन सन्तर्प्य, जलममृतीकृत्य मूलेन त्रिरभिमन्त्र्य, मूलं श्रीज्वालामुखि इमं जलं गृह्णाणेति जलं दत्त्वा योनिमुद्रया प्रणमेत् । ततः कुमारीं सूक्ष्मक्रमेण मूलेन पूजयेत् । ततो मूलेन मूलदेवीं संपूज्य, प्राणायामपर्यादिकरषडङ्गन्यासान् विधाय स्वात्मानं कामकलारूपं ध्यायन् मालामादाय, ॐमां माले माले महामाले सर्वशक्तिस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ इति संपूज्य, गे अविघ्नं कुरु माले त्वं सर्वभावेषु सर्वदा, इति दक्षकरेण मालां गृहीत्वा स्वशिरसि श्रीगुरुं, कण्ठे पीतवर्णां मूलविद्यां, हृदये ज्वालामुखीदेवीं, श्रीगुरुचरणयोः स्वात्मानं ध्यात्वा, भ्रूमध्ये तेषां चतुर्णामैक्यं विभाव्य, विशुद्धौ चतुष्टयमेकीभूतमानीय देवतारूपं हृदं ध्यात्वा, मूलं स्मरन् यथाशक्ति जपं कृत्वा, जपान्ते "त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव । शुभं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥ इति मालां स्वशिरसि संस्थाप्य पुनरपि प्राणायामपर्यादिकरषडङ्गन्यासान् विधाय "गुह्यातीति" सामान्यार्घामृतेन धामद्वस्ते तेजोमयं जपफलं समर्प्य, मालां संपूज्य रहः स्थापयेत् । ततो मूलदेव्यै पुष्पाञ्जलिं दत्त्वा, कवचसहस्रनाम-स्तोत्रपाठं कृत्वा श्रीदेवीं सन्तोष्य, प्रागुक्तगुरुस्तोत्रेण श्रीगुरुं स्तुत्वा प्रणम्य, सर्वशक्तिकमोद्भूतिप्रभिन्नधामद्वयात्मिकाम् । देवस्य देवतां कांचित् सच्चिदानन्दमयीं पराम् ॥ इति नत्वा क्षमापयेत् ।

भूर्णा स्खलितपादानां भूमिरेवावलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं शिवे ॥
अपराधो भवत्येव मत्कस्य पदे पदे ।

हृदयाय नमः स्वाहा, एवमस्त्रान्तं षडङ्गाहुतीर्हुत्वा, आवरणदेवता अपि हुत्वा देवीं स्वहृदयानीयाग्निं विसर्जयेदिति नित्यहोमविधिः ॥

तत ईशाने मण्डलं कृत्वा "वां वटुकाय नमः, ॐह्रीं श्रीं एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख सर्वविघ्नान् नाशय २ सर्वोपचारसहितां पूजां बलिं गृह्ण २ स्वाहा" इति वामाङ्गुष्ठानामिकाभ्यां बलिं दद्यात् । तत आग्नेये यां योगिनीभ्यो नमः, "ऊर्ध्वे ब्रह्माण्डतो वा दिवि गगनतले भूतले निस्तले वा पाताले वानले वा पवनसलिलयोर्यत्र कुत्र स्थिता वा । क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपालिमांसैः प्रीता देव्यः सदा नः शुभबलिविधिना पान्तु वीरेन्द्रवन्द्याः" ॥ यां योगिनीभ्यो नमः "सर्वयोगिभ्यो हूंफट् स्वाहा" इति वामाङ्गुष्ठमध्यमाभिर्बलिं सृजेत् । ततो नैर्ऋते "क्षां क्षेत्रपालाय नमः, ॐक्षांक्षींक्षूंक्षैंक्षौंक्षः क्षेत्रपालालिबलिसहितं बलिं गृह्ण २ स्वाहा, " योऽस्मिन् क्षेत्रे निवासी च क्षेत्रपालः सकिङ्करः । स प्रीतो बलिदानेन सर्वरक्षां करोतु मे ॥ " इति वामाङ्गुष्ठतर्जनीभ्यां बलिमुत्सृजेदिति । ततो वायव्ये "गांगींगूंगं गणपतये वर वरद सर्वजनं मे वशमानय बलिं गृह्ण २ स्वाहा" इति वामाङ्गुष्ठमध्यमाभ्यां बलिमुत्सृजेदिति । तत उत्तरे ॐसर्वभूतेभ्यो नमः "ॐह्रीं सर्वविघ्नरुद्रेभ्यः सर्वभूतेभ्यो हूंस्वाहा एष बलिर्नमः" इति सर्वाङ्गुलीभिर्बलिमुत्सृजेदिति बलिपञ्चकं दद्यात् । अशक्त एकपात्र एव कुर्यात् । अस्मिन्नेवावसरे छागादिबलिं दद्यात् । तत्र मूलेन पशुं संस्नाप्य गन्धपुष्पादिभिरलङ्कृत्य देव्यग्रे संस्थाप्य, मूलेन प्रोक्षणीजलेन प्रोक्ष्यास्त्राय फडिति संरक्ष्य हुमित्यवगुण्ठ्य मूलेन धेनुमुद्रयामृतीकृत्य "सर्वदेवतारूपिणे बलिरूपायामुकपशवे नमः" इति गन्धादिना त्रिः संपूज्य, तस्य दक्षकर्णे "ॐपशुपाशाय विद्महे विघ्नकर्णाय धीमहि तन्नो जीवः प्रचोदयात् । " इति पशुगायत्रीं त्रिः पठित्वा, पुरतः खड्गं निधाय "ॐकालि कालि वज्रेश्वरि खोल्कदण्डायै नमः " इति गन्धादिना त्रिरभ्यर्च्य, तस्य मुष्टौ ॐह्रींश्रीं वागीश्वरीब्रह्मभ्यां नमः, मध्ये ॐ लक्ष्मीनारायणाभ्यां नमः, ॐ उमामहेश्वराभ्यां नमः इति संपूज्य ते भूत्वा मन्त्रयेत् । "ॐपशुघ्नायासुरनाशाय देवकार्यार्थतत्पर । पशुस्त्वंत्वया शीघ्रं गन्तव्यं नाथ नमोऽस्तु ते ॥ " इत्यभिमन्त्र्य, गन्धादितः

जलादिकमादाय, मूलं मासादिकमुत्कीर्य्यामुकगोत्रोऽमुकशर्माऽमुककामः श्रीज्वालामुखया इमं पशुं तुभ्यमर्पयाम्यहं संप्रसीद, इति पठित्वा पशोः शिरसि निःक्षिपेत् । ततस्तच्छिरो धृत्वा, ऊँयज्ञार्थं पशवः सृष्टा यज्ञार्थं पशुघातनम् । अतस्त्वां यातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥ शिवायत्तमिदं पिण्डमतस्त्वं शिवतां गतः । उद्बुध्यस्व पशो त्वं हि नाशिवस्त्वं शिवोऽसि हि ॥ इति संबोधयित्वा खड्गमादाय "ॐ सौः अस्त्राय फट् छिन्धि २ स्वाहा" इति खड्गं तस्य स्कन्धे योजयेत् । ततः स्वयं देवीरूपो भूत्वा निर्विकल्प एकेन प्रहारेण च्छिन्द्यात् । सविकल्पः परहस्तेन च्छेदयेत् । अत्रैव ब्राह्मणातिरिक्तैः स्वात्मादिबलिर्देयः । इति बलिं दत्वा मूलदेवीं संपूज्य रक्तेन सन्तर्प्य, जलममृतीकृत्य मूलेन त्रिरभिमन्त्र्य, मूलं श्रीज्वालामुखि इमं जलं गृह्णेति जलं दत्वा योनिमुद्रया प्रणमेत् । ततः कुमारीं सूक्ष्ममन्त्रेण मूलेन पूजयेत् । ततो मूलेन मूलदेवीं संपूज्य, प्राणायामपूर्वादिकरषडङ्गन्यासान् विधाय स्वात्मानं कामकलारूपं ध्यायन् मालामादाय, ॐमां माले माले महामाले सर्वशक्तिस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ इति संपूज्य, ॐ अविघ्नं कुरु माले त्वं सर्वभावेषु सर्वदा, इति दक्षकरेण मालां गृहीत्वा स्वशिरसि श्रीगुरुं, कण्ठे पीतवर्णां मूलविद्यां, हृदये ज्वालामुखीदेवीं, श्रीगुरुचरणयोः स्वात्मानं ध्यात्वा, भ्रूमध्ये तेषां चतुर्णामैक्यं विभाव्य, त्रिगुणा चतुष्टयमेकीभूतमानीय देवतारूपं क्षणं ध्यात्वा, मूलं स्मरन् यथाशक्ति जपं कृत्वा, जपान्ते "त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव । शुभं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥ इति मालां स्वशिरसि संस्थाप्य पुनरपि प्राणायामपूर्वादिकरषडङ्गन्यासान् विधाय "गुह्यातीति" सामान्यार्घ्यामृतेन वामहस्ते तेजोमयं जपफलं समर्प्य, मालां संपूज्य रहः स्थापयेत् । ततो मूलदेव्यै पुष्पाञ्जलिं दत्वा, कवचसहस्रनाम-स्तोत्रपाठं कृत्वा श्रीदेवीं सन्तोष्य, प्राग्वत्तत्तत्स्तोत्रेण श्रीगुरुं स्तुत्वा प्रणम्य, सर्वशक्तिकमोद्भूतिप्रभिन्नामद्यमालिकाम् । देवस्य देवतां कांचित् सच्चिदानन्दमयीं भज ॥ इति नत्वा क्षमापयेत् ।

भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं शिवे ॥
अपराधो भवत्येव मेरुकल्प पदे पदे ।

कोऽपरः सहते लोके केवलं स्वामिनं विना ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
समत्तं सविध सर्वमिति मातः क्षमस्व मे ॥

इति प्रणामपूर्वं क्षमाप्य, अर्घ्योदक चुलुकेन गृहीत्वा, ओं इत. पूर्व प्राण-बुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा पद्भ्यामुदरेण शिश्ना यत् स्मृत यदुक्त यत् कृत तत् सर्वं श्रीदेव्यर्पणमस्तु स्वाहा, इत्यनेन देव्याश्चरणारविन्दयोर्गृहीतोदकदानेनात्मान समर्प्य, कृताञ्जलिर्भूत्वा,

यद् दत्तं भक्तिमात्रेण पुष्पं पत्रं फलं जलम् ।
निवेदितं च नैवेद्यं तद् गृहाणानुकम्पया ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजाभागं न जानामि त्वं गतिः परमेश्वरि ॥
कर्मणा मनसा वाचा नास्ति वान्या गतिर्मम ।
अन्तश्चारेण भूताना रक्ष त्वं परमेश्वरि ॥
मातर्योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वच्युता भक्तिरच्युतेऽस्तु सदा त्वयि ॥
देवी दात्री च भोक्त्री च देवी सर्वमिद जगत् ।
देवी जयति सर्वत्र या देवी सोऽहमेव हि ॥
यदक्षरपदभ्रष्ट मात्राहीन च यद्गतम् ।
क्षन्तुमर्हसि देवेशि कस्य न स्खलित मनः ॥
क्षमस्व देवदेवेशि ज्वालामुखि महेश्वरि ।
तव पादाम्बुजे नित्य निश्चला भक्तिरस्तु मे ॥

इति पुष्पै क्षमापयित्वा, योनिमुद्रया प्रणम्य शङ्खमुद्धृत्य देव्युपरि भ्रामयित्वा,

साधु वासाधु वा कर्म यद्यदाचरित मया ।
तत् सर्वं कृपया देवि गृहाणाराधन मम ॥

इति देवीदक्षहस्ते शुद्धजल किञ्चिद् दत्त्वा, शङ्ख स्वस्थाने सस्थाप्य, तज्जल किञ्चिद्वामहस्ते निधाय मूलेन सप्तधाभिमन्त्र्य स्वात्मानमन्या-

नपि सामयिकान् तेन प्रोक्ष्य, पुष्पाञ्जलिमादाय

गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि ।
यत्र ब्रह्मादयो देवा न विदुः परमं पदम् ॥

इति विसृज्य सहारमुद्रया श्रीचक्रात् पुष्पमादाय तत्तेजः समुद्धृत्याघ्राय पूर्वयोगेन हृदयकमले प्रापय्य, तत्र यथोक्तरूपं ध्यायन्,

तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वरि ।
यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठन्ति मे हृदि ॥

इति हृदयकमले संस्थाप्य, 'चण्डेश्वराय नमः' इति निर्माल्यं संपूज्य ऐशान्यां जलेन त्रिकोणं विधाय, तत्र "निर्माल्यवासि-ये नमः" इति नैवेद्यशतांशं सहस्रांशं वा निर्माल्यपुष्पसहितं क्षिपेत्, तालत्रय-पूर्वं निर्माल्यवासिनीं विसर्जयेत् । ततः

देव नाथ गुरो स्वामिन् देशिक स्वात्मनायक ।
त्राहि त्राहि कृपासिन्धो पूजां पूर्णतरां कुरु ॥

इति श्रीगुरुं प्रणम्य प्रार्थ्य, श्रीपात्रं समुद्धृत्यामस्तकान्तं शिरःस्थाय श्रीगुरवे समर्प्य, तत्पात्रं दक्षकरे निधाय वामकरेण तत्त्वमुद्रया श्रीपा-दुकामन्त्रेण श्रीपादुकां तर्पयामि नमः इति त्रिः सन्तर्प्य तत्पात्रं स्वस्थाने संस्थाप्य, तज्जलं किञ्चित् पात्रान्तरं निधाय, ॐ आत्म-तत्त्वाय नमः, ह्रीं विद्यातत्त्वाय नमः, श्रीं शिवतत्त्वाय नमः, मूलं सर्वतत्त्वाय नमः, इति चतुस्तत्त्वानि जले विन्यस्य तज्जलं चुलुकेना-दाय, ॐ ऐं ह्रीं श्रीं प्रकृतिबुद्ध्यहङ्कारमन-श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पा-णिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवाय्वग्निसलिलपृथिव्यात्मकं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं क्लीं मूल आत्मतत्त्वात्म-काशुद्धचतुर्विंशतितत्त्वसहितं स्थूलदेहं शोधयामि स्वाहा, ॐ ऐं ह्रीं श्रीं मायाकलाविद्यारागकालनियतिपुरुषात्मकशुद्धाशुद्धसप्ततत्त्वसहित क स गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं क्लीं मूल विद्यातत्त्वात्मक सूक्ष्मदेहं शोधयामि स्वाहा, ॐ ऐं ह्रीं श्रीं शिवशक्ति-सदाशिवेश्वरशुद्धविद्यादिपञ्चतत्त्वसहितं यं रं लं वं शं षं सं हं ळं क्षः सौः मूलं शिवतत्त्वात्मकं परदेहं शोधयामि स्वाहा, ॐ ऐं ह्रीं श्रीं शिवादिषट्-त्रिंशत्तत्त्वसहित अं आं इत्यादि क्षः इत्यन्तं ऐं क्लीं सौः मूलं सर्वतत्त्व-

स्थूलसूक्ष्मपराख्यदेहरूपाभिमानिनं जीवात्मानं शोधयामि स्वाहा, इति चुलकचतुष्टयं स्वीकृत्य तत्पात्रं कराभ्यामादाय, मूलं गुरुपादुकामुच्चार्य,

ओं प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचम् ।
धर्माधर्मकलास्नेहपूर्णां वह्नौ जुहोम्यहं स्वाहा ॥

इति तज्जलमश्नीयात् । ततः कराभ्यां मूर्धादिपादान्तं षट्त्रिंशत्तत्त्वात्मकतां भावयन् स्वदेहं स्पृशेत् । ततः स्वसामयिकैः सह यथाशास्त्रं गुरूपदिष्टविधिना पात्रवन्दनं कुर्यात् । तत्रादौ मूलाधारात् कुण्डलिनीमिष्टदेवतारूपामुत्थाप्य स्वजिह्वाग्रान्तमानीय पात्रं वामहस्तकृतत्रिखण्डोपरि दक्षहस्तेनाच्छाद्य श्लोकं पठेत् ।

अधुना देवि वक्ष्येऽहं पात्रवन्दनमीश्वरि ।
तत्कालं यद्वरानन्दपात्रं देवैश्च वन्दितम् ॥ १ ॥
पूजायां पात्रमानन्दभरितं परमेश्वरि ।
गुरुणा दत्तमभ्यर्च्य प्रणमेच्छिरसा तदा ॥ २ ॥
श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृतप्लावितं
क्षेत्राधीश्वरयोगिनीगणमहासिद्धैः समाराधितम् ।
आनन्दागमकं महात्मकमिदं साक्षात् त्रिखण्डामृतं
वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥ ३ ॥

ओं आत्मतत्त्व शोधयामि स्वाहा ।

हैमं चैणरसावहं दयितया दत्तं च पेयादिभिः
किञ्चिच्चञ्चलरक्तपङ्कजदृशा सानन्दमालोकितम् ।
वामे स्वादुविशुद्धशुद्धिशकलं पाणौ निधाय स्वके
वन्दे पात्रमहं द्वितीयमधुनानन्दैकसंवर्धनम् ॥ ४ ॥

ओं विद्यातत्त्व शोधयामि स्वाहा ।

ओं सर्वाम्नायकलाकलापकलितं कौतूहलोद्द्योतैन
चन्द्रोपेन्द्रमहेन्द्रशंभुवरुणब्रह्मादिभिः सेवितम् ।

ध्यातं देवगणैः परं मुनिगणैर्मोक्षार्थिभिः सर्वदा
वन्दे पात्रमहं तृतीयमधुना स्वात्मावबोधक्षमम् ॥ ५ ॥

ॐ शिवतत्त्व शोधयामि स्वाहा ।

मद्यं मीनरसान्वितं हरिहरब्रह्मादिभिः सेवितं
मुद्रामैथुनधर्मकर्मनिरतं चाराम्लतिक्ताश्रितम् ।
आचार्यार्चितमष्टभैरवकलान्यासेन चाच्छादितं
पायात् पञ्चमकारतत्त्वनिलयं पात्रं चतुर्थं नुमः ॥ ६ ॥

महत्तितत्त्व शोधयामि स्वाहा ।

आधारे भुजगाधिराजवलये पात्रं महीमण्डलं
द्रव्यं सप्तसमुद्रवारि पिशितं चाष्टौ च दिग्दन्तिनः ।
सोहं भैरवमर्चयन् प्रतिदिनं तारागणैरक्षतै-
रादित्यप्रमुखैः सुरासुरगणैराज्ञाकरैः किङ्करैः ॥ ७ ॥

पुरुषतत्त्वं शोधयामि स्वाहा ।

सच्छ्रीश्यामलभद्रपीठपरमानन्दोदयादायकं
रम्यं राज्यकरं सदा सुखकरं सायुज्यसाम्राज्यदम् ।
नानाव्याधिभवान्धकारहरणं जन्मान्तरध्वंसनं
श्रीमद्भैरवभैरवीप्रियतरं पात्रं च षष्ठं नुमः ॥ ८ ॥

मनस्तत्त्वं शोधयामि स्वाहा ।

जाग्रत्स्वप्नसुषुप्तिबोधपवनं चैतन्यसाक्ष्यप्रद
विद्युद्भास्करवह्निचन्द्रधनुषा ज्योतिष्कलाव्यापितम् ।
वामापिङ्गलषध्यगा त्रिवलया तस्याः प्रबोधोद्धतं
पात्रं सप्तममूपणेन तरुणानन्दप्रदं पातु माम् ॥ ९ ॥

बुद्धितत्त्वं शोधयामि स्वाहा ।

---

१ 'धौः' ख पाठ । २ 'अयम्' ख पाठ. । ३ 'आचार्याष्टकविद्भैरव' ग पाठ । ४ 'मद्य' ग पाठ. । ५ 'सुश्री श्यामलभद्र' ग पाठ । ६ 'दय दायक पात्रोत्तिम-नोहर' ग पाठ. । ७ 'सुपवन' ग पाठ । ८ 'सर कुण्डली शोधन' ख. पाठ ।

खड्गं श्रीगुरुपादुकां च तिलकं कण्ठेऽपि सारस्वतं
शत्रोर्वाग्बलशौर्यकार्यहरणं देहस्थितेः कारणम् ।
वाञ्छासिद्धिकरं मनःस्थितिकरं चावर्जनं योषितां
पात्रं चाष्टममष्टसिद्धिकरणं प्रौढप्रसन्नं भजे ॥ १० ॥

अहङ्कारतत्त्वं शोधयामि स्वाहा ।

सर्वानन्दकरं सदा शिवपदं सर्वार्थसंपत्प्रदं
साम्राज्यार्थकरं समस्तसुखदं चाज्ञानविध्वंसनम् ।
आयुष्कान्तियशोविवर्धनकरं संसारमोहच्छिदं
पात्रं लक्षगुणात्मकं च नवमं प्रौढप्रतापं भजे ॥ ११ ॥

शक्तितत्त्वं शोधयामि स्वाहा ।

ब्रह्मविष्णुमहेशानां देवानां च विशेषतः ।
दुर्लभं पावनं पात्रं दशमं प्रणमाम्यहम् ॥ १२ ॥

भैरवतत्त्वं शोधयामि स्वाहा ।

पापघ्नं शान्तिशुभदं दिव्यं स्वादु सुखावहम् ।
पात्रमेकादशं वन्दे गुरुसेवासुखागतम् ॥ १३ ॥

सर्वतत्त्वं शोधयामि स्वाहा । इति पात्रवन्दनं कृत्वा पात्रप्रशंसां कुर्यात् ।

पात्रं कृत्वा करे मन्त्री सर्वकर्मसु लभेत्सुखी ।
इह लोके श्रियं भुक्त्वा देहान्ते भैरवो भवेत् ॥ १४ ॥
करे पात्रं मुखे स्तोत्रमानन्दो हृदयाम्बुजे ।
भक्तिर्गुरुपदाम्भोजे स्मरणं किमतः परम् ॥ १५ ॥
एकेन शुष्कचणकेन घटं पिबामि
त्रीणि पिबामि सहसा लवणार्द्रकेण ।
आस्वाद्य पानमलिरोहितमुण्डखण्ड
गङ्गां पिबामि यमुनां सह सागरेण ॥ १६ ॥
करे माला मुखे हाला वामे रामा सुकोमला ।

---

१ 'पुष्टि' ग पाठः । २ 'परत्र प्रणमाम्यहं' ख पाठः । ३ 'लक्षं' ग पाठः ।

त्रिपुरा हृदये बाला यागशाला गृहे गृहे ॥ १७ ॥
पात्रं भैरवपात्र गोत्रं श्रीनाथपादुकागोत्रम् ।
शास्त्रं संविच्छास्त्रं ज्ञानं तत्त्वावबोधकं ज्ञानम् ॥ १८ ॥
अलिपिशितपुरन्ध्रीभोगपूजापरोऽहं
बहुविधकुलमार्गारम्भसंभाविताऽहम् ।
पशुजनविमुखोऽहं भैरवीमाश्रितोऽहं
गुरुचरणरतोऽहं भैरवोऽहं शिवोऽहम् ॥ १९ ॥
वामे चन्द्रमुखी मुखे च मदिरा पात्रं कराम्भोरुहे
मूर्ध्नि श्रीगुरुचिन्तनं भगवतीध्यानास्पदं मानसम् ।
जिह्वायां जपसाधनं परिणतिः कौलक्रमाभ्यासने
ये सन्तो नियतं पिबन्ति सरसं ते भुक्तिमुक्ती गताः ॥२०॥
वामे रामा रमणकुशला दक्षिणे चालिपात्र-
मग्रे मुद्राक्षयकवटकाः शूकरस्योष्णशुद्धिः ।
स्कन्धे वीणा सरसकविता सद्गुरोः सत्कथायां
कौलो मार्गः परमगहनो योगिनामप्यगम्यः ॥ २१ ॥
पीत्वा पीत्वा पुनः पीत्वा यावत् पतति भूतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ॥ २२ ॥
धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा शुचा ।
सुषुम्नावर्त्मना नित्यमन्तर्वहिर्जुहोम्यहम् ॥ २३ ॥
प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा ।
धर्माधर्मकलान्नेहपूर्णां वक्त्रे जुहोम्यहम् ॥ २४ ॥
यावन्न चलते दृष्टिर्यावच्च चलते मनः ।
तावत् पानं प्रकर्तव्यं पशुपानमतः परम् ॥ २५ ॥

इत्थं पात्रमशस्त्रा हत्वा तत्र स्वसामयिकान् यथाशास्त्रं गुरूपदिष्टविधिना संपूज्य सतर्प्य, पूर्वस्थापितबलिपात्रस्थमद्यादिकमेकस्मिन्

पात्रे कृत्वा तद्गृहादुत्थाय सोदकपात्रहस्तो बहिर्गत्वा, जलेन शुचौ देशे चतुरश्रवृत्तत्रिकोणात्मकं मण्डलं कृत्वा, तत्र "गदाखिशूलडमरुपात्रहस्तं त्रिलोचनम्। कृष्णाभं भैरवं देवं सर्वविघ्नविनाशनम्" ॥ इत्युच्छिष्टभैरवं ध्यात्वा, गन्धादिना सपूज्य, "ॐ उच्छिष्टभैरव एह्येहि बलिं गृह्ण २ हूं फट् स्वाहा" इति पात्रस्थं बलिद्रव्यं तत्र मण्डले विसृज्य, तत्पात्रं हस्तौ पादौ च प्रक्षाल्याचम्य, तत्पात्रं जलेनापूर्य पूजागृहद्वारं गत्वा प्रविश्य स्वासने समुपविश्य तत्पात्रस्थजले श्रीपाद्यजलबिन्दुं दत्त्वा तेन जलेन स्वात्मानमभिषिञ्चन् शान्तिस्तोत्रं पठेत्। तदुक्तं श्रीदेवीरहस्ये (२१ प०)। यथा—

देवि वक्ष्यामि पूजान्ते शान्तिस्तोत्रमनुत्तमम्।
वीरा येन परानन्दपदं प्राप्स्यन्त्यनामयम् ॥ १ ॥
योगिनीचक्रमध्यस्थं मातृमण्डलवेष्टितम्।
नमामि शिरसा नाथं भैरवं भैरवीप्रियम् ॥ २ ॥
अनादिघोरसंसारव्याधिध्वंसैकहेतवे।
नमः श्रीनाथवैद्याय कुलौषधिप्रदायिने ॥ ३ ॥
आपदो दुरितं रोगाः समयाचारलङ्घनात्।
ते सर्वेऽत्र व्यपोहन्तु दिव्यचक्रस्य मेलनात् ॥ ४ ॥
आयुरारोग्यमैश्वर्यं कीर्तिर्लाभः सुतं जयः।
कान्तिर्मनोरथाश्चास्तु पान्तु सर्वाश्च देवताः ॥ ५ ॥
संपूजकानां परिपालकाना यतीन्द्रयोगीन्द्रतपोधनानाम्।
देशस्य राष्ट्रस्य कुलस्य राज्ञां करोतु शान्तिं भगवान् कुलेशः ॥ ६ ॥

नन्दन्तु सिद्धगुरवः स्वगुरुक्रमौघा
ज्येष्ठानुगाः समयिनो वटुकाः कुमार्यः ।
षट्योगिनीप्रवरवीरकुलप्रसूता
नन्दन्तु भूमिपतिगोद्विजसाधुलोकाः ॥ ८ ॥
नन्दन्तु नीतिनिपुणा निरवद्यनिष्ठा
निर्मत्सरा निरुपमा निरुपद्रवाश्च ।
नित्या निरञ्जनरता गुरवो निरीहाः
शाक्ताश्च शान्तमनसो हृतशोकशङ्काः ॥ ९ ॥
नन्दन्तु योगनिरताः कुलयोगयुक्ता
आचार्यसामयिकसाधकपुत्रकाश्च ।
गावो द्विजा युवतयो यतयः कुमार्यो
धर्मे भवन्तु निरता गुरुभक्तियुक्ताः ॥ १० ॥
नन्दन्तु साधककुला अणिमादिनिष्ठाः
शापाः पतन्तु समयद्विषि योगिनीनाम् ।
सा शाम्भवी स्फुरतु कापि ममाध्यवस्था
यस्यां गुरोश्चरणपङ्कजमेव लभ्यम् ॥ ११ ॥
याश्चक्रक्रमभूमिकावसतयो नाडीषु या संस्थिता
याः कायद्रुमरोमकूपनिलया याः संस्थिता धातुषु ।
उच्छ्वासोर्मिमरुत्तरङ्गनिलया निःश्वासवासाश्च या-
स्ता देव्यो रिपुपक्षभक्षणपरास्तृप्यन्तु कौलार्चिताः ॥ १२ ॥
या दिव्यक्रमपालिकाः क्षितिगता या देवतास्तोयगा
या नित्यं प्रथितप्रभाः शिखिगता या मातरिश्वाश्रयाः ।
या व्योमामृतमण्डलामृतमया याः सर्वगाः सर्वदा-
स्ताः सर्वाः कुलमार्गपालनपराः शान्तिं प्रयच्छन्तु मे ॥ १३ ॥

ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निस्तले वा
पाताले वा तले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा ।
क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन
प्रीता देव्यः सदा नः शुभबलिविधिना पान्तु वीरेन्द्रवन्द्याः १४
ब्रह्मांशेषेशदुर्गागुह्यबटुकगणा भैरवाः क्षेत्रपाला
वेतालादित्यरुद्रग्रहनसुमनुसिद्धाप्सरोगुह्यकाद्याः ।
भूता गन्धर्वविद्याधरऋषिपितृयक्षासुराहिप्रभूता
योगीशाश्चारणाः किंपुरुषमुनिवराश्चकगाः पान्तु सर्वे ॥ १५ ॥
देहस्थाखिलदेवता गजमुखाः क्षेत्राधिपा भैरवा
योगिन्यो बटुकाश्च यक्षपितरो भूताः पिशाचा ग्रहाः ।
अन्ये भूचरदिक्चराश्च खचरा वेतालकाश्चेटका-
स्तृप्ताः स्युः कुलपुत्रकस्य पिबतः पानं सदीपं चरुम् ॥१६॥
सत्यं चेद्गुरुवाक्यमेव पितरो देवाश्च चेद्योगिनी-
प्रीतिश्चेत् परदेवता च यदि चेद्वेदाः प्रमाणं च चेत् ।
शाक्तेयं यदि दर्शनं भवति चेदाज्ञेयमेषास्ति चेत्
सन्त्यत्रापि च कौलिकाश्च यदि चेत् स्यान्मे जयः सर्वदा ॥१७॥
तृप्यन्तु मातरः सर्वाः समुद्राः सगणाधिपाः ।
योगिन्यः क्षेत्रपालाश्च मम देहे व्यवस्थिताः ॥ १८ ॥
शिवाद्यमनिपर्यन्त ब्रह्मादिस्तम्बसंयुतम् ।
कालाग्न्यादिशिवान्तं च जगद्यज्ञेन तृप्यतु ॥ १९ ॥
पठित्वेद नमेद्वीरान् वीरवन्दनमाचरेत् ।
स्तुत्वेद्वीरान्नमेद्वीरान् मन्त्रसिद्धिः प्रजायते ॥ २० ॥

इत्थं शान्तिस्तोत्रं पठित्वा वीरवन्दनस्तोत्रं पठेत् ।

जगत्त्रयाभ्यर्चितशासनेभ्यः
परार्थसम्पादनकोविदेभ्यः ।

---

१ 'श्रीशक्ति' इति पाठः ।

समुद्धृतक्लेशमहोरगेभ्यो
नमो नमः साधकनायकेभ्यः ॥ १ ॥
प्रहीणसर्वाश्रयवासनेभ्यः
सर्वार्थितत्त्वोदितसाधनेभ्यः ।
सर्वप्रजाभ्युद्धरणोद्यतेभ्यो
नमो नमः साधकनायकेभ्यः ॥ २ ॥
विधूतकेशालिकपालिकेभ्यः
सुरासवारक्तविलोचनेभ्यः ।
नवीनकान्ता-रततत्परेभ्यो
नमो नमः शाम्भविशाम्भवेभ्यः ॥ ३ ॥
विभूतिलिप्ताङ्गदिगम्बरेभ्य-
श्चिताग्निधूमालिभयानकेभ्यः ।
कपालपात्रामृतपानकेभ्यः
नमो नमो भैरविभैरवेभ्यः ॥ ४ ॥
सिद्ध्यष्टकाधानमहामुनिभ्यः
श्रीभैरवाचारकृतादरेभ्यः ।
स्वाधीनतान्यक्कृतनिर्जरेभ्यो
नमो नमो भैरविभैरवेभ्यः ॥ ५ ॥
अनेन वीरस्तवकीर्तनेन
समुद्धृतक्लेशसुवासनोऽहम् ।
संसारकान्तारमहार्णवेऽज्ञ-
निमज्जमान जगदुद्धरेयम् ॥ ६ ॥

इति शान्तिस्तोत्र वीरवन्दन च पठित्वा सर्वान् सामयिकानभिषिच्य, विशेषार्घ्यपात्रमुद्धृत्य शिरस्थाय श्रीगुरवे समर्प्य तथैव तत्पादुका अपि सपूज्य मूलविद्यया गुरुपादुकाविद्यान्ते च, स्वाहेति स्वमूलाधा-

एकुण्डलिन्यात्मकपरदेवतामुखे हवनबुद्ध्या तज्जलं पात्रान्तरे कृत्वा-श्नीयात् । शेष प्रियशिष्याय प्रसादबुद्ध्या किञ्चिद् दद्यात् । सोऽपि स्वपात्रे कृत्वा तज्जलं प्राश्नीयादित्थमर्घ्यप्रतिपत्तिः । ततः स्वगुरूप-दिष्टविधिना शेषकृत्यं समापयेत् । ततस्ताम्रादिपात्रे गन्धपुष्पाक्षतान्वित जलमापूर्य, " ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे । जग-त्पवित्रे शुचये सवित्रे कर्मदायिने ॥ ॐह्रांह्रींस. सूर्य एष तेऽर्घ. स्वाहा " इत्यर्घ्यं सूर्याय दत्त्वा कृताञ्जलिः—" ॐ यच्छिद्र तप.च्छिद्रं यच्छिद्रं पूजने मम । अच्छिद्रमस्तु तत्सर्वं भास्करस्य प्रसादत. ॥ " इत्यच्छि-द्रमवधारयेत् । ततो मूलेन प्राणायामर्घ्यादिकरषडङ्गन्यासान् विधाय षडा सन-वाग्देवताष्टकन्यासान् विधाय प्रागुक्तगुरुस्तोत्रं पठित्वा, श्रीगुरु प्रणम्य मूलविद्यया द्वितीयकूटेन निर्माल्यं शिरसि धृत्वा मूलविद्ययैव चरणोदकं स्वीकृत्य श्रीपरदेवतामक्तेभ्यो नैवेद्यादिक विभज्य सुहृद्-बान्धवजनै. साक भुक्त्वा स्वात्मान कामकलारूप भावयन् सुख विहरेदिति ॥


इत्येषा नित्यपूजायाः पद्धतिर्गद्यरूपिणी ।
ज्वालासर्वस्वरूपापि न देया तत्त्ववादिभिः ॥
श्रीज्वालापद्धतिर्गुह्या नित्यार्चनक्रमाङ्किता ।
गुह्यातिगुह्यगुह्याढ्या गोपनीया मुमुक्षुभिः ॥

इति श्रीरुद्रयामले तन्त्रे दशविधारहस्ये
श्रीज्वालामुखीपद्धतिः । २ ॥

—ॐॐॐॐॐ—

अथ

श्रीज्वालामुखीकवचम् ।



श्रीभैरव उवाच ।

शृणु देवि जगन्मातर्ज्वालामुख्या ब्रवीम्यहम् ।
कवचं मन्त्रगर्भं च त्रैलोक्यविजयाभिधम् ॥ १ ॥
अप्रकाश्यं परं गुह्यं न कस्य कथितं मया ।
विनामुना न सिद्धिः स्यात् कवचेन महेश्वरि ॥ २ ॥
अवक्तव्यमदातव्यं दुष्टायासाधकाय च ।
निन्दकायान्यशिष्याय न वक्तव्यं कदाचन ॥ ३ ॥

श्रीदेव्युवाच

त्रैलोक्यनाथ वद मे बहुधा कथितं मया ।
स्वयं त्वया प्रसादोऽयं कृतः स्नेहेन मे प्रभो ॥ ४ ॥

श्रीभैरव उवाच ।

प्रभाते चैव मध्याह्ने सायंकालेऽर्धरात्रके ।
कवचं मन्त्रगर्भं च पठनीयं परात्परम् ॥ ५ ॥
मधुना मत्स्यमांसादिमोदकेन समर्चयेत् ।
देवतां परया भक्त्या पठेत् कवचमुत्तमम् ॥ ६ ॥
ॐ ह्रीं मे पातु मूर्धानं ज्वाला अक्षरमातृका ।
ॐ ह्रींश्रीं मेऽवताद्भालं अक्षरी विश्वमातृका ॥ ७ ॥
ॐ ऐंक्लींसौः ममाव्यात् सा देवी माया भ्रुवौ मम ।
ॐ अंआइंईंह्सौः पायान्नेत्रे मे विश्वसुन्दरी ॥ ८ ॥

ॐ ह्रींऐंसौंः पातु नासां उंऊं कर्णौं च मोहिनी ।
ऋंॠंऌंॡंहसौंः मे वाला पायाद् गण्डौ च चञ्चुपी ॥ ९ ॥
एंऐंओंऔं सदाव्यान्मे मुखं श्रीभगरूपिणी ।
अंअः ॐह्रींक्लींसौंः पायाद् गलं मे भगधारिणी ॥ १० ॥
कंखंगंघंङसौंः पायात् स्कन्धौ मे त्रिपुरेश्वरी ।
ङंचंछंजंझसौंः वक्षः पायाच्च वैन्दवेश्वरी ॥ ११ ॥
ञंटंठंडंढसौंःऐंक्लींहूं ममाव्यात् सा भुजान्तरम् ।
णंतं तंथंदंधंनं स्तनौ पायाद् भीरुण्डा मम सर्वदा ॥ १२ ॥
पंफंबंश्रींह्रींसौंः पार्श्वं मृडानी पातु मे सदा ॥ १३ ॥
भंमंयंरंश्रींहसौंःलंवं नाभिं मे पान्तु कन्यकाः ।
शंषंसंहं सदा पातु गुह्यं मे गुह्यकेश्वरी ॥ १४ ॥
ळंक्षः पातु सदा लिङ्गं ह्रींश्रीं लिङ्गनिवासिनी ।
ऐंक्लींसौंः पातु मे मेढ्रं पृष्ठं मे पातु वारुणी[1] ॥ १५ ॥
ॐ श्रींह्रींक्लींहूंहूं पातु ऊरू मे पात्वमां सदा ।
ॐ ऐंक्लींसौंःयां वात्याली[2] जङ्घे पायात् सदा मम ॥ १६ ॥
ॐ श्रींमौंक्लीं सदा पायाज्जानुनी कुलसुन्दरी ।
ॐ श्रींह्रींहूं कूचरी[3] च गुल्फौ ऐंश्रीं ममावतु ॥ १७ ॥
ॐ श्रींह्रींक्लींइंमौंः पायात् कुण्ठी क्रींह्रींहसौंः मे तलम् ।
ॐ श्रींश्रीं पादौ हसौंः पायाद् ह्रींश्रींक्रीं कुत्सिता मम ॥१८॥
ॐ ह्रींश्रीं कुटिला ह्रींक्रीं पादपृष्ठं च मेऽवतु ।
ॐ श्रींह्रींश्रीं च मे पातु पादस्था अङ्गुलीः सदा ॥ १९ ॥
ॐ ह्रींहसौंःऐं कुहूः मज्जां ॐ श्रीं कुन्ती[4] ममावतु ।
रक्तं कुम्भेश्वरी ऐंक्लीं शुक्रं पायाच्च कूचरी ॥ २० ॥

---

१ 'पातु ना' ख. पाठः। २ 'वाराही' ख. पाठः। ३ 'कुब्जिका' ख. पाठः। ४ 'कुन्ता' ख. पाठः।

पातु मेऽङ्गानि सर्वाणि ओं ह्रींश्रींक्लींऐंह्सौंः सदा ।
पादादिमूर्धपर्यन्तं ह्रींक्रींश्रीं कारणी सदा ॥ २१ ॥
मूर्धादिपादपर्यन्तं पातु क्लींश्रीं कृतिर्मम ।
ऊर्ध्वं मे पातु व्रां ब्राह्मी अधः श्रीं शान्भवी मम ॥ २२ ॥
दुं दुर्गा पातु मे पूर्वे वां वाराही शिवालये ।
ह्रींक्रींह्रूश्रीं च मां पातु उत्तरे कुलकामिनी ॥ २३ ॥
नारसिंही ह्सौंःऐंक्रीं वायव्ये पातु मा सदा ।
ओं श्रींक्रींऐं च कौमारी पश्चिमे पातु मां सदा ॥ २४ ॥
ओं ह्रींश्रीं निर्ऋतौ पातु मातङ्गी मा शुभङ्करी ।
ओं श्रींह्रींक्रीं सदा पातु दक्षिणे भद्रकालिका ॥ २५ ॥
ओं श्रींऐंक्रीं सदाग्नेय्यामुग्रतारा सदावतु ।
ओं वां दशदिशो रक्षेन्मां ह्रीं दक्षिणकालिका ॥ २६ ॥
सर्वकालं सदा पातु ऐंसौंः त्रिपुरसुन्दरी ।
मारीभये च दुर्भिक्षे पीडाया योगिनीभये ॥ २७ ॥
ओं ह्रींश्रीं त्र्यक्षरी पातु देवी ज्वालामुखी मम ।
इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम् ॥ २८ ॥
त्रैलोक्यविजयं नाम मन्त्रगर्भं महेश्वरि ।
अस्य प्रसादादीशोऽहं भैरवाणा जगत्त्रये ॥ २९ ॥
सृष्टिकर्तापहर्ता च पठनादस्य पार्वति ।
कुङ्कुमेन लिखेद्भूर्जे आसवेन सुरेतसा ॥ ३० ॥
स्तम्भयेदखिलान् देवान् मोहयेदखिलाः प्रजाः ।
मारयेदखिलान् शत्रून् वशयेदपि देवताः ॥ ३१ ॥
बाहौ धृता चरेद्युद्धं शत्रुक्षिता गृहे व्रजेत् ।
पोते रणे विवादे च कारागा रोगपीडने ॥ ३२ ॥

क्लींश्री में बाहवी ' ऐसा पाठ ।

ग्रहपीडादिकालेषु पठेत् सर्वं शमं व्रजेत् ।
इतीदं कवचं देवि मन्त्रगर्भं सुरार्चितम् ॥ ३३ ॥
यस्य कस्य न दातव्यं विना शिष्याय पार्वति ।
मासैकेन भवेत् सिद्धिर्देवानां या च दुर्लभा ।
पठेन्मासत्रयं मर्त्यो देवीदर्शनमाप्नुयात् ॥ ३४ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीज्वालामुखीकवचम् ॥ ३ ॥

अथ

श्रीज्वालामुखीसहस्रनामकम् ।

श्रीभैरव्युवाच ।
भगवन् सर्वधर्मज्ञ देवानामभयङ्कर ।
पुरा मे यत् त्वया प्रोक्तं वरं कैलाससानुतः ॥ १
कृपया परया नाथ तं मे दातुं क्षमो भव ।
श्रीभैरव उवाच ।
सत्यमेतत् त्वया प्रोक्तं वरं वरय पार्वति ॥ २ ॥
तं प्रयच्छामि संसिद्धयै मनसा यदभीप्सितम् ।
श्रीभैरव्युवाच ।

---

१ 'यावच्च' ब. पाठः ।

ज्वालामुख्यास्तथा देव सहस्राणि च तत्त्वतः ॥ ३ ॥
प्रोक्तानि मूहि मे भक्त्या यदि मे तत्कृपा भवेत् ।

श्रीभैरव उवाच ।

प्रवक्ष्यामि महादेवि ज्वालानामानि तत्त्वतः ॥ ४ ॥
सहस्राणि कलौ नृणां वरदानि यथेप्सितम् ।
अभक्ताय न दातव्यं दुष्टायासाधकाय च ॥ ५ ॥
या सा ज्वालामुखी देवी त्रैलोक्यजननी स्मृता ।
तस्या नामानि वक्ष्यामि दुर्लभानि जगत्त्रये ॥ ६ ॥
विना नित्यबलिं स्तोत्रं न रक्ष्यं साधकोत्तमैः ।
दुर्भिक्षे शत्रुभीतौ च मारणे स्तम्भने पठेत् ॥ ७ ॥
सहस्राख्यं स्तवं देव्याः सद्यः सिद्धिर्भविष्यति ।
विना गन्धाक्षतैः पुष्पैर्धूपैर्दीपैर्विना बलिम् ॥ ८ ॥
न रक्ष्यं साधकेनैव देवीनामसहस्रकम् ।
दत्त्वा बलिं पठेद् देव्या मन्त्री नामसहस्रकम् ।
देवि सत्यं मया प्रोक्तं सिद्धिहानिस्ततोऽन्यथा ॥ ९ ॥

अस्य श्रीज्वालामुखीसहस्रनामस्तवस्य, भैरव ऋषिः, अनुष्टुप् छन्दः, श्रीज्वालामुखी देवता, ह्रीं बीजं, श्रीं शक्तिः, ॐ कीलकं पाठे विनियोगः ॥ भैरवऋषये नमः शिरसि । अनुष्टुप्छन्दसे नमो मुखे । श्रीज्वालामुखीदेवतायै नमो हृदि । ह्रीं बीजाय नमो नाभौ । श्रीं शक्तये नमो गुह्ये । ॐ कीलकाय नमः पादयोः । विनियोगाय नमः सर्वाङ्गेषु । ॐ ह्रामिति षड्दीर्घयुक्तमायया करषडङ्गानि विधाय ध्यायेत्—

उद्यच्चन्द्रमरीचिसंनिभमुखीमेकादशाराञ्जगां
पाशाम्भोजवराभयान् करतलैः संबिभ्रतीं सादरात् ।
अग्नीन्द्वर्कविलोचना शशिकलाचूडां त्रिवर्गोज्ज्वलां
प्रेतस्थां ज्वलदग्निमण्डलशिखां ज्वालामुखीं नौम्यहम् ॥

---

१ 'श्रीमादरात्' स पाठ ।

ॐह्रींज्वालामुखी जैत्री श्रींज्योत्स्ना जयदा जया ।
औदुम्बरा महानीला शुक्लुप्ता शची श्रुतिः[1] ॥ १ ॥
स्मयदा स्मयहर्त्री च स्मरशत्रुप्रियङ्करी ।
मानदा मोहिनी मत्ता माया बाला बलन्धरा ॥ २ ॥
भगरूपा[2] भगावासा भीरुण्डा भयघातिनी ।
भीतिर्भयानकास्या च भ्रूः सुभ्रूः सुखिनी सवी[3] ॥ ३ ॥
शूलिनी शूलहस्ता च शूलिवामाङ्कवासिनी ।
शशाङ्कजननी शीता शीतला शारिका शिवा[4] ॥ ४ ॥
क्षुचिका मधुमन्मान्या त्रिवर्गफलदायिनी ।
त्रेता[5] त्रिलोचना दुर्गा दुर्गमा दुर्गतिर्गतिः ॥ ५ ॥
पूता प्लुतिर्विमेशा[6] च सृष्टिकर्त्री सुखावहा ।
सुखदा सर्वमध्यस्था लोकमाता महेश्वरी ॥ ६ ॥
लोकेष्टा वरदा स्तुत्या स्तुतिर्द्युतगतिर्द्युतिः[7] ।
नयदा नयनेत्रा च नवग्रहनिषेविता ॥ ७ ॥
अम्बा वरूथिनी वीरजननी वीरसुन्दरी ।
वीरघ्नीरुणी वार्ता वराऽभयकरा वधूः ॥ ८ ॥
वानीरतलगा वाम्या वामाचारफलप्रदा ।
वीरा शौर्यकरी शान्ता शार्दूललक् च शर्वरी ॥ ९ ॥
शल्भी शास्त्रमर्यादा शिवदा शम्बरान्तका ।
शम्बरारिप्रिया शम्भुकान्ता शशिनिभानना ॥ १० ॥
शस्त्रास्त्रधरा शान्तिर्ज्योतिर्दीप्तिर्जगत्प्रिया ।
जगती जितरा जारी मार्जारी पशुपालिनी (१००) ॥ ११ ॥

---

१ 'श्रुतिः' ख. पाठः । २ 'माता' ख. पाठः । ३ 'शिवा' ग. पाठः । ४ 'त्रिलोचना' ग. पाठ । ५ 'विसर्गा' ख. ग. पाठः । ६ 'द्युतिर्गतिः' ख. पाठः । ७ 'वीरा' ख. पाठः । 'भीता' ग पा ।

मेरुमध्यगता मैत्री मुसलायुधधारिणी ।
मान्या मन्त्रेष्टदा माध्वी माध्वीरसविघूर्णिता ॥ १२ ॥
मोदकाहारतृप्ता च मत्तमातङ्गगामिनी ।
महेश्वरप्रियोन्मत्ता दार्वी दैत्यविमर्दिनी ॥ १३ ॥
देवेष्टा साधकेष्टा च साध्वी सर्वत्रगाऽसमा ।
सन्तानकतरुच्छायासन्तुष्टाऽध्वश्रमापहा ॥ १४ ॥
शारदा शरदब्जाक्षी वरदाब्जनिभाननां ।
नम्राङ्गी कर्कशाङ्गी च वज्राङ्गी वज्रधारिणी ॥ १५ ॥
वज्रेष्टा वज्रकङ्काला वानरी वायुवेगिनी ।
वराकी कुलका काम्या कुलेष्टा कुलकामिनी ॥ १६ ॥
कुन्दा कामेश्वरी क्रूरा कुन्या कामान्तकारिणी ।
कुन्ती कुन्तधरा कुब्जा कष्टहा बगलामुखी ॥ १७ ॥
मृडानी मधुरा मूका भ्रमत्ता वैन्दवेश्वरी ।
कुमारी कुलजाऽकामा कुबरी नडकूबरी ॥ १८ ॥
नगेश्वरी नगावासा नगपुत्री नगारिहा ।
नागकन्या कुहूः कुण्ठी[2] करुणा कृपयान्विता ॥ १९ ॥
ककारवर्णरूपाढ्या द्वीर्लज्जा श्रीः शुभाशुभा ।
खेचरी खगपत्नी च खगनेत्रा खगेश्वरी ॥ २० ॥
खाता खनित्री खस्था च जप्या जाप्याऽमरा धृतिः[3] ।
जगती जन्मदा जम्भी जम्बुवृक्षतलस्थिता ॥ २१ ॥
जाम्बूनदप्रिया सत्या सात्त्विकी सत्त्ववर्जिता ।
सर्वमाता समालोका लोकाख्यातिर्लयात्मिका ॥ २२ ॥
लूता लतातिर्लज्जा वाजिगा (२००) वाक्यी वशा ।
कुटिला कुत्सिता व्राह्मी मलाक्षी मलदापिनी ॥ २३ ॥

चन्द्रनि' ग. पाठ. । २'कण्ठा' ग पाठः । 'धृतिः' ग. पाठ । ४ 'सात्त्विका' ख. पाठ ।

व्रतेष्टा वाजिनी वस्तिर्वामनेत्रा वशङ्करी ।
शङ्करी शङ्करेष्टा च शशाङ्ककृतशेखरा ॥ २४ ॥
कुम्भेश्वरी कुरुक्षी च पाण्डवेष्टा परात्परा ।
महिषासुरसंहर्त्री माननीया मनुप्रिया ॥ २५ ॥
दक्षिणा दक्षजा दक्षा द्राक्षा दूती द्युतिर्धरा ।
धर्मदा धर्मराजेष्टा धर्मस्था धर्मपालिनी ॥ २६ ॥
धनदा धनिका धर्म्या पताका पार्वती प्रजा ।
प्रजावती पुरी प्रज्ञा पूः पुत्री पत्रिवाहिनी ॥ २७ ॥
पत्रिहस्ता च मातङ्गी पत्रिका च पतिव्रता ।
पुष्टिः प्रच्छा श्मशानस्था देवी धनदसेविता ॥ २८ ॥
दयावती दया दूरा दूता निकटवासिनी ।
नर्मदाऽनर्मदा नन्दा नाकिनी नाकसेविता ॥ २९ ॥
नासा सङ्क्रान्तिरीड्या च भैरवी च्छिन्नमस्तका ।
श्यामा श्यामाम्बरा पीता पीतवस्त्रा कलावती ॥ ३० ॥
कौतुकी कौतुकाचारा कुलधर्मप्रकाशिनी ।
शाम्भवी गारुडीविद्या गरुडासनसंस्थिता ॥ ३१ ॥
विनता वैनतेयेष्टा वैष्णवी विष्णुपूजिता ।
वार्तादो वालुका वेत्री वेत्रहस्ता वराङ्गना ॥ ३२ ॥
विवेकलोचना विज्ञा विशाला विमला प्रजा ।
विवेका प्रचुरा लुप्ता नारायणपूजिता ॥ ३३ ॥
नारायणी (३००) च सुमुखी दुर्लभा दुःखहारिणी ।
दौर्भाग्यहा दुराचारा दुष्टहन्त्री च वेदिणी ॥ ३४ ॥
वाग्वश्यी भारती भाषा मषी लेखकपूजिता ।
लेखपत्री च लोलार्की लासा हासा प्रियङ्करी ॥ ३५ ॥

---

१ 'वान्तदा' ग. पाठः । २ 'सेविता' ग. ' '।

प्रेमदा प्रणयज्ञा च प्रमाणा प्रत्ययान्विता ।
वाराही कुब्जिका कारा कारावन्धनमोचदा ॥ ३६ ॥
उग्रा चोग्रतरोग्रेष्टा नृमान्या नरसिंहिका ।
नरनारायणस्तुत्या नरवाहनपूजिता ॥ ३७ ॥
नृमुण्डा नूपुराढ्या च नृमाता त्रिपुरेश्वरी ।
दिव्यायुधोग्रतारा च त्र्यक्षा त्रिपुरमालिनी ॥ ३८ ॥
त्रिनेत्रा कोटराक्षी च षट्चक्रस्था क्रिमीश्वरी ।
क्रिमिहा क्रिमियोनिश्च कला चन्द्रकला चमूः ॥ ३९ ॥
चर्माम्बरा च चार्वङ्गी चञ्चलाक्षी च भद्रदा ।
भद्रकाली सुभद्रा च भद्राङ्गी प्रेतवाहिनी ॥ ४० ॥
सुषमा स्त्रीप्रिया कान्ता कामिनी कुटिलालका ।
कुशब्दा कुगतिर्मेधा मध्यमाङ्गा च कारयपी ॥ ४१ ॥
दक्षिणाकालिका काली कालभैरवपूजिता ।
क्लींकारी[1] कुमतिर्वाणी बाणासुरनिषूदिनी[2] ॥ ४२ ॥
निर्ममा निर्ममेष्टा च निरयोन्निर्निराश्रया ।
निर्विकारा निरीहा च निलया नृपपुत्रिणी ॥ ४३ ॥
नृपसेव्या विरिञ्चीष्टा विशिष्टा विश्वमातृका ।
मातृकाऽर्णविलिप्ताङ्गी मधुस्नाता मधुद्रवा ॥ ४४ ॥
शुक्रेष्टा शुक्रसन्तुष्टा शुक्रस्नाता कृशोदरी ।
वृषा वृष्टिरनावृष्टिर्लभ्या लोभविवर्जिता ॥ ४५ ॥
अन्धिश्च (४००) ललना लक्ष्या लक्ष्मी रामा रमा रतिः ।
रेवा रम्भोर्वशी वश्या वासुकिप्रियकारिणी ॥ ४६ ॥
शेषा शेषरता श्रेष्ठा शेषशायिनमस्कृता ।
शय्या शर्वप्रिया शास्ता प्रशस्ता शम्भुसेविता ॥ ४७ ॥

---

१ 'क्लेंकारा' ग. पाठः । २ 'क्लीं' ख पाठ. ।

आशुशुचिनेत्रा च चण्डा चण्डसेविता ।
क्षुरिका कर्णिका सत्या सचराचररूपिणी ॥ ४८ ॥
चरित्री च धरित्री च दितिर्दैत्येन्द्रपूजिता ।
गुणिनी गुणरूपा च त्रिगुणा निर्गुणा घृणा ॥ ४९ ॥
घोषा गजाननेष्टा च गजाकारा गुणिप्रिया ।
गीता गीतप्रिया तथ्या पथ्या त्रिपुरसुन्दरी ॥ ५० ॥
पीनस्तनी च रमणी रमणीष्टा च मैथुनी ।
पद्मा पद्मधरा वत्सा धेनुर्मेरुधरा मघा ॥ ५१ ॥
मालती मधुरालापा मातृजा मालिनी तथा ।
वैश्वानरप्रिया वैद्या चिकित्सा वैद्यपूजिता ॥ ५२ ॥
वेदिका वारपुत्री च वयस्या वाग्भवी प्रभुः ।
क्रीता पद्मासना सिद्धा[1] सिद्धलक्ष्मीः सरस्वती ॥ ५३ ॥
सत्त्वश्रेष्ठा सत्त्वसंस्था सामान्या सामवायिका ।
साधकेष्टा च सत्पत्नी सत्पुत्री सत्कुलाश्रया ॥ ५४ ॥
समदा प्रमदा श्रान्ता[2] परलोकगतिः शिवा ।
घोररूपा घोरराव मुक्तकेशी च मुक्तिदा ॥ ५५ ॥
मोक्षदा बलदा पुष्टिर्मुक्तिर्बलिप्रियाऽभया ।
तिलप्रसूननासा च प्रसूना कुलशीर्षिणी ॥ ५६ ॥
परद्रोहकरी (५००) पान्था पारावारसुता भगा ।
भगप्रिया भगशिखा हेला हैमवतीश्वरी ॥ ५७ ॥
हेरुकेष्टा बटुस्था च बटुमाता बटेश्वरी ।
नटिनी त्रोटिनी त्राता स्वसा सारवती सभा ॥ ५८ ॥
सौभाग्या भाग्यदा भाग्या भोगदा भूः प्रभावती ।
चन्द्रिका कालहन्त्री च ज्योत्स्नोल्काऽशनिराह्निका ॥ ५९ ॥

---

[1] 'गजप्रिया' ग. पाठः । २ 'श्रान्ता' ख. पाठः । ३ 'पुर' ग पाठः ।

ऐदिकी चौष्मिकी चोष्मा ग्रीष्मांशुद्युतिरूपिणी ।
ग्रीवा ग्रीष्मानना गव्यां कैलासाचलवासिनी ॥ ६० ॥
मज्जा मार्तण्डरूपा च मानहर्त्री मनोरमा ।
मानिनी मानकर्त्री च मानसी तापसी तुटिः ॥ ६१ ॥
पयःस्था तु परब्रह्मस्तुता स्तोत्रप्रिया तनुः ।
तन्वी तनुतरा सूक्ष्मा स्थूला शूरप्रियाऽधमा ॥ ६२ ॥
उत्तमा मणिभूषाढ्या मणिमण्डपसंस्थिता ।
माषा तीक्ष्णा त्रपा चिन्ता मण्डिका चर्चिका चला ॥ ६३ ॥
चण्डी चुल्ली चमत्कारकर्त्री हर्त्री हरीश्वरी ।
हरिसेव्या कपिश्रेष्ठा चर्चिता चारुरूपिणी ॥ ६४ ॥
चण्डीश्वरी चण्डरूपा मुण्डहस्ता मनोगतिः ।
पोता पूता पवित्रा च मज्जा मेध्या सुगन्धिनी ॥ ६५ ॥
सुगन्धा पुष्पिणी पुष्पा प्रेरिता पवनेश्वरी ।
प्रीता क्रोधाकुला न्यस्ता न्यक्कारा सुरवाहिनी ॥ ६६ ॥
स्रोतस्वती मधुमती देवमाता सुधाम्बरा (६००) ।
मत्स्या मत्स्येन्द्रपीठस्था वीरपाना मदातुरा ॥ ६७ ॥
पृथिवी तैजसी वह्निर्मूलाधारा प्रभा पृथुः ।
नागपाशधरानन्ता पाशहस्ता प्रबोधिनी ॥ ६८ ॥
प्रसादना कलिङ्गाख्या मदनाशा मधुद्रवा ।
मधुवीरा मदान्धा च पावनी वेदना स्मृतिः ॥ ६९ ॥
बोधिका बोधिनी पूषा काशी वाराणसी गया ।
कौशी चोज्जयिनी धारा काश्मीरी कुङ्कुमाकुला ॥ ७० ॥
भूमिः सिन्धुः प्रभासा च गङ्गा गौरी शुभाश्रया ।
नानाविद्यामयी वेत्रवती गोदावरी गदा ॥ ७१ ॥

---

१ ' नागकन्या ' ग. पाठ. ।

गदहर्त्री गजारूढा इन्द्राणी कुलकौलिनी ।
कुलाचारा कुरूपा च सुरूपा रूपवर्जिता ॥ ७२ ॥
चन्द्रभागा च यमुना यामी यमत्रयङ्करी
काम्भोजी सरयूश्चित्रा वितस्तैरावती कृपा ॥ ७३ ॥
चपिका पथिका तन्त्री वीणा वेणुः प्रियंवदा ।
कुण्डलिनी निर्विकल्पा[1] गायत्री नरकान्तका ॥ ७४ ॥
कृष्णा[2] सरस्वती तापी पयोष्णी[3] शतरुद्रिका ।
कावेरी शतपत्राभा शतबाहुः शतह्रदा ॥ ७५ ॥
रेवती रोहिणी क्षिप्रा क्षीणा क्षोणी क्षमा क्षया ।
क्षान्तिर्भ्रान्तिर्गुरुर्गुर्वी गरिष्ठा गोकुला नदी ॥ ७६ ॥
नादिनी कृपिणी कृष्णा सत्कुटी भूमिका (७००) भ्रमा ।
विभ्राजमाना तीर्थ्या च तीर्था तीर्थफलप्रदा ॥ ७७ ॥
तरुणी तामसी पाशा विपाशा पाशधारिणी ।
पशूपहारसन्तुष्टा कुक्कुटी हंसवाहना ॥ ७८ ॥
मधुरा विपुलाऽकाङ्क्षा वेदकाण्डी विचित्रिणी ।
स्वभावती सरित् सीताधारिणी मत्सरी च मुत् ॥ ७९ ॥
शतद्रूर्भारती कद्रूरनन्तानन्तशाखिनी ।
वेदना वासवी वेश्या पूतना पुष्पहासिनी ॥ ८० ॥
त्रिशक्तिः शक्तिरूपा चाचरमाता क्षुरी क्षुधा ।
मन्दा मन्दाकिनी मुद्रा भूता भूतपतिप्रिया ॥ ८१ ॥
भूतेष्टा पञ्चभूतस्था स्वच्छा कोमलहासिनी ।
वासिनी कुहिका लम्भा लम्बकेशी सुकेशिनी ॥ ८२ ॥
ऊर्ध्वकेशी विशालाक्षी घोरा पुण्यपतिप्रियाँ ।

---

१ 'निर्विकारा' ग. पाठ । २ 'तृष्णा' ख पाठः । ३ 'धारा' ख पाठः ।
४ 'वापगी' ख पाठ । ५ 'पतिव्रता' ग पाठ. ।

पांसुला पात्रहस्ता च खर्परी खर्परायुधा ॥ ८३ ॥
केकरी काकिनी कुम्भी सुफला केकराकृतिः ।
विफला विजया श्रीदा श्रीदसेव्या शुभङ्करी ॥ ८४ ॥
शैत्या शीतालया शीधुपात्रहस्ता कृपावती ।
कारुण्या विश्वसारा च करुणा कृपणा कृपा ॥ ८५ ॥
प्रज्ञा ज्ञाना च षड्वर्गा षडास्या षण्मुखप्रिया ।
क्रौञ्ची क्रौञ्चाद्रिनिलया दान्ता दारिद्र्यनाशिनी[1] ॥ ८६ ॥
शाला चामासुरा साध्या साधनीया च सामगा ।
सप्तस्वरा सप्तधरा सप्तसप्तिविलोचना ॥ ८७ ॥
स्थितिः क्षेमङ्करी स्वाहा वाचाली (८००) विविधाम्बरा ।
कलकण्ठी घोषधरा सुग्रीवा कन्धरा रुचिः ॥ ८८ ॥
शुचिस्मिता समुद्रेष्टा शशिनी वशिनी सुदृक् ।
सर्वज्ञा सर्वदा शारी सुनासा सुरकन्यका[2] ॥ ८९ ॥
सेना सेनासुता शृङ्गी शृङ्गिणी हाटकेश्वरी ।
होटिका हारिणी लिङ्गा भगलिङ्गस्वरूपिणी ॥ ९० ॥
भगमाता च लिङ्गाख्या लिङ्गभीतिः[3] कलिङ्गजा ।
कुमारी युवती प्रौढा नवोढा प्रौढरूपिणी ॥ ९१ ॥
रम्या रजोवती रज्जू रजोली राजसी घटी ।
कैवर्ती रावसी रात्री रात्रिञ्चरक्षयङ्करी ॥ ९२ ॥
महोग्रा मुदिता भिल्ली भद्रहस्ता भयङ्करी ।
तिलाभा दारिका द्वारःस्था द्वारिका मध्यदेशगा ॥ ९३ ॥
चित्रलेखा वसुमती सुन्दराङ्गी वसुन्धरा ।
देवता पर्वतस्था च परभूः परमाकृतिः ॥ ९४ ॥

---

१ 'दक्षभी' ख पाठ । २ 'हारिणी' ग पाठ. । ३ 'नुनि' ग पाठः ।
४ 'प्रौढा' ग पाठः ।

JIKHADAS THAKKAR
18, ,267,SION-W
BOMBAY 400 022 INDIA

परमूर्तिर्मुण्डमाला नागयज्ञोपवीतिनी ।
श्मशानकालिका श्मश्रुः प्रलयात्मा प्रलोपिनी ॥ ९५ ॥
प्रस्थस्था प्रस्थिनी प्रस्था धूम्रार्चिर्धूम्ररूपिणी ।
धूम्राङ्गी धूम्रकेशा च कपिला कालनाशिनी ॥ ९६ ॥
कङ्काली कालरूपा च कालमाता मलिम्लुची ।
शर्वाणी रुद्रपत्नी च रौद्री रुद्रस्वरूपिणी ॥ ९७ ॥
सन्ध्या त्रिसन्ध्या संपूज्या सर्वैश्वर्यप्रदायिनी ।
कुलजा सत्यलोकेशा सत्यवाक् सत्यवादिनी ॥ ९८ ॥
सत्यस्वरा सत्यमयी हरिद्वारा हरिन्मयी ।
हरिद्वन्नमयी राशि[3] (९००) ग्रहतारातिथितनुः ॥ ९९ ॥
तुम्बुरुस्तुटिका त्रोटी भुवनेशी भयापहा ।
राज्ञी राज्यप्रदा योग्या योगिनी भुवनेश्वरी ॥ १०० ॥
तुरी तारा महालक्ष्मीर्भीडा मार्गी भयानका ।
कालरात्रिर्महारात्रिर्महाविद्या शिवालया ॥ १०१ ॥
शिवासङ्गा शिवस्था च समाधिरग्निवाहना ।
त्र्यक्षीश्वरी महाव्याप्तिर्बलाका बालरूपिणी ॥ १०२ ॥
वटुकेशी विलासा च सदसत्पुरभैरवी ।
विग्रहा खलहा गाथा कथा कन्था शुभाम्बरा ॥ १०३ ॥
क्रतुहा क्रतुजा क्रान्ता माधवी चामरावती ।
अरुणाक्षी विशालाक्षी पुण्यशीला विलासिनी ॥ १०४ ॥
सुमाता स्कन्दमाता च कृत्तिका भरणी बलिः ।
जिनेश्वरी सुकुशला गोपी गोपतिपूजिता ॥ १०५ ॥
गुप्ता गोप्यतरा ख्याता मकटा गोपितात्मिका ।
कुलाम्नायवती कीला पूर्णा स्वर्गाङ्गदोत्सुका ॥ १०६ ॥

---

१ 'कलि' ग पाठ । २ 'सत' ग पाठः । ३ सामर्षतष्टम । ४ 'सद्वार ' ग. पाठः ।

उत्कण्ठा कलकण्ठी च रक्तपा पानपाऽमला ।
संपूर्णचन्द्रवदना यशोदा च यशस्विनी ॥ १०७ ॥
आनन्दा सुन्दरी सर्वानन्दा नन्दात्मजा तथा ।
विद्युत् खद्योतरूपा च सादरा जविका जविः ॥ १०८ ॥
जननी जनहर्त्री च खर्परा खञ्जनेक्षणा ।
जीर्णा जीमूतलक्ष्या च जटिनी जयवर्धिनी ॥ १०९ ॥
जलस्था च जयन्ती च जम्भारिवरदा तथा ।
सहस्रनामसंपूर्णा देवी ज्वालामुखी स्मृता (१०००) ॥ ११० ॥
इति नाम्नां सहस्रं तु ज्वालामुख्याः शिवोदितम् ।
चतुर्वर्गप्रदं नित्यं बीजत्रयप्रकाशितम् ॥ १११ ॥
मोक्षैकहेतुमतुलं भुक्तिमुक्तिप्रदं नृणाम् ।
स्तुत्यं च साधनीयं च सर्वस्वं सारमुत्तमम् ॥ ११२ ॥
महामन्त्रमयं विद्यामयं विद्याप्रदं परम् ।
परब्रह्मस्वरूपं च साक्षादमृतरूपणम् ॥ ११३ ॥
अद्वैतरूपणं नाम्नां सहस्रं भैरवोदितम् ।
यः पठेत् पाठयेद्वापि शृणोति श्रावयेदपि ॥ ११४ ॥
भक्त्या युतो महादेवि स भवेद्भैरवोपमः ।
शिवरात्र्यां च संक्रान्तौ ग्रहणे जन्मवासरे ॥ ११५ ॥
भैरवस्य बलिं दत्त्वा मूलमन्त्रेण मान्त्रिकः ।
पठेन्नामसहस्रं च ज्वालामुख्याः सुदुर्लभम् ॥ ११६ ॥
अनन्तफलदं गोप्यं त्रिसन्ध्यं यः पठेत् सुधीः ।
अणिमादिविभूतीनामीश्वरो धार्मिको भवेत् ॥ ११७ ॥
अर्धरात्रे समुत्थाय शून्यगेहे पठेदिदम् ।
नाम्नां सहस्रकं दिव्यं त्रिवारं साधकोत्तमः ॥ ११८ ॥

'नृणाम्' ग. पाठ । २ 'कुकुक्कटस्य' ख. पाठः ।


कर्मणा मनसा वाचा ज्वालामुख्याः सुतो भवेत् ।
मध्याह्ने प्रत्यहं गत्वा प्रेतभूमिं विधानवित् ॥ ११९ ॥
नरमांसबलिं दत्त्वा पठेत् सहस्रनामकम् ।
दिव्यदेहधरो भूत्वा विचरेद्भुवनत्रयम् ॥ १२० ॥
शनिवारे कुजेऽष्टम्यां पठेन्नामसहस्रकम् ।
दत्त्वा क्षीरबलिं तस्यै करस्थाः सर्वसिद्धयः ॥ १२१ ॥
विना नैवेद्यमात्रेण न रक्ष्यं साधकोत्तमैः ।
कुजवारे सदा देवि दत्त्वासवबलिं नरः ॥ १२२ ॥
पठेत् साधक एवाशु लभेद् दर्शनमुत्तमम् ।
शनिवारे सदा विद्या जप्त्वा दत्त्वा बलिं प्रिये ॥ १२३ ॥
कपोतस्य महेशानि पठेन्नामसहस्रकम् ।
तद्गृहे वर्धते लक्ष्मीर्गोकर्णमिव नित्यशः ॥ १२४ ॥
शतावर्तं चरेद्रात्रौ साधको दर्शनं लभेत् ।
वन्ध्या वा काकवन्ध्या वा कुङ्कुमेन लिखेदिदम् ॥ १२५ ॥
स्वस्तन्येन च शुक्रेण भूर्जे नामसहस्रकम् ।
गले वा वामबाहौ वा धारयेत् प्रत्यहं प्रिये ॥ १२६ ॥
वन्ध्यापि लभते पुत्रान्[1] शूरान् विद्याधरोपमान् ।
इदं कृत्वा सव्यबाहौ गत्वा रणधरां प्रति ॥ १२७ ॥
निर्जित्य शत्रुसङ्घातान् सुखी याति स्वकं गृहम् ।
वारत्रयं पठेन्नित्यं शत्रुनाशाय पार्वति ॥ १२८ ॥
वारद्वयं पठेल्लक्ष्म्यै मुक्त्यै तु शतधा पठेत् ।
वश्यार्थे दशधा नित्यं मारणार्थे च विंशतिम्[2] ॥ १२९ ॥
स्तम्भनार्थे पठेन्नित्यं सप्तधा मान्त्रिकोत्तमः ।
भूम्यर्थं त्रिंशतिं देवि पठेन्नामसहस्रकम् ॥ १३० ॥

---

१ 'प्रत्यहानि सुखी गृहम्' ख पाठ । २ 'विंशत' ख पाठः ।

प्रत्यहमेकवारं तु मृतो मोक्षमवाप्नुयात् ।
अप्रकाश्यमदातव्यमवक्तव्यमभक्तिषु ॥ १३१ ॥
अशाक्तायाकुलीनाय कुपुत्राय दुरात्मने ।
गुरुभक्तिविहीनाय दीक्षाहीनाय पार्वति ॥ १३२ ॥
दत्त्वा कुष्ठी भवेल्लोके परत्र नरकं व्रजेत् ।
श्रद्धायुक्ताय भक्ताय साधकाय महात्मने ।
साचाराय सुशीलाय दत्त्वा मोक्षमवाप्नुयात् ॥ १३३ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीज्वालामुखीसहस्रनामस्तोत्रम् ॥ ४ ॥



अथ

श्रीज्वालामुखीस्तोत्रम् ।

श्रीभैरव उवाच ।
तारं यो भजते मातर्बीज तव सुधाकरम् ।
पारावाप्रसुता नित्य निश्चला तद्गृहे वसेत् ॥ १ ॥
शून्यं यो दहनाधिरूढममलं वामाक्षिमसेवित
सेन्दुं विन्दुयुतं भवानि वरदे स्वान्ते स्मरेत् साधकः ।
मूकस्यापि सुरेन्द्रसिन्धुजलवद्वाग्देवता भारती
मद्यः पद्मपयी निरर्गलतरा मातर्मुखे तिष्ठति ॥ २ ॥

शुभं वहयारूढं मतियुक्तमनन्पेष्टफलदं
सविन्दीन्दुं मन्दो यदि जपति बीजं तव प्रियेम् ।
तदा मातः स्वःस्त्रीजनविहरणक्लेशसहितः
सुखमिन्द्रोद्याने स्वपिति स भवत्पूजनरतः ॥ ३ ॥
ज्वालामुखीति जपते तव नामवर्णान्
यः साधको गिरिशपत्नि सुभक्तिपूर्वम् ।
तस्याङ्घ्रिपद्मयुगलं सुरनाथवेश्याः
सीमन्तरत्नकिरणैरनुरञ्जयन्ति ॥ ४ ॥
पाशाम्बुजाभयधरे मम सर्वशत्रून्
शब्दं त्विति स्मरति यस्तव मन्त्रमध्ये ।
तस्याद्रिपुत्रि चरणौ बहुपांसुयुक्तौ
प्रक्षालयन्त्यरिवधूनयनाश्रुपाताः ॥ ५ ॥
मन्त्रपद्वयमिदं यदि भक्त्या साधको जपति चेतसि मातः ।
स स्मरारिरिव सत्प्रसादतस्त्वत्पदं च लभते दिनानिशम् ॥ ६ ॥
कूर्चबीजमनघं यदि ध्यायेत् साधकस्तव महेश्वरि योऽन्तः ।
अष्ट हस्तकमलेषु सुवरपास्तस्य त्र्यम्बकसमस्तसिद्धयः ॥ ७ ॥
ठद्वयं तव मनूत्तरस्थितं यो जपेत्तु परमप्रभावदम् ।
तस्य देवि हरिशङ्करादयः पूजयन्ति चरणौ दिवौकसः ॥ ८ ॥
ओंह्रींश्रीं त्र्यक्षरे देवि सुरासुरनिषूदिनि ।
त्रैलोक्याभयदे मातर्ज्वालामुखि नमोऽस्तु ते ॥ ९ ॥
उदितार्कद्युते[1] लक्ष्मि लक्ष्मीनाथसमर्चिते ।
वराम्बुजाभयधरे ज्वालामुखि नमोऽस्तु ते ॥ १० ॥
सर्वसारमयि शर्वे[3] सर्वामरनमस्कृते ।
सत्ये सति सदाचारे ज्वालामुखि नमोऽस्तु ते ॥ ११ ॥

---

१ 'द्विषे' क पाठः । २ 'दिने' ख पाठः । ३ 'सर्वे' ख पाठः ।

यस्या मूर्ध्नि शशी विलोचनगतौ यस्या रवीन्द्वग्नयः
पाशाम्भोजवराभयाः करतलाम्भोजेषु सद्वेतयः ।
गात्रे कुङ्कुमसन्निभा द्युतिरहिर्यस्यागले सन्ततं
देवीं कोटिसहस्ररश्मिसदृशीं ज्वालामुखीं नौम्यहम् ॥ १२ ॥
निद्रां नो भजते विधिर्भगवति शङ्का शिवं नो त्यजेद्
विष्णुर्व्याकुलतामलं कमलिनीकान्तोऽपि धत्ते भयम् ।
दृष्ट्वा देवि त्वदीयकोपदहनज्वालां ज्वलन्तीं तदा
देवः कुङ्कुमपीतगण्डयुगलः संक्रन्दनः क्रन्दति ॥ १३ ॥
यामाराध्य दिवानिशं सुरसरित्तीरे स्तवैरात्मभू-
रुद्यद्भास्वरधर्मभानुसदृशीं प्राप्तोऽमरज्येष्ठताम् ।
दारिद्र्योरगदष्टलोकत्रितयीसंजीविनीं मातरं
देवीं तां हृदये शशाङ्कशकलाचूडावतंसां भजे ॥ १४ ॥
आपीनस्तनभोगिभारनमितां कन्दर्पदर्पोज्ज्वलां
लावण्याङ्कितरम्यगण्डयुगलां यस्त्वां स्मरेत् साधकः ।
वश्यास्तस्य धराभृदीश्वरसुते गीर्वाणवामभ्रुवः
पादाम्भोजतलं भजन्ति त्रिदशा गन्धर्वसिद्धादयः ॥ १५ ॥
हत्वा देवि शिरो विधेर्यदकरोत् पात्रं कराम्भोरुहे
शूलप्रोतमसुं हरिं न्यगमयत् सद्रूपणं स्कन्धयोः ।
कालान्ते त्रितयं मुखेन्दुकुहरे शम्भोः शिरः पर्वति
तन्मातर्भुवने विचित्रमखिलं जाने भवत्याः शिवे ॥ १६ ॥
गायत्री प्रकृतिर्गलेऽपि विधृता सा त्वं शिवे वेधसा
श्रीरूपा हरिणापि वक्षसि धृताप्यर्धाङ्गभागे तथा ।
शर्वेणापि भवानि देवि सकलाः ख्यातु न शक्ता वयं
त्वद्रूपं हृदि मादृशां जडधियां ध्यातुं कथंवास्ति का ॥ १७ ॥

---

१ 'त्रिलोचन' ख पाठः । २ 'पावन क ख पाठः ।

ज्वालामुखीस्तवमिमं पठते यदन्तः
श्रीमन्त्रराजसहितं विभवैकहेतुम् ।
इष्टप्रदानसमयं भुवि कल्पवृक्षं
स्वर्गं व्रजेत् सुरवधूजनसेवितः सः ॥ १८ ॥

इति श्रीपरमाज्वालातत्त्वं पञ्चाङ्गमीरितम् ।
पररहस्यकं श्यामासर्वस्वं कुलसुन्दरि ॥ १९ ॥
गोप्यं गुह्यतमं सारं शिवदं पुण्यवर्धनम् ।
कोटियज्ञफलप्राज्यं कुलाचारैकसाधनम् ॥ २० ॥
स्तुत्यं रोगापहं दिव्यं सर्वैश्वर्यप्रदायकम् ।
सर्वस्वभूतं देवेशि रहस्यं मम पार्वति ॥ २१ ॥
परशिष्याय नो देयं दत्त्वा हानिर्भवेन्मनोः ।
गुरुपूजां विधायादौ गुरुं सन्तोष्य यत्नतः ॥ २२ ॥
गृह्णीयात् परमेशानि ज्वालामुख्या यथाविधि ।
पञ्चाङ्गमखिलं दिव्यं रहस्यं पारदैवतम् ॥ २३ ॥
सर्वसिद्धिर्भवेदाशु देवानामपि दुर्लभा ।

श्रीदेव्युवाच ।

कृतार्थासि भवतानेन स्तोत्रेणापि महेश्वर ।
सर्वथा तव दास्यस्मि पञ्चाङ्गश्रवणेन हि ॥ २४ ॥

श्रीभैरव उवाच ।

इदं रहस्यं परमं तव भक्त्या मयोदितम् ।
पञ्चाङ्गमखिलं देव्या गोपनीयं मुमुक्षुभिः ॥ २५ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीज्वालामुखीस्तोत्रम् ॥ ५ ॥

समाप्तं श्रीज्वालामुखीपञ्चाङ्गम् ॥

अथ

श्रीशारिकापञ्चाङ्गम् ॥

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि पटलं देवदुर्लभम् ।
सर्वसिद्धिकरं दिव्यं सर्वैश्वर्यप्रदायकम् ॥ १ ॥
या देवदेवी वरदा शारिका त्रिपुरेश्वरी ।
त्रैलोक्यजननी दुर्गा त्रिया सम्भावनी परा ॥ २ ॥
सप्तर्षिरूपेश्वरी सैव सप्तलोकान्तराश्रया ।
सप्तद्वीपमयी पृथ्वी शून्यरूपा कुलेश्वरी ॥ ३ ॥
या देवी चेतना लोके शिलारूपास्ति शारिका ।
सर्वेप्सितप्रदा नित्यं प्रद्युम्नपीठमाश्रिता ॥ ४ ॥
वक्ष्यामि पटलं तस्या मन्त्रोद्धारप्रकाशकम् ।
यन्त्रोद्धारं तथाङ्गाढ्यं यथावद्वर्णयामि ते ॥ ५ ॥
मन्त्रोद्धारं महद्गोप्यं सर्वसिद्धिप्रदं कलौ ।
मन्त्रं हितार्थं लोकानां तन्मादौ शृणु पार्वति ॥ ६ ॥

तारं परामातटसिन्पुरार्णाः
खे शर्म तन्मध्यगते च नाम ।
अन्तेऽश्मरी पार्वति शारिकाया-
स्त्रयोदशार्णो मनुरस्ति गोप्यः ॥ ७ ॥

मन्त्रस्यास्य महादेवि न विघ्नो नापि दूषणम् ।
न विपर्ययभीर्लोके सिद्धमाध्यारिमशयः ॥ ८ ॥
पुरश्चर्याफलं नापि न कायक्लेशसंग्रहः ।
मात्रात्र सिद्धिप्रदो मन्त्रः सर्वविघ्नापहारकः ॥ ९ ॥

ब्रह्महत्या-सुरापान-महापातकजं मलम् ।
प्रक्षालयति मन्त्रोऽयमभक्ष्यभक्षणं द्रुतम् ॥ १० ॥
मन्त्रमुत्कीलयेदादौ मन्त्रं सञ्जीवयेत्ततः ।
सिद्धं मन्त्रं जपेन्मध्ये दद्यादन्ते च संपुटम् ॥ ११ ॥
ततः सिद्धमनुः सिद्धो नामाढ्यो भवति ध्रुवम् ।
अस्य मन्त्रस्य देवेशि प्रसादाद्भैरवोऽस्म्यहम् ॥ १२ ॥
विष्णुर्नारायणो देवि ब्रह्मा लोकपितामहः ।
न देयः परशिष्याय भक्तिहीनाय पार्वति ॥ १३ ॥
अन्यथा सिद्धिहानिः स्यादुभयोः शिवशासनतः ।
मन्त्रस्यास्य ऋषिः प्रोक्तो महादेवो महेश्वरि ॥ १४ ॥
त्रिष्टुप् छन्दः समाख्यातं शारिका देवता स्मृता ।
शर्म बीजं रमा शक्तिः सिन्धुरं कीलकं स्मृतम् ॥ १५ ॥
धर्मार्थकाममोक्षार्थे विनियोग इतीरितः ।
तारपरारमाबीजैः षड्दीर्घोच्चाररूपकैः ॥ १६ ॥
न्यासं कुर्यात् षडङ्गादि येन देवीमयो भवेत् ।
ध्यानमस्याः प्रवक्ष्यामि जगच्चैतन्यकारणम् ।
येन ध्यानेन देवेशि परानन्दः प्रजायते ॥ १७ ॥

बालार्ककोटिद्युतिमिन्दुचूडा
वराभिचक्राभयवाहुमाद्याम् ।
सिंहाधिरूढां शिवकामदेह-
लीनां भजे चेतसि शारिकेशीम् ॥ १८ ॥

यन्त्रोद्धारं प्रवक्ष्यामि साधकानां शुभावहम् ।
सर्वार्थसाधकं दिव्यं सर्वोपद्रवनाशकम् ॥ १९ ॥

---

१. 'मन्त्रं तार'

खत्रिकोण-वसुकोणसुवृत्तोद्-
द्योतनागदलवृत्त(सत्रि)मण्डलम् ।
भूगृहं शिखिरवीन्दुभाश्चितं
यन्त्रमेतदुदितं शिवोऽऽलयम् ॥ २० ॥
शारिकाया महायन्त्रं त्रैलोक्योद्धारकारकम् ।
न देयं परशिष्येभ्यो दत्त्वा तु ब्रह्महा भवेत् ॥ २१ ॥
लयाङ्गस्य वक्ष्यामि ब्रह्मविष्णुसमर्चितम् ।
यन्त्रराजस्य देवेशि चतुर्वर्गप्रदायकम् ॥ २२ ॥
गणेशधर्मवरुणाः कुबेरसहिताः शिवे ।
पूज्या दूर्वाक्षतैः पुष्पैश्चतुर्द्वारेषु साधकैः ॥ २३ ॥
इन्द्राद्याश्चैव दिक्पालास्तथेशानक्रमेण च ।
ब्राह्मी च वैष्णवी देवी चण्डिकाप्यपराजिता ॥ २४ ॥
कौमारी शाम्भवी चैव वाराही नारसिंहिका ।
पूज्या वामक्रमेणैता मातृचक्रस्यमातरः ॥ २५ ॥
तत्रैव गुरवोऽभ्यर्च्यास्त्रिषु वृत्तेषु साधकैः ।
गुरुं च परमं देवि परापरगुरुं तथा ॥ २६ ॥
परमेष्ठिगुरुं देवि नुत्वा पूज्याश्च भैरवाः ।
संहारो भीषणो देवि कपाल्युन्मत्तभैरवौ ॥ २७ ॥
क्रोधश्चण्डो रुरुश्चैवमसिताङ्गो महेश्वरि ।
इत्येतान् भैरवान् देवि वसुपत्रेषु पूजयेत् ॥ २८ ॥
ब्राह्मयाद्या मातरो यत्र तत्र संपूजयेद् सदा ।
भैरवान् दक्षिणावृत्त्या मातृचक्रं तु वामतः ॥ २९ ॥
अमा कामा च चार्वङ्गी देवी च टङ्कधारिणी ।
तारा च पार्वती देवि संपूज्या यक्षिणी शिवा ॥ ३० ॥

---

१ "शिवा" ग पाठ ।

वामावर्तक्रमेणैव वसुकोणगताः शिवे ।
कालिका त्रिपुरा दुर्गा पूज्या मध्यत्रिकोणगाः ॥ ३१ ॥
ईशानक्रमयोगेन यथाभीष्टफलप्रदाः ।
मध्ये श्रीशारिकादेवीं वामदेवाङ्कमध्यगाम् ॥ ३२ ॥
मकारैः पञ्चभिः कौलः कौलाचारपरायणः ।
सपूजयेन्महादेवि साधको मन्त्रसाधकः ॥ ३३ ॥
वरं चक्रं च खड्गं च पूजयेदभयं तथा ।
बिन्दौ पुष्पाक्षतैश्चैव धूपदीपादितर्पणैः ॥ ३४ ॥
नैवेद्याचमनीयाद्यैस्ताम्बूलैश्च सुवासितैः ।
लयाङ्गमिदमाख्यातं प्रयोगाञ्छृणु पार्वति ॥ ३५ ॥
स्तम्भनं मोहनं चैव मारणाकर्षणे तथा ।
वशीकारं तथोच्चाटं शान्तिकं पौष्टिकं तथा ॥ ३६ ॥
एतेषां साधनं वक्ष्ये रहस्यं परमाद्भुतम् ।
येन साधनमात्रेण साधको भैरवो भवेत् ॥ ३७ ॥
(१) रवौ स्नात्वा शिवे कूपे कृत्वा कर्माह्निकं तथा ।
अर्धरात्रे निराहारो जपेन्मूलं चतुष्पथे ॥ ३८ ॥
अयुतं नियमेनैव दशांशं होममाचरेत् ।
घृतराजाशटीक्षौद्र-कङ्कोलादिभिः शिवे ॥ ३९ ॥
ब्रह्मा हरिः शिवो जिष्णुः स्तम्भवान् भवति ध्रुवम् ।
(२) चन्द्रे मे याङ्गमभये वेतसीमूलमण्डले ॥ ४० ॥
त्रिकोणं मण्डलं कृत्वा श्रीचक्रं पूजयेत्ततः ।
अयुतं प्रजपेन्मूलं नियमेन सुरेश्वरि ॥ ४१ ॥
घृतदाध्यंपयोमत्स्य-कर्पूरामवतज्ञगाः ।
शीताद्भूतेन देवेशि भस्मना तिलकं चरेत् ॥ ४२ ॥
तस्य दर्शनमात्रेण त्रैलोक्यं मोहमेष्यति ।

(३) भौमे निशामुखे गत्वा श्मशानमयुतं जपेत् ॥ ४३ ॥
चितायां तत्र दीप्तायां हुनेदाज्यं सगोमयम् ।
शमीमूले नरास्थीनि शत्रुनाम्ना निखातयेत् ॥ ४४ ॥
अपि देवसमो वापि शत्रुर्मृत्युमुखं व्रजेत् ।
(४) बुधे गत्वा वनं देवि वटाश्वत्थतले जपेत् ॥ ४५ ॥
अयुतं मूलमेकाकी हुनेत् पुष्पचयं सितम् ।
साज्यं सासवरक्तं च पुष्पाणि च महेश्वरि ॥ ४६ ॥
मेनका पीनपयोजा प्रातः प्रादुर्भविष्यति ।
(५) गुरौ गत्वा शमीमूलं जपेन्मूल चतुष्पथे ॥ ४७ ॥
अयुतं वायुतार्धं वा हुनेत् पायसमाज्यवत् ।
स्वयं चासज्जलोलाक्षः साज्य ताम्बूलमिश्रितम् ॥ ४८ ॥
इन्द्राग्नियममासाद-वरुणानिलवित्तदाः ।
सेश्वराः सहसा तस्य वशमेष्यन्त्यसंशयम् ॥ ४९ ॥
(६) शुक्रेऽर्धरात्रे विष्ण्यां वा गत्वा प्रेतालयं परम् ।
एकाकी प्रजपेत्तत्र कृत्वा पानाञ्जनं शिवे ॥ ५० ॥
अयुतं तु चितावह्नौ हुनेदाज्यं सकाञ्चिकम् ।
चिताङ्गारचये देवि रिपोरुच्चाटनं भवेत् ॥ ५१ ॥
(७) शनौ मध्याह्नसमये स्नात्वा कृत्वाह्निकीं क्रियाम् ।
गत्वा देवालयं देवि देवीं ध्यात्वा यथाविधि ॥ ५२ ॥
तदग्रे पूजयेद्यत्नं जपेन्मूलमथायुतम् ।
तत्र त्रिकोणकुण्डे तु हुनेदाज्यं ससंस्कृतम् ॥ ५३ ॥
वरुणाक्षं कुलेशानि कुक्कुटस्य शिरस्तथा ।
सद्यः सर्वभयानां च शान्तिर्भवति पार्वति ॥ ५४ ॥
(८) अष्टम्यां च चतुर्दश्यां गत्वा प्रेतालयं शिवे ।
जपेदयुतमर्धं वा हुनेत् पायसशर्कराम् ॥ ५५ ॥

मृद्वीकां त्रींश्च मद्यादीन्महापुष्टिः प्रजायते ।
इत्येष विधिराख्यातः सर्वतन्त्रेषु गोपितः ॥ ५६ ॥
नाख्येयो नच देष्टव्यो योगिनीचक्रपूजकैः ।
इत्येष पटलो गुह्यः सकलागमसारवान् ।
रहस्यभूतोऽयं देवि गोपनीयो मुमुक्षुभिः ॥ ५७ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीशारिकादेवीपटलः ॥ १ ॥



अथ

श्रीशारिकापूजापद्धतिः ।



श्रीभैरव उवाच ।
अधुना पद्धतिं वक्ष्ये शारिकार्चनसंयुताम् ।
गणपत्यमयीं गोप्यां सकलागमनिश्चिताम् ॥ १ ॥
प्रातः कृत्यमकृत्वा तु यो देवीं च समर्चयेत् ।
तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥ २ ॥

तत्रादौ प्रारब्धे मुहूर्ते प्रातःकृत्यं विधाय नद्यां स्नानसन्ध्यादि कर्म कृत्वा, गृहमागत्य पूजामण्डपद्वारदेवताः पूजयेत् । यथा—ॐ द्वारभैरवाय नमः ऊर्ध्वे, गं गणपतये नमः दक्षे, क्षां क्षेत्रपालाय नमः वामे, गां वास्तुपुरुषाय नमः वेदद्वयां, इत्यभ्यर्च्य वामपादपुरःसरमन्तः प्रवि-

ष्य, स्वासने उपविश्य, अस्य श्री आसनशोधनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनशोधने विनियोगः । "पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ "ॐ ह्रीं आधारशक्तिकमलासनाय नमः" इत्यासनं सपूज्य, "अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ पाषाणटङ्कारिणो भूता भूता भूम्यन्तरिक्षगाः । अपसर्पन्तु ते सर्वे ते नश्यन्तु शिवाज्ञया ॥ भूताः प्रेताः पिशाचाश्च राक्षसाश्च सरीसृपाः । अपसर्पन्तु ते सर्वे देव्या अस्त्रेण ताडिताः ॥" इति तालत्रयेण तर्जनीमध्यमाभ्यामूर्ध्वोर्ध्वं तालत्रयदानेन वामपार्ष्णिघातत्रयेण च दिव्यदृष्ट्या च विविधविघ्नोत्सार्य, दशभिरङ्गोटिकाभिर्दशदिग्बन्धनं कृत्वा चतुर्दिक्षु वह्निप्राकारं सञ्चिन्त्य, प्राणायामत्रयं कुर्यात् । १६ पूरकम् ६४ कुम्भकम् ३२ रेचकम् इत्येकः, विपर्ययेण द्वितीयः, प्रथमवत् तृतीयः, । इति प्राणायामत्रयेण निरस्तसकलविघ्नोत्सर्यं स्वदेह देवताराधनयोग्यं विभाव्य न्यासं कुर्यात् । अस्य श्रीशारिकाभगवतीमन्त्रस्य, महादेव ऋषिः, त्रिष्टुप् छन्दः, श्रीशारिकादेवी देवता, शां बीजं श्रीं शक्तिः क्रां कीलकं धर्मार्थकाममोक्षार्थे पूजने विनियोगः, इति कृताञ्जलिर्वदेत् । महादेवऋषये नमः शिरसि, त्रिष्टुप्छन्दसे नमो मुखे, श्रीशारिकादेवतायै नमो हृदि, शां बीजाय नमो गुह्ये, श्रीं शक्तये नमः पादयो, क्रां कीलकाय नमो नाभौ, पूजने विनियोगाय नमः सर्वाङ्गेषु । इति ऋष्यादिन्यासः । ॐ ह्रां श्रीं अङ्गुष्ठाभ्यां नमः, ॐ ह्रीं श्रीं तर्जनीभ्यां नमः, ॐ ह्रूं श्रीं मध्यमाभ्यां नमः, ॐ ह्रैं श्रीं अनामिकाभ्यां नमः, ॐ ह्रौं श्रीं कनिष्ठाभ्यां नमः, ॐ ह्रः श्रीं करतलपृष्ठाभ्यां नमः, । इति करन्यासः । व षडङ्गेष्वपि न्यसेत् । इति न्यासदेहं सम्पाद्य,

"मूलाधारे मूलविद्यां विद्युत्कोटिसमप्रभाम् । सूर्यकोटिप्रतीकाशां चन्द्रकोटिप्रभां प्रिये ॥ विसतन्तुसूक्ष्मरूपां तां बिन्दुत्रितयसंयुतां प्रिये । ऊर्ध्वशक्तिनिपातेन सहजेन वरानने ॥ मूलशक्तिकृतेनैव मायया शक्तिबोधनः । परमानन्दसन्दोहसानन्दां चिन्तयेत् पराम् ॥" इत्यन्तर्यजनं कृत्वा, मूलाधारे आत्मान्तरात्मपरमात्मज्ञानेत्यात्मचतुष्टयं सचतुरश्रं कुण्डस्थाग्निसमुज्ज्वलं कुण्डं ध्यात्वा, तन्मध्ये मूलान्ते "अहन्तां

जुहोमि स्वाहा" इत्यहन्तां समर्प्य, असत्यं पैशुन्यं कामं क्रोधं लोभं मदं मात्सर्यं जुहोमि सुषुम्नासङ्क्रमनस्रुवेण प्रत्येकं हुत्वा, अथवा "धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा। सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम्॥ इति हुत्वा पुनः हृत्कमले यथोक्तरूपां देवीं ध्यात्वा मानसोपचारैराराध्य यथाशक्ति जपहोमादिकं च मनसैव कृत्वा, कामकलारूपं स्वात्मानं विचिन्त्य स्वदेहं गन्धादिना संपूज्य कलशस्थापनं कुर्यात्।

तत्र स्वदक्षे त्रिकोणं वृत्तमण्डलं विधाय "आधारशक्तये नमः" इत्यभ्यर्च्य, तत्राधारं निधाय तदुपरि अस्त्राय फडिति शोधितं, नमः इति पूरितं, पात्रं शङ्खं वा संस्थाप्य, तत्र गङ्गे च यमुने चैवेत्यादिना तीर्थान्यावाह्य, ॐमिति गन्धादि निःक्षिप्य "वह्निसूर्यसोमकलाभ्यो नमः" इति संपूज्य धेनुमुद्रां प्रदर्श्य स्वमन्त्रेण संपूजयेदिति सामान्यार्घ्यं विधाय। ततः स्ववामे षट्कोणान्तर्गतत्रिकोणबिन्दुयाह्यवृत्तचतुरस्रं विधाय सामान्यार्घ्योदकेन तं मण्डलमभ्युक्ष्य, तत्र "आधारशक्तिभ्यो नमः" इति संपूज्य आधारं संस्थाप्य "रं वह्निमण्डलाय दशकलात्मने नमः" इति प्रपूज्य, फडिति कलशं प्रक्षाल्य कारणेन प्रपूर्य, रक्तवस्त्रमाल्यादिना संभूष्य देवीबुद्ध्या संस्थाप्य, "सं अर्कमण्डलाय द्वादशकलात्मने नमः" इति कलशं संपूज्य, "सौं सोममण्डलाय षोडशकलात्मने नमः" इति द्रव्यं संपूज्य फडिति संरक्ष्य, हूमित्यवगुण्ठ्य, मूलेन संवीक्ष्य, नम इत्यभ्युक्ष्य मूलेन गन्धमाघ्राय, कुम्भे पुष्पं दत्वा शापमोचनं कुर्यात्।

एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम्। कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्॥ सूर्यमण्डलसंभूते वरुणालयसंभवे। अमाबीजमयि देवि शुक्रशापाद्विमुच्यताम्॥ वेदानां प्रणवो बीजं ब्रह्मानन्दमयो यदि। तेन सत्येन देवेशि ब्रह्महत्यां व्यपोहतु॥ इति त्रिः पठित्वा, ततो "वां वीं वूं वः वौं वः ब्रह्मशापमोचितायै सुरादेव्यै नमः" इत्यपि त्रिरुच्चार्य, हंस शुचिषदित्यादि अद्रिजा ऋतमित्यन्तं त्रिः पठित्वा, आनन्दभैरवमष्टादशभुज त्रिनयनं पञ्चमुख सुरादेवीसहित ध्यात्वा, "ॐ आनन्दभैरवाय वौषट् सदक्षमलवरयऊ सुरादेव्यै वौषट्" इति त्रिः संपूज्य, द्रव्यमध्ये दक्षिणावर्तेन त्रिपंक्त्या अं १६ कं १६ थं १६

इति विलिख्य, तन्मध्ये हंसः इति, तत्समावेशाद् द्रव्यमध्येऽमृतं विचिन्त्य, धेनुमुद्रयामृतीकृत्य वमिति सुधाबीजं मूलमपि चाष्टधा पठेत् । तयोर्मध्ये त्रिकोणषट्कोणवृत्तचतुरश्रं विलिख्य चतुरश्रे 'पूर्णगिरिपीठाय नमः, उड्डीयानपीठाय नमः, कामरूपपीठाय नमः, जालन्धरपीठाय नम , इति संपूज्य , षट्कोणे षडङ्गं संपूज्य , त्रिखण्डेन त्रिकोणाग्रदत्तोत्तरं संपूज्य, मध्ये "आधारशक्त्यै नमः" इति संपूज्य, त्रिकोणगर्भे यन्त्रिकां संस्थाप्य, नम इति सामान्यार्घ्यजलेनाभ्युक्ष्य मध्ये "रं वह्निमण्डलाय दशकलात्मने नमः" इति संपूज्य, फडिति पात्रं प्रक्षाल्य यन्त्रिकोपरि संस्थाप्य, तत्र "अं अर्कमण्डलाय द्वादशकलात्मने नमः" इति संपूज्य, त्रिकोणवृत्तषट्कोणं पात्रे विलिख्य समस्तव्यस्तमन्त्रेण संपूज्य वं मूलं विलोममातृकां च पठन्नमृतेन त्रिकोणं प्रपूर्य तत्र गन्धादि निक्षिप्य "सौं सोममण्डलाय षोडशकलात्मने नमः" इति संपूज्य पूर्ववद्यन्त्रं द्रव्ये विलिख्य, त्रिकोणपरिरेखायां ॐ १६ कं १६ थं १६ इति विलिख्य मूलेन त्रिकोणं त्रिः संपूज्य, षडङ्गेन षट्कोणं संपूज्य, गङ्गेच यमुने चैवेति तीर्थमावाह्य, आनन्दभैरवभैरव्यौ स्वस्वमन्त्रेण संपूज्य, पूर्वादितः ग्लूं गगनरत्नेभ्यो नमः पूर्वे । स्लूं स्वर्गरत्नेभ्यो नमः दक्षिणे । म्लूं मर्त्यरत्नेभ्यो नमः पश्चिमे । प्लूं पातालरत्नेभ्यो नमः उत्तरे । न्लूं नागरत्नेभ्यो नमः मध्ये । इति संपूज्य मांसादि संशोधयेत् । मांसपात्रमानीय फडस्त्राय फडिति सामान्यार्घ्येदकेनाभ्युक्ष्य हुमित्यवगुण्ठ्य वमित्यमृतमुद्रयामृतीकृत्य मूलं सप्तधोच्चार्य "प्र तद्विष्णुः स्तवते" इत्यृचा संशोधयेत् । त्र्यम्बकं यजामहे" इत्यृचा मीनं शोधयेत् । "ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अश्विनौ देवा आधत्तां पुष्करस्रजम् ॥" ॐ हंसः धीं जुंसः अमृते अमृतोद्भवे अमृतवर्षिणि अमृत स्रावय २ स्वाहा, इति कुण्डगोलादिकं संशोध्यावगुण्ठ्यामृतीकृत्य तदुपरि सप्तधा मूलं सञ्जप्य तत्र देवीमावाह्य, तालत्रयेण दिग्बन्धनं विधाय योनिमुद्रां प्रदर्श्य हंसौं नमः इति संपूज्य शक्तिमुद्रां प्रदर्श्य, षडङ्गेन सकलीकृत्य मत्स्यमुद्रया पात्रमाच्छाद्य मूलमुच्चरन् पात्रं देवीरूपं विभावयेत् । ततो घटमर्मापि गुरुशक्तिभोगस्थपात्रयोगिनीयोग्यलिपाद्यर्घ्यांचमनीयमधुपर्कपात्राणि क्रमेण

संस्थापयेत्। ततश्चर्वणयुतकारणेन तन्मुद्रया श्रीपात्राद् बिन्दून्समुद्धृत्य "आनन्दभैरवं तर्पयामि नमः" इति त्रिः सन्तर्प्य, ततः "श्रीमच्छ्री अमुकानन्दनाथश्रीगुरुपादुकां तर्पयामि नमः" इति त्रिः, एवं परमगुरु परमाचार्यादीन् सन्तर्प्य, श्रीपात्रामृतेन मूलेन श्रीदेवीं सायुधां सवाहनां सपरिवारां तर्पयामि नमः, इति सन्तर्पयेदिति कलशस्थापनम्॥

ततः पीठपूजा कुर्यात्। ॐ मण्डूकाय नमः, कालाग्निरुद्राय०, मूलप्रकृत्यै, आधारशक्त्यै, कमठाय, अनन्ताय, पृथिव्यै, सुधार्णवाय रत्नद्वीपाय, कल्पवनाय, नन्दनोद्यानाय, मणिमण्डपाय, मणिवेदिकायै, रत्नसिंहासनाय, सूर्यसोमवह्निमण्डलेभ्यो, ह्सौः सदाशिवमहाप्रेतासनाय नमः, इति पीठं संपूज्य, वायुर्यजेन वामनासापुटेन स्वहृदयाद् देवीं कुसुमाञ्जलौ संयोज्य, "देवेशि भक्तिसुलभे परिवारसमन्विते। यावत् त्वां पूजयिष्यामि तावद् देवि इहावह॥" इति पठित्वा, मूल श्रीवामदेवसहिते श्रीशारिकाभगवति इहागच्छ २ इह संतिष्ठ २ इह सन्निधेहि २ सन्निरुद्धा भव २ मम सर्वोपचारसहिता पूजां गृह्ण २ इत्यावाहनादिमुद्राः प्रदर्श्य, प्राणप्रतिष्ठां लेलिहानमुद्रया विधाय, दशदिग्बन्धनं कृत्वा अवगुण्ठ्य च धेनुयोनीं प्रदर्श्य वरासिचक्राभयमुद्राश्च प्रदर्श्य, श्रीपात्रामृतेन सायुधा सवाहना सपरिवारा सावरणा श्रीशारिकाभगवतीश्रीपादुकां तर्पयामि नमः इति त्रिः सन्तर्प्य, मूल श्रीवामदेवसहितशारिकाभगवत्यै पाद्यं नमः, एवमर्घ्यं स्वाहा, आचमनीयं सुधा, मधुपर्कं सुधा मुखे, स्नानीयं नमः, "पादुके परिधायाथ शारिके रत्ननिर्मिते। स्नानमण्डपमायाहि स्नानार्थं शक्रदिग्गतम्॥" मूलेन स्नात्वा, पुनः "शारिके परिधायाथ पादुके रत्ननिर्मिते। आगच्छ निर्मितं रम्यमलङ्कारस्य मण्डपम्॥" इति सुस्नाप्य शुद्धदुकूलेनाङ्गं प्रोञ्छ्य, विचित्रपटवस्त्रकुङ्कुमकस्तूरीचन्दनसिन्दूरमुकुटकुण्डलहारादि-नानालङ्कारान् दत्त्वा, मूलेन मध्यमानामाङ्गुष्ठाग्रगन्धो नमः, एवमङ्गुष्ठतर्जनीभ्यां पुष्पाणि दत्त्वा "ॐ जगद्ध्वनिमन्त्रमातः स्वाहा" इति घण्टां संपूज्य वामेन पाणिना तां वादयन् मूलेन धूपं दद्यात्। एवं दीपचामरच्छत्रध्वजादर्शनवेद्यादीन् निवेदयेत्। ततस्तत्तन्मुद्रया देवीं त्रिः सन्तर्प्य कृताञ्जलिः "श्रीशारिकाभगवति आवरणं ते पूजयामि नमः" इत्याज्ञां गृहीत्वावरणपूजामारभेत।

तत्रादौ चतुर्द्वारपूजा । ॐह्रीं श्रीं गं गणपतिश्रीपादुकां पूजयामि नमस्तर्पयामि नमः । ॐ धं धर्मश्री० । ॐ वं वरुणश्री० । ॐ कुं कुबेरश्री० । पुष्पाञ्जलिं दत्त्वा योनिमुद्रया प्रणमेदिति चतुर्द्वारप्रथमरेखायां पूर्वादिक्रमेण पूजनम् ।

अथ द्वितीयरेखायां । ॐह्रीं श्रीं इन्द्रश्रीपादुकापू० । ॐ अग्निश्री० । ॐ यमश्री० । ॐ निर्ऋतिश्री० । ॐ वरुणश्री० । ॐ वायुश्री० । ॐ कुबेरश्री० । ॐ ईशानश्री० । ॐ ब्रह्मश्री० । ॐ विष्णुश्री० । पुष्पाञ्जलिं दत्त्वा योनिमुद्रया प्रणमेदिति ।

ततस्तृतीयरेखायामेतेषामायुधानि पूजयेत् । यथा ॐ वज्रश्री० । ॐ शक्तिश्री० । ॐ दण्डश्री० । ॐ खड्गश्री० । ॐ पाशश्री० । ॐ ध्वजश्री० । ॐ गदाश्री० । ॐ त्रिशूलश्री० । ॐ पद्मश्री० । ॐ चक्रश्री० । पुष्पाञ्जलिं दत्त्वा योनिमुद्रया प्रणमेदिति प्रथमावरणम् ।

अथ त्रिवृत्तपूजा । तत्रादौ प्रथमरेखाया मू० दिव्यौघपराख्यगुरुपङ्क्तिश्रीपा०, द्वितीयरेखाया मूल सिद्धौघपराख्यगुरुपङ्क्तिश्रीपा०, तृतीयरेखायां मूल मानवौघपरापराख्यगुरुपङ्क्तिश्रीपा०, अत्रैव ॐ स्वगुरुश्री०, ॐ परमगुरुश्री०, ॐ परमेष्ठिगुरुश्री०, ॐ परमाचार्यगुरुश्री०, इति पुष्पाञ्जलिं दत्त्वा योनिमुद्रया प्रणमेदिति द्वितीयावरणम् ।

ततोऽष्टदलेषु मूलेन पुष्पाञ्जलिं दत्त्वा अष्ट मातृकाः पूजयेत् । यथा—स्वाग्रदलमारभ्य वामावर्तेन पूजनम् । ॐ ब्राह्मीश्री० । ॐ वैष्णवीश्री० । ॐ चण्डिकाश्री० । ॐ अपराजिताश्री० । ॐ कौमारीश्री० । ॐ शाम्भवी० । ॐ वाराहीश्री० । ॐ नारसिंहिकाश्री० । इति सपूज्य सन्तर्प्य, अष्टदलकेसरेषु दक्षावर्तेनाष्टभैरवान् पूजयेत् । ॐ असिताङ्गभैरवश्री० । ॐ रुरुभैरवश्री० । ॐ चण्डभैरवश्री० । ॐ क्रोधेशभैरवश्री० । ॐ उन्मत्तभैरवश्री० । ॐ कपालिभैरवश्री० । ॐ भीषणभैरवश्री० । ॐ संहारभैरवश्री० । इति सपूज्य सन्तर्प्य योनिमुद्रया प्रणमेदिति तृतीयावरणम् । (तत्रैव वामावृत्त्या ब्राह्म्यादीना पूजा कार्या ।)

अथ त्रसुकोणे मूलेन पुष्पाञ्जलिं दत्त्वा ॐ अमाश्री० । ॐ कामा-

श्री० । ॐ चर्यङ्गीश्री० । ॐ दक्षधारिणीश्री० । ॐ ताराश्री० । ॐ पार्वतीश्री० । ॐ यक्षिणीश्री० । ॐ शिवाश्री० । इति संपूज्य सन्तर्प्य योनिमुद्रया प्रणमेदिति चतुर्थावरणम् ।

ततस्त्रिकोणेऽग्रकोणमारभ्य ॐ कालिकाश्री० । ईशाने ॐ त्रिपुरसुन्दरीश्री० । आग्नेये ॐ श्रीदुर्गाश्री० । इति संपूज्य सन्तर्प्य योनिमुद्रया प्रणमेदिति पञ्चमावरणम् ।

ततो बिन्दौ मूलेन पुष्पाञ्जलिं दत्त्वा तत्र यथोक्तरूपां श्रीदेवीं ध्यात्वा, पुष्पाञ्जलिं गृहीत्वा मूलं सप्तधोच्चार्य श्रीमच्छ्रीवामदेवसहित श्रीशारिकाभगवतीश्रीपादुकां पूजयामि नमस्तर्पयामि नमः, इति संपूज्य सन्तर्प्य पूर्ववद् गन्धकुसुमधूपदीपच्छत्रादिभिः संपूजयेत् । (तत्रैव वराभयौ पद्मचक्रे यथोक्तविधिना पूज्यौ ।) ततः कवचसहस्रनामस्तोत्राणि पठेत्, नित्यहोमं च कुर्यात् । ततो यथाशक्ति मूलं जप्त्वा "गुह्यातिगुह्यगोप्त्री त्वं" इत्यादिना तर्पणं कुर्यात् ।

सर्वमङ्गल्यमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

इति सप्तवारं प्रदक्षिणीकृत्य, सामयिकैः सह मूलेन पात्रवन्दनं कृत्वा, पात्रमुद्धृत्य मस्तकान्तं नीत्वा देव्या प्रसादीकृतं विभाव्य, मूलं आत्मतत्त्वं शोधयामि स्वाहा, मू० विद्यातत्त्वं शोधयामि स्वाहा, मूलं शिवतत्त्वं शोधयामि स्वाहा, मूलं सर्वतत्त्वं शोधयामि स्वाहा, इति चुलकचतुष्टयं पीत्वा शेषं मूलमन्त्रं पठन् पिबेत्। चर्वणं च स्वीकृत्य,

नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः ।
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ॥

इत्यादि शान्तस्तोत्रं पठित्वा, ईशाने मण्डलं विधाय तत्र निर्माल्येन "निर्माल्यवासिन्यै नमः" इति संपूज्य सन्तर्प्य, सामान्यार्घोदकं गृहीत्वा "इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा पद्भ्यामुदरेण शिश्ना यत्कृतं तन्मम मदीयं श्रीशारिकाभगवतीचरणार्पणमस्तु स्वाहा" इति सन्तर्प्य, सामान्यार्घ्यपात्रं गृहीत्वा ।

साधु वासाधु यत्कर्म यद्यदाचरितं मया ।
तत्सर्वं कृपया देवि गृहाण मम सिद्धये ॥

इत्यपश्चकोपरि त्रिः परिभ्राम्य देवीहस्ते जलं निधाय शेषजलं स्ववामहस्ते संस्थाप्य मूलं पठन् सप्तधा स्वात्मानं प्रोक्षयेत् । ततः

"गच्छगच्छ परं स्थानं स्वस्थानं परमेश्वरि ।
यत्र ब्रह्मादयो देवाः न विदुः परमं पदम् ॥"

इति पुष्पाञ्जलिना देवीं क्षमापयित्वा, संहारमुद्रया चक्रात् पुष्पं गृहीत्वाघ्राय

"तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वरि ।
यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठन्ति मे हृदि ॥"

इति स्वहृदये देवीमानीय सुखं विहरेदिति ॥

इत्येषा नित्यपूजायाः पद्धतिर्गद्यरूपिणी ।
शारिकासर्वस्वरूपा न देया तत्त्ववादिभिः ॥
शारिकापद्धतिर्गुह्या नित्यार्चनक्रमाङ्किता ।
अदीक्षितान्यशिष्येभ्यो गोपनीया तु देशिकैः ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीशारिकायाः पद्धतिः ॥ २ ॥

अथ

श्रीशारिकाकवचम्

श्रीभैरव उवाच ।

अधुना 'शृणु देवेशि शारिकाकवचं परम् ।
त्रैलोक्यमोहनं नाम मूलमन्त्रमयं परम् ॥ १ ॥

देवि वक्ष्यामि ' इ० पाठः ।

'यस्य श्रवणमात्रेण सर्वयज्ञफलं लभेत् ।
सर्वोपचारयं दिव्यं सर्वसिद्धिप्रदं कलौ ॥ २ ॥
सर्वस्वं मे रहस्यं मे परमं परमाद्भुतम् ।
धारणादस्य देवेशि विष्णुना स जलोद्भवः ॥ ३ ॥
दानवेन्द्रो हतः शीघ्रमन्धकारो यथेन्दुना ।
मयापि त्रिपुराध्यक्षो दानवो जिष्णुना[2] बलः ॥ ४ ॥
जम्भो वृत्रासुरो देवि प्रभावादस्य वर्मणः ।
कवचस्यास्य देवेशि ऋषिर्भैरव ईरितः ॥ ५ ॥
त्रिष्टुप् छन्दो देवता च त्रैलोक्यमोहनेश्वरी ।
शारिका शर्म बीजं च मा शक्तिः कीलकं गजः ।
त्रैलोक्यमोहविद्यार्थे विनियोगः प्रकीर्तितः ॥ ६ ॥

अस्य श्रीशारिकाभगवतीकवचस्य, श्रीभैरव ऋषिः, त्रिष्टुप् छन्दः, त्रैलोक्यमोहनेश्वरी शारिकाभगवती देवता, शां बीजं श्रीं शक्तिः फ्रां कीलकं, त्रैलोक्यमोहनकवचपाठे विनियोगः । भैरवऋषये नमः शिरसि । त्रिष्टुप्छन्दसे नमो मुखे । श्रीशारिकादेवतायै नमो हृदि । शां बीजाय नमो नाभौ । श्रीं शक्तये नमो गुह्ये । फ्रां कीलकाय नमः पादयोः । त्रैलोक्यमोहनकवचविनियोगाय नमः सर्वाङ्गेषु । शामिति षड्दीर्घयुक्तषड्बीजेन करषडङ्गन्यासौ कृत्वा ध्यायेत् ।

श्रीशङ्खचक्रमुसलाम्बुजयुग्महस्तां
नागेन्द्रहारवलयां सितकण्ठमान्याम् ।
सिन्दूरकुङ्कुमसहस्रमरीचिदीप्तिं
श्रीशारिकां त्रिनयनां हृदये स्मरामि ॥

ओं मे दुर्गा शिरः पायादेकाक्षरविभूषणा ।
ओं ह्रीं चण्डी ललाटं मे जगदुल्लासरूपिणी ॥ ७ ॥
ओं ह्रीं श्रीं त्र्यक्षरा पातु भ्रुवौ मे भगमालिनी ।

---

१ 'अस्य' ख. पाठः । २ 'विष्णुना' क. ख पाठः ।

ॐ ह्रीं श्रीं हूं च नेत्रेऽव्यात् सर्वमङ्गलमङ्गला ॥ ८ ॥
ॐ ह्रीं श्रीं हूं फ्रां अव्यान्मे श्रुती शङ्करवल्लभा ।
ॐ ह्रीं श्रीं हूं फ्रां आं पातु नासां नारायणेश्वरी ॥ ९ ॥
ॐ ह्रीं श्रीं हूं फ्रां आं शां मे पातु वक्त्रं सरस्वती ।
मंआंईं रदान् पातु मातृकाशेखरेश्वरी ॥ १० ॥
उंऊंश्रंत्रं लृंलृंएंऐं पायादोष्ठौ भवप्रिया ।
ओंऔंअंअः गलं पातु नीलकण्ठासनेश्वरी ॥ ११ ॥
कंखंगंघंङं मे पातु स्कन्धौ स्कन्दसमर्चिता ।
चंछंजंझंञं मे पायाद् बाहो वामप्रियाम्बिका ॥ १२ ॥
टंठंडंढंणं मे पायात् पार्श्वौ पर्वतनन्दिनी ।
तंथंदंधंनं मे पातु कुक्षिं कुलाकुलेश्वरी ॥ १३ ॥
पंफंबंभंमं मे पातु नाभिं नारदसेविता ।
यंरंलंवं गुद पातु गुह्यकेश्वरपूजिता ॥ १४ ॥
शंषंसंहं कटिं पातु देवी कात्यायनी सदा ।
ळंक्षः ऊरू सदा पातु सर्वसारस्वतप्रदा ॥ १५ ॥
ॐ शां जानू शिवा पातु ॐआं जङ्घेऽवतादुमा ।
ॐ फ्रां पादौ सदा पातु राजमातङ्गिनी मम ॥ १६ ॥
ॐ हूं पादादिमूर्धान्तं वपुर्मे पातु कुब्जिका ।
ॐ श्रीं मूर्धादिपादान्त वपुर्मे पातु शारदा ॥ १७ ॥
ॐ ह्रीं सप्ताक्षरी पातु शारिका सकलं वपुः ।
पूर्वे मां पातु ब्रह्माणी वह्नौ मे वैष्णवी सदा ॥ १८ ॥
दक्षिणेऽवतु मां चण्डी नैर्ऋते माऽपराजिता ।
पश्चिमेऽवतु कौमारी वायव्ये शाम्भवी च माम् ॥ १९ ॥
वाराही चोत्तरे पायादीशाने नारसिंहिका ।

प्रभाते मार्ममा पातु मध्ये कामाऽवताच्च माम् ॥ २० ॥
चार्वङ्गी मां दिनान्तेऽव्यान्निशादौ टङ्कधारिणी ।
निशीथेऽव्यादुग्रतारा निशान्ते पार्वती च माम् ॥ २१ ॥
सर्वत्र याचिणी पातु शिवा मां पातु सर्वदा ।
असिताङ्गः क्षितेः पातु रुरुर्मां पातु पाथसः ॥ २२ ॥
चण्डो मां पातु मरुतः क्रोधोऽव्यान्मां हुताशनात् ।
उन्मत्तः सोमतः पातु कपाली सूर्यतोऽवतु ॥ २३ ॥
भीषणो यज्ञविघ्नात्तु संहारः शून्यमण्डलात् ।
रणे मां कालिका पातु द्यूते त्रिपुरसुन्दरी ॥ २४ ॥
दुर्गावतु विवादे मां श्रीचक्रं सर्वदावतु ।
सर्वत्र सर्वदा देवी पातु मा शारिका परा ॥ २५ ॥
धनं पुत्रं सुतान् दारान् गृहं यद्वस्तु मामकम् ।
तत्तन्मम शिवः पातु वामदेवश्चिदीश्वरः ॥ २६ ॥
इत्येतत् कवचं दिव्यं त्रिषु लोकेषु दुर्लभम् ।
त्रैलोक्यमोहनं नाम शारिकाया रहस्यकम् ॥ २७ ॥
विनाम्नुना न सिद्धिः स्यात् कवचेन्द्रेण पार्वति ।
कोटिलक्षप्रजप्तस्य मन्त्रस्यास्य महेश्वरि ॥ २८ ॥
तस्मात् पठेच्छिवे वर्म मनुगर्भमनुत्तमम्[2] ।
सर्वोत्पातप्रशमनं बलबुद्धिप्रवर्धनम् ॥ २९ ॥
परमानन्ददं लोके परमैश्वर्यकारणम् ।
यः पठेत् पाठयेद्वापि शृणोति श्रावयेदपि ॥ ३० ॥
स एव भैरवाध्यक्षस्त्रैलोक्यविजयी विभुः ।
रवौ भूर्जे लिखेद्धर्मं स्वयम्भूकुसुमद्रुना ॥ ३१ ॥
कुसुमेनाष्टगन्धेन स्तन्येन निजरेतसा ।

---

१ 'सुमा' ख. पाठः । २ 'मन्त्रगर्भमनुत्तमम्, ख. पाठः । ३ 'द्रुकुसुमेन' ख पाठः ।

धारयेन्मूर्ध्नि वा बाहौ प्राप्नुयात् परमां गतिम् ॥ ३२ ॥
धनकामी लभेद्वित्तं पुत्रकामी लभेत् प्रजाम् ।
रणे रिपून्नरो हत्वा कन्यार्थी गृहमाविशेत् ॥ ३३ ॥
धृत्वा यत्तामि देवेशि वाग्मिनं जायते क्षणात् ।
वन्ध्या च काकवन्ध्या च मृतवत्सा लभेत् सुतान् ॥ ३४ ॥
मार्कण्डेयायुषो देवि साक्षाद्वैश्रवणोपमान् ।
किंकिं न लभते मर्त्यः पठन् कवचमुत्तमम् ॥ ३५ ॥
यः पठेदर्धरात्रे तु श्मशाने मुक्तकुन्तलः ।
पीत्वा शीधुं स देवेशि देवीदर्शनमाप्नुयात् ॥ ३६ ॥
स्तम्भयेद्भास्करं वायुं मोहयेत् त्रिजगद् ध्रुवम् ।
बहु किं कथ्यतां तस्य कवचस्यास्य धारणात् ॥ ३७ ॥
पठनाच्छ्रवणाद् वापि स भवेद् भैरवोपमः ।
इतीदं कवचं देवि त्रैलोक्यवश्यकारणम् ॥ ३८ ॥
त्रैलोक्यमोहनं नाम गोपनीयं सुरेश्वरि ।
यस्य कस्य न दातव्यं विना शिष्येण पार्वति ॥ ३९ ॥
दीक्षिताय कुलीनाय दत्त्वा मोक्षमवाप्नुयात् ।
विना दानं न गृह्णीयान्न दद्याद् दक्षिणां विना ॥ ४० ॥
दत्त्वा गृहीत्वाप्युभयोः सिद्धिहानिर्भवेद् ध्रुवम् ।
अन्यथा यस्तु गृह्णीयाद् दद्याद्वा कवचेश्वरम् ॥ ४१ ॥
पुत्रान् दारान् सुतांश्चैव (तस्य) योगिन्यो भक्षयन्ति हि ।
अज्ञात्वा कवचं देवि पूजयेच्छ्रीशिलां शिवे ॥ ४२ ॥
स भवेच्छिवहा सत्यं सर्वोपद्रवसङ्कुलः ।
धृत्वा यः कवचं देवि पूजयेच्छ्रीशिलां शिवे[1] ॥ ४३ ॥
स एव परमां सिद्धिं लभते नात्र संशयः ।

---

१ 'पूजयेदम्बिका नरः' ख पाठ ।

इतीदं कवचं देवि सारं सर्वस्वमुत्तमम् ॥ ४४ ॥
रहस्यं शारिकारत्नं गोपनीयं स्वयोनिवत् ।
सर्वकामप्रदं दिव्यं त्रैलोक्यमोहनाभिधम् ॥ ४५ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीशारिकायाः त्रैलोक्यमोहनकवचम् ॥ ३ ॥

अथ

श्रीशारिकासहस्रनामकम् ।

श्रीभैरव उवाच ।

या सा देवी पुराख्याता शारिकारूपधारिणी ।
जालन्धरराक्षसघ्नी प्रद्युम्नशिखरे स्थिता ॥ १ ॥
तस्या नामसहस्रं ते मन्त्रगर्भं जयावहम् ।
कथयामि परां विद्यां सहस्राख्याभिधां शिवे ॥ २ ॥
शिलायाः शारिकाख्यायाः परसर्वस्वरूपिणीम् ।
विना नित्यक्रियां देवि विना न्यासं विनार्चनम् ॥ ३ ॥
विना पुरस्क्रियां जाप्यं विना[1] होमं च तर्पणम् ।
विना श्मशानगमनं विना समयपूजनम् ॥ ४ ॥
यया[2] लभेत् फलं सर्वं तां विद्यां शृणु पार्वति ।
या देवी चेतना लोके शिलारूपास्ति शारिका ॥ ५ ॥

---

१ 'होमार्चनादितर्पणम्' ख पाठ । २ 'यथा' ख. पाठ. ।

सृजत्यवति विश्वं तु संहरिष्यति तामसी ।
सैव संसारिणां देवि परमैश्वर्यदायिनी ॥ ६ ॥
परपदप्रदाप्यन्ते महाविद्यात्मिका शिला ।
तस्या नामसहस्रं ते वर्णयामि रहस्यकम् ॥ ७ ॥
रहस्यं मम सर्वस्वं सकलाचारवल्लभम् ।
यो जपेत परमां विद्यां पठेदाख्यांसहस्रकम् ॥ ८ ॥
धारयेत् कवचं दिव्य पठेन् स्तोत्रेश्वरं परम्।
किं तस्य दुर्लभं लोके नाप्नुयाद् यद्यदीश्वरि ॥ ९ ॥
अस्य नाम्ना सहस्रस्य महादेव ऋषिः स्मृतः ।
छन्दोऽनुष्टुब् देवता च शारिका परिकीर्तिता ॥ १० ॥
शर्मे बीजं रमा शक्तिः सिन्धुरः कीलकं स्मृतम् ।
धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः ॥ ११ ॥
ध्यानमस्याः प्रवक्ष्यामि शृणु पर्वतनन्दिनि ।

अस्य श्रीशारिकाभगवतीसहस्रनामस्तोत्रस्य, श्रीमहादेव ऋषि', अनुष्टुप् छन्द, श्रीशारिकाभगवती देवता, शर्मबीज श्रीशक्ति क्रींकीलकं धर्मार्थकाममोक्षार्थे विनियोग । ऋष्यादिन्यास कृत्वा, ह्राभ्रामित्यादिना कराङ्गन्यासौ ॥ ध्यानम्

बालार्ककोटिसदृशीमिन्दुचूडा कराम्बुजैः ।
वरचक्राभयासींश्च धारयन्तीं हसन्मुखीम् ॥ १ ॥
सिंहारूढा रक्तवस्त्रा रक्ताभरणभूषिताम् ।
वामदेवाङ्गनिलया हृत्पद्मे शारिका भजे ॥ २ ॥
बालार्ककोटिद्युतिमिन्दुचूडा
वरामिचक्राभयबाहुमाद्याम् ।
सिंहाधिरूढां शिववामदेह-
लीना भजे चेतसि शारिकेशीम् ॥ ३ ॥

' 'नाम' ख पाठ ।

ॐह्रींश्रींह्रूंक्रांआंशांश्रीशारिका श्यामसुन्दरी ।
शिला शारी शुकी शान्ता शमन्तमानसगोचरा ॥ १ ॥
शान्तिस्था शान्तिदा शान्तिः श्यामा श्यामपयोधरा ।
देवी शशाङ्कबिम्बाभा शशाङ्ककृतशेखरा ॥ २ ॥
शशाङ्कशोभिलावण्या शशाङ्कमध्यवासिनी ।
शार्दूलवाहा देवेशी शार्दूलस्थितिरुत्तमा ॥ ३ ॥
शार्दूलचर्मवसना शक्तिः शार्दूलवाहना ।
गौरी पद्मावती पीना पीनवक्षोजकुड्मला ॥ ४ ॥
पीताम्बरा रक्तदन्ता दाडिमीकुसुमोपमा ।
स्फुरद्रत्नांशुखचिता रत्नमण्डलविग्रहा ॥ ५ ॥
रक्ताम्बरधरा देवी रत्नमालाविभूषणा ।
रत्नसंमूर्छिताभा च दीप्ता दीप्तशिखा दया ॥ ६ ॥
दयावती कल्पलता कल्पान्तदहनोपमा ।
भैरवी भीमनादा च भयानकमुखी भगा ॥ ७ ॥
कारा कारुण्यरूपा च भगमालाविभूषणा ।
भगेश्वरी भगस्था च कुरुकुल्ला कृशोदरी ॥ ८ ॥
कादम्बरी पेटोत्कट्टा परमा परमेश्वरी ।
सती सरस्वती सत्या सत्यासत्यस्वरूपिणी ॥ ९ ॥
परम्परा पटाकारा पाटला पाटलप्रभा ।
पद्मिनी पद्मवदना पद्मा पद्मकरा शिवा ॥ १० ॥
शिवाश्रया शरच्छान्ता शची रम्भा विभावरी ।
द्युमणिस्तरणा पाटा पीठेशी पीवराकृतिः ॥ ११ ॥

---

१ 'शान्ति' ख पाठः । २ 'प्रभा' ख पाठ. । ३ 'शीवा' ख. पाठः ।
४ 'क्षीर' ख. पाठः । ५ 'कचोरकट्टा' ख. पाठः । ६ 'सरस्वती' ख . पाठः ।
७ 'शरत्कान्त' ख. पाठ । । ८ 'प्रस्तरा' ख पाठः । ९ 'पीवरांगा परावृत्ति ख. पाठः ।

अचिन्त्या मुसलाधारा मातङ्गी मधुरस्वना ।
वीरागीतप्रिया गाधा गारुडी गरुडध्वजा ॥ १२ ॥
अतीवसुन्दराकारा सुन्दरी सुन्दरालका ।
अलका नाकमध्यस्था नाकिनी नाकिपूजिता ॥ १३ ॥
पातालेश्वरपूज्या च पातालतलचारिणी ।
अनन्तानन्तरूपा च सज्ञाता (१००) ज्ञानवर्धिनी ॥ १४ ॥
अमेया ह्यप्रमेया च ह्यनन्तादित्यरूपिणी ।
द्वादशादित्यसंपूज्या शमी श्यामाकबीजिनी ॥ १५ ॥
विभासा भासुरवर्णा समस्तासुरघातिनी ।
सुधामयी सुधामूर्तिः सुधा सर्वमियङ्करी ॥ १६ ॥
सुखदा च सुरेशानी कृशानुवल्लभा हविः ।
स्वाहा स्वाहेशनेत्रा च स्वाग्निवक्त्राग्नितर्पिता ॥ १७ ॥
सोमसूर्याग्निनेत्रा च भूर्भुवःस्वःस्वरूपिणी ।
भूमिर्भूदेवपूज्या च स्वयम्भूः स्वात्मपूजका ॥ १८ ॥
स्वयम्भूपुष्पमालाढ्या स्वयम्भूपुष्पवल्लभा ।
आनन्दकन्दली कन्दा स्कन्दमाता शिलालया ॥ १९ ॥
चेतना चिद्घनाकारा भवपत्नी भयापहा ।
विघ्नेश्वरी गणेशानी विघ्नविध्वंसिनी निशा ॥ २० ॥
वरया वशिष्ठजनस्तुत्या स्तुतिः श्रुतिधरा श्रुतिः ।
शास्त्रविधानविज्ञा च वेदशास्त्रार्थकोविदा ॥ २१ ॥
वेद्या वेदमयी विद्या विधातृवरदा वधूः ।
वधूरूपा वधूपूज्या वधूपानप्रतर्पिता ॥ २२ ॥
वधूपूजनसन्तुष्टा वधूमालाविभूषणा ।
वामा वामेश्वरी वाम्या कुलाकुलविचारिणी ॥ २३ ॥

---

१ 'चित्राकारा च पा० । २ 'वन्द्यजन' च पा० ।

वितर्कतर्कनिलया प्रलयानलसन्निभा ।
यज्ञेश्वरी यज्ञमुखा याजका यज्ञपात्रका ॥ २४ ॥
यक्षेश्वरी यक्षधात्री पार्वती पर्वताश्रया ।
पिलम्पिला पदस्थाना पददा नरकान्तका ॥ २५ ॥
नारी नर्मप्रिया श्रीदा श्रीदश्रीदा (२००) शरायुधा ।
कामेश्वरी रतिर्हूतिराहुतिर्हव्यवाहना ॥ २६ ॥
हरेश्वरी हरिवधूर्हाटकाङ्गदमण्डिता ।
हपुषा स्वर्गतिर्वैद्या सुमुखा च महौषधिः ॥ २७ ॥
सर्वरोगहरा माध्वी मधुपानपरायणा ।
मधुस्थिता मधुमयी मधुदानविशारदा ॥ २८ ॥
मधुवृक्षा मधुरूपा मधूककुसुमप्रभा ।
माधवी माधवीवल्ली मधुमत्ता मदालसा ॥ २९ ॥
मारप्रिया मारपूज्या मारदेवप्रियङ्करी ।
मारेशी च मृत्युहरा हरिकान्ता मनोन्मना ॥ ३० ॥
महावैद्यप्रिया वैद्या वैद्याचारा सुरार्चिता ।
सौमन्ता पीनवपुषी गुटी गुर्वी गरीयसी ॥ ३१ ॥
कालान्तका कालमुखी कठोरा करुणामयी ।
नीला नाभी च वागीशी दूर्वा नीलसरस्वती ॥ ३२ ॥
अपारा पारगा गम्या गतिः प्रीतिः पयोधर ।
पयोदसदृशच्छाया पारदाकृतिलालसा ॥ ३३ ॥
सरोजनिलया नीतिः कीर्तिः कीर्तिकरी कथा

---

१ 'यानपात्रगा' ख पाठ. । २ 'स्वमुखा' ख पाठ । ३ 'सुमन्ता' ख पाठ ।
४ 'कचोरा' ख पाठ । ५ 'नाडानाडा इति' ख. पाठः ।
६ 'कथा' ख पाठ ।

काशी कांम्या कपर्दांशा काशपुष्पोपमा रमा ॥ ३४ ॥
रामा रामप्रिया रामभद्रदेवसमर्चिता ।
रामसपूजिता रामसिद्धिदा रामराज्यदा ॥ ३५ ॥
रामभद्रार्चिता रेवा देवकी देववत्सला ।
देवपूज्या देवबन्धा देवदानवचर्चिता ॥ ३६ ॥
दूती द्रुतगतिर्दम्भा दामिनी विजया जया ।
अशेषसुरसपूज्या निःशेषासुरसूदिनी ॥ ३७ ॥
वटिनी वटमूलस्था लाक्षहार्सैकवल्लभा ।
अरूपा निर्गुणा सत्या सदासन्तोषवर्धिनी ॥ ३८ ॥
सौम्या यजुर्वेदा याम्या (३००) यमुना यामिनी यमी ।
दात्र दया च वरदा दाम्भ्यसेव्या पुरन्दरी ॥ ३९ ॥
पौरन्दरी पुलोमेशी पौलोमी पुलकाङ्कुरा ।
पुरस्था वनभूर्वन्या वानरी वनचारिणी ॥ ४० ॥
समस्तवर्णनिलया समस्तवर्णपूजिता ।
समस्तवर्णवर्णाढ्या समस्तगुरुवल्लभा ॥ ४१ ॥
समस्तमुण्डमालाढ्या मालिनी मधुपस्खना ।
कोशप्रदा कोशवासा चमत्कृतिरलम्बुसा ॥ ४२ ॥
हासदा सदसद्रूपा सर्ववर्णमयी स्मृतिः ।
सर्वाक्षरमयी विद्या मूलविद्येश्वरीश्वरी ॥ ४३ ॥
अकारा षोडशाकारा कारान्धविमोचिनी ।
ककारव्यञ्जनाक्रान्ता सर्वमन्त्राक्षरालया ॥ ४४ ॥
अणुरूपाप्यमला च त्रैगुण्याप्यपराजिता ।
अम्बिकाम्बालिका चाम्बा अनन्तगुणमेखला ॥ ४५ ॥
अपर्णा पर्णशाला च साट्टहासा हसन्तिका ।

---

१ 'कामा' ख पाठ २ 'कमला' ख पाठ ।

अद्रिकन्याप्यट्टहासाप्यजरासौंप्यरुन्धती ॥ ४६ ॥
अब्जाक्षी चाब्जिनी देवी ह्यम्बुजासनपूजिता ।
अब्जहस्ता ह्यब्जपादा चाब्जपूजनतोषिता ॥ ४७ ॥
अकारमातृकादेवी सर्वानन्दकरी कला ।
आनन्दसुन्दरी आद्या आघूर्णारुणलोचना ॥ ४८ ॥
आदिदेवान्तकाऽक्रूरा आदित्यकुलभूषणा ।
आंबीजमण्डना देवी चाकारमातृकावलिः ॥ ४९ ॥
इन्दुस्तुतेन्दुबिम्बास्या इनकोटिसमप्रभा ।
इन्दिरा मन्दुराशाला चेतिहासा कथा स्मृतिः ॥ ५० ॥
इला चेक्षुरसास्वादा इकाराक्षरभूषिता ।
इन्द्रस्तुता चेन्द्रपूज्या इनभद्रा इनेश्वरी ॥ ५१ ॥
इभगतिरिभगीतिरिकाराक्षरमातृका ।
ईश्वरी वैभवख्या चेशानीश्वरवल्लभा ॥ ५२ ॥
ईशः कामकलादेवी ईकाराश्रितमातृका [४००] ।
उग्रप्रभोग्रचित्ता च उग्रवामाङ्कवासिनी ॥ ५३ ॥
उषा वैष्णवपूज्या च उग्रतारोन्मुक्तानना ।
उमेश्वरीश्वरी श्रेष्ठा उदक्स्था ह्युदेश्वरी ॥ ५४ ॥
उदकाच्छोदकदा च उकारोद्भासमातृका ।
ऊष्मा प्यूषा ऊषणा च तथोचितवरप्रदा ॥ ५५ ॥
ऋणहर्त्री ऋकारेशी ऋत्वर्णा ॡवर्णभाक् ।
ॡकारभ्रुकुटिर्बाला बालादित्यसमप्रभा ॥ ५६ ॥
एणाङ्कमुकुटा चैहा एकाराक्षरबीजिता ।
एणप्रिया एणमध्यवासिनी एणवत्सला ॥ ५७ ॥

---

१ 'मा' ख. पाठः । २ 'ऋय' घ. पाठः ।
३ 'रविप्रभा' 'अरिनादित्यसमप्रभा' ख पाठः ।

एणाङ्कमध्यसंस्था च ऐकारोल्लासकूटिनी ।
ओंकारशेखरा देवी औचित्यपदमण्डिता ॥ ५८ ॥
अम्भोजनिलयस्थाना अःस्वरूपा च स्वर्गतिः ।
षोडशस्वररूपा च षोडशस्वरगायिनी ॥ ५९ ॥
षोडशी षोडशाकारा कमला कमलोद्भवा ।
कामेश्वरा कलाभिज्ञा कुमारी कुटिलालका ॥ ६० ॥
कुटिला कुटिलाकारा कुटुम्बसंयुता शिवा ।
कुलाकुलपदेशानी कुलेशी कुञ्जिका कला ॥ ६१ ॥
कामा कामप्रिया कीरा कमनीया कपर्दिनी ।
कालिका भद्रकाली च कालकामान्तकारिणी ॥ ६२ ॥
कपालिनी कपालेशी कर्पूरचयचर्चिता ।
कादम्बरी कोमलाङ्गी काश्मीरी कुङ्कुमद्युतिः ॥ ६३ ॥
कुन्ता कूर्चार्णबीजाढ्या कमनीया कुलाकुला ।
करालास्या करालाक्षी विकरालस्वरूपिणी ॥ ६४ ॥
काम्यालका कामदुघा कामिनी कामपालिनी ।
कन्थाधरा कृपाकर्त्री ककाराक्षरमातृका ॥ ६५ ॥
खड्गहस्ता खर्परेशी खेचरी खगगामिनी ।
खेचरीमुद्रया युक्ता खेचरत्वप्रदायिनी ॥ ६६ ॥
खगामना खलोलाक्षी खेटेशी खलनाशिनी ।
खेटकायुधहस्ता [५८०] च खराशुद्युतिसन्निभा ॥ ६७ ॥
खान्ता खबीजनिलया खकारोल्लासमातृका ।
गंगरी गीजनिलया गस्था गेचरवल्लभा ॥ ६८ ॥
गुण्या गजाम्बजननी गणेशवरदा गया ।

---

१ 'अक्षमालिका' ख पाठ । २ 'तथा स्वरूपा' ख पाठ ।
३ 'विकालिका' ख पाठ । ४ 'कचालयीजाढ्या' ख पाठ ।

गोदावरी गदाहस्ता गङ्गाधरवरप्रदा ॥ ६९ ॥
गोधा[1] गोवाहनेशानी गरलाशनवल्लभा[2] ।
गाम्भीर्यभूषणा गङ्गा गकारार्णविभूषणा ॥ ७० ॥
घृणा घोणाकरस्तुत्या घुर्घुरा घोरनादिनी ।
घटस्था घटजसेव्या घनरूपा घृणेश्वरी[3] ॥ ७१ ॥
घनवाहनसेव्या च घकाराक्षरमातृका ।
ङान्ता ङवर्णनिलया ङाणुरूपा ङणालया ॥ ७२ ॥
ङेशा ङेन्ता ङनाजाप्या ङवर्णाक्षरभूषणा ।
चामीकररुचिश्चान्द्री चन्द्रिका चन्द्ररागिणी ॥ ७३ ॥
चला चलच्चला चेला[4] चन्द्रा चन्द्रकरा चली ।
चञ्चुरीकस्वनालापा चमत्कारस्वरूपिणी ॥ ७४ ॥
चटुली चाटुकी चार्वी चम्पा चम्पकसन्निभा ।
चीनाशुकधरा चाद्री चकारार्णविभूषणा ॥ ७५ ॥
छत्री च्छत्रधरा च्छिन्ना च्छिन्नमस्ता छटच्छविः ।
छायासुतप्रिया च्छाया छवर्णामलमातृका ॥ ७६ ॥
जगदम्बा जगज्ज्योतिर्ज्योतीरूपा जटाधरा ।
जयदा जयकर्त्री च जयस्था जयहारिणी ॥ ७७ ॥
जगत्प्रिया जगत्पूज्या जगत्कर्त्री जरातुरा ।
ज्वरघ्नी जम्भदमनी जगत्प्राणा जयावहा ॥ ७८ ॥
जम्भारिवरदा जैत्री जीवना जीवनाप्रदा ।
जाग्रती च जगन्निद्रा जगद्योनिर्जलन्धरा ॥ ७९ ॥

---

१ 'गदाधरप्रिया गति' ख पाठ । २ गाता' ख पाठ ।
३ 'विग्रहा' ख पाठ । ४ 'गायत्री गजवाहना' ख पाठ । ५ धात्री' ख. पाठ ।
६ 'गुणेश्वरी' ख पाठ । ७ 'चापा ख पाठ । ८ 'चित्रा ख पाठ ।

जालन्धरधरा जाया जकाराक्षरमातृका ।
झम्पा झिंझेश्वरी झान्ता झकाराक्षरमातृका ॥ ८० ॥
ञाणुरूपा ञिणाभासा (६००) ञकारेशी ञणायुधा ।
अवर्गबीजभूषाढ्या ञकाराक्षरमातृका ॥ ८१ ॥
टङ्कायुधा टकाराढ्या टोटाची टसुकुन्तला ।
टङ्कायुधा टङ्कीरूपा टकाराक्षरमातृका ॥ ८२ ॥
ठक्कुरा ठक्कुरेशानी ठकारत्रितयेश्वरी ।
ठःस्वरूपा ठवर्णाढ्या ठकाराक्षरमातृका ॥ ८३ ॥
डका डकेश्वरी डिम्भा डवर्णोत्तरमातृका ।
ढिण्डी देहा ढिल्लहस्ता ढकाराक्षरमातृका ॥ ८४ ॥
णेशा णान्ता णवर्गान्ता णकाराक्षरभूषणा ।
तुरी तुर्या तुलारूपा त्रिपुरा तामसप्रिया ॥ ८५ ॥
तोतुला तारिणी तारा सप्तविंशतिरूपिणी ।
त्रिपुरा त्रिगुणा ध्येया त्र्यम्बकेशी त्रिलोकधृत् ॥ ८६ ॥
त्रिवर्गेशी त्रयी त्र्यक्षी त्रिपदा वेदरूपिणी ।
त्रिलोकजननी त्राता त्रिपुरेश्वरपूजिता ॥ ८७ ॥
त्रिकोणस्था त्रिकोणेशी कोणत्रयनिवासिनी ।
त्रिकोणपूजनतुष्टा त्रिकोणपूजनाश्रिता ॥ ८८ ॥
त्रिकोणदानसलग्ना सर्वकोणशुभार्थदा ।
वसुकोणस्थितादेवी वसुकोणार्थवादिनी ॥ ८९ ॥
वसुकोणपूजिता च षट्चक्रक्रमवासिनी ।
नागपत्रस्थिता शारी त्रिवृत्तपूजनार्थदा ॥ ९० ॥
चतुर्द्वाराग्रगा चक्रबाह्यान्तरनिवासिनी ।
तामसी तोमरप्रख्या तुम्बुरुस्वननादिनी ॥ ९१ ॥

---

१ 'अपणा' ख पाठ । २ 'टम्ब' ख पाठ । ३ 'टङ्कीरूपा' ख. पाठः ।

तुलाकोटिस्तना तापी तपसा फलवर्धिनी ।
तरलाक्षी तमोहन्त्री तारकासुरघातिनी ॥ ९२ ॥
तरी तरणिरूपा च तकाराक्षरमातृका ।
स्थली स्थविररूपा च स्थूला स्थाली स्थलाङ्गिनी ॥ ९३ ॥
स्थावरेशा स्थूलमुखी थकाराक्षरमातृका ।
दृतिका शिवदूती च दण्डायुधधरा द्युतिः ॥ ९४ ॥
दया दीनानुकम्पा च दम्भोलिधरवल्लभा ।
देशानुचारिणी द्रेका द्राविडेशी दवीयसी ॥ ९५ ॥
दाक्षायणी द्रुमलता (७००) देवमातृधिदेवता ।
दधिना दुर्लभा देवी देवता परमात्तरा ॥ ९६ ॥
दामोदरसुपूज्या च दामोदरवरप्रदा ।
दनुपुत्री विनाशा च दनुपुत्रकुलार्चिता ॥ ९७ ॥
दण्डहस्ता दण्डिपूज्या दमदा च दमस्थिता ।
दशधेनुसुरूपा च दकाराक्षरमातृका ॥ ९८ ॥
धर्म्या धर्मप्रवर्धन्या धनदा धनवर्धिनी ।
धृतिर्धूर्ता धन्यधूर्धकाराक्षरमातृका ॥ ९९ ॥
नलिनीनालिका नाप्या नाराचायुधधारिणी ।
नीपोपवनमध्यस्था नागरेशी नरोत्तमा ॥ १०० ॥
नरेश्वरी नृपाराध्या नृपपूज्या नृपार्थदा ।
नृपसेव्या नृपवन्द्या नरनारायणप्रसूः ॥ १०१ ॥
नर्तकी नीरजाक्षी च नवर्णाक्षरभूषणा ।
पद्मेश्वरी पद्ममुखी पद्मयाना परापरा ॥ १०२ ॥
पाराक्षारसुता पाठा परवर्गविमर्दिनी ।
पूः पुरारिवधूः पम्पा पत्नी पक्षीशवाहना ॥ १०३ ॥
पीवरामा पतिप्राणा पीनलाक्षी पतिव्रता ।

पीठा पीठस्थितापीठा पीतालङ्कारभूषणा ॥ १०४ ॥
पुरूरवस्तुता पात्री पुत्रिका पुत्रदा भजा ।
पुष्पोत्तसा पुष्पवती पुष्पमालाविभूषणा ॥ १०५ ॥
पुष्पमालातिशोभाढ्या पकाराक्षरमातृका ।
फलदा स्फीतनखा च फेरवारावभीषणा ॥ १०६ ॥
फल्गुनी फल्गुतीर्थस्था फवर्णाकृतमण्डला ।
बलदा बालखिल्या च बाला बलारिपुप्रिया ॥ १०७ ॥
बाल्यावस्था बर्बरेशी बकाराकृतिमातृका ।
भद्रिका भीमपत्नी च भीमा भर्गशिखाऽभया ॥ १०८ ॥
भयघ्नी भीमनादा च भयानकमुखेक्षणा ।
भिल्लीश्वरी भीतिहरा भद्रदा भद्रकारिणी ॥ १०९ ॥
भद्रेश्वरी भद्रधरा भद्राख्या भाग्यवर्धिनी (८००) ।
भगमाला भगावासा भवानी भवतारिणी ॥ ११० ॥
भगयोनिर्भगाकारा भगस्था भगरूपिणी ।
भगलिङ्गामृतप्रीता भकाराक्षरमातृका ॥ १११ ॥
मान्या मानप्रदा मीना मीनकेतनलालसा ।
मदोद्भूता मनोन्मान्या मेना मैनाकवत्सला ॥ ११२ ॥
मधुमत्ता मधुपूज्या मधुदा मधुमाधवी ।
मांसाहारा मांसप्रीता मांसभक्ष्या च मांसदा ॥ ११३ ॥
मारार्ता मत्स्यरूपा च मत्स्यघाता महत्तरा ।
मेरुशृङ्गाग्रतुङ्गास्या मोदकाहारपूजिता ॥ ११४ ॥
मातङ्गिनी मधुमत्ता मदमत्ता मदेश्वरी ।
मजा मुग्धानना मुग्धा मकाराक्षरभूषणा ॥ ११५ ॥
यशस्विनी यतीशानी यजकर्त्री यजुःप्रिया ।

मारूपा' ख पाठः ।

यज्ञधात्री यज्ञफला यजुर्वेदऋचांफला ॥ ११६ ॥
यशोदा यतिसेव्या च याग्या यागिकवत्सला ।
योगेश्वरी योगगम्या योगेन्द्रजनवत्सला ॥ ११७ ॥
यदुपुत्री यमप्रीता च यकाराक्षरमातृका ।
रत्नेश्वरी रमानाथसेव्या रम्या रजस्वला ॥ ११८ ॥
राज्यदा राजराजेशी रोगहर्त्री रजोवती ।
रत्नाकरसुता रम्या रात्री रात्रिपतिप्रभा ॥ ११९ ॥
रक्षोघ्नी राक्षसेशानी रक्षोनाथसमर्चिता ।
रतिप्रिया रतिमुखा रकाराकृतिशेखरा । १२० ॥
लम्बोदरी ललज्जिह्वा लास्यतत्परमानसा ।
लूतातन्तुवितानास्या लक्ष्मीर्लज्जा लयालिनी ॥ १२१ ॥
लोकेश्वरी लोकधात्री लाटस्था लक्षणाकृतिः ।
लम्बा लम्बकचोल्लासा लकाराकारवर्धिनी ॥ १२२ ॥
लिङ्गेश्वरी लिङ्गलिङ्गा लिङ्गमाला लसद्द्युतिः ।
लक्ष्मीरूपा रसोल्लासा रामा रेवा रजस्वला ॥ १२३ ॥
लयदा लक्षणा (६००) लोला लकाराक्षरमातृका ।
वाराही वरदात्री च वीरसूर्वीरदायिनी ॥ १२४ ॥
वीरेश्वरी वीरजन्या वीरचर्वणचर्चिता ।
वरायुधा वराङ्गा च वामना वामनाकृतिः ॥ १२५ ॥
वधूता वधकावध्या वध्यभूर्वाणिजप्रिया ।
वसन्तलक्ष्मीर्वटुकी वटुका वटुकेश्वरी ॥ १२६ ॥
वटुप्रिया वामनेत्रा वामाचारैकलालसा ।
वार्ता वाम्या वरारोहा वेदमाता वसुन्धरा ॥ १२७ ॥
वयोयाना वयस्या च वकाराक्षरमातृका ।
शम्भुप्रिया शरच्चर्चा शाद्वला शशिवत्सला ॥ १२८ ॥

शीतद्युतिः शीतरसा शोणोष्ठी शीकरप्रदा ।
श्रीवत्सलाञ्छना शर्वा शर्ववामाङ्गवासिनी ॥ १२९ ॥
शशाङ्कामललक्ष्मीश्च शार्दूलतनुरद्रिजा ।
शोपहर्त्री शमीमूला शकाराकृतशेखरा ॥ १३० ॥
षोडशी षोडशीरूपा षढा षोढा षडानना ।
षट्कूटा षड्रसास्वादा षडशीतिमुखाम्बुजा ॥ १३१ ॥
षडास्यजननी षण्ठा षवर्णाक्षरमातृका ।
सारस्वतप्रदः सर्वा सर्वगा सर्वतोमुखा ॥ १३२ ॥
समा सीता सतीमाता सागराभयदायिनी ।
समस्तशापशमनी सालभञ्जी सुदक्षिणा ॥ १३३ ॥
सुषुप्तिः सुरसा साध्वी सामगा सामवेदजा ।
सत्यप्रिया सोममुखी सूत्रस्था सूतवल्लभा ॥ १३४ ॥
सनकेशी सुनन्दा च स्वर्गस्था सनातनी ।
सेतुभूता समस्ताशा सकाराक्षरवल्लभा ॥ १३५ ॥
हालाहलप्रिया हेला हाहारावविभूषणा ।
हाहाहूहूस्वरूपा च हलधात्री हलिप्रिया ॥ १३६ ॥
हरिनेत्रा घोररूपा हविष्याहुतिवल्लभा ।
हंचंळंक्षःस्वरूपा च सर्वमातृकपूजिता ॥ १३७ ॥
ॐऐंसौः ह्रींमहाविद्या श्रांशांक्रांहूंस्वरूपिणी (१०००) ।
इति श्रीशारिकादेव्या मन्त्रनामसहस्रकम् ॥ १३८ ॥
पुण्यं पुण्यजनस्तुत्यं नुत्यं वैष्णवपूजितम् ।
इदं यः पठते देवि धारयेद्यः शृणोति च ॥ १३९ ॥
स एव भगवान् देवः सत्यं सत्यं सुरेश्वरि ।
एककालं द्विकालं वा त्रिकालं पठते नरः ॥ १४० ॥

---

१ 'षोडशांतया' इ पाठः ।

वामाचारपरो देवि तस्य पुण्यफलं शृणु ।
मूकत्वं बधिरत्वं च कुष्ठं हन्याच्च श्वित्रिकाम् ॥ १४१ ॥
वातपित्तकफान् गुल्मान् रक्तस्रावं विपूचिकाम् ।
सद्यः शमयते देवि श्रद्धया यः पठेन्निशि ॥ १४२ ॥
अपस्मारं कर्णपीडां शूलं रौद्रं भगन्दरम् ।
मासमात्रं पठेद्यस्तु स रोगैर्मुच्यते ध्रुवम् ॥ १४३ ॥
भौमे शनिदिने वापि चक्रमध्ये पठेद्यदि ।
सद्यस्तस्य महेशानि शारिका वरदा भवेत् ॥ १४४ ॥
चतुष्पथे पठेद्यस्तु त्रिरात्रं रात्रिमध्यतोये ।
दत्त्वा बलिं सुरा मुद्रां मत्स्यं मांसं सभक्तकम् ॥ १४५ ॥
बब्बोलत्वग्रसाकीर्णं शारी प्रादुर्भविष्यति ।
यः पठेद् देवि लोलायां चितायां शवसन्निधौ ॥ १४६ ॥
पायंपायं त्रिवारं तु तस्य पुण्यफलं शृणु ।
ब्रह्महत्यां गुरोर्हत्यां मद्यपानं च गोवधम् ॥ १४७ ॥
महापातकमङ्गातं गुरुतल्पगतोद्भवम् ।
स्तेयं वा भ्रूणहत्यां वा नाशयेन्नात्र संशयः ॥ १४८ ॥
स एव हि रमापुत्रो यशस्वी लोकपूजितः ।
वरदानक्षमो देवि वीरेशो भूतवल्लभः ॥ १४९ ॥
चक्रार्चने पठेद्यस्तु साधकः शक्तिसन्निधौ ।
त्रिवारं श्रद्धया युक्तः स भवेद्भैरवेश्वरः ॥ १५० ॥
किंकिं न लभते देवि साधको वीरसाधकः ।
पुत्रवान् धनवांश्चैव सत्याचारपरः शिवे ॥ १५१ ॥
शक्तिं सपूज्य देवेशि पठेत् स्तोत्रं परात्मिकम् ।

१ 'एव नाशयेत्तथा' ख पाठ । २ 'वृत्तये' ख पाठः । ३ 'सौद्र' ख पाठः ।
४ 'सुरापान' ख पाठः । ५ 'धनसपन्न.' ख पाठः । ६ 'वर शुभम्' ख पाठः ।

इह लोके सुखं भुक्त्वा परत्र त्रिदिवं व्रजेत् ॥ १५२ ॥
इति नामसहस्रं तु शारिकाया मनोरमम् ।
गुह्यं गुह्यतमं लोके गोपनीयं स्वयोनिवत् ॥ १५३ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीशारिकाया सहस्रनामस्तोत्रकम् ॥ ४ ॥

—() ० ()—

अथ

श्रीशारिकास्तोत्रम्

त्रयाणां त्रयाणे तव मनुशिरोमौलिमाणिक्यभूतं
ध्यायेच्चित्ते शशिधरकलाविन्दुविम्बावतंसम् ।
यो मन्त्रीशो जपति मनसा माननीयो महद्भि-
र्धन्यः पुण्यैः स भवति मरुद्वीज्यमानो मरुत्वान् ॥ १ ॥

परावीजं तेजोनिधिमधिमनौ यः प्रजपते
जगन्मोहध्वान्तामितपटलसूर्योदयमिदम् ।
स लोकेशो भूत्वा विचरति महामाम्निकमणि-
र्धरायां वा नाके फणिपुरि यथेच्छं त्रिभुवने ॥ २ ॥

मावीजमानन्दजामिन्दुचूडं
सिद्धो जपेद्यस्तव मन्त्रमध्ये ।
स देवि देवेश्वरविष्टरार्ध
निविष्ट ईषन्मदिरारुणाक्षः ॥ ३ ॥

कूर्चं चमत्कारलसत्प्रमादं
जपेच्छिवे यः स्मरकेलिलोलः ।
हुंकारमात्रेण स वैरिवर्गं
हत्वा भवेद्भूपतिसार्वभौमः ॥ ४ ॥

गजार्णमाकर्ण्य जपेत् क्षणं यो
मृगेक्षणापीनकुचान्तरस्थः ।
स मेनकाकामरणप्रवीणो
लीलावतीं केलिकला करोति ॥ ५ ॥

शून्यं बीजं मन्त्रमध्ये जपेद्यो
मूढो जाड्याम्भोधिमग्नोऽरिभग्नः ।
तस्यास्याब्जान्निःसरन्ते सुवाचो
गद्यैः पद्यैर्मद्यसारप्रचाराः ॥ ६ ॥

कल्याणबीजं यदि साधकेन्द्रो
जपेच्छिवे चेतसि वार्धरात्रे ।
स भोगवाल्लभ्यपरो नरेन्द्रो
भोगावतीं प्राप्य भवेद्भगेशः ॥ ७ ॥
श्रीशारिकायै तव मन्त्रमध्ये
यो नाममन्त्र जपते महेशि ।
तस्याजिभूमौ नृपवर्गलक्ष्मी-
र्वशे भवेत् साधकलोकमौलेः ॥ ८ ॥
भ्रमरीबीजमाद्यान यो जपेदर्धरात्रके ।
सिंहासना भगवती वरदा दर्शनप्रदा ॥ ९ ॥
बिन्दुत्रिकोणवसुकोणसुवृत्तनाग-
पत्रत्रिवृत्तधरणीगृहमण्डलस्थाम् ।
बालार्कबिम्बसदृशाननबिम्बपद्मा
यो ध्यायतेऽम्ब स भवेद्भुवि सार्वभौमः ॥ १० ॥
यो बिन्दुः स पितामहो हरिरसौ वर्णः स्वरः कीर्तितो
यो रेफो दुरितौघमर्दनकरो रुद्रः सदा गीयते ।
यः प्राणः स परः स एव भगवान्नादः शिवः सर्वदा
देवी चन्द्रकला कलङ्करहिता मायै तु तुभ्यं नमः ॥ ११ ॥
श्रीशारिकास्तवमिमं पठति प्रभाते
यो वार्धरात्रसमयेऽर्चनकर्मकाले ।
इन्द्रः सुरासुरयुतः स्वयमेति तस्य
पूजां विधाय ददते त्रिदिवाधिपत्यम् ॥ १२ ॥
इदं देवि पञ्चाङ्गं शारिकायाः रहस्यकम् ।
मयैव परमं गुह्यं त्रैलोक्योद्धरणक्षमम् ॥ १३ ॥
पुण्यं पवित्रमायुष्यं श्रेयस्करं यशस्करम् ।

मकारैः पञ्चभिः पूज्यं साध्यं साधकसत्तमैः ॥ १४ ॥
संरक्ष्ये पुत्रवद् देवि दर्शयेदिष्टमित्रवत् ।
इदं रहस्यमाख्यातं शारिकासारमुत्तमम् ॥ १५ ॥
अभक्ताय न दातव्यं कुचैलाय दुरात्मने ।
निन्दकायान्यशिष्याय स मन्त्री निरयी भवेत् ॥ १६ ॥


श्रीदेव्युवाच ।

भगवन् भवतानेन पञ्चाङ्गकथनेन हि ।
क्रीताऽस्मि तव दास्याऽस्मि किमन्यत् कथयामि ते ॥ १७ ॥

श्रीभैरव उवाच ।

पञ्चाङ्गतत्त्वमीशानि शिलासर्वस्वमुत्तमम् ।
गुह्यं गोप्यतमं देवि गोपनीयं मुमुक्षुभिः ॥ १८ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीशारिकास्तोत्रम् ॥ ५ ॥



समाप्तं चेदं श्रीशारिकापञ्चाङ्गम् ॥



अथ

श्रीमहाराज्ञीपञ्चाङ्गम् ।

श्रीशैलशिखरासीन भगवन्तमुमापतिम् ।
चन्द्रार्धमुकुट देवं सूर्यसोमाग्निलोचनम् ॥ १ ॥
गजचर्मपरीधानं विरूपाक्ष सुराधिपम् ।
गणगन्धर्वयक्षेन्द्र-देवासुरनमस्कृतम् ॥ २ ॥
विहसन्तं जपन्तं च पठन्तं च मुहुर्मुहुः ।
नागाभरणभूषाढ्य ब्रह्माच्युतनमस्कृतम् ॥ ३ ॥
उत्थाय प्रणता भूत्वा पर्यपृच्छत भैरवी ।

श्रीदेव्युवाच ।

भगवंस्त्वं परो देवः सुरासुरनमस्कृतः ।
गुणी वेदान्ततत्त्वज्ञो गुणातीतशिवेश्वरः ॥ ४ ॥
सर्वत्र किंजपासक्तस्त्वत्तः सर्वोत्तमं प्रभो[2] ।
अद्याप्यविदिते यन्मे तत्तत्त्वं वक्तुमर्हसि ॥ ५ ॥

श्रीभैरव उवाच ।

या देवी निष्कला श्यामा निराभासा निरञ्जना ।
महाश्रीषोडशीविद्या सा राज्ञीति निगद्यते ॥ ६ ॥
सकला राज्यदा लोके विद्याराज्ञी महेश्वरी ।
देवी पञ्चदशी सैव परब्रह्मकुटुम्बिनी ॥ ७ ॥
नृणा दारिद्र्यनाशाय प्रादुर्भूताद्य भारते ।
यस्याः पञ्चदशीविद्या गुह्यामविदिता पुरा ॥ ८ ॥

---

१ 'विनता' ख पाठ । २ विभा ख पाठ ।

तां जपामि महाविद्यां तत्पञ्चाङ्गं स्मराम्यहम् ।

श्रीदेव्युवाच ।

भगवन् करुणाम्भोधे शरणागतवत्सल ।
या देवी लोकमातेति राज्ञी राज्यप्रदायिनी ॥ ९ ॥
दारिद्र्यहारिणी त्वद्य तत्पञ्चाङ्गं वदस्व मे ।
तत्त्वतो वेदतन्त्राढ्यं यद्यहं प्रेयसी तव ॥ १० ॥

श्रीभैरव उवाच ।

शृणुष्वावहिता भूत्वा पटलं मन्त्रविग्रहम् ।
राज्ञ्याः सर्वस्वभूतं मे रहस्यं देवदुर्लभम् ॥ ११ ॥
मन्त्रोद्धारं महादेवि राज्ञ्या मद्वदनोदितम् ।
श्रुत्वा गोपय यत्नेन येन सिद्धिः प्रजायते ॥ १२ ॥

तारं माया मानलः कामशक्ती
मध्ये चाख्या भगवत्यै च राज्ञ्यै ।
मायाबीजं ठद्वयं देवि राज्ञ्या
मन्त्रोद्धारो वर्णितो गोपनीयः ॥ १३ ॥

नास्यान्तरायो न क्लेशो न विपर्ययभीः शिवे[1] ।
सर्वसिद्धिप्रदो देवि मन्त्रोऽयं भाग्यवर्धनः ॥ १४ ॥
मन्त्रमुत्कीलयेदादौ ततः सञ्जीवयेन्मनुम् ।
सिद्धं मन्त्रं जपेद् देवि ततः संपुटितं चरेत् ॥ १५ ॥
ततो मन्त्रोऽयमीशानि साक्षात् सिद्धिप्रदो भवेत् ।
यन्त्रोद्धार प्रवक्ष्यामि सर्वाशापरिपूरकम् ॥ १६ ॥
सर्वसंपत्प्रदं चैव सर्वार्थसाधकं तथा ।
सर्वसिद्धिप्रद चक्रं सर्वानन्दमयं तथा ॥ १७ ॥
सर्वसंमोहनं चक्रं पीठार्चाया प्रपूजयेत् ।

---

१ देव', ग पाठ । २ [illegible]' ख पाठ ।

बिन्दुस्त्र्यश्रं षडस्रं च वृत्ताष्टदलमण्डितम् ॥ १८ ॥
वृत्तत्रयं धरामध्र राज्ञीश्रीचक्रमीरितम् ।
तवाङ्गमस्य देवेशि शृणु वेदागमोद्धृतम् ॥ १९ ॥
यस्य श्रवणमात्रेण पूजायुतफलं लभेत् ।
गणेशो भीमराजश्च कुमारो जाङ्गलेश्वरः ॥ २० ॥
इन्द्राद्या लोकपालाश्च पूजनीयाश्च भूगृहे ।
वृत्तत्रयेऽभ्यर्चनीया गुरुपङ्क्तित्रयी शिवे ॥ २१ ॥
दिव्यसिद्धौघमर्त्याद्याः पूज्या गन्धाक्षतैः प्रिये ।
वासुकिर्नीलनागश्च तक्षकः पद्मनागकः ॥ २२ ॥
पूर्वादिदिक्षु सपूज्या विदिक्षु शृणु पार्वति ।
कार्कोटकः शङ्खपालः कुलिकः शेष ईश्वरि ॥ २३ ॥
आग्नेयक्रमतः पूज्या ब्राह्म्याद्या मातरस्तथा ।
भैरवास्त्वष्ट सपूज्या वामावर्तेन पार्वति ॥ २४ ॥
ब्राह्मी च वैष्णवी चैव रुद्राणी चापराजिता ।
कौमारी चैव चामुण्डा वाराही नारसिंहिका ॥ २५ ॥
असिताङ्गो रुरुश्चण्डः क्रोधेशोन्मत्तभीषणाः ।
कपालीशश्च सहारः पूजनीया यथाक्रमम् ॥ २६ ॥
श्रीदुर्गा शारिकादेवी वैखरी च शिवा शिवे ।
कालिका त्रिपुरा चैव वामाद्यन्या षडश्रके ॥ २७ ॥
लक्ष्मीः सरस्वती बाला पूजनीयास्त्रिकोणके ।
बिन्दौ राज्यप्रदा राज्ञी विद्या पञ्चदशाक्षरी ॥ २८ ॥
भूतेश्वर शिव देवि खड्ग पद्म समर्चयेत् ।
कलश च सुधापात्र पूजयेद्वटुक तथा ॥ २९ ॥
योगिनीः क्षेत्रपालाश्च भूतडामर विनायकम् ।

---

१ 'वन' ग पाठ । २ पृथा ख पाठ ।

रामेश्वरं महेशानि लयाङ्गमिदमीरितम् ॥ ३० ॥
श्रीराज्ञीमूलमन्त्रस्य ऋषिर्ब्रह्मा समीरितः ।
गायत्री छन्द ईशानि राज्ञीदेवी च देवता ॥ ३१ ॥
माया बीज शरच्छक्तिः कामः कीलकमीश्वरि ।
भोगापवर्गसिद्ध्यर्थे विनियोगः प्रकीर्तिता ॥ ३२ ॥
ध्यानमस्याः प्रवक्ष्यामि सात्त्विकं कामनावहम् ।
सर्वसिद्धिप्रदं देवि मन्त्रकोटिफलप्रदम् ॥ ३३ ॥
उद्यद्दिवाकरसहस्ररुचिं त्रिनेत्रा
सिंहासनोपरिगतामुरगोपवीताम् ।
खड्गाम्बुजाढ्यकलशामृतपात्रहस्ता
राज्ञीं भजामि विकसद्वदनारविन्दाम् ॥ ३४ ॥
(चतुर्भुजा चन्द्रकलार्धशेखरा
सिंहासनस्था भुजगोपवीतिनीम् ।
पाशाङ्कुशाम्भोरुहखड्गधारिणीं
राज्ञीं भजे चेतसि राज्यदायिनीम्) ॥ ३५ ॥
अधुना देवि वक्ष्यामि प्रयोगानष्ट तत्त्वतः ।
येषा साधनमात्रेण मन्त्रः कल्पद्रुमो भवेत् ॥ ३६ ॥
स्तम्भन मोहनं चैव मारणाकर्षणे प्रिये ।
वशीकरं तथोचाट शान्तिक पौष्टिकं तथा ॥ ३७ ॥
एतेषा साधनं वक्ष्ये प्रयोगाणा महेश्वरि ।
(१) रवौ स्नात्वा जपेन्मूल श्मशानेऽयुतसंख्यया ॥ ३८ ॥
हुनेच्चितानले सर्पिर्मालिनीकेशसञ्चयम् ।
स्तम्भन जायते वारिचन्द्रवातार्कपाथसाम् ॥ ३९ ॥
(२) चन्द्रे तथा श्मशानस्थः शवकेशधरः सुधीः ।

---

१ वारि' त्र पाठ ।

जपेन्मन्त्रायुतं सम्यक् कुर्याद् होमं दशांशतः ॥ ४० ॥
घृतन्नानीरशाखाभिर्लवङ्गैर्मोहनं भवेत् ।
(३) भौमे स्नात्वा श्मशाने च चिताग्रे संजपेन्मनुम् ॥ ४१ ॥
हुनेद् दशांशतः सर्पिर्मीनकण्टकगोमयान् ।
शत्रुः कालसमानोऽपि मृत्युमेष्यति पार्वति ॥ ४२ ॥
(४) बुधे श्मशाने देवेशि जपेन्मन्त्रायुतं निशि ।
हुनेदाज्यं दशांशेन सचण्डालकचं प्रिये ॥ ४३ ॥
रम्भा तिलोत्तमा वापि प्रातः प्रादुर्भविष्यति ।
(५) गुरौ जपेन्मनुं देवि श्मशाने मुक्तकुन्तलः ॥ ४४ ॥
अयुतं तद्दशांशेन हुनेदाज्यं सपायसम् ।
सशरं धनसारं च भृत्यत्वं याति वासवः ॥ ४५ ॥
(६) शुक्रे श्मशानदेशे तु जपेदयुतसंख्यया ।
दिगम्बरो मुक्तकेशो हुनेदाज्यं च सोल्मुकम् ॥ ४६ ॥
सदूर्वाशर्करं हुत्वा रिपुमुच्चाटयिष्यति ।
(७) शनौ श्मशाननिलये जपेद्राक्षीमनुं सुधीः ॥ ४७ ॥
अयुतं तद्दशांशेन हुनेदाज्यं सशस्त्रुकम् ।
समेषप्तीहरिद्रारं च शमयेदभितो भयम् ॥ ४८ ॥
(८) रवौ श्मशाने[2] सञ्जप्य मूलं चायुतसंख्यया ।
हुनेत् कपोतमांसाज्यमाद्रिपं पलमद्रिजे ॥ ४९ ॥
पितृणां देवतानां च पुष्टिदोऽयं प्रयोगकः ।
इत्येष पटलो राज्ञः सर्वागमरहस्यवान् ॥ ५० ॥
अन्यशिष्याय न देयो दुर्जनाय विशेषतः ।
गुरुभक्तिविहीनाय कुचैलाय दुरात्मने ॥ ५१ ॥
अभक्तेभ्योऽपि पुत्रेभ्यो दत्त्वा निरयमाप्नुयात् ।

---

१ 'गावा श्मशान' ख पाठः । २ 'सर्वबारे तु' ख पाठः ।

देयं शिष्याय शान्ताय गुरुभक्तया पार्वति ॥ ५२ ॥
दीक्षिताय कुलीनाय राज्ञीभक्तिरताय च ।
इदं रहस्य परम तव भक्त्या मयोदितम् ।
गुह्यं गोप्यतमं लोके गोपनीय स्वयोनिवत् ॥ ५३ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीमहाराज्ञीपटलम् ॥ १ ॥

अथ

श्रीमहाराज्ञी-पूजापद्धतिः ।

—※—

श्रीभैरव उवाच ।
अधुना देवि वक्ष्येऽहं पद्धतिं गद्यरूपिणीम् ।
श्रीराज्ञीनित्यपूजायास्तत्त्वतः सौख्यदायिनीम् ॥ १ ॥
प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोऽर्चयेत् ।
तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥ २ ॥

तत्र श्रीमान्-साधको ब्राह्मे मुहूर्ते शयनतलात् उत्थाय करचरणादि प्रक्षाल्य निजासने पद्मपद्मासन समुपविश्य स्वशिरःस्थसहस्राराधोमुखकमलकर्णिका-वर्तिन निजगुरु स्वशक्त्या सहित ध्यात्वा मानसेरुपचारै सपूज्य दण्डवन्नत्वा तत्र सशिवा देवा ध्यात्वा मूल यथाशक्त्या जप्त्वा जप गुरव समर्प्य तदाज्ञा गृहीत्वा बहिरागत्य

१ 'अधुना पद्धति वक्ष्य श्रीराज्ञचनमद्भुताम् ।
गद्यपद्यमयीं गोप्या सकलागमनिश्रिताम् ॥ ख पाठ ।

मलादिशोधनं विधाय नद्यादौ गत्वा वर्णोक्तं शौचं कृत्वा, "ॐक्लीं कामदेवाय सर्वजनप्रियाय नमः" इति दन्तान्विशोध्य मलापकर्षणं स्नानं कृत्वा, मृत्त्रयं मूलेन संशोध्य जले श्रीचक्र योनिचक्रं वा विभाव्य, तत्र "गंगे गङ्गे च यमुने चैव" इत्यादिनाङ्कुशमुद्रया तीर्थान्यावाह्य, तत्र "बालार्ककोटिसदृशे भूतेश्वरसमन्विते। महापञ्चदशीविद्ये जलेऽस्मिँस्त्वमिहावह ॥" इत्यावाहनादिमुद्राः प्रदर्श्य, मृदमङ्गे विलिप्य मूलमुच्चार्य कुम्भमुद्रया जले त्रिवारं पुनर्मन्त्रित्। ततो "ॐह्रांह्रींसः सूर्याय इदं तेऽर्घो नमः ॥" इत्यर्घ्यत्रयं दत्त्वा, मूल यथाशक्त्या जप्त्वा वाससी परिधाय, वैदिकीं संध्यां निर्वर्त्य तान्त्रिकीं कुर्यात्। तत्र मूलषडङ्गं विधाय वामहस्ते जलं निधाय पञ्चमूलमन्त्रेण धेनुमुद्रयावलोक्य सप्तधाभिमन्त्र्य, तत्त्वमुद्रयाच्छाद्य मूलमुच्चरंस्तद्गलितोदकबिन्दुभिः सप्तधार शिरः प्रोक्ष्य, दक्षिणहस्ते धृत्वा इडया देहान्तर्नीत्वा पापं प्रक्षाल्य, तज्जलं पिङ्गलया विरिच्य वामहस्ते तज्जलं सकलुषं वामभागस्थशिलायां फडिति निःक्षिपेत्। इत्यघमर्षणं कृत्वा, प्रणवमायाभ्यां प्राणायामत्रयं कृत्वा, ॐह्रीं आत्मतत्त्वं शोधयामि स्वाहा। ॐह्रीं विद्यातत्त्वं शोधयामि स्वाहा। ॐह्रीं शिवतत्त्वं शोधयामि स्वाहा। इत्याचम्य, षडङ्गन्यास ॐह्रीं इत्यादिना विधाय गायत्रीं जपेत्। ॐ राज्यप्रदायै विद्महे ह्रीं पञ्चदशाक्षर्यै धीमहि श्रीं तन्नो महाराज्ञी प्रचोदयात् ३। गायत्रीं मूलविद्यां च जप्त्वा, गायत्र्या श्रीमहाराज्ञीभूतेश्वराभ्यामिदमर्घ्यं स्वाहा इत्यर्घ्यत्रयं दत्त्वा, पुनर्जले योनिचक्रं विभाव्य मूल सप्तधोच्चार्य 'श्रीसाङ्गा सवाहना सायुधा सपरिच्छदा भूतेश्वरसहिता श्रीमहाराज्ञी तृप्यतां' इति सप्तधार सन्तर्प्य, भूतेश्वरं पृथक् त्रिः सन्तर्प्य, परिवारान् प्रणवमायाभ्यां सकृत् सन्तर्प्य, गुरुपरमगुरुपरमेष्ठिगुरून् पितॄंश्च सन्तर्प्य, पूर्ववत् सूर्यायार्घ्यत्रय दत्त्वा पुनर्देवेभ्यो हृदि समानीय, तीर्थं विसृज्य यागगृहमागच्छेदिति संध्याविधिः ॥

दावे त्वं विष्णुना धृता । त्वं च धारय मां लोके पवित्रं कुरु चासनम् ॥ ॐ आं आधारशक्तये नमः । कूर्माय नमः । अनन्ताय नमः । अष्टदलपद्माय नमः । सहस्रदलपद्माय नमः । तत्रोपविश्य , अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ इति तालत्रयं दत्त्वा भौमान् विघ्नानुत्सार्य , नाराचमुद्रां प्रदर्श्य , भूताः प्रेताः पिशाचाश्च राक्षसाश्च सरीसृपाः । अपसर्पन्तु ते सर्वे देव्यस्त्रेण तु पीडिताः ॥ इति वामपार्ष्णिघातत्रयं दत्त्वा गुरु प्रणमेत् । अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ॐ गुरुभ्यो नमः । ॐ परमगुरुभ्यो नमः । ॐ परापरगुरुभ्यो नमः । परमेष्ठिगुरुभ्यो नमः । इति संपूज्य ।

अस्य श्रीमहाराज्ञीमन्त्रस्य, ब्रह्मा ऋषिः, गायत्रं छन्दः, श्रीभूतेश्वरीमहाराज्ञीदेवता , ह्रींबीजं , सौःशक्तिः , क्लींकीलक , चतुर्वर्गपुरुषार्थसिद्धये विनियोगः । ब्रह्मऋषये नमः शिरसि , गायत्रीच्छन्दसे नमो मुखे , राज्ञीदेवतायै नमो हृदि , ह्रींबीजाय नमो नाभौ , सौःशक्तये नमो गुह्ये , क्लींकीलकाय नमः पादयोः , पूजायां विनियोगाय नमः सर्वाङ्गेषु । ॐह्रां अङ्गुष्ठाभ्यां नमः । ॐह्रीं तर्जनीभ्यां नमः । ॐह्रूं मध्यमाभ्यां नमः । ॐह्रैं अनामिकाभ्यां नमः । ॐह्रौं कनिष्ठिकाभ्यां नमः । ॐह्रः करतलपृष्ठाभ्यां नमः । इति करन्यासः । एव षडङ्गन्यासः ।

इत्थं न्यासं विधाय भूतशुद्धिं कुर्यात् । ॐह्रीं इत्याधारात् कुण्डलिनीं प्रदीपकलिकाकारां सुषुम्नामार्गेण ब्रह्मपथान्तर्नीत्वा परमशिवं प्रापय्य तयोः सामरस्यं विधाय , तदुद्भूतानन्दामृतधारया कुलगुरून् सन्तर्प्य , पुनः षट्चक्रं भित्त्वा स्वस्थानमानीय , वामकुक्षौ पापपुरुषमङ्गुष्ठमात्राकारं कृष्णवर्णं रक्तश्मश्रुलं ध्यात्वा प्राणायामयोगेन शोषणादि कुर्यात् । आदौ यमिति वायुबीजेन षोडशवारजपेन शोषयेत् । रमित्यग्निबीजेन षोडशवारजपेन दाहयेत् । वमिति वरुणबीजेन षोडशवारजपेनाप्लावयेत् । लमिति भूर्बीजेन षोडशधा जपेन देहं दृढं विधिन्यस्य , हमित्याकाशबीजेन षोडशधा जपेन स्वात्मानं दिव्यदेहमुत्पाद्य प्राणप्रतिष्ठां कुर्यात् ।

ॐह्रीं आं क्रों सोऽहं मम प्राणा इह प्राणाः ॐ मम जीव इह

स्थितः स मम वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा, इति प्राणप्रतिष्ठां विधाय पूर्ववत् प्राणायामं कृत्वा, तत्त्रयेणाचम्य न्यासं कुर्यात्। ॐनमो ब्रह्मरन्ध्रे, ह्रीं शिरसि, श्रीं नेत्रयोः, रां कर्णयो., क्लीं नासाग्रे, सौः मुखे, भं कण्ठे, गं भुजयोः, वं वक्षसि, त्यैं कुक्षौ, रां नाभौ, श्यै गुह्ये, ह्रीं जान्वोः, स्वां जङ्घयोः, ह्रां नमः सर्वाङ्गेषु। इति मूलमन्त्रन्यासः॥

ॐह्रांश्रां हृदयाय नमः। ॐह्रींश्रीं शिरसे स्वाहा। ॐह्रूंश्रूं शिखायै वषट्। ॐह्रैंश्रैं कवचाय हुं०। ॐह्रौंश्रौं नेत्राभ्यां वौषट्। ॐह्रः श्रः अस्त्राय फट्। ॐरां हृदयाय०, अङ्गुष्ठाभ्यां नमः। ॐरीं शिरसे०, तर्जनीभ्यां नमः। ॐरूं शिखायै०, मध्यमाभ्यां नमः। ॐरैं कवचाय०, अनामिकाभ्यां०। ॐरौं नेत्राभ्यां०, कनिष्ठिकाभ्यां०। ॐरः अस्त्रायफट्, करतलपृष्ठाभ्यां नमः॥ ॐसौःक्लां अङ्गुष्ठाभ्यां नमः। ॐसौःक्लीं तर्जनीभ्यां०। ॐसौःक्लूं मध्यमाभ्यां०, ॐसौःक्लैं अनामिकाभ्यां०। ॐसौःक्लौं कनिष्ठिकाभ्या०। ॐसौःक्लः करतलपृष्ठाभ्यां नमः। एवं हृदयादि षडङ्गन्यासः॥

ॐह्रीं जालन्धरपीठाय नमो मूलाधारे। ॐश्रीं उड्डीयानपीठाय नमः स्वाधिष्ठाने। ॐरां कामरूपपीठाय नमः अनाहते। ॐक्लीं मधुपुरीपीठाय नमो मणिपूरे। ॐसौः वाराणसीपीठाय नमो विशुद्धौ। ॐह्रीं अनन्तपीठाय नमः आज्ञायां। ॐस्वाहा शारदापीठाय नमो ब्रह्मरन्ध्रे। इति पीठन्यासः॥

ॐअंकंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंळंक्षं हृदयाय नमः। ॐह्रींअंकंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंळंक्षं शिरसे स्वाहा। ॐश्रींअंकंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंळंक्षं शिखायै वषट्। ॐरांअंकंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंळंक्षं कवचाय हुं। ॐक्लींअंकंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंळंक्षं नेत्रत्रयाय वौषट्। ॐसौःअंयंरंअः अस्त्राय फट्। एव करन्यासः॥ इति शुद्धमातृकान्यासः॥

ततो मातृकान्यासं च कृत्वा, ॐ आत्मतत्त्वाय हृदयाय नमः। ह्रीं विद्यातत्त्वाय शिरसे०। श्रीं शिवतत्त्वाय शिखायै०। रां शक्तितत्त्वाय कवचाय०। क्लीं शिवतत्त्वाय नेत्रेभ्यो०। सौः सर्वतत्त्वाय अस्त्राय फट्। एव करन्यासः, इति तत्त्वन्यास॥ ॐह्रांमिति पूर्ववत् षडङ्ग विधाय कामकलारूप स्वात्मानं विचिन्त्य, हृत्कर्णिकाया श्रीभूतेश्वराङ्गतां श्रीमहाराज्ञीं विचिन्त्य मानसैरुपचारैः संपूज्य, बहिः श्रीचक्र बिन्दुत्रिकोणवसुकोणदशारयुग्मान्वितचतुर्दशारान्वितबहिर्दशारसंयुतं भूगृहत्रयोपशोभितं विचिन्त्य, तत्र पूर्वादिदिक्षु वामाज्येष्ठारौद्रीशान्तिपराख्याः शक्तीः, तदग्रे दिक्षु अनङ्गकुसुमानङ्गमेखलानङ्गमदनानङ्गमदनातुराः, तदग्रे दिक्षु सर्वसंक्षोभिणीसर्वविद्राविणीसर्वाकर्षिणीसर्ववशंकरीसर्वोन्मादिनीसर्वमहांकुशासर्वखेचरीसर्वबीजसर्वयोनिसर्वत्रिखण्डाः, तदग्रे दिक्षु त्रैलोक्यमोहनचक्रस्वामिनीसर्वार्थसाधकचक्रसर्वसौभाग्यदायकचक्रसर्वार्थसंपत्प्रदचक्रसर्वमन्त्रमयचक्रसर्वद्वन्द्वक्षयंकरचक्रसर्वरोगहरचक्रसर्वसिद्धिप्रदचक्रसर्वानन्दमयचक्रसर्वरक्षाकरचक्राणि, तदग्रे दिक्षु ब्राह्मीनारायणीमाहेश्वरीचामुण्डाकौमारीवाराहीमहालक्ष्मीमनोन्मनीमातरः, तदग्रे दिक्षु सर्वसंक्षोभणसर्वविद्रावणसर्वाकर्षणसर्ववशंकरसर्वोन्मादनसर्वमहांकुशसर्वखेचरसर्वबीजसर्वयोनिसर्वत्रिखण्डनाथाः, तदग्रे दिक्षु सर्वसिद्धिसर्वसम्पत्सर्वप्रियंकरसर्वमङ्गलसर्वकामप्रदसर्वदुःखविमोचनसर्वमृत्युप्रशमनसर्वविघ्ननिवारणसर्वाङ्गसुन्दरसर्वसौभाग्यदायिन्यः, तदग्रे दिक्षु सर्वज्ञसर्वशक्तिसर्वैश्वर्यसर्वज्ञानसर्ववैराग्यसर्वबलसर्वैश्वर्यसर्वक्रियासर्वमन्त्रसिद्धयः, तदग्रे दिक्षु सर्वज्ञसर्वशक्तिसर्वैश्वर्यसर्वज्ञानसर्ववैराग्यसर्वबलसर्वैश्वर्यसर्वक्रियासर्वमन्त्रसिद्धिदेव्यः, तदग्रे दिक्षु सर्वज्ञसर्वशक्तिसर्वैश्वर्यसर्वज्ञानसर्ववैराग्यसर्वबलसर्वैश्वर्यसर्वक्रियासर्वमन्त्रसिद्धिनाथा

द्भासित-चतुर्द्वारोपशोभितं विलिख्य वा संस्थाप्य योगपीठ परिकल्प्य योगपीठपूजां कुर्यात्। ॐह्रीं मण्डूकाय नमः। ॐ कालाग्निरुद्राय०। ॐ मूलप्रकृतये नमः। ॐ आधारशक्त्यै०। ॐ वराहाय०। ॐ कूर्माय०। ॐ अनन्ताय०। ॐ पृथिव्यै०। ॐ सुधाम्बुधये०। मध्ये ॐ सुवर्णद्वीपाय०। ॐ कल्पवनाय०। मध्ये ॐ मणिगेहाय०। रत्नवेदिकायै०। तन्मध्ये ॐ चिन्तामणिमण्डपाय०। तत्र ॐ श्मशानाय०। ॐ धर्मज्ञानवैराग्यैश्वर्येभ्यो०। तद्वामे ॐ अधर्माज्ञानावैराग्यानैश्वर्येभ्यो०। तदुपरि ॐ रं वह्निमण्डलाय नमः। ॐ अं अर्कमण्डलाय०। ॐ सों सोममण्डलाय०। ॐ तं तमसे०। ॐ रं रजसे०। ॐ सं सत्त्वाय०। मूलं सहस्रदलकमलाय०। संविन्नालाय०। प्रकृतिमयपत्रेभ्यो०। विकृतिमयकेसरेभ्यो०। पञ्चाशद्बीजभूषितकर्णिकायै०। मूलं मातृकामुच्चार्य श्रीयोगपीठाय नमः। इत्यक्षतपुष्पैरभ्यर्च्य, श्रीयोगपीठोपरि श्रीचक्रं (संस्थाप्य वा) विभाव्य, आत्मश्रीचक्रयोर्मध्ये पात्रार्चनं कुर्यात्। तत्र स्ववामे वृत्तषट्कोणचतुरश्रं मण्डलं विलिख्य मूलेन षडङ्गेनार्चां विधाय, "ॐह्रीं श्रीं महाराज्ञीभगवती—सामान्यार्घ्यमण्डलाय नमः"। इत्यक्षतैरभ्यर्च्य, "रवह्निमण्डलाय दशकलात्मने नमः" इत्यक्षतैरभ्यर्च्य, तत्राधारं संस्थाप्य, "अं अर्कमण्डलाय द्वादशकलात्मने नमः" इत्यभ्यर्च्य, विलोममातृकया शङ्खं संपूर्य "तत्र सौं: सोममण्डलाय षोडशकलात्मने नमः" इत्यभ्यर्च्य, तत्र सूर्यमण्डलादङ्कुशमुद्रया तीर्थानि, "गङ्गे च यमुने चैव" इत्यादिनावाह्य, शुद्धं भावयेदिति सामान्यार्घ्यविधिः॥

सामान्यार्घ्यस्य वामे त्रिकोणषट्कोणवृत्तचतुरश्र मण्डलं विधाय षडङ्गेनाभ्यर्च्य, मूलविद्यामुच्चार्य "श्रीराज्ञीकलशमण्डलाय नमः" तत्राधारं संस्थाप्य, "र वह्निमण्डलाय दशकलात्मने नम" इति संपूज्य, तत्राक्षतालिप्तकलश संस्थाप्य, "अं अर्कमण्डलाय द्वादशकलात्मने नमः" इति संपूज्य, तत्रानामिकाङ्गुष्ठाभ्यामृतधारापवेन कलशमापूर्य, तत्र "सौं: सोममण्डलाय षोडशकलात्मने नमः" इति पुष्पाक्षतैः संपूज्य, "ॐह्रीं श्रीं रं रं रं रं अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २ शुक्रशापं नोचय २ ॐह्रीं श्रीं सुरादेव्यै वौ-

पद्" इति त्रिरभिमन्त्र्य मूलं दशधा जप्त्वा, आनन्देश्वराय विद्महे सुरादेव्यै धीमहि तन्नोऽर्धनारीश्वरः प्रचोदयात् ३। इति त्रिरानन्द-भैरवगायत्रीं जप्त्वा ह्सक्षमलवरयऊं आनन्दभैरवाय वौषट्, सहक्षमलवरयऊं आनन्दभैरवीसुरादेवीपादुकाभ्यो नमः इति संपूज्य, ऊँ ह्रीं सूर्यमण्डलसंभूते वरुणालयसंभवे। अमाबीजमये देवि गुरुशापाद्विमुच्यताम्॥ ऊँह्रीं वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि। तेन सत्येन देवेशि ब्रह्महत्या विहन्यतु। ऊँह्रीं एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम्। कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्॥ ऊं ह्रीं पावमानः परानन्दः पवमानः परोरसः। पवमानं पर ज्ञानं तेन ते पावयाम्यहम्॥ ऊं ह्रीं कृष्णशापविनिर्मुक्ता त्वं मुक्ता ब्रह्मशापतः। विमुक्ता रुद्रशापेन पवित्रा भव सांप्रतम्॥ इति संपूज्य, मूलं त्रिधा जपन् द्रव्योपरि धेनुयोनिमत्स्यमुद्राः प्रदर्श्य, कुम्भं पूर्णमित्युक्त्वा सुधामयं ध्यात्वा तत्त्वमुद्रयाच्छादयेदिति द्रव्यशुद्धिः॥

ऊं ह्रीं कृतावतारो हरिणा कलिना पीडितं जगत्। बलिना निगृहीतं तु कौलिकानां हिताय च॥ भवानीपरितोषार्थं स्वयं मीनोऽभवत् प्रभुः॥ मीनोपरि मूलं त्रिधा जपन् मुद्रात्रयं प्रदर्श्य, ऊं ह्रीं छागलाद्यिगवान्तादिकृतरूपाय वै नमः। बल्यर्थं देवदेव्योश्च पवित्री भव सांप्रतम्॥ इति, ऊं ह्रीं राक्षीयन्त्रार्चनाकाले यानि यानीह सिद्धये। वस्तूनि सौरभेयानि पवित्राणीह सांप्रतम्॥ मूलं त्रिधा जपन् मुद्राद्वयं प्रदर्श्य, कलशादुत्तरतः पाद्यार्घ्यमधुपर्कांचमनीयपात्राणि संस्थाप्य गुरुशक्तिवटुकसाधकपात्राणि च संस्थाप्य सामान्यार्घ्यवत् संपूज्य श्रीचक्रं पूजयेदिति पात्रस्थापनम्॥

तत्र हृदयकमलाद्भूतेश्वराद्वोपविष्टां श्रीराज्ञीं सुषुम्नामार्गेण बहिरानीय श्रीचक्रबिन्दुपीठोपरि संस्थाप्य, तत्रावाहनादिमुद्राः प्रदर्श्य स्वरूपघटकलशामृतपात्रमुद्राः प्रदर्श्य, मूलेन प्राणप्रतिष्ठामन्त्रेण प्राणान् कृत्वा, मू० श्रीभूतेश्वरभूतेश्वरीभ्यां पाद्यार्घ्याचमनीयादि परिकल्पयामि नमः। मू० भूतेश्वरभूतेश्वरीभ्यां मधुपर्काचमनीयगन्धाक्षतपुष्पार्चान् परिकल्पयामि नमः। मूलेन नैवेद्याचमनीयताम्बूलादि समर्प्य, मूलषडङ्गं विधाय भैरवाज्ञां गृहीत्वा, देवदेव्यौ नुत्वा परिवारदेवीर्विचिन्त्य दण्डवत्प्रणिपत्य चतुर्भे पूजयेत्।

ॐह्रींसर्वाशापिरपूरकचक्राय नमः। इति पुष्पाञ्जलिं दत्त्वा, ॐह्रीं-गांगणेश्वरश्रीपादुकां पूजयामि नमः तर्पयामि नमः। ॐ भैंभीमराजश्रीपा-दुकां पूजयामि नमस्तर्पयामि नमः। ॐ ह्रौंकुमारश्रीपादुकां पू०। ॐ जुंजाङ्ग-लेश्वरश्रीपादुकां० इति। तत्रैव दिग्विदिक्षुः। ॐ इन्द्रश्री०। ॐ अग्नि-श्री०। ॐ धर्मराजश्री०। ॐ निर्ऋतिश्री०। ॐ वरुणश्री०। ॐ वायु-श्री०। ॐ कुबेरश्री०। ॐ ईशानश्री०। ऊर्ध्वे ॐ ब्रह्मश्री०। अधः ॐ अनन्तश्री०। इति गन्धाक्षतैर्वामावर्तेन संपूजयेदिति। पुनस्तत्रैव-ॐ वज्रश्री०। ॐ शक्तिश्री०। ॐ दण्डश्री०। ॐ खड्गश्री०। ॐ पाशश्री०। ॐ ध्वजश्री०। ॐ गदाश्री०। ॐ त्रिशूल०। ॐ पद्मश्री०। ॐ चक्रश्री०। इति पुष्पाक्षतैरर्चयेदिति प्रथमावरणम्॥

ततो वृत्तत्रये ॐह्रींसर्वसंपत्प्रदचक्राय नमः इति पुष्पाञ्जलिं दत्त्वा, ॐह्रींगुरुश्रीपादुकां०। ॐ परमगुरुश्री०। ॐ परापरगुरुश्री०। ॐ परमेष्ठिगुरुश्री०। इति गन्धाक्षतैरभ्यर्चयेदिति द्वितीयावरणम्॥

ततो वसुदले। ॐह्रींसर्वार्थसाधकचक्राय नमः इति पुष्पा-ञ्जलिं दत्त्वा, ॐह्रींवासुकिश्रीपादुकां०। ॐ नीलनागश्री०। ॐ तक्ष-कश्री०। ॐ पद्मनागश्री०, इति पूर्वादिदिक्षु, ॐ कार्कोटकश्री०। ॐ शङ्खपालश्री०। ॐ कुलिकश्री०। ॐ शेषनागश्री०। इति विदिक्षु गन्धाक्ष-तैरभ्यर्चयेदिति। तत्रैव ॐह्रींश्रीसिताङ्गभैरवयुतब्राह्मीश्री०। ॐ रुरुभैरवयु-तमाहेश्वरीश्री०। ॐ चण्डभैरवयुतकौमारीश्री०। ॐ क्रोधभैरवयुतापराजि-ताश्री०। ॐ उन्मत्तभैरवयुतवैष्णवीश्री०। ॐ भीषणभैरवयुतवाराह्यश्री०। ॐ कपालिभैरवयुतमाहेन्द्रीश्री०। ॐ संहारभैरवयुतनारसिंहिकाश्री०। इति वसुदले वामावर्तेन गन्धाक्षतपुष्पैरभ्यर्चयेदिति तृतीयावरणम्॥

ततः षट्कोणे। ॐह्रींसर्वसिद्धिप्रदाय श्रीचक्राय नमः इति पुष्पाञ्जलिं दत्त्वा, वामावर्तेन। ॐह्रीं दुर्गाश्री०। ॐ शारिकाश्री०। ॐ लघुश्री०। ॐ गिरिजाश्री०। ॐ कालिकाश्री०। ॐ त्रिपुराश्री०। इति गन्धाक्षतैरभ्यर्चयेदिति चतुर्थावरणम्॥

ततस्त्रिकोणे ईशानाग्नेयाग्रतो । ॐह्रींसर्वसंमोहनचक्राय नमः इति पुष्पाञ्जलिं दत्त्वा, ॐह्रीं लक्ष्मीश्री० । रँ सरस्वतीश्री० । रँ बाला-श्री० । इति गन्धपुष्पाक्षतैरभ्यर्चयेदिति-पञ्चमावरणम् ॥

ततो बिन्दौ । ॐह्रींसर्वानन्दमयचक्राय नमः इति पुष्पाञ्जलिं दत्त्वा मूलविद्यां सप्तवारमुच्चार्य ॐह्रीं श्रीभूतेश्वरभूतेश्वरीश्रीपादुकां० । मूलं श्रीमहाराज्ञीश्री० । रँ श्रीराज्यप्रदाश्री० । रँ पञ्चदशाक्षरीश्री० । रँ भूतेश्वरश्री० । रँ खड्गश्री० । रँ पद्मश्री० । रँ कलशश्री० । रँ सुधा-पात्रश्री० । इति गन्धपुष्पाक्षतैः पूजयेदिति षष्ठावरणम् ॥

भैरवचक्रे मूलं भूतेश्वरभूतेश्वरीभ्यां गन्धाक्षतपुष्पधूपदीपाचमनीय-नैवेद्यताम्बूलच्छत्रचामरारात्रिकादीन् निवेद्य, नैवेद्यं च " अमृतोपस्त-रणमसि स्वाहा " इति । बलिमुत्सृजेत्, ॐह्रींदेवीपुत्रबटुकनाथ क-पिलजटाभारभास्वर त्रिनेत्र ज्वालामुख इमं बलिं पूजां गृह्ण२ मम वाञ्छि-तां सिद्धिं देहि २, इति दक्षिणे । ॐ यांयींयूं योगिनीगणेभ्यो नमः स्वाहा इत्युत्तरे । ॐह्रींक्षांक्षीं ॐह्रींश्रींक्षेत्रपालाय रामेश्वराय वौषट् इति पश्चिमे । ॐगांग्लांगणपतये नमः इति पूर्वे । ॐसौः सर्वविघ्नकृद्भ्यो भूतेभ्यः स्वाहा, इति बलिमुत्सृज्य निर्ऋतिदिशि संस्थाप्य, पूर्ववन्म-न्त्रसंकल्पं विधाय मूलषडङ्गं कृत्वा देवीं ध्यात्वा मालामभ्यर्च्य दक्षि-णहस्ते धृत्वा यथाशक्त्या मूलविद्यां जपेत् । ततो " गुह्यातिगुह्यगो-प्त्री त्वं " इत्यादिना जपं देव्या हस्ते समर्प्य तेजोरूप जपफलं गृहीत्वा, देवदेव्योरग्रतः कवच-सहस्रनाम-स्तवपाठं विधाय तदपि समर्प्य, प्रातःप्रभृतिसायान्तं सायादिप्रातरन्ततः । यत्करोमि जग-न्मातस्तदस्तु तव पूजनम् ॥ इति पुष्पाञ्जलिं दत्त्वा योनिमुद्रया प्र-णम्य, संहारमुद्रया देवदेव्यौ पुष्पेण नासाग्रमानीय हृत्कमलकर्णिकायां प्रापयित्वा, देवीरूपोऽहं सोऽहमिति विचिन्त्य स्वशक्त्या सह सुखं विहरेत् । पात्रार्पणं कृत्वा च राज्ञीकृतविग्रहो भूत्वानन्दकृतं स्वा-त्मानं विभावयेदिति नित्यपूजाविधिः ॥

इत्येषा नित्यपूजायाः पद्धतिर्गद्यरूपिणी ।
राज्ञीसर्वस्वरूपा हि न देया तत्त्ववादिभिः ॥
श्रीराज्ञ्याः पद्धतिर्गुह्या नित्यार्चनक्रमाङ्किता ।

गुह्यातिगुह्यतत्त्वाढ्या गोपनीया मुमुक्षुभिः ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीमहाराज्ञी—नित्यपूजापद्धति. ॥ २ ॥

अथ

श्रीमहाराज्ञीकवचम् ।

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि राज्ञीकवचमुत्तमम् ।
त्रैलोक्यविजयं नाम दिव्य भोगापवर्गदम् ॥ १ ॥
मूलमन्त्रमय मुख्यमष्टसिद्धिप्रदायकम् ।
सर्वैश्वर्यप्रद लोके सर्वागमविनिश्चितम् ॥ २ ॥
पठनाद् धारणाद् देवि महापातकनाशनम् ।
महोत्पातप्रशमन मूलविद्यामनोहरम् ॥ ३ ॥
त्रिरूपाक्षः शिवो देवि विष्णुर्नारायणो बली ।
ब्रह्मा पितामहो लोके जिष्णुर्गीर्वाणनायकः ॥ ४ ॥
महोनिधिस्तथा सूर्यस्तारकाधिपतिः शशी ।
रत्नाकरश्च जलधिः शेषश्चानन्तता गतः ॥ ५ ॥
श्रीराज्ञ्याः कवचस्यास्य पठनाद धारणात् सदा ।
बहुनोक्तेन देवेशि कवचस्यास्य धारणात् ॥ ६ ॥
मर्त्योऽप्यमरता याति राज्ञीपदमवाप्नुयात् ।

ऋषिरस्य महादेवि ब्रह्मा च्छन्दः समीरितम् ॥ ७ ॥
गायत्री देवता राज्ञी माया बीजमुदाहृतम् ।
शरच्छक्तिः कीलकं च कामराजः सुरेश्वरि ॥ ८ ॥
भोगापवर्गसिद्ध्यर्थे विनियोग इति स्मृतः ।

अस्य श्रीमहाराज्ञीत्रैलोक्यविजयकवचस्य, श्रीब्रह्मा ऋषिः, गायत्री छन्दः, श्रीमहाराज्ञी देवता, ह्रीं बीजे, सौः शक्तिः, क्लीं कीलकं, भोगापवर्गसिद्ध्यर्थे विनियोगः । ब्रह्मऋषये नमः शिरसि । गायत्रीछन्दसे नमो मुखे । महाराज्ञीदेवतायै नमो हृदि । ह्रीं बीजाय नमो नाभौ । सौः शक्तये नमो गुह्ये । क्लीं कीलकाय नमः पादयोः । विनियोगाय नमः सर्वाङ्गेषु । ॐ ह्रामित्यादिषड्दीर्घयुक्तमायाबीजेन कराङ्गन्यासं कृत्वा ध्यायेत् ।

उद्यद्दिवाकरसहस्ररुचिं त्रिनेत्रां
सिंहासनोपरिगतामुरगोपवीताम् ।
खड्गाम्बुजाढ्यकलशामृतपात्रहस्तां
राज्ञीं भजामि विकसद्वदनारविन्दाम् ॥ १ ॥
चतुर्भुजां चन्द्रकलार्धशेखरां
सिंहासनस्थां भुजगोपवीतिनीम् ।
पाशाङ्कुशाम्भोरुहखड्गधारिणीं
राज्ञीं भजे चेतसि राज्यदायिनीम् ॥ २ ॥

ॐ लक्ष्मीर्मे शिरः पातु ह्रीं ललाटं सरस्वती ।
श्रीं बाला पातु मां नेत्रे त्र्यक्षं पातु श्रुती मम ॥ ९ ॥
रां दुर्गा पातु मे नासां क्लीं मुखं पातु शारिका ।
सौः कण्ठं वैखरी पातु भं भुजौ पातु मे शिवा ॥ १० ॥
गं हस्तौ पातु मे काली वं वक्षस्थलमावतु ।
पञ्चं पातु मे मध्यं वृत्तं पार्श्वौ ममावतु ॥ ११ ॥
सैं पृष्ठं पातु मे ब्राह्मी रां नाभिं पातु वैष्णवी ।

ईं गुदं पातु रुद्राणी क्रीं कटिं मेऽपराजिता ॥ १२ ॥
स्वा कौमारी पातु जानू हा जङ्घेऽवतु चण्डिका ।
स्वाहा गुल्फौ च वाराही ऊँ पादौ नारसिंहिका ॥ १३ ॥
विस्मारितं च यत् स्थानं यत् स्थानं नामवर्जितम् ।
तत् सर्वं पातु मे राज्ञी मूलविद्यामयी परा ॥ १४ ॥
वासुकिः पूर्वतः पातु नीलनागोऽनलेऽवतात् ।
तक्षको दक्षिणे पातु नैर्ऋते पद्मनागकः ॥ १५ ॥
कार्कोटकः पश्चिमेऽव्याच्छङ्खपालस्तु वायुगे ।
कुलिकश्चोत्तरे पातु शेष ईशानमण्डले ॥ १६ ॥
ब्राह्मी ब्राह्ममुहूर्तेऽव्याद् दिनादौ वैष्णवी मम ।
रुद्राणी पातु मध्याह्ने सायं पात्वपराजिता ॥ १७ ॥
निशादौ पातु कौमारी निशीथे चण्डिकावतु ।
निशान्ते पातु वाराही सर्वदा नारसिंहिका ॥ १८ ॥
असिताङ्गः क्षितेः पातु पयसो रुरुभैरवः ।
चण्डो मा पवनात् पातु क्रोधेशः पातु मानलात् ॥ १९ ॥
उन्मत्तः सोमतः पातु भीषणः सूर्यतोऽवतु ।
याजकाच्च कपालीशो व्योम्नः संहारकोऽवतात् ॥ २० ॥
सदा समन्ततः पातु वपुर्बसुदलं मम ।
गुरवः पान्तु सर्वत्र दिगीशाः पान्तु सर्वतः ॥ २१ ॥
वृत्तत्रयं पातु नित्यं धरागेहं सदावतु ।
श्रीचक्रं पातु भीतिभ्यो योगिन्यः पान्तु सर्वदा ॥ २२ ॥
ऊर्ध्वं चाधः सदा पातु देवो रामेश्वरः शिवः ।
सर्वत्र सर्वदा सत्य वपुर्भूतेश्वरोऽवतात् ॥ २३ ॥

---

१ 'वायव्या शङ्खपालक' ख पाठ । २ 'रुरुभौ पातु पायस' ख पाठ ।
३ 'सर्वत' ख पाठ । ४ 'तथा' ख. पाठ. ।

पादादिमूर्धपर्यन्तं वपुः सर्वत्र मेऽवतु ।
शिरसः पादपर्यन्तं राज्ञी पञ्चदशाक्षरी ॥ २४ ॥
इतीदं कवचं राज्ञ्या मन्त्रगर्भं जयावहम् ।
त्रैलोक्यविजय नाम दारिद्र्यभयनाशनम् ॥ २५ ॥
सर्वरोगहरं साक्षात् सिद्धिद पापनाशनम् ।
महाभयहरं देवि मूलविद्यामयं परम् ॥ २६ ॥
परमार्थप्रदं नित्यं भोगमोक्षैककारणम् ।
यः पठेत् कवचं देवि रणे राजभये क्षणात् ॥ २७ ॥
सग्रामेषु रिपूञ्जित्वा विजयी गृहमेष्यति ।
पठनात् कवचस्यास्य राजकोपः प्रशाम्यति ॥ २८ ॥
द्यूते धनं लभेद् द्यूती श्मशाने सिद्धिमाप्नुयात् ।
त्रिवारं यः पठेद्रात्रौ रेतःस्नाने महेश्वरि ॥ २९ ॥
तस्य राज्ञी महाविद्या स्वप्नेऽभीष्टप्रदा भवेत् ।
स्वयम्भूकुसुमैः शुद्धै रेतसा चोभयाङ्कितैः ॥ ३० ॥
रसैर्भूर्जे लिखेद्धर्मं रवौ मातर्महेश्वरि ।
क्षौमतन्तुभिरव्यक्त लाक्षया वेष्टितं तथा ॥ ३१ ॥
सुवर्णगुटिकान्तःस्थ पूजयेद्यन्त्रराजवत् ।
गुटिकैषा महाविद्या राज्ञी मूर्तिरियापरा ॥ ३२ ॥
मूलविद्यामयी देवि सर्वाभीष्टफलप्रदा ।
शिरःस्था धनदा देवि कण्ठस्था वाक्प्रदायिनी ॥ ३३ ॥
वक्षःस्था पुत्रदा देवि कटिस्था भोगदायिनी ।
पृष्ठस्था बलदा नित्य कुक्षिस्था रोगनाशिनी ॥ ३४ ॥
सर्वार्थसाधिनी लोके यथाभीष्टफलप्रदा ।
गुटिकेयं शुभा राज्ञ्या न देया यस्य कस्यचित् ॥ ३५ ॥

---

१ 'स्वय' इ पाठः । २ 'पञ्चिन' इ पाठः । ३ 'त्रिःया' इ पाठ ।

इदं कवचमीशानि मूलविद्यामयं ध्रुवम् ।
सारस्वतप्रदं लक्ष्मीपुत्रपौत्रविवर्धनम् ॥ ३६ ॥
आयुष्करं पुष्टिकरं श्रीकरं च यशस्करम् ।
चतुष्पष्ट्यादितन्त्राणां सारमादाय वर्णितम् ॥ ३७ ॥
श्मशाने यः पठेत् सायं महाचीनक्रमेश्वरः[1] ।
स साधको महादेवि राज्ञीपुत्रो भविष्यति ॥ ३८ ॥
इतीदं मम सर्वस्वं त्रैलोक्यविजयाभिधम् ।
कवचं मन्त्रगर्भं तु गोपनीयं स्वयोनिवत् ॥ ३९ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीमहाराज्ञ्यास्त्रैलोक्यविजयं नाम कवचम् ॥ ३ ॥

अथ

महाराज्ञीसहस्रनामकम् ।

श्रीभैरव उवाच ।
भगवन् वेदतत्त्वज्ञ मन्त्रतन्त्रविचक्षण ।
शरण्य सर्वलोकेश शरणागतवत्सल ॥ १ ॥
कथं श्रियमवाप्नोति लोके दारिद्र्यदुःखभाक् ।
मान्त्रिको भैरवेशान[2] तन्मे गदितुमर्हसि ॥ २ ॥

---

१ 'श्रीम्' ख पाठ. । २ 'श्रीशान' ख पाठ. ।

श्रीभैरव उवाच ।

या देवी निष्कला राज्ञी भगवत्यमलेश्वरी ।
सा सृजत्यवति व्यक्तं संहरिष्यति तामसी ॥ ३ ॥
ब्रह्मा नामसहस्रं ते वक्ष्ये स्नेहेन पार्वति ।
अवाच्यं दुर्लभं लोके दुःखदारिद्र्यनाशनम् ॥ ४ ॥
परमार्थप्रदं नित्यं परमैश्वर्यकारणम् ।
सर्वागमरहस्याढ्यं सकलार्थप्रदीपनम् ॥ ५ ॥
समस्तशोकशमनं महापातकनाशनम् ।
सर्वमन्त्रमयं दिव्यं राज्ञीनामसहस्रकम् ॥ ६ ॥

अस्य श्रीमहाराज्ञीनामसहस्रस्य, ब्रह्मा ऋषिः, गायत्रं छन्दः, श्रीभूतेश्वरीमहाराज्ञी देवता, ह्रीं बीज, सौः शक्तिः, क्लीं कीलकं, महाराज्ञीसहस्रनामपाठे विनियोगः । ब्रह्मऋषये नमः शिरसि । गायत्रीच्छन्दसे नमो मुखे । श्रीभूतेश्वरीमहाराज्ञीदेवतायै नमो हृदि । ह्रींबीजाय नमो नाभौ । सौः शक्तये नमो गुह्ये । क्लींकीलकाय नमः पादयोः । विनियोगाय नमः सर्वाङ्गेषु । ॐह्रामित्यादिना करषडङ्गन्यासं विधाय ध्यानं कुर्यात् ।

या द्वादशार्कपरिमण्डितमूर्तिरेका
सिंहासनस्थितिमतीमुरगैर्वृतां च ।
देवीमनन्तगतिमीश्वरतां प्रपन्नां
तां नौमि भर्गवपुषीं परमार्थराज्ञीम् ॥ १ ॥
चतुर्भुजां चन्द्रकलार्धशेखरां
सिंहासनस्थां भुजगोपवीतिनीम् ।
पाशाङ्कुशाम्भोरुहवज्रधारिणीं
राज्ञीं भजे चेतसि राज्यदायिनीम् ॥ २ ॥

ॐह्रींश्रींरांमहाराज्ञी ह्रींसौःपञ्चदशाक्षरी ।
ह्रींस्वाहाऽन्यक्षरीविद्या परमभगवती विभा ॥ १ ॥

भास्वती भद्रिका भीमा भर्गरूपा महस्विनी ।
माननीया मनीषा च मनोजा च मनोजवा ॥ २ ॥
मानदा मन्त्रविद्या च महाविद्या षडक्षरी । *
षट्कूटा च त्रिकूटा च त्रयी वेदत्रयी शिवा ॥ ३ ॥
शिवाकारा त्रिरूपाक्षी शशिखण्डाननस्मिनी ।
महालक्ष्मीर्महोरस्का महौजस्का महोदया ॥ ४ ॥
मातङ्गी मोदकाहारा मदिरारुणलोचना ।
साध्वी शीलवती शाला सुधाकलशधारिणी ॥ ५ ॥
खड्गिनी पद्मिनी पद्मा पद्मकिञ्जल्करञ्जिता ।
हृत्पद्मवासिनी हृद्या पानपात्रधरा धरा ॥ ६ ॥
धराधरेन्द्रतनया दक्षिणा दक्षजा दया ।
दयावती महामेधा मोदिनी बोधिनी गदा ॥ ७ ॥
गदाधरार्चिता गोधा गङ्गा गोदावरी गया ।
महाप्रभावसहिता महोरगविभूषणा ॥ ८ ॥
महामुनिकृतातिथ्या माध्वी मानवती मघा ।
बाला सरस्वती लक्ष्मीर्दुर्गा दुर्गतिनाशिनी ॥ ९ ॥
शारी शरीरमध्यस्था वैखरी खेचरेश्वरी ।
शिवदा शिववक्षःस्था कालिका त्रिपुरापुरी ॥ १० ॥
मुरारिकुक्षिमध्यस्था मुरारिहृदयेश्वरी ।
बलारिराज्यदा चण्डी चामुण्डा मुण्डधारिणी ॥ ११ ॥
मुण्डमालान्विता मुद्रा क्षोभणा कर्षणक्षमा ।
ब्राह्मी नारायणीदेवी कौमारी चापराजिता ॥ १२ ॥
रुद्राणी च शचीन्द्राणी वाराही वीरसुन्दरी ।

---

* अत्र रेखाङ्कितमेकमेव नाम सर्वत्र ज्ञेयम् ।

नारसिंही भैरवेशी भैरवाकारभीषणा ॥ १३ ॥
नागालङ्कारशोभाढ्या नागयज्ञोपवीतिनी ।
नागकङ्कणकेयूरा (१००) नागहारा सुरेश्वरी ॥ १४ ॥
सुरारिघातिनी पूता पूतना डाकिनीक्रिया ।
क्रियावती कुरी कृत्या डाकिनी लाकिनी लया ॥ १५ ॥
लीलावती रसाकीर्णा नागकन्यामनोहरा ।
हारकङ्कणशोभाढ्या सदानन्दा शुभङ्करी ॥ १६ ॥
महासिनी मधुमती सरसी स्मरमोहिनी ।
महोग्रवपुषी वार्ता वामाचारप्रिया सिरा ॥ १७ ॥
सुधामयी वेणुकरा [1]वैरिणीवीरसुन्दरी ।
वारिमध्यस्थिता वामा वामनेत्रा शशिप्रभा ॥ १८ ॥
शर्मदा शङ्करी सीता रवीन्दुशिखिलोचना ।
मदिरा वारुणी वीणागीतविज्ञा मदिरावती ॥ १९ ॥
वटस्था वारुणीशक्तिर्वटजा वटवासिनी ।
वटुकी वीरसुवन्द्या स्तम्भिनी मोहिनी च मुद्रे ॥ २० ॥
मुद्गराङ्कुशहस्ता च वराभयकरा कुटी ।
पाटीरद्रुमवल्ली च वटिका वटुकेश्वरी ॥ २१ ॥
इष्टदा क्रपिभूः कीरी रेवतीरमणप्रिया ।
रोहिणी रेवती रम्या रमणा रोमहर्षिणी ॥ २२ ॥
रसोल्लासा रसासारा सारिणी तारिणी तन्वि[2] ।
तरीतरित्रहस्ता च तोतुला तरणिप्रभा ॥ २३ ॥
रत्नाकरप्रिया रम्भा रत्नालङ्कारशोभिता ।
रुचमाङ्गदा गदाहस्ता गदाधरवरप्रदा ॥ २४ ॥
पद्मा द्विरसा माला मालाभरणभूषिता ।

१ 'वैरिहा' ख. पाठः । २ 'सुक्तिः' ख. पाठः । ३ 'चमू' ख. पाठः ।

मालती मल्लिकामोदा मोदकाहारवल्लभा ॥ २५ ॥
वल्लभी मधुरा माया काशी काञ्ची ललन्तिका ।
हसन्तिका हसन्ती च भ्रमन्ती च वसन्तिका ॥ २६ ॥
क्षेमा क्षेमङ्करी क्षामा क्षौमवस्त्रा (२००) क्षणेश्वरी ।
क्षणदा क्षेमदा सीरा सीरपाणिसमर्चिता ॥ २७ ॥
क्रीता क्रीतानघा क्रूरा कमनीया कुलेश्वरी ।
कूर्चबीजा कुठाराढ्या कूर्मिणी कूर्मसुन्दरी ॥ २८ ॥
कारुण्या चैव काश्मीरी दूती द्वारवती ध्रुवा ।
ध्रुवस्तुता ध्रुवगतिः पीठेशी बगलामुखी ॥ २९ ॥
सुमुखी शोभनानीतिः[1] रत्नज्वालामुखी नतिः ।
अलकोज्झयिनी भोग्या भङ्गी भोगावती बला ॥ ३० ॥
धर्मराजपुरी पूता पूर्णसत्त्वाऽमरावती ।
अयोध्या योधनीया च युगमाता च यक्षिणी ॥ ३१ ॥
यज्ञेश्वरी योगगम्या योगिध्येया यशस्विनी ।
यशोवती च चार्वङ्गी चारुहासा चलाचला ॥ ३२ ॥
हरीश्वरी हरेर्माया मायिनी वायुवेगिनी ।
अम्बालिकाऽम्बा भर्गेशी भृगुकूटा महामतिः ॥ ३३ ॥
कोशेश्वरी च कमला कीर्तिदा कीर्तिवर्धिनी ।
कठोरवाक्कुहूमूर्तिः चन्द्रबिम्बसमानना ॥ ३४ ॥
चन्द्रकुङ्कुमलिप्ताङ्गी कनकाचलवासिनी ।
मलयाचलसानुस्था हिमाद्रितनयातनुः ॥ ३५ ॥
हिमाद्रिकुक्षिदेशस्था कुब्जिका कोमलेश्वरी ।
कारैकनिगडा गूढा गूढगुल्फातिगोपिता ॥ ३६ ॥
तनुजा तनुरूपा च बाणचापधरा नुतिः ।

---

१ 'ज्योतिः' ख. पाठ । २ लोकेश्वरा ख पाठ ।

धुरीणा धूम्रवासही धूम्रकेशाऽरुणानना ॥ ३७ ॥
अरुणेशी रतिः स्वार्तिर्गरिष्ठा च गरीयसी ।
महानमी महाकारा सुरासुरभयङ्करी ॥ ३८ ॥
अणुरूपा महज्ज्योतिरनिरुद्धमरस्वती ।
श्यामा श्याममुखी शान्ता श्रान्तसन्तापहारिणी ॥ ३९ ॥
गौर्गण्या गोमयी गुह्या गोमती गुरुवागऽर्या[1] ।
गीतसन्तोषसंसक्ता (३००) ग्राहिणी ग्रहिणी ग्रहा ॥ ४० ॥
गणप्रिया गजगतिर्गान्धारी गन्धमोदिनी ।
गन्धमादनसानुस्था सह्याचलकृतालया ॥ ४१ ॥
गजाननप्रिया गव्या[2] ग्राहिका ग्राहवाहना ।
गुह्यमार्गगुहावासा ग्रहमालाविभूषणा ॥ ४२ ॥
कावेरी कुहका भ्रान्तिस्तर्कविद्या प्रियङ्करी ।
पीताम्बरा पटाकारा पताका सृष्टिजा सुधा ॥ ४३ ॥
दाक्षायणी दक्षसुता दक्षयज्ञविनाशिनी ।
ताराचक्रस्थिता तारा तुरी तुर्या तुटिस्तुला ॥ ४४ ॥
सन्ध्यात्रयी सन्धिजरा सन्ध्यातारुण्यलालिता ।
ललिता लोहिता लम्पा चम्पा कम्पाकुला सखिः ॥ ४५ ॥
सतिः सत्यवती स्वस्था समाना मानवर्धिनी ।
महोमयी मनस्तुष्टिः कामधेनुः सनातनी ॥ ४६ ॥
सूक्ष्मरूपा सूक्ष्ममुखा स्थूलरूपा कलावती ।
तलातलाश्रया सिन्धुरम्बिका लम्बिका जया ॥ ४७ ॥
सौदामिनी सुधादेवी सनकर्षिसमर्चिता ।
मन्दाकिनी च यमुना विपाशा नर्मदानदी ॥ ४८ ॥

---

१ 'र्या' ख. पाठः । २ 'गुरुवागगया' ज. पाठ. । ३ 'गव्यामासिका' ख. पाठः ।

गण्डकचैरावती सिप्रा वितस्ता च सरस्वती ।
रेवा चैरावती[1] चेक्षुमती सागरवासिनी ॥ ४९ ॥
देवकी देवमाता च देवेशी देवसुन्दरी ।
दैत्यघ्नी दमनी दात्री दितिर्दितिजसुन्दरी ॥ ५० ॥
विद्याधरी च विद्येशी विद्याधरजसुन्दरी ।
मेनका चित्रलेखा च चित्रिणी च तिलोत्तमा ॥ ५१ ॥
उर्वशी मोहिनी रम्भा चाप्सरोगणसुन्दरी ।
यक्षिणी यक्षलोकेशी नरवाहनपूजिता ॥ ५२ ॥
यक्षेन्द्रतनया योग्या यक्षनायकसुन्दरी ।
(गन्धवती चिता गन्धा सुगन्धा गीततत्परा ॥ ५३ ॥
गन्धर्वतनया नम्रा (४००) गीतिर्गन्धर्वसुन्दरी ।)
मन्दोदरी करालाक्षी मेघनादवरप्रदा ॥ ५४ ॥
मेघवाहनसन्तुष्टा मेघमूर्तिश्च राक्षसी ।
रक्षोहन्त्री केकसी च रक्षोनायकसुन्दरी ॥ ५५ ॥
किंनरी कम्बुकण्ठी च कलकण्ठस्वना सुधा ।
किंमुखी हयवक्त्रा च केला किन्नरसुन्दरी ॥ ५६ ॥
पिशाची राजमातङ्गी उच्छिष्टपदसंस्थिता ।
महापिशाचिनी चान्द्री पिशाचकुलसुन्दरी ॥ ५७ ॥
गुह्येश्वरी गुह्यरूपा गुर्वी गुह्यकसुन्दरी ।
सिद्धिप्रदा सिद्धवधूः सिद्धेशी सिद्धसुन्दरी ॥ ५८ ॥
भूतेश्वरी भूतालया भूतधात्री भयापहा ।
भूतभीतिहरी भव्या भूतजा भूतसुन्दरी ॥ ५९ ॥
पृथ्वी पार्थिवलोकेशी पृथा विष्णुसमर्चिता ।

---

१ 'च देविका' ग. पाठः । २ 'अन्यान्तर्गत क. ग. घ. पुस्तकेष्वधिकम् ।

वसुन्धरा वसुनता पृथिवी भूमिसुन्दरी ॥ ६० ॥
अम्भोधितनयाऽलुप्ता जलजाची जलेश्वरी ।
अमूर्तिरम्मयी मारी जलस्था जलसुन्दरी ॥ ६१ ॥
तेजस्विनी महोधात्री तैजसी सूर्यविम्बगा ।
सूर्यकान्तिः सूर्यतेजास्तेजोरूपैकसुन्दरी ॥ ६२ ॥
वायुग्राह्या वायुमुखी वायुलोकैकसुन्दरी ।
गगनस्था खेचरेशी शून्यरूपा निराकृतिः ॥ ६३ ॥
निराभासा भासमाना द्युतिराकाशसुन्दरी ।
क्षितिमूर्तिधराऽनन्ता क्षितिभूर्लोकसुन्दरी ॥ ६४ ॥
अब्धियाना रत्नशोभा वरुणेशी वरायुधा ।
पाशहस्ता पोषणा च वरुणेश्वरसुन्दरी ॥ ६५ ॥
अनलैकरुचिज्योतिः पञ्चानिलगतिस्थितिः ।
प्राणापानसमानेच्छा चोदानव्यानरूपिणी ॥ ६६ ॥
पञ्चवातगतिर्नाडीरूपिणी वातसुन्दरी ।
अग्निरूपा वह्निशिखा वडवानलसन्निभा ॥ ३७ ॥
हेतिर्हाविर्हुतज्योतिरग्निजा वह्निसुन्दरी ।
सोमेश्वरी सोमकला सोमपानपरायणा ॥ ६८ ॥
सौम्याननना सौम्यरूपा सोमस्था सोमसुदन्री ।
सूर्यप्रभा सूर्यमुखी सूर्यजा सूर्यसुन्दरी ॥ ६९ ॥
याज्ञिकी यज्ञभागेच्छा यजमानवरप्रदा ।
याजकी यज्ञविद्या च यजमानैकसुन्दरी (५००) ॥ ७० ॥
आकाशगामिनी वन्द्या शब्दजाकाशसुन्दरी ।
मीनप्रिया मीननेत्रा मीनाशा[1] मीनसुन्दरी ॥ ७१ ॥

---

[1] 'मानास्या' घ पाठः ।

कूर्मपृष्ठगता कूर्मी कूर्मजा कूर्मरूपिणी ।
वाराही वीरमूर्त्तिर्ज्ञा वरारोहा मृगेक्षणा ॥ ७२ ॥
वराहमूर्तिर्वाचाला दंष्ट्रा वराहसुन्दरी ।
नरसिंहाकृतिर्देवी दुष्टदैत्यनिसूदिनी ॥ ७३ ॥
प्रद्युम्नवरदा नारी नरसिंहैकसुन्दरी ।
वामजा वामनाकारा नारायणपरायणा ॥ ७४ ॥
बलिदानवदर्पघ्नी वाम्या वामनसुन्दरी ।
रामप्रिया रामकीर्तिः क्षत्रवंशक्षयङ्करी ॥ ७५ ॥
[1]दनुपुत्री राजकन्या रामा परशुधारिणी ।
भार्गवी भार्गवेष्टा च जामदग्न्यवरप्रदा ॥ ७६ ॥
कुठारधारिणी रात्रिर्जामदग्न्यैकसुन्दरी ।
सीतालक्ष्मणसेव्या च रक्षःकुलविनाशिनी ॥ ७७ ॥
रामप्रिया च शत्रुघ्नी शत्रुघ्नभरतेष्टदा ।
लावण्यामृतधाराढ्या लवणासुरघातिनी ॥ ७८ ॥
लोहितास्या प्रसन्नास्या स्वारामा रामसुन्दरी ।
कृष्णकेशा कृष्णमुखी यादवान्तकरी लया ॥ ७९ ॥
यादोगणार्चिता योज्या राधाश्रीकृष्णसुन्दरी ।
बुद्धप्रसूर्बुद्धदेवी जिनमार्गपरायणा ॥ ८० ॥
जितक्रोधा जितालस्या जिनसेव्या जितेन्द्रिया ।
जिनवंशधरोग्रा च नीलान्ता बुद्धसुन्दरी ॥ ८१ ॥
काली कोलाहलप्रीता प्रेतवाहा सुरेश्वरी ।
कल्किप्रिया कम्बुधरा कालिकालैकसुन्दरी ॥ ८२ ॥
विष्णुमाया ब्रह्ममाया शाम्भवी शववाहना ।

---

१ 'रामकला' च पाठ. । २ 'अदनुपुत्री' च पाठ. ।

इन्द्रावरजवक्षःस्था स्थाणुपत्नी पलालिनी ॥ ८३ ॥
जृम्भिणी जृम्भहन्त्री च जृम्भमाणकचालकाः ।
कुलाकुलपदेशानी पददानफलप्रदा ॥ ८४ ॥
कुलवागीश्वरी कुल्या कुलजा कुलसुन्दरी ।
पुरन्दरेष्टा तारुण्यालया पुण्यजनेश्वरी ॥ ८५ ॥
पुण्योत्साहा पापहन्त्री पाकशासनसुन्दरी ।
सूर्यकोटिप्रतीकाशा सूर्यतेजोमयी सती ॥ ८६ ॥
लेखिनी भ्राजिता रज्जुरूपिणी सूर्यसुन्दरी (६००) ।
चन्द्रिका च सुधाधारा ज्योत्स्ना शीताशुसुन्दरी ॥ ८७ ॥
लोलाक्षी च शताक्षी च सहस्राक्षी सहस्रपात् ।
सहस्रशीर्षा चेन्द्राक्षी सहस्रभुजवल्लिका ॥ ८८ ॥
कोटिरत्नांशुशोभा च शुभ्रवस्त्रा शताननाः ।
शतानन्दा श्रुतिधरा पिङ्गला चोग्रनादिनी ॥ ८९ ॥
सुपुत्रा हारकेयूरनूपुरारावसङ्कुला ।
घोरनादा घोरमुखी चोन्मुखी चोल्मुकायुधा ॥ ९० ॥
गोपिता गूर्जरी गाथा गायत्री मदवल्लभा ।
वल्लकीस्वननादा च नादविद्या नदीतटी ॥ ९१ ॥
बिन्दुरूपा चक्रयोनिर्बिन्दुनादस्वरूपिणी ।
चक्रेश्वरी भैरवेशी महाभैरवबल्लभा ॥ ९२ ॥
कालभैरवभार्या च कल्पान्तरहनर्तकी ।
प्रलयानलपुञ्जाभा योनिमण्डलवासिनी ॥ ९३ ॥
भूचरी खेचरीमुद्रा नवमुद्रानिलासिनी ।
त्रियोगिनी श्मशानस्था श्मशानार्चनतोषिता ॥ ९४ ॥

---

१ कपालिनी ता ३ । २ ४ ८ [illegible] ३ ५ ७ ९ ११ १२ १३ ५ ७ १५

भास्वराङ्गी भगशिखा भगवामाङ्गवासिनी ।
भद्रकाली विश्वकाली श्रीकाली मेघकालिका ॥ ९५ ॥
नीरकाली कालरात्रिः काली कामेशकालिका ।
इन्द्रकाली पूर्वकाली पश्चिमाम्नायकालिका ॥ ९६ ॥
श्मशानकालिका भद्रकाली श्रीकृष्णकालिका ।
क्रींकारोत्तरकाली श्रींहूंदक्षिणकालिका ॥ ९७ ॥
सुन्दरी त्रिपुरेशानी त्रिकूटा त्रिपुरार्चिता ।
त्रिनेत्रा त्रिपुराध्यक्षा त्रिपुटा पुटभैरवी ॥ ९८ ॥
त्रिलोकजननी त्रेता महात्रिपुरसुन्दरी ।
कामेश्वरी कामकला कालकामशसुन्दरी ॥ ९९ ॥
यक्षरी यक्षरीदेवी भावना भुवनेश्वरी ।
एकाक्षरी चतुष्कूटा त्रिकूटेशी लयेश्वरी ॥ १०० ॥
चतुर्वर्णा च वर्णेशी वर्णाढ्या चतुरक्षरी ।
पञ्चाक्षरी च पङ्क्त्या षट्कूटा च षडक्षरी ॥ १०१ ॥
सप्ताक्षरी नवाक्षरी परमाष्टाक्षरेश्वरी ।
नवमी पञ्चमी षष्ठी नागेशी च नवाक्षरी ॥ १०२ ॥
दशाक्षरी दशास्येशी देविरेकादशाक्षरी ।
द्वादशादित्यसङ्काशा (७००) द्वादशी द्वादशाक्षरी ॥ १०३ ॥
त्रयोदशी वेदगर्भा बाधा त्रयोदशाक्षरी ।
चतुर्दशाक्षरी विद्या विद्यापञ्चदशाक्षरी ॥ १०४ ॥
षोडशी सर्वविद्येशी महाश्रीषोडशाक्षरी ।
महाश्रीषोडशीविद्या चिन्तामणिमनुप्रिया ॥ १०५ ॥
द्वात्रिंशत्यक्षरी श्यामा महाकालकुटुम्बिनी ।
वज्रतारा कालतारा नारी तारोग्रतारिणी ॥ १०६ ॥
कामतारा शब्दतारा 'स्पर्शतारा' रसाश्रया ।

रूपतारा गन्धतारा महानीलसरस्वती ॥ १०७ ॥
कालज्वाला वह्निज्वाला ब्रह्मज्वाला जटाकुला ।
विष्णुज्वाला जिष्णुशिखा भद्रज्वाला करालिनी ॥ १०८ ॥
विकरालमुखीदेवी करालीं भूतिभूषणा ।
चिताशयासना चिन्ता चितामण्डलमध्यगा ॥ १०९ ॥
भूतभैरवसेव्या च भूतभैरवपालिनी ।
बन्धकी बद्धसंमुद्रा भवबन्धविनाशिनी ॥ ११० ॥
भवानी देवदेवेशी दीक्षा दीक्षितपूजिता ।
साधकेशी सिद्धिदात्री साधकानन्दवर्धिनी ॥ १११ ॥
साधकाश्रयभूता च साधकेष्टफलप्रदा ।
रजोवती राजसी च रजकी च रजस्वला ॥ ११२ ॥
पुष्पप्रिया पुष्पवती स्वयम्भूपुष्पमालिका ।
स्वयम्भूपुष्पगन्धाढ्या पुलस्त्यसुतघातिनी ॥ ११३ ॥
पात्रहस्ता सुता पौत्री पीतास्या पीतभूषणा ।
पिङ्गानना पिङ्गकेशी पिङ्गला पिङ्गलेश्वरी ॥ ११४ ॥
मङ्गला मङ्गलेशानी सर्वमङ्गलमङ्गला ।
पुरुषेश्वरी पाशधरा चापधराऽधुरा ॥ ११५ ॥
पुण्यधात्री पुण्यमयी पुण्यलोकनिवासिनी ।
द्योतसेव्या हकारस्था सकारस्था सुखावती ॥ ११६ ॥
सखी शोभावती सत्या सत्याचारपरायणा ।
सतीशानकलेशानी वामदेवकलाश्रिता ॥ ११७ ॥
सद्योजातकलादेवी शिवाऽघोरकलाकृतिः ।
शर्वरी क्षीरसदृशी क्षीरनीरविवेकिनी (८००) ॥ ११८ ॥
वितर्कनिलया नित्या नित्यक्रिया परम्बिका ।
पुरारिदयिता दीर्घा दीर्घनासाऽल्पभाषिणी ॥ ११९ ॥

काशिका कौशिकी कोरया कोशदा रूपवर्धिनी ।
तुष्टिः पुष्टिः प्रजाप्रीता प्राजिका पूजकप्रिया ॥ १२० ॥
प्रजावती गर्भवती गर्भपोषणपोषिता[1] ।
शुक्लवासाः शुक्लरूपा शुचिवासा जयावहा ॥ १२१ ॥
जानकी जन्यजनका जनतोषणतत्परा ।
वादप्रिया वाद्यरता वादिता वादसुन्दरी ॥ १२२ ॥
वाक्स्तम्भिनी क्षीरवाणी धीराधीरा धुरन्धरा ।
सनन्धयी सामिधेनी निरानन्दा निरालगा ॥ १२३ ॥
समस्तसुखदा सारा वारानिधिवरप्रदा ।
वालुकी वीरपानेप्सा वसुधात्री वसुप्रिया ॥ १२४ ॥
शुक्रनान्दा शुक्ररसा शुक्रपूज्या शुक्रप्रिया ।
शुक्री च शुक्रहस्ता च समस्तनरकान्तका ॥ १२५ ॥
समस्तवनिलया भगरूपा भगेश्वरी ।
भगविम्बा भगाह्वया भगलिङ्गस्वरूपिणी ॥ १२६ ॥
भगलिङ्गेश्वरी श्रीदा भगलिङ्गामृतस्रवा ।
क्षीराशना क्षीरुचिराज्यपानपरायणा ॥ १२७ ॥
मधुपानपरा प्रौढा पीवरास्या परपरा ।
पिलम्पिला पटोलेशा पाटलारुणलोचना ॥ १२८ ॥
क्षीराम्बुधिप्रिया क्षीरा सरला सरलायुधा ।
सगामा सुनया स्रस्ता सद्गतिः सनकेश्वरी ॥ १२९ ॥
कन्या कनकरेखा च कान्यकुब्जनिवासिनी ।
काञ्चनाभतनुः काष्ठा दुष्टरोगविनाशिनी ॥ १३० ॥
कट्वङ्गधर्वना कुन्ती कुन्तायुधधरा प्रतिः ।

---

१ पुत्रिका । २ पाठ । ३ पाठ । ४ पाठ ।

चर्माम्बरा क्रूरनखा चकोराक्षी चतुर्भुजा ॥ १३१ ॥
चतुर्वेदप्रिया चाण्डी चतुर्वर्गफलप्रदा ।
ब्रह्माण्डचारिणी स्फूर्तिर्ब्रह्माणी ब्रह्मसंमता ॥ १३२ ॥
सत्कारकारिणी सूतिः सूतिका लतिकालता । (६००)
कल्पवल्ली कृपाङ्गी च कल्पपादपवासिनी ॥ १३३ ॥
कल्पपाशा महाविद्या विद्याराज्ञी सुखाश्रया ।
भूतिराज्ञी विश्वराज्ञी लोकराज्ञी शिवाश्रया ॥ १३४ ॥
ब्रह्मराज्ञी विष्णुराज्ञी रुद्रराज्ञी जटाश्रया ।
नागराज्ञी वंशराज्ञी वीरराज्ञी रजःप्रिया ॥ १३५ ॥
सत्यराज्ञी तमोराज्ञी गुणराज्ञी चलाचला ।
वसुराज्ञी सत्यराज्ञी तपोराज्ञी जपप्रिया ॥ १३६ ॥
मन्त्रराज्ञी वेदराज्ञी तन्त्रराज्ञी श्रुतिप्रिया ।
वेदराज्ञी[1] मन्त्रिराज्ञी दैत्यराज्ञी दयाकरा ॥ १३७ ॥
कालराज्ञी प्रजाराज्ञी तेजोराज्ञी हराश्रया ।
पृथ्वीराज्ञी पयोराज्ञी वायुराज्ञी मदालसा ॥ १३८ ॥
सुधाराज्ञी सुराराज्ञी भीमराज्ञी भयोज्झिता ।
तथ्यराज्ञी जयाराज्ञी महाराज्ञी कुलाकृतिः ॥ १३९ ॥
कामराज्ञी क्रीनराज्ञी हरिराज्ञी हलीश्वरी ।
परराज्ञी यक्षराज्ञी भूतराज्ञी शिवासना[2] ॥ १४० ॥
वह्निराज्ञी प्रेतराज्ञी शेषराज्ञी शमप्रदा ।
आकाशराज्ञी राजेशी राजराज्ञी रतिप्रिया ॥ १४१ ॥

---

१ 'कल्पशाखा' ग, पाठः । २ 'भद्र' ग पाठः । ३ 'रजःप्रिया' ग पाठः ।
४ 'देवराज्ञी मनोराज्ञी' ग पाठः । ५ 'शिवाकृतिः' ग पाठः ।
६ 'क्रीन' ग पाठः । ७ 'शासना' ग पाठः ।

पातालराज्ञी भूराज्ञी प्रेतराज्ञी विपापहा ।
सिद्धराज्ञी विभाराज्ञी तेजोराज्ञी विभामयी ॥ १४२ ॥
भास्वद्राज्ञी चन्द्रराज्ञी ताराराज्ञी खवासिनी ।
ग्रहराज्ञी लताराज्ञी वृक्षराज्ञी मतिप्रदा ॥ १४३ ॥
धीरराज्ञी मनोराज्ञी मनुराज्ञी च काश्यपी ।
मुनिराज्ञी रत्नराज्ञी युगराज्ञी मणिप्रभा ॥ १४४ ॥
सिन्धुराज्ञी नदीराज्ञी नदराज्ञी दरीस्थिता ।
विन्दुराज्ञी नादराज्ञी आत्मराज्ञी च सद्गतिः ॥ १४५ ॥
पुत्रराज्ञी ध्यानराज्ञी लयराज्ञी सदीश्वरी[1] ।
ईशानराज्ञी राजेशी स्वाहाराज्ञी महत्तरा ॥ १४६ ॥
यक्षिराज्ञी योगिराज्ञी[2] यज्ञराज्ञी चिदाकृतिः ।
जगद्राज्ञी तत्त्वराज्ञी वाग्राज्ञी विश्वरूपिणी ॥ १४७ ॥
पञ्चदशाक्षरीराज्ञी ऊर्द्धीभूतेश्वरेश्वरी । (१०००)
इतीदं मन्त्रसर्वस्वं राज्ञीनाममहस्रकम् ॥ १४८ ॥
पञ्चदशाक्षरीतत्त्वं मन्त्रसारं मनुप्रियम् ।
सर्वतत्त्वमयं पुण्यं[3] महापातकनाशनम् ॥ १४९ ॥
सर्वसिद्धिप्रदं लोके सर्वरोगनिबर्हणम् ।
सर्वोत्पातप्रशमनं ग्रहशान्तिकरं परम् ॥ १५० ॥
सर्वदेवप्रियं प्राज्ञं सर्वशत्रुभयापहम् ।
सर्वदुःखौघशमनं सर्वशोकविनाशनम्[4] ॥ १५१ ॥
पठेद्वा पाठयेन्नाम्ना सहस्रं शक्तिसंनिधौ ।
दूरादेव पलायन्ते विपदः शत्रुभीतयः ॥ ४५२ ॥
राक्षसा भूतवेतालाः पन्नगा हरिणद्विषः ।

---

[1] 'सदश्वरी' ख पाठ । २ 'यागराज्ञी' ख पाठ । ३ 'पूज्य' ख पाठ. । [4] 'जाम' ख पाठ ।

पठनाद्विद्रवन्त्याशु महाकालादिव प्रजाः ॥ १५३ ॥
श्रवणात्पातकं नश्येच्छ्रावयेद्यः[1] भाग्यवान् ।
(नानाविधानि भोगानि संभुज्य पृथिवीतले ॥ १५४ ॥)
गमिष्यति परां भूमिं त्वरितं नात्र संशयः ।
अश्वमेधसहस्रस्य वाजिपेयस्य कोटयः ।
गङ्गास्नानसहस्रस्य चान्द्रायणायुतस्य च ॥ १५५ ॥
तप्तकृच्छ्रैकलक्षस्य राजसूयस्य कोटयः ।
सहस्रनामपाठस्य कलां नार्घन्ति षोडशीम् ॥ १५६ ॥
सर्वसिद्धीश्वरं साध्यं राज्ञीनामसहस्रकम् ।
मन्त्रगर्भं पठेद्यस्तु राज्यकामो महेश्वरि ॥ १५७ ॥
वर्षमेकं शतावर्तं महाचीनक्रमाकुलः ।
शक्तिपूजापरो रात्रौ स लभेद्राज्यमीश्वरि ॥ १५८ ॥
पुत्रकामी पठेत् सायं चिताभस्मानुलेपनः ।
दिगम्बरो मुक्तकेशः शतावर्तं महेश्वरि ॥ १५९ ॥
श्मशाने तु लभेत् पुत्रं साक्षाद्वैश्रवणोपमम् ।
परदारार्चनरतो भगबिम्बं स्मरन् सुधीः ॥ १६० ॥
पठेन्नामसहस्रं तु वसुकामी लभेद् धनम् ।
रवौ वारत्रयं देवि पठेन्नामसहस्रकम् ॥ १६१ ॥
मृदुविष्टरनिर्विष्टः क्षीरपानपरायणः ।
स्वप्ने सिंहासनां राज्ञीं वरदां भुवि पश्यति ॥ १६२ ॥
वीरचर्वणसन्तुष्टो वीरपानरसाकुलः ।
यः पठेत् परया भक्त्या राज्ञीनामसहस्रकम् ॥ १६३ ॥
स सद्यो मुच्यते घोरान्महापातकजात्रयात् ।
यः पठेत् साधको भक्त्या शक्तिचक्रःकृतासनः ॥ १६४ ॥

---

1 'समाहित,' ख पाठ ।

शुक्रोत्तरणकाले तु तस्य हस्तेऽष्टसिद्धयः ।
यः पठेन्निशि चक्राग्रे परस्त्रीध्यानतत्परः ॥ १६५ ॥
सुरासवरसानन्दी स लभेत् संयुगे जयम् ।
इदं नामसहस्रं तु सर्वमन्त्रमयं शिवे ॥ १६६ ॥
भूर्जत्वचि लिखेद्रात्रौ चक्रार्चनसमागमे ।
अष्टगन्धेन पूतेन वेष्टयेत् स्वर्णपत्रके ॥ १६७ ॥
धारयेत् कण्ठदेशे तु सर्वसिद्धिः प्रजायते ।
यो धारयेन्महारत्नां सर्वदेवातिदुर्लभाम् ॥ १६८ ॥
रणे राजकुले द्यूते चौररोगाद्युपद्रवे ।
स प्राप्नोति जयं सद्यः साधको वीरनायकः ॥ १६९ ॥
श्रीचक्रं पूजयेद्यस्तु धारयेद्वर्म मस्तके ।
पठेन्नामसहस्रं तु स्तोत्रं मन्त्रात्मकं तथा ॥ १७० ॥
किं किं न लभते काम देवानामपि दुर्लभम् ।
सुरापानं ततः संविच्चर्वणं मीनमांसकम् ॥ १७१ ॥
नवकन्यासमायोगो मुद्रा वीणारवः प्रिये ।
सत्सङ्गो गुरुसांनिध्यं राज्ञीश्रीचक्रमग्रतः ॥ १७२ ॥
यस्य देवि स एव स्याद्योगी ब्रह्मविदीश्वरः ।
इदं रहस्यं परमं भक्त्या तव मयोदितम् ॥ १७३ ॥
अश्रद्धाकारयमदातव्यं न देयं यस्य कस्यचित् ।
अन्यशिष्याय दुष्टाय दर्जनाय दुरात्मने ॥ १७४ ॥
गुरुभक्तिविहीनाय सुरास्त्रीनिन्दकाय च ।
नास्तिकाय कुशीलाय न देय तत्त्वदर्शिभिः ॥ १७५ ॥
देय शिष्याय शान्ताय भक्तायाद्वैतवादिने ।
दीक्षिताय कुलीनाय राज्ञीभक्तिरताय च ॥ १७६ ॥

---

१ 'परस्या' ख पाठ ।

दत्त्वा भोगापवर्गत्वं लभेत् साधकसत्तमः ।
इति नामसहस्रे तु राज्ञ्याः शिवमुखोदितम् ।
अत्यन्तदुर्लभं गोप्यं गोपनीयं स्वयोनिवत् ॥ १७७ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीमहाराज्ञीसहस्रनामकम् ॥ ४ ॥

अथ

श्रीमहाराज्ञीस्तोत्रम् ।

श्रीभैरव उवाच ।

अधुना कथयिष्यामि स्तोत्रराजं परात्मकम् ।
मूलमन्त्रमयं दिव्यं तत्त्वभूतं मनोहरम् ॥ १ ॥
राज्ञीप्रियं पापहरं लक्षपूजाफलप्रदम् ।
जपलक्षसमं स्तोत्रं ध्यानकोटिसमं प्रिये ॥ २ ॥
राज्ञीस्तोत्रस्य देवेशि ब्रह्मा ऋषिरुदाहृतः ।
गायत्रं छन्द इत्युक्तं श्रीराज्ञी देवतेरिता ॥ ३ ॥
माया बीजं परा शक्तिः कामः कीलकमीश्वरि ।
भोगापवर्गसिद्ध्यर्थे विनियोगः प्रकीर्तितः ॥ ४ ॥

अस्य श्रीमहाराज्ञीस्तवराजमन्त्रस्य ब्रह्मा ऋषि गायत्र छन्दः श्रीभूतेश्वरीमहाराज्ञी देवता ह्रींबीज सा शक्ति क्लीं कीलक भोगापवर्गसिद्धये विनियोग । ब्रह्मऋषये नम शिरसि, गायत्रं छन्दसे नमो मुखे, श्रीराज्ञीभूतेश्वरीदेवतायै नमो हृदि, ह्रींबीजाय नमो नाभौ, मां शक्तये नमो गुह्य, क्लींकीलकाय नम पादयो, विनियोगाय नम.

सर्वाङ्गेषु । ध्यानम्—

उद्यद्दिवाकरसहस्ररुचिं त्रिनेत्रां
सिंहासनोपरि गतामुरगोपवीताम् ।
खड्गाम्बुजाढ्यकलशामृतपात्रहस्तां
राज्ञीं भजामि विकसद्वदनारविन्दाम् ॥ १ ॥
तारमिन्दुकलिकावतंसितं
वेदसागरमणिं मनोहरम् ।
यो जपेदुपसि रत्नमालया
राज्यमाशु लभते स साधकः ॥ २ ॥
भूतिमिन्दुनवबिन्दु (म्ब) मण्डितां
नादबिन्दुललितां जपेत्तु यः ।
वीरमेकमुरुवारणस्थितो
जेष्यति स्मयमयानरीन् रणे ॥ ३ ॥
रमां जपेद्यो भुवनेशि मन्त्री
तन्मन्त्रमध्ये मदनोपतप्तः ।
रम्भां समालिङ्ग्य विमानचारी
लीलां भजेन्नन्दनवाटिकायाम् ॥ ४ ॥
वह्निबीजमणिमादिसिद्धिदं
बिन्दुबिम्बशशिखण्डमण्डितम् ।
यो जपेन्निशि धनाभिलाषवान्
स क्षणाद्भवति वित्तदोपमः ॥ ५ ॥
कामराजममराभिवन्दितो
यो जपेन्निभुवनेऽब्जमालया ।

---

१ 'वारमेकसुरवारणस्थितो' क पाठः ।

तस्य यान्ति वशतां सुराङ्गनाः
किं पुनर्जगति भूभृदङ्गनाः ॥ ६ ॥
शक्तिं भक्त्या यो जपेच्छक्तिपूजा-
काले कालीपादपद्मार्पितान्तः ।
नक्तं तस्य स्मेरवक्त्रा घृताची
वेश्या वश्या स्वर्गता वा शची च ॥ ७ ॥
भगवत्यै तथा राज्ञ्यै नाममन्त्रमिति स्मरेत् ।
यो देवि तस्य वश्याः स्युर्भैरवस्याष्टसिद्धयः ॥ ८ ॥
मायार्णमन्ते यदि साधकेन्द्रो
जपेन्महेशानि शवालयस्थः ।
तत्रैव देवीं परमार्थराज्ञीं
पश्येत् स सद्यो वरसिद्धिदात्रीम् ॥ ९ ॥
वद्वयं यदि जपेन्निशात्रये
चीरभृद्[1] सुतटिनीतटास्थितः ।
विष्णुविष्णुकमलासनेश्वरा
यान्ति देवि वशतां तदा क्षणात् ॥ १० ॥
भूगेहवृत्तत्रयनागपत्र-
षडश्रयोन्यश्रकविन्दुबिम्बे ।
निषेदुषीं राजकुलाधिदेवीं
राज्ञीं भजे राजकुलावतंसाम् ॥ ११ ॥
देवि श्रीभूतधात्रि प्रवरगुणमये निष्कले निर्गुणे मे[2]
माये मातः शरण्ये गिरिवरतनये चिन्मये तत्त्वरूपे ।
दुर्गे चण्डि प्रमत्ते त्रिपुरविजयिनि स्मेरवक्त्रे वरेण्ये
कारुण्याढ्ये प्रशस्ते सुरदितिजनुते राज्ञि त्वं वै प्रसीद ॥ १२ ॥

---

१ 'स्व' इ. ग. पाठः । २ 'मे' ग. पाठः ।

इति स्तोत्रं मन्त्रस्फुरणकरुणानन्दनिलयं
पठेद्भक्त्या प्रातस्तव गिरिसुते यो निरलसम् ।
भवेत् सद्यो भूमौ नृपमुकुटनीराजितपदो
मृतो मुक्तिं मर्त्यस्तव भवनमाप्नोति वरदे ॥ १३
इति राज्ञ्याः परं तत्त्वं पञ्चाङ्गमखिलं शिवे ।
सर्वस्वं च रहस्यं मे सर्वसारस्वतप्रदम् ॥ १४ ॥
आनन्दवर्धनं गुह्यं परमैश्वर्यकारणम् ।
भोगापवर्गदं पुण्यं दारिद्र्यभयनाशनम् ॥ १५ ॥
राज्यप्रदं भक्तिकरं सर्वशत्रुनिवर्हणम् ।
पञ्चाङ्गमखिलं देव्या न वक्तव्यं दुरात्मने ।
तव भक्त्या मयाख्यातं गोपनीयं प्रयत्नतः ॥ १६ ॥

श्रीदेव्युवाच ।

भगवन् करुणाम्भोधे क्रीतास्मि भवताधुना ।
दास्यस्मि तव भक्तास्मि कृतार्थास्मि जगत्प्रभो ॥ १७ ॥
पञ्चाङ्गकथनेनास्या राज्ञ्या देव्या महेश्वर ।
भवत्प्रसादाद् देव्यस्मि किमन्यत् कथयामि ते ॥ १८ ॥

श्रीभैरव उवाच ।

इदं रहस्यं पञ्चाङ्गं राज्ञीदेव्या मयेरितम् ।
कौलानां सिद्धिदं वामाद्गोपनीयं स्वयोनिवत् ॥ १९ ॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये
श्रीमहाराज्ञीस्तोत्रम् ॥ ५ ॥

समाप्तमिदं श्रीमहाराज्ञीपञ्चाङ्गम् ।

अथ

बालात्रिपुरापञ्चाङ्गम्

बालापटलम् ।

कैलासशिखरासीनं भगवन्तमुमापतिम् ।
चन्द्रार्धमुकुटं देवं सोमसूर्याग्निलोचनम् ॥ १ ॥
गजचर्मपरीधानं विरूपाक्षं सुरार्चितम् ।
गणगन्धर्वयक्षेन्द्र-देवासुरनमस्कृतम् ॥ २ ॥
विहसन्तं जपन्तं च पठन्तं च मुहुर्मुहुः ।
उत्थाय प्रणता भूत्वा चेदं पृच्छति भैरवी ॥ ३ ॥

श्रीभैरवी ।

भगवन् करुणाम्भोधे सर्वागमविशारद ।
त्वत्प्रसादान्मया सर्वाः श्रुता विद्याः सुरेश्वर ॥ ४ ॥
इदानीं श्रोतुमिच्छामि बालां त्रिपुरसुन्दरीम् ।
देयास्ति[1] यदि मे देव वद विद्यां महेश्वर ॥ ५ ॥

श्रीभैरवः ।

शृणु देवि प्रवक्ष्यामि पञ्चाङ्गं साधकेष्टदम् ।
पटलं पद्धतिं वर्म तथा नाम्नां सहस्रकम् ॥ ६ ॥
स्तवराजं महादेवि शृणुष्वैकाग्रमानसा ।
श्रीबाला परमेशानी भुक्तिमुक्तिप्रदायिनी ॥ ७ ॥

---

[1] 'दयास्ति' ग. 'देयास्मि' ख पाठ. ।

राज्यं देयं शिरो देयं गृहं लक्ष्मीयुतं तथा
सर्वं देयं महादेवि न देयमिदमुत्तमम् ॥ ८ ॥
अस्या विद्यायाः सदृशी विद्या नान्या कलौ युगे ।
श्रीबालात्रिपुराविद्या शीघ्रं सिद्धिप्रदा स्मृता ॥ ९ ॥
देया शिष्याय शान्ताय गुरुभक्तिरताय च ।
नाभक्ताय प्रदातव्या विद्येयं परमेश्वरि ॥ १० ॥
मन्त्रोद्धारं तथा यन्त्रं प्रस्तार ध्यानमेव च ।
प्रयोगान् संप्रवक्ष्यामि देवदेव्या महेश्वरि ॥ ११ ॥
प्रथमं शृणु देवेशि मन्त्रोद्धारं फलप्रदम् ।
गोपनीयं प्रयत्नेन येन सिद्धिः प्रजायते ॥ १२ ॥
वाग्भवं कामराजश्च शक्तिमध्येऽभिधं न्यसेत् ।
नमोऽन्ते देवि बालाया मन्त्रोऽयं चाष्टवर्णकः ॥ १३ ॥
नापि विघ्नो न चाशौचो न चारनियमस्तथा ।
स्वयं सिद्धो महादेवि मन्त्रराजः कलौ युगे ॥ १४ ॥
दक्षिणामूर्तिपङ्क्त्यौ च मुनिरछन्दः क्रमात् स्मृतम् ।
देवता त्रिपुरा बाला आद्यन्ते बीजशक्तिके ॥ १५ ॥
क्लीं कीलकं समादिष्टं धर्मकामार्थमुक्तये ।
शिरसि वदने देवि हृदये गुह्यदेशके ॥ १६ ॥
पादयोर्नाभिकमले सर्वाङ्गे च तथा न्यसेत् ।
ऋष्यादिकं महादेवि कुर्यान्न्यासत्रिकल्पनाम् ॥ १७ ॥
करन्यासं षडङ्गं च बीजैः कुर्यान्महेश्वरि ।
अस्या ध्यानं प्रवक्ष्यामि साधकानां हितप्रदम् ॥ १८ ॥

रक्ताम्बरा चन्द्रकलावतंसा
समुद्यदादित्यनिभा त्रिनेत्राम् ।

विद्याक्षमालाभयदानहस्तां
ध्यायामि बालामरुणाम्बुजस्थाम् ॥ १९ ॥
इति ध्यात्वा महादेवीं जपेन्मन्त्रं सुसिद्धिदम् ।
लक्षत्रयं पुरश्चर्याविधौ साधकसत्तमः ॥ २० ॥
अथ वक्ष्यामि देवेशि यन्त्रोद्धारं सुदुर्लभम् ।
साधकस्य महादेव्या भुक्तिमुक्तिफलप्रदम् ॥ २१ ॥
बिन्दुत्रिकोणवसुकोणकनागपत्र-
वृत्तत्रयाञ्चितमहीसदनत्रयं च ।
बालादिचक्रमिदमार्तिहरं गिरीशे
ब्रह्मेन्द्रविष्णुनमितं गदितं मया ते ॥ २२ ॥
एवं विलिखिते यन्त्रे पीठशक्तीः प्रपूजयेत् ।
इच्छाज्ञानक्रियाश्चैव कामिनी कामदायिनी ॥ २३ ॥
रती रतिप्रियानन्दा मनोन्मन्यपि वौन्तिमा ।
पीठशक्तीरिमा इष्ट्वा पीठं तन्मनुना दिशेत् ॥ २४ ॥
व्योमपर्वततार्तीयं सदाशिवमहापदम् ।
पीठपद्मासनायान्ते नमोन्तः पीठमन्त्रकः ॥ २५ ॥
षोडशार्णस्ततो मूर्तौ क्लिन्नायां मूलमन्त्रतः ।
आवाह्य पूजयेद् देवीमुपचारैः पृथग्विधैः ॥ २६ ॥
देवीमिश्रा मध्ययोनौ त्रिकोणे मातृपूर्वकः ।
वामकोणे रतिं दत्ते प्रीतिमग्ने मनोभवाम् ॥ २७ ॥
योन्या तु वह्निकोणादावङ्गानि परिपूजयेत् ।
मध्ययोन्यां बहिः पूर्वदिक्षु चाग्ने स्मरान्तपि ॥ २८ ॥
क्षेत्रदेवीस्तद्वदेव शक्तीरष्टासु योनिषु ।
सुभगाख्या भगा पश्चात्तृतीया भगमालिनी ॥ २९ ॥

---

१ 'स्म' ख पाठः । २ 'मालिका' ग पाठ । ३ 'दिशि' ग पाठ ।

भगमाला तथानङ्गाद्यानङ्गकुसुमा परा ।
अनङ्गमेखलानङ्गमदनेत्यष्टशक्तयः ॥ ३० ॥
पद्मकेसरगा ब्राह्मीमुखाः पत्रेषु भैरवाः ।
दलाग्रेऽप्यष्ट पीठानि कामरूपाख्यमादिमम् ॥ ३१ ॥
मलयं कौलगिर्याख्यं चौहाराख्यं कुलान्तकम् ।
जालन्धरं तथौड्याणं देवकूटमथाष्टमम् ॥ ३२ ॥
भूगृहे च धरादिक्षु हेरुकं त्रिपुरान्तकम् ।
वेतालमग्निजिह्वं च कालान्तककपालिनौ ॥ ३३ ॥
एकपादं भीमरूप मलयं हाटकेश्वरम् ।
शक्राद्यानायुधैः सर्वैः स्वस्वदिक्षु सचर्मयेत् ॥ ३४ ॥
तद्बहिर्दिक्षु वटुकं योगिनीः क्षेत्रपालकम् ।
गणेशं विदिशासु वै वसून् सूर्यं शिवं तथा ॥ ३५ ॥
(सर्वभूतान् समभ्यर्च्य पूजयेदायुधांस्तथा) ।
बालां मध्ये विभाव्यादौ कामेश्वराङ्कमध्यगाम् ॥ ३६ ॥
मकारैः पञ्चभिः कौलः कौलाचारपरायणः ।
संपूजयेन्महादेवि साधको मन्त्रसाधकः ॥ ३७ ॥
बिन्दौ गन्धाक्षतैः पुष्पैर्धूपदीपादितर्पणैः ।
लयाङ्गमिदमाख्यातं प्रयोगाञ् शृणु पार्वति ॥ ३८ ॥
यान् विधाय मनुः शीघ्रं सिद्धिभाग् भवति ध्रुवम् ।
स्तम्भनं मोहनं चैव मारणाकर्षणे तथा ॥ ३९ ॥
वशीकार तथोच्चाट शान्तिक पौष्टिकं तथा ।
एतत्साधनमाचष्टे सारभूत मनोः प्रिये ॥ ४० ॥
अदेयं देव्यभक्ताय गोप्य गुह्यतम पशोः ।
(१) प्रतिपद्दिवसे देवि स्नात्वा कृत्वाह्निकीं क्रियाम् ॥ ४१ ॥

---

१ 'नायक' ख पाठः ।

मध्याह्ने निर्जनं गत्वा यथावदयुतावधि ।
होमो दशांशतः कार्यो घृतपायसवर्हकैः ॥ ४२ ॥
संतर्प्य देवताः सद्यः स्तम्भनं जायते ध्रुवम् ।
राजसूर्येन्दुवातानां दस्युवादिमुखेषु च ॥ ४३ ॥
२) दर्शे सायं श्मशाने तु जपेदुलूकविष्टरः ।
अयुतं तद्दशांशेन होमं सर्पिस्सुरान्वितैः ॥ ४४ ॥
कर्णिकेसरपद्माक्षैर्मोहनं जगतां भवेत् ।
(३) भूताख्ये वासरे देवि गत्वा प्रेतालयं निशि ॥ ४५ ॥
चिताग्रे संजपेद्विद्यां वीरेन्द्रः षोडशाक्षरीम् ।
अयुतं च हुनेन्मन्त्री चिताग्नौ घृतगुग्गुलम् ॥ ४६ ॥
चण्डालकेशसहितं म्रियते रिपुरुत्कटः ।
(४) अष्टम्यां शुक्लपक्षे तु जपेद्रहसि साधकः ॥ ४७ ॥
अयुतं मूलविद्याया ध्यात्वा कान्तां मनोगताम् ।
होमो दशांशतः सर्पिर्लाक्षापुष्पवतीरजः ॥ ४८ ॥
करीरपूलगोधूमैः स्त्रीणामाकर्षणं भवेत् ।
(५) नवम्यां साधकः स्नात्वा कृत्वा कर्माह्निकं प्रिये ॥ ४९ ॥
अयुतं घृतमत्स्यण्ड-पद्ममुक्तेणरोमभिः ।
होमो विधेयो वरिशै(१)र्वासवो दासतां व्रजेत् ॥ ५० ॥
(६) चतुर्थ्यां कृष्णपक्षे तु जपेच्चन्द्रोदये शिवे ।
नदीतीरे मनुं वीरोऽयुतं शीर्षासनस्थितः ॥ ५१ ॥
दशांशेन हुनेत्तत्र घृतनीलोत्पलत्वचः ।
लवङ्गमरिचाम्लादीन् रिपोरुच्चाटनं भवेत् ॥ ५२ ॥
(७) पञ्चम्यां निशि देवेशि जपेदयुतसंख्यया ।
हुनेद् दशांशतः सर्पिर्मत्स्यमत्स्यण्डखर्परान् ॥ ५३ ॥

---

१ 'नागकेसर' घ ङ. पाठ 'कनकेसर' ग पाठ ।

महामय-महाभीति-महोपद्रवशान्तये ।

(८) महाष्टम्यां नरः स्नात्वा पीठे श्रेष्ठे दशाधिकाम् ॥ ५४ ॥
वीरो दशाङ्कसाहस्रीं हुनेत्तत्र दशांशतः ।
घृतखर्जूरमृद्वीका-नागवल्लीदलस्रजः ॥ ५५ ॥
छागमांसं सरक्तं च महापुष्टिः प्रजायते ।
इदं रहस्यमाख्यातं सर्वतन्त्रनिरूपणम् ॥ ५६ ॥
सर्वस्वं मम देवेशि रहस्यं गोपयेत् कलौ ।
सूर्यादिवारेषु जपैर्दशसाहस्रसंख्यकैः ॥ ५७ ॥
सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा ।
इत्येष पटलो दिव्यः स्नेहात् तव प्रकाशितः ।
गोप्याद् गोप्यो गोप्यतरो गोपनीयः स्वयोनिवत् ॥ ५८ ॥

इति श्रीरुद्रयामले तन्त्रे भैरवभैरवीसंवादे
श्रीबालात्रिपुरसुन्दरीपटलः ॥ २ ॥

अथ

श्रीबालायाः पद्धतिः ।

अधुना कथयिष्यामि पद्धतिं गद्यरूपिणीम् ।
श्रीबालात्रिपुरेश्वर्यास्तन्त्रतः सौख्यदायिनीम् ॥ १ ॥

प्रातः कृत्यमकृत्वा तु यो देवीं भक्तितोऽर्चयेत् ।
तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥ २ ॥

धीमान् साधको ब्राह्मे मुहूर्ते शयनतलादुत्थाय करचरणमुखादि प्रक्षाल्य, बद्धपद्मासनः समुपविश्य स्वशिरःस्थसहस्रारादधोमुखकमलकर्णिकान्तर्गतं निजगुरुं स्वशक्त्या सहितं ध्यात्वा, मानसोपचारैः संपूज्य दण्डवत्कृत्वा, गुरुक्रमविधिना प्रातःकृत्यमजपाजपं च विधाय, स्वकार्यानुष्ठानाय भूमिं प्रार्थ्य श्वासानुसरेण तस्यां पादावुपन्यस्य, गृहाद्बहिर्निःसृत्य, नैर्ऋत्यां याम्यां वा दिशि मलमूत्रोत्सर्ग — शौचाचमन — दन्तधावनादिकं विधाय नद्यादौ गत्वा यैदिकं निर्वर्त्य तान्त्रिकमारभेत । तत्रादौ मूलयुक्ततत्त्वत्रयेणाचम्य, ह्रौंस्वाहा इत्यनेन वाचम्य, मूलं स्मरन् मलापकर्षणस्नानं विधाय, पुनराचम्य अघेलादिमासाद्युत्कीर्तनं विधाय, श्रीकुलदेवताप्रीतये तान्त्रिकविधिना स्नानमहं करिष्ये इति संकल्प्य, जले त्रिकोणचक्रं विभाव्य सूर्यमण्डलात् "गङ्गे च यमुने चैव" इत्यादिनाङ्कुशमुद्रया तीर्थमावाह्य, पुरःकल्पततीर्थे संयोज्याचम्य स्वात्मानं शोधय, मूलेन मृदा स्नानं विधाय, मूलं पठन्नावाहिता स्वदेवतां त्रिरभिषिच्य, श्रवणादिसप्तच्छिद्राणि निरुध्य त्रिर्निमज्योन्मज्जेदिति स्नानविधिः ॥

अथ संध्या । तत्र पूर्ववदाचम्य स्वमूलप्राणायामर्घ्यादिकरषडङ्गं विधाय पूर्ववत्तीर्थमावाह्य, वामहस्ते तज्जलं निधाय दक्षहस्तेनाच्छाद्य परंबलेहं इति पञ्चभौतिकमन्त्रेः सप्तवारमभिमन्त्र्य, मूलविद्यया त्रिरभिमन्त्र्य, तज्जलबिन्दुभिर्वामाङ्गुष्ठानामिकाभ्यां मूलविद्यया स्वशिरस्त्रिः प्रोक्ष्यावशिष्टजलं वामहस्ते निधाय, त्रिरभिमन्त्र्य मूलमुच्चरंस्तत्त्वमुद्रया मूर्ध्नि सप्तधा मूलेन च त्रिधाभ्युक्ष्य, शेषं जलं दक्षहस्ते समादाय तेजोरूपं ध्यात्वा, इडया देहान्तःपापं प्रक्षाल्य, कृष्णवर्णं तज्जलं पापरूपं पिङ्गलया विरिच्य वामे कल्पितवज्रशिलायां स्फोटिति निःक्षिपेत् । ततोऽर्घ्यं विधाय, ॐहांहींस श्रीमार्तण्डभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं परिकल्पयामि स्वाहा' इति त्रिरर्घ्यं कुलसूर्याय दत्त्वा, क्षुत्पश्चात् सूर्यमण्डले मूलदेवीं नीत्वा तत्र विधिवद्ध्यात्वा, ॐ वाग्भवं त्रिवह्नि क्लीं कामेश्वर्यै धीमहि सौ तन्नः शक्तिः प्रचोदयात्, इत्यनया मूलगायत्र्या चतसृषु सन्ध्यासु सूर्यमण्ड-

ले मूलदेव्यै अर्घ्यं दत्त्वा यथाशक्ति जपेत् । ततश्चतसृषु संध्यासु क्रमशो मूलाधार—हृत्कमल—भ्रूमध्य—ब्रह्मरन्ध्रेभ्यो देवीतेजः समाकृष्य इडया विरेच्य, कल्पितवह्निसूर्यचन्द्रतारामण्डलेषु निक्षिप्य तत्र बालयौवनप्रौढचिद्रूपां देवीं ध्यात्वा, ततः ऐं त्रिपुरादेव्यै विद्महे वागीश्वर्यै धीमहि तन्नो सुक्तिः प्रचोदयात्, इति प्रातः । क्लीं त्रिपुरादेव्यै विद्महे कामेश्वर्यै धीमहि तन्नः क्लिन्ना प्रचोदयात्, इति मध्याह्ने । सौः त्रिपुरादेव्यै विद्महे शक्तीश्वर्यै धीमहि तन्नोऽमृते प्रचोदयात्, इति सायं । ऐं वागीश्वर्यै विद्महे क्लीं कामेश्वर्यै धीमहि सौः तन्नः शक्तिः प्रचोदयात्, इति अर्धरात्रे । इति स्वस्वगायत्र्यार्घ्यं दत्त्वा यथाशक्ति स्वस्वगायत्रीं च जप्त्वा, पुनर्मूलगायत्रीं च जप्त्वा स्वस्ववीजाक्षरं सर्वं मूलं च जप्त्वा, प्राणायामादिना जपं समर्प्य मण्डलेभ्यो देवीतेजः स्वस्थाने देवीं च हृद्यानीय ध्यायेदिति संध्याविधिः ॥

ततस्तर्पणम् । तत्र पूर्ववदाचम्य प्राणायामादि कृत्वा तीर्थमावाह्य, मूलेन जलं सप्तधामृतमुद्रयामृतीकृत्य तत्र जले यन्त्रं ध्यात्वा, तत्र देवीं हृदयात् सपरिवारामानीय षडङ्गयोगेन सकलीकृत्य कुण्डलिन्याः प्रयोगेणामृतेनाभिषिच्य विधिवत् प्रपूज्य, ऐशान्यां ॐ श्रीकौलानन्दनाथभैरवस्तृप्यताम् इति त्रिः सतर्प्य, ब्रह्मौ ॐ परमगुरुं, नैर्ऋत्यां ॐ परमाचार्यं, वायव्ये ॐ परमेष्ठिगुरुं, त्रिः सकृद्वा संतर्प्य, दिव्यौघसिद्धौघमानवौघानपि गुरून् सतर्प्य जले यन्त्रं विभाव्य, मूले कामेश्वरसहिता बालात्रिपुरा वागीश्वरी तृप्यतामिति त्रिः संतर्प्य परिवारानपि संतर्प्य, प्राणायामादि विधाय देवीं स्वहृदि विसृजेत् तीर्थं च स्वस्थाने विसृजेदिति तर्पणम् ॥

ततो यागगेहमागत्य जलादिना द्वारदेवताः पूजयेत् । ॐ धात्रे नमः, ॐ विधात्रे नमः, दक्षे । गङ्गायै नमः, य यमुनायै नमः, वामे । द्वाराधिपै नमः वास्तुपुरुषाय नम ऊर्ध्वे । देहल्यै नमः इत्यधः संपूज्य, स्वासनमास्तीर्य 'ह्रीं आधारशक्तिकमलासनाय नमः' इति संपूज्य वीराद्यासनेनोपविश्य, "पृथ्वि त्वया धृता लोकाः" इत्यादिना पृथिवीं प्रार्थ्य, मण्डूकाय नमः, कालाग्निरुद्राय० । ह्रींआधारशक्तिकमलासनाय० । ह्रींपीठात्मनाय० । इत्यासनं संपूज्य, तदुपरि समुपविश्य, सविद यथामन्त्रं स्वीकुर्यात् । तद्विधिर्यथा—

द्रां क्षोभणबाणाय नमः अङ्गुष्ठयोः, द्रीं द्रावणबाणाय नमः तर्जन्योः, क्लीं आकर्षणबाणाय नमो मध्यमयोः, ब्लूं वशीकरणबाणाय नमः अनामिकयोः, इति बाणन्यासः ॥

सौः कामाय नमः अङ्गुष्ठयोः, क्लीं मन्मथाय नमः तर्जन्योः, ऐं कन्दर्पाय नमो मध्यमयोः, ब्लूं मकरध्वजाय नमः अनामिकयोः, स्त्रीं मनकेतवे नमः कनिष्ठिकयोः, इति कामकरन्यासः ॥

अथ स्वमूलकरन्यासः । ऐं अङ्गुष्ठाभ्यां नमः, क्लीं तर्जनीभ्यां, सौः मध्यमाभ्यां, ऐं अनामिकाभ्यां, क्लीं कनिष्ठिकाभ्यां, सौः करतलपृष्ठाभ्यां नमः । एव हृदयादिन्यासः । ततोऽन्तर्मातृकान्यासं बहिर्मातृकान्यासं च कृत्वा मातृकाविद्यान्यासं कुर्यात् । यथा—ऐं नमः मणिबन्धे, क्लीं नमः तले, सौः अग्रे, इति दक्षकरे । एवं वामकरे । ऐं नमः कक्षे, क्लीं कूर्परे, सौः पाणौ, इति दक्षे । एव वामेऽपि । ऐं नमः अधः कक्षे, क्लीं जानुनि, सौः पादाग्रे इति दक्षे । एवं वामे । ऐं नमो लिङ्गे, क्लीं हृदि, सौः नादान्ते, इति विद्यान्यासः ।

अथ नवयोनिन्यासः । ऐं नमो दक्षकर्णे, क्लीं वामे, सौः चिबुके, ऐं दक्षअक्षि, क्लीं वामे, सौः मुखे, ऐं दक्षनेत्रे, क्लीं वामे, सौः नासाया, ऐं दक्षबाहौ, क्लीं वामे, सौः कुक्षौ, ऐं दक्षजानुनि, क्लीं वामे, सौः नाभौ, ऐं दक्षपादे, क्लीं वामे, सौ गुह्ये, ऐं दक्षपार्श्वे, क्लीं वामे, सौः हृदि, ऐं दक्षस्तने, क्लीं वामे, सौः कण्ठे, इति नवयोनिन्यासः ॥

अथ रत्यादिन्यासः । मूलाधारे ऐं रत्यै नमः, हृदि क्लीं प्रीत्यै०, भ्रूमध्ये सौः मनोभवायै० । पुनरप्येषु स्थानेष्वेता विन्यसेत् । सौः अमृतेश्यै नमः, क्लीं योगेश्यै नम, ऐं विश्वयोन्यै नम । ततः पुनरपि षडङ्गन्यासः संप्रदायेन । ऐं हृदयाय नमः, क्लीं शिरसे० । सौः शिखायै०, ऐं कवचाय०, क्लीं नेत्राभ्या०, सौः अस्त्राय फट्, इति न्यासेदेहं सनह्य, "मूलाधारे मूलविद्या विद्युत्कोटिसमप्रभाम् ॥ सूर्यकोटिप्रतीकाशां चन्द्रकोटिसुशीतलाम् ॥ विसतन्तुस्वरूपा तां बिन्दुत्रिवलया प्रिये । ऊर्ध्वशक्तिनिपातेन सहजेन चरानने ॥ मूलशक्तिदृढत्वेन मध्यशक्तिप्रबोधतः । परमानन्दसंदोहसानन्दं चिन्तयेत् परम् ॥" इत्यन्तर्यजन कृत्वा पीठपूजा न्यासेन

मणिपूरकं समानीय, तत्र वह्नौ जलं लीनं विभाव्य तस्माद्वह्निना सहानाहतं समानीय, तत्र वायौ वह्निं लीनं विचिन्त्य तस्माद्वायुना सह विशुद्धं समानीय, तत्रस्थाकाशे वायुं लीनं विचिन्त्य तस्मादाकाशेन सहाज्ञाचक्रं समानीय, तत्र मनस्याकाशं लीनं विचिन्त्य, मनो नादे लीनं विभाव्य, ध्वनौ ध्वनिं समर्प्य, सहस्रदलकमलकर्णिकास्थचन्द्रमण्डलमध्यगतत्रिकोणान्तर्गततेजोमयबिन्दुरूपपरमशिवे देवतां समर्प्य, प्राणायामविधिना यमिति वायुबीजं धूम्रवर्णं षोडशवारं जपन् शरीरं पापपुरुषं, "वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभम्। ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम् ॥ सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम्। तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ॥ उपपातकरोमाणं रक्ताश्रुविलोचनम्। खड्गचर्मधरं क्रुद्धं पापं कुक्षौ विचिन्तयेत् ॥" इत्थं संशोष्य, रमिति वह्निबीजं रक्तवर्णं चतुष्षष्टिवारं जपंस्तमेव संदह्य, वमित्यमृतबीजं शुक्लवर्णं सहस्रारे विचिन्त्य द्वात्रिंशद्वारं जपंस्तदुद्भवामृतधारया निष्पापं शरीरमुत्पाद्य, ललाटस्थ-लमिति पृथ्वीबीजेन पीतवर्णेन सुदृढीकृत्य, ह्रीमिति मूलस्थेन बीजेन सैश्वर्यं विधाय, सोहमिति मन्त्रेण कुण्डलिनीममृतलोलीभूतां पञ्चभूतानि जीवात्मानं च ब्रह्ममार्गेण स्वस्वस्थाने नियोजयेत्। ततो देवीरूपमात्मानं विचिन्त्य हृदि हस्तं निधाय प्राणप्रतिष्ठां कुर्यात्।

'ॐआंह्रींक्रोंहंसः श्रीबालात्रिपुरायाः प्राणा इह प्राणः १ जीव इह स्थितः १ सर्वेन्द्रियाणि इह स्थितानि १ वाङ्मनश्चक्षुःश्रोत्रघ्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा' इति प्राणप्रतिष्ठां विधाय, स्वमूलऋष्यादिचिन्तनं विदधीत। यथा—

अस्य श्रीबालात्रिपुरामन्त्रस्य दक्षिणामूर्तिर्ऋषिः, पङ्क्तिश्छन्दः श्रीबालात्रिपुरा देवता ऐं बीजं सौः शक्तिः क्लीं कीलकं पूजादौ विनियोगः इति कृताञ्जलिः स्मृत्वा यथाविधि न्यसेत्। दक्षिणामूर्तिऋषये नमः शिरसि, पङ्क्तिच्छन्दसे नमो मुखे, श्रीबालात्रिपुरादेवतायै नमो हृदि, ऐं बीजाय नमो गुह्ये, सौः शक्तये नमः पादयोः, क्लीं कीलकाय नमो नाभौ, विनियोगाय नमः सर्वाङ्गेषु। ऐं नमो नाभ्यादिपादान्तं, क्लीं नमः कण्ठादिनाभ्यन्तं, सौः नमो मूर्धादिकण्ठान्तम् ॥ ऐं नमो वामपाणितले क्लीं नमो दक्षे, सौः नमः उभयोः ॥

रक्तोत्पलदलाकार-पादपल्लवशोभिताम् ।
नक्षत्रमात्रासङ्काश-मुक्तामञ्जीरमण्डिताम् ॥ ७ ॥
वामेन पाणिनैकेन पुस्तकं चापरेण तु ।
अभयं च प्रयच्छन्तीं साधकानां वरानने ॥ ८ ॥
अक्षमालां च वरदं दक्षपाणिद्वयेन तु ।
दधतीं चिन्तयेद देवीं वश्यसौभाग्य .क्प्रदाम् ।
क्षीरकुन्देन्दुधवलां प्रसन्नां संस्मरेत् प्रिये ॥ ९ ॥

इति श्रीबालात्रिपुरां ध्यात्वा मानसोपचारैराराध्य मनसा यथाशक्ति जपहोमादिकं च कृत्वा, "धर्माधर्मद्वविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा । सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा ॥" कामकलां विचिन्त्य तदुपरि श्रीबालां यथोक्तां ध्यायन्, स्ववामभागे षट्कोणान्तर्गतत्रिकोणद्वयबिन्दुबाह्यवृत्तचतुरस्रं कृत्वा स्वदक्षे त्रिकोणं वृत्तबिम्बं मण्डलं भूमौ विरच्य तत्राधारशक्तिं संपूज्य, तत्राधारं निःक्षिप्य, तदुपर्यस्त्रमन्त्रेण शोधितं हृन्मन्त्रेण पूरितं पात्रं शंखादिकं वा संस्थाप्य तत्र 'गङ्गे च यमुने चैव' इत्यादिना तीर्थमावाह्य गन्धादीन् प्रणवेन निःक्षिप्य, वह्निसूर्यसोमकलाभि संपूज्य धेनुमुद्रां प्रदर्श्य स्वमन्त्रेण च संपूजयेदिति विधिविहितसामान्यार्घ्योदकेन स्ववामे कृतमण्डलमभ्युक्ष्य, तत्र 'आधारशक्तिभ्यो नमः' इत्यादि पीठपूजाक्रमेण संपूज्य, नमः इत्याधारं प्रक्षाल्य मण्डलोपरि संस्थाप्य, "रं वह्निमण्डलाय दशकलात्मने नमः" इति प्रपूज्य, फडिति कलशं प्रक्षाल्य, कवचेन प्रपूर्य रक्तपल्लवमाल्यादिना संभूष्य धेनुमुद्रया संस्थाप्य, "अं अर्कमण्डलाय द्वादशकलात्मने नमः" इति कलशे संपूज्य, ॐ चन्द्रमण्डलाय षोडशकलात्मने नमः" इति द्रव्ये संपूज्य, फडिति संरक्ष्य हुमित्यवगुण्ठ्य मूलेन संपीड्य, नमः इत्यभ्युक्ष्य मूलेन गन्धमाघ्राय, कुम्भे पुष्पं दत्त्वा शापमोचनं कुर्यात्।

एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् । कचोच्चयां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥ सूर्यमण्डलसंभूते वरुणालयसंभवे । अमावीजमयि देवि शुक्रशापाद्विमुच्यताम् ॥ वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि । तेन सत्येन देवेशि ब्रह्महत्यां व्यपोहतु ॥ पवमानः प-

स्वदेहे कुर्यात् ।

मूलाधारे आधारशक्तये नमः, प्रकृत्यै नमः, स्वाधिष्ठाने कमठाय०, मणिपूरे शेषाय०, अनाहते पृथिव्यै०, तत्रैव सुधाम्बुधये०, मणिद्वीपाय०, चिन्तामणिगृहाय०, रत्नवेदिकायै०, मणिपीठाय०, दिक्षु नानामुनिगणेभ्यो०, नानादेवेभ्यो०, धर्माय नमः दक्षांसे । ज्ञानाय० वामांसे । वैराग्याय० वामोरौ । ऐश्वर्याय० दक्षोरौ । अधर्माय० दक्षकुक्षौ । अज्ञानाय० दक्षपृष्ठे । अवैराग्याय नमः वामपृष्ठे । अनैश्वर्याय० वामकुक्षौ । शेषाय० । पद्माय० । प्रकृतिमयपत्रेभ्यो० । विकृतिमयकेसरेभ्यो० । पञ्चाशद्वर्णभूषितकर्णिकायै० । सूर्यमण्डलाय० । सोममण्डलाय० । वह्निमण्डलाय० । सं सत्त्वाय० । रं रजसे० । त तमसे० । आं आत्मने० । अ अन्तरात्मने० । पं परमात्मने० । ह्रीं ज्ञानात्मने० । पत्रेषु वामायै० । ज्येष्ठायै० । रौद्र्यै० । अम्बिकायै० । इच्छायै० । ज्ञानायै० । क्रियायै० । कुब्जिकायै० । विचित्रायै० । विपाम्रिकायै० । दूत्यै० । आनन्दायै० । मध्ये मनोन्मन्यै० । पें परायै० । अपरायै० । परापरायै० । ह्सौं सदाशिवमहाप्रेतपद्मासनाय नमः । परमशिवपर्यङ्काय नमः, इति पीठं न्यस्य तत्रैव हृदये श्रीबाला-ध्यायेत् ।

मूलादिब्रह्मरन्ध्रान्तं विसतन्तुतनीयसीम् ।
भ्रमद्भ्रमरनीलाभ-धम्मिल्लामलपुष्पिणीम् ॥ १ ॥
ब्रह्मरन्ध्रस्फुरद्भिन्न-मुखरेखाविराजिताम् ।
मुखरेखालग्नरत्नतिलकां मुकुटोज्ज्वलाम् ॥ २ ॥
विशुद्धमुक्तावज्राढ्य-चन्द्ररेखाकिरीटिनीम् ।
भ्रमद्भ्रमरनीलाभ-नयनत्रयराजिताम् ॥ ३ ॥
सूर्यभास्वन्महारत्नकुण्डलालङ्कृतां पराम् ।
शुक्लाकारस्फुरन्मुक्ता-हारभूषणभूषिताम् ॥ ४ ॥
ग्रैवेयाङ्गदपत्रालि-स्फुरत्कान्तिजितामृताम् ।
गङ्गातरङ्गकर्पूर-शुभ्राम्बरविराजिताम् ॥ ५ ॥
श्रीखण्डवल्ली-सदृशबाहुवल्लीविराजिताम् ।
कङ्कणादिलसद्रूपा-मणिबन्धलसत्प्रभाम् ॥ ६ ॥

रानन्दः पवमानः परो रसः । पवमानं परं शानं तेन ते पावयाम्यहम् ॥ कृष्णशापविनिर्मुक्ता त्वं मुक्ता ब्रह्मशापतः । विमुक्ता रुद्रशापेन पवित्रा भव सांप्रतम् ॥

इति त्रिः पठित्वा, ततः ॐ वांवींवूंवैंवोंवः ब्रह्मशापमोचिताये सुरादेव्यै नमः इत्यपि त्रिः । ह्रौंश्रींक्रांक्लींक्लूंक्लैंक्लौंकः सुराकृष्णशापं मोचय २ अमृतं स्रावय २ स्वाहा इति त्रिः । हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं ॥ इत्यपि त्रिः पठित्वा, आनन्दभैरवं सुरादेवीं च तत्र ध्यात्वा, 'हसरक्तमलवयऊं आनन्दभैरवाय वौषट्, सहक्तमलवरयऊ सुरादेव्यै वौषट्' इति देवदेव्यौ त्रिः संपूज्य द्रव्यमध्ये दक्षिणावर्तेन त्रिः पंक्त्या अं १६ कं १६ थं १६ इति शक्तिचक्रं विलिख्य तन्मध्ये हक्षं च, तत्समावेशाद् द्रव्यमध्येऽमृतं विचिन्त्य, धेनुमुद्रयामृतीकृत्य वमिति सुधाबीज मूलमष्टधा घटं धृत्वा पठित्वा, आत्मश्रीचक्रयोर्मध्ये त्रिकोणषट्कोणवृत्तचतुरस्रं विलिख्य चतुरस्रे पूर्णगिरिपीठाय नमः, उड्डीयानपीठाय०, कामरूपपीठाय०, जालन्धरपीठाय०, इति संपूज्य, षट्कोणे षडङ्गं संपूज्य, त्रिखण्डेन त्रिकोणाग्रदक्षोत्तरं संपूज्य, मध्ये आधारशक्तीः संपूज्य त्रिकोणगर्भे यन्त्रिकां संस्थाप्य, नमः इति सामान्यार्घ्यजलेनाभ्युक्ष्य, यं धूम्रार्चिषे नमः । रं ऊष्मायै० । लं ज्वलिन्यै० । वं ज्वालिन्यै० । शं विस्फुलिङ्गिन्यै० । षं सुश्रियै० । सं स्वरूपायै० । हं कपिलायै० । लं हव्यवाहायै० । क्षं कव्यवाहायै० । मध्ये रं वह्निमण्डलाय दशकलात्मने नमः इति संपूज्य, षट्कोणे षडङ्गं संपूज्य, मध्ये मूलेन देवीं संपूज्य, पात्रं फडिति प्रक्षाल्य, यन्त्रिकोपरि संस्थापयेत् । तत्र कं ब्रह्मतापिन्यै० नमः । खं तापिन्यै०, गं धूम्रायै० । घं मरीच्यै० । ङं ज्वलिन्यै० । चं रुचे० । छं सुषुम्नायै० । जं भोगदायै० । झं विश्वायै० । ञं बोधिन्यै० । टं धारिण्यै० । ठं क्षमायै नमः । अं अर्कमण्डलाय द्वादशकलात्मने नमः इति संपूज्य, त्रिकोणवृत्तषट्कोणं पात्रे विलिख्य समस्तव्यस्तमन्त्रेण संपूज्य, वरुणबीज मूलं विलोममातृकां च पठन्, अमृतेन त्रिकोणं प्रपूर्य जलेन च भागमेकं प्रपूर्य तत्र सुगन्धादि निक्षिप्य, अं अमृतायै नमः । आं मानदायै० । इं पूषायै० । ईं तुष्ट्यै० । उं पुष्ट्यै० । ऊं

त्यै० । ऋं धृत्यै० । ॠं शशिन्यै० । ऌं चण्डिकायै० । ॡं कान्त्यै० । एं ज्योत्स्नायै० । ऐं श्रियै० । ओं प्रीत्यै० । औं अङ्गदायै० अं पूर्णायै० । अः पूर्णामृतायै नमः । ओं सोममण्डलाय षोडशकलात्मने नमः इति संपूज्य, पूर्ववन्मन्त्रं द्रव्ये विलिख्य त्रिकोणभिरेखायां अं आं इत्यादि क्षः इत्यन्तं मातृकां त्रिरिर्विलिख्य, मूलखण्डत्रयेण त्रिकोणं संपूज्य षट्कोणे षडङ्गं च, गङ्गेत्यादिना तीर्थमावाह्य, आनन्दभैरवभैरव्यौ स्वमन्त्रेण संपूज्य, पूर्वादितः स्लूं गगनरत्नेभ्यो नमः । स्लूं स्वर्गरत्नेभ्यो० । स्लूं मर्त्यरत्नेभ्यो० । स्लूं पातालरत्नेभ्यो० । मध्ये स्लूं नागरत्नेभ्यो० । इति संपूज्य, मांसादि संशोध्य ह्रूमित्यवगुण्ठ्य अमृतीकृत्य, तालत्रयेण दिशः संवद्ध्य, तदुपरि सप्तधा मूलं संपूज्य तत्र देवीमावाह्य, तालत्रयेण दिग्बन्धने विधाय अवगुण्ठ्यामृतीकृत्य, योनिमुद्रां प्रदर्श्य, ह्सौं नमः इति संपूज्य, शंखमुद्रां प्रदर्श्य षडङ्गेन सकलीकृत्य मत्स्यमुद्रया पात्रमासाद्य मूलं दशधा जप्त्वा पात्र देवीरूप विभावयेदिति । ततो द्रव्याण्यादाय घटसमीपे गुरुपात्रं ततः शक्तिपात्रं भोगपात्रं स्वपात्रं योगिनीपात्रं वीरपात्रं बलिपाद्यार्घ्याचमनीयपात्राणि संस्थाप्य, चर्षणयुतकारणेन तत्त्वमुद्रया श्रीपात्राद् बिन्दून् समुद्धृत्य, आनन्दभैरव तर्पयामि नमः इति तन्मन्त्रेण त्रिः सन्तर्प्य, ततः श्रीगुरु श्रीमच्छ्रीमुक्तानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः इति त्रिः सन्तर्प्य, श्रीपात्रामृतेन मूलदेवीं सायुधां सवाहनां सपरिवारां तर्पयामि नमः इति सन्तर्पयेदिति कलशपूजाविधिः ॥

अथ श्रीचक्रोपरि पीठपूजां पूर्ववद्विधाय श्रीबालां ध्यात्वा मायुधीजेन वामनासापुटेन देवीं स्वहृदयात् कुसुमाञ्जलापानीय श्रीचक्रे संस्थाप्य, "देवेशि भक्तसुलभे परिवारसमन्विते । यावत्त्वां पूजयिष्यामि तावद् देवि इहावह ॥" इति पठित्वा, मूलं श्रीकामेश्वरीयसहिते बालात्रिपुरे इहागच्छ २ इह तिष्ठ २ इह सन्निधेहि २ इह सन्निरुध्व २ मम सपरिवारसहिता पूजा गृहाण २ इत्यावाहनादिमुद्राः प्रदर्श्य, प्राणप्रतिष्ठा श्रीचक्रे लेलिहानमुद्रया विधाय वश्यादिरुद्रान्त कवचावगुण्ठ्य सकलीकृत्य परामृश्य, धेनुयोनिमुद्रे प्रदर्श्य परामर्शपुस्तकाक्षमालाज्ञानाङ्कुशपाशचापबाणकपालकमलादिमुद्राः प्र-

र्घ्यं, श्रीपात्रामृतेन सायुधां सवाहनां सपरिवारां साचरणां श्रीकामेश्वरभैरवसहितां श्रीबालात्रिपुरां तर्पयामि नमः इति त्रिः सन्तर्प्य, पुनरपि मूलेन श्रीबालात्रिपुराश्रीपादुकां तर्पयामि नमः इति त्रि॰ सन्तर्प्य, मूलमुच्चार्य, एतत्पाद्यं श्रीकामेश्वरसहितश्रीबालात्रिपुरायै नमः पाद्योः पाद्यं। एवमर्घ्यं स्वाहा शिरसि। आचमनीयं मधुपर्कं च सुधा मुखे। स्नानीयं नमः सर्वाङ्गे, इति सुस्नाप्य, शुद्धदुकूलेनाङ्गं प्रोञ्छ्य, विचित्रपटवस्त्रं कुङ्कुमकस्तूरीचन्दनसिन्दूरमुकुटकुण्डलहारादिनानालङ्कारान् दत्त्वा पुनराचमनीयं दद्यात्। ततो मध्यमानामाङ्गुष्ठैः गन्धो नमः इति गन्धं, अङ्गुष्ठतर्जनीभ्यां पुष्पाणि वौषट् इति पुष्पैः संपूज्य, धूपपात्रं फडिति संपूज्य पुरतः स्थापयित्वा वामतर्जन्या संस्पृशन् श्रीपात्रामृतेन धूपं निवेदयामि इति निवेद्य, जगद्ध्वनिमन्त्रमातः स्वाहा इति घण्टां संपूज्य वामेन पाणिना तां वादयन्, मध्यानामाङ्गुष्ठैर्धूपं धृत्वा गायत्रीं मूलमन्त्रं च पठन् "वनस्पतिरसो दिव्यो गन्धाढ्यो गन्ध उत्तमः। आघ्रानं सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥" इति त्रिधोच्चार्य देवीं धूपयेत्। ततो दीपं संमुखे संस्थाप्य पूर्ववत् मोक्षणपूजने कृत्वा वाममध्यमया दीपपात्रं स्पृशन् दीपं निवेदयामि इति निवेद्य पूर्ववद् घण्टां वादयन्, मध्यानामामध्ये दीपपात्रमङ्गुष्ठेन धृत्वा दर्शयन्, गायत्रीं मूलं च पठन् "सुप्रकाशो महादीपः सर्वत्र तिमिरापहः। सवाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम्॥" इति दीपयेत्। ततः सुवर्णादिपात्रे कुङ्कुमेन वसुपत्रं चन्द्ररूपं च कृत्वा मध्ये दीपमेकमष्टपत्रेषु दीपाष्टकं संस्थाप्य 'ॐ सौः ग्लौंस्लौंग्लूंप्लून्लूंसौः श्रीं रत्नेश्वर्यै नमः, इत्यभ्यर्च्य मूलेन चाभ्यर्च्य, स्थालकं मस्तकान्तमुद्धृत्य नववार मूल० "समस्तचक्रचक्रेशीयुते देवि नयातिमके। आराधिकामिदं देवि गृहाण मम सिद्धये॥ इति चक्रमुद्रया नीराजयेत्।

ततो नानानैवेद्यं सुवर्णादिपात्रे निक्षिप्य हृमित्यवगुण्ठ्य धेनुमुद्रयामृतीकृत्य, मूलं सप्तधा जप्त्वा वामाङ्गुष्ठेन नैवेद्यपात्रं स्पृशन् मूलान्ते "हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम्। षड्रसोपेतं गृहाण परमेश्वरि॥" नैवेद्यं निवेदयामीति दत्तानामाङ्गुष्ठाभ्यामुत्सृजेत्। ततः पुनराचमनीयं दत्त्वा मूलान्ते कर्पूरादियुक्तताम्बूलं निवेदयामीति

पूर्ववद् दद्यात् । सर्वेषामर्घ्यपात्रजलेनोत्सर्गः कार्यः । ततस्तन्मुद्रया देवीं त्रिः सन्तर्प्य पूर्वोक्ताः मुद्राः प्रदर्श्य, योनिं हृदि, क्षोभिणीं मुखे, द्राविणीं भ्रूमध्ये, आकर्षिणीं ललाटे, वशिनीं ब्रह्मरन्ध्रे, आह्लादिनीं पञ्चमुद्रामयीं प्रदर्श्य, कृताञ्जलिः श्रीबालात्रिपुरे आवरणानि ते पूजयामीत्याज्ञां गृहीत्वावरणपूजामारभेत ।

तत्रादौ प्राग्योनिमध्ययोर्न्योरन्तराले गुरुपात्रे (त्रेण) अमुकानन्दनाथश्रीपादुकां पूजयामि नमस्तर्पयामि नमः । एवं परमगुरुश्रीपादुकां पू० । परमाचार्यश्री० । परमेष्ठिगुरुश्री० । दिव्यौघगुरुश्री० । सिद्धौघगुरुश्री० । मानवौघगुरुश्री० । पुनः स्वगुरुश्री० । इति पूजयेत्तर्पयेच्च ॥

आग्नेये हृदयश्रीपा० । ईशाने शिरःश्रीपा० । नैर्ऋते शिखाश्रीपा० । वायव्ये कवचश्रीपा० । मध्ये नेत्रश्रीपा० । दिक्षु चतुर्षु अस्त्रश्री० । इति पूजयेत्तर्पयेच्च ॥

ततस्त्रिकोणे आग्नेये वें रं रतिश्रीपा० । ईशाने क्लीं प्रीं प्रीतिश्रीपा० । अग्रकोणे सौः मं मनोभवाश्रीपा० । इति पूजयेत्तर्पयेच्च ॥

तत्रस्त्रिकोणस्यैवोत्तरे । द्रां क्षोभणबाणश्री० । द्रीं द्रावणबाणश्री० । क्लीं आकर्षणबाणश्री० । ब्लूं वशीकरणबाणश्री० । तदग्रे सः उन्मादनबाणश्री० । इति संपूज्य सन्तर्प्य, तत्रैव तदुत्तरे । सौः कामश्री० । क्लीं मन्मथश्री० । तद्दक्षे वें कन्दर्पश्री० । ब्लूं मकरध्वजश्री० । अग्रे स्त्रीं मीनकेतुश्री० । इति पूजयेत्तर्पयेच्च ॥

ततोऽष्टयोनिषु पूर्वादितः । अनङ्गकुसुमाश्री० । अनङ्गमेखलाश्री० । अनङ्गमदनाश्री० । अनङ्गमदनातुराश्री० । सुभगाश्री० । भगाश्री० । भगसर्पिणीश्री० । भगमालाश्री० । इति पूजयेत्तर्पयेच्च ॥

ततोऽष्टपत्रेषु पूर्वादितः । अं असिताङ्गभैरवश्री० । आ आह्लीश्री० । इ रुरुभैरवश्री० । ईं माहेश्वरीश्री० । उं चण्डभैरवश्री० । ऊ कौमारीश्री० । ऋ क्रोधभैरवश्री० । ॠं वैष्णवीश्री० । ऌं उन्मत्तभैरवश्री० । ॡ वाराहीश्री० । ए कपालिभैरवश्री० । ऐं माहेन्द्रीश्री० । ओं भीषणभैरवश्री० । औ चामुण्डाश्री० । अं संहारभैरवश्री० । अः नारसिंहीश्रीपा० । इति पूजयेत्तर्पयेच्च ॥

ततो ग्रन्थिस्थानेषु पश्चिमादितः । कामरूपपीठश्री० । मलयगिरिपीठश्री० । कौलगिरिपीठश्री० । कुलान्तकपीठश्री० । चौहारपीठश्री० ।

जालन्धरपीठश्री० । उड्डीयानश्री० । देवकूटश्री० । इति पूजयेत्तर्पयेच्च ॥

ततो वृत्तमण्डले पश्चिमादित ऊर्ध्वमधश्च । हेरुकभैरवश्री० । वेतालभैरवश्री० । त्रिपुरान्तकभैरवश्री० । अग्निजिह्वभैरवश्री० । कालान्तकभैरवश्री० । कपालिभैरवश्री० । एकपादभैरवश्री० । भीमरूपभैरवश्री० । मलयभैरवश्री० । ह्राकटेश्वरभैरवश्री० । इति पूजयेत्तर्पयेच्च ॥

ततश्चतुरस्रे पूर्वादितः । इन्द्रश्री० । अग्निश्री० । यमश्री० । निर्ऋतिश्री० । वरुणश्री० । वायुश्री । कुबेरश्री० । ईशानश्री० । इन्द्रेशानयोर्मध्ये ब्रह्मश्री० । वरुणराक्षसयोर्मध्ये विष्णुश्री० । इति पूजयेत्तर्पयेच्च ॥

ततस्तत्समीपे । वज्रश्री० । शक्तिश्री० । दण्डश्री० । खड्गश्री० । पाशश्री० । ध्वजश्री० । गदाश्री० । त्रिशूलश्रीपादुका पूजयामि त० ॥ ततश्चतुरश्रे पश्चिमे । वां वटुकाय नमो वटुकश्री० । उत्तरे या योगिनीभ्यो नमो योगिनीश्री० । पूर्वे क्षा क्षेत्रपालाय नम. क्षेत्रपालश्री० । दक्षे गां गणपतये नमो गणपतिश्री० । इति पूजयेत्तर्पयेच्च । ततो वायव्ये अष्टवसुभ्यो नमः, ईशाने द्वादशादित्येभ्यो नमः, आग्नेये एकादशरुद्रेभ्यो नमः, नैर्ऋते सर्वेभ्यो भूतेभ्यो नमः, इति पूजयेत्तर्पयेच्च । ततो देवीसमीपे दक्षहस्ते अक्षमालाश्री० । वरश्री० । तद्वामे पुस्तकश्री० । अभयश्री०, इति पूजयेत्तर्पयेच्च । पुनर्बिन्दौ मूलदेवीं पूर्ववत् सपूज्य सन्तर्प्य पुष्पाञ्जलित्रयेण स पूज्य नित्यहोममाचरेत् ।

तद्यथा अग्नौ चक्रं विभाव्य विलिख्य जले वा, प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा, उदानाय स्वाहा, समानाय स्वाहा, इति हुत्वा षडङ्गाहुतीं कुर्यात् । ततो मूलेन स्वदेव्यै हुत्वा, स्वहृदि विसृज्य ईशाने मण्डलं कृत्वा, वां वटुकाय नम. एह्येहि देवीपुत्रवटुकनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख सर्वान् विघ्नान् नाशय २ सर्वोपचारसहित बलिं गृह्ण २ स्वाहा ॥ आग्नेये । या योगिनीभ्यो नम । "ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले वा पाताले वा तले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा । ऊर्ध्वं पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्रीता देव्य. सदा न. शुभबलिविधिना पान्तु वीरेन्द्रवर्या ॥

यां योगिनीभ्यो फट् स्वाहा, इति योगिनीबलिः ॥ नैर्ऋते क्षांक्षींक्षूं क्षैंक्षौंक्षः क्षेत्रपाल आलेबलिसहितं बलिं गृह्ण २ स्वाहा, इति क्षेत्रपालबलिः ॥ वायव्ये गांगींगूं गणपतये वरवरद सर्वजनं मे वशमानय बलिं गृह्ण २ स्वाहा, इति गणपतिबलिः ॥ इत्थं बलिं विरचय्य च्छागादिबलिमप्यागमोक्तविधिना दत्त्वा गुरुदेव्यौ ध्यायन् यथाशक्ति जपं विधाय, पुनरपि प्राणायामन्यासादिकराङ्गन्यासानन्तरं "गुह्यातीति" तर्पणेन तेजोरूपं जपफलं देवीवामहस्ते समर्प्य, कवचसहस्रनामस्तवपाठं पठित्वा साष्टाङ्गं प्रणिपत्य प्रदक्षिणीकृत्य सामयिकैः सह पूर्वोक्तरूपेण पात्रवन्दनं विधाय "नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः। अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ॥ इत्यादि पूर्वोक्तं शान्तिस्तोत्रं पठित्वा, ईशाने "निर्माल्यवासिन्यै नमः" इति निर्माल्यं त्यजेत्। ततः 'इतः पूर्वं जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा पद्भ्यामुदरेण शिश्ना यत्कृतं यत्कृतं तत्सर्वं मदीयं श्रीबालात्रिपुरार्पणमस्तु। ताम्रादिपात्रेऽर्घ्यं धृत्वा "ॐह्रांह्रींसः सूर्य एष तेऽर्घः स्वाहा" इत्यर्घ्यं सूर्याय दत्त्वा, अच्छिद्रमवधारयेत्। नैवेद्यादि बान्धवैः साकं भुक्त्वा स्वात्मानं कामकलारूपं भावयन् सुखं विहरेत् ॥

श्रीबालात्रिपुरादेव्यास्त्रैलोक्यपतिना कृता ।
पद्धतिः पूर्णतां प्राप्ता निजभक्तदयालुना ॥

इति श्रीरुद्रयामले तन्त्रे भैरवभैरवीसंवादे
श्रीबालात्रिपुरापद्धतिः ॥ २ ॥

अथ

श्रीबालात्रिपुरसुन्दरीकवचम् ।

श्रीभैरवी ।

देवदेव महादेव भक्तानां प्रीतिवर्धन ।
सूचितं यन्मया (त्वया) देव्याः कवचं कथयस्व मे ॥ १ ॥

श्रीभैरवः ।

शृणु देवि प्रवक्ष्यामि कवचं देवदुर्लभम् ।
अप्रकाश्यं परं गुह्यं साधकाभीष्टसिद्धिदम् ॥ २ ॥
कवचस्य ऋषिर्देवि दक्षिणामूर्तिरव्ययः ।
पङ्क्तिश्छन्दः समुद्दिष्टो देवी त्रिपुरसुन्दरी ॥
धर्मार्थकाममोक्षार्थे विनियोगस्तु साधने ॥ ३ ॥

अस्य श्रीबालात्रिपुरसुन्दरीकवचस्य श्रीदक्षिणामूर्तिर्ऋषिः पङ्क्तिश्छन्दः श्रीबालासुन्दरी देवता ऐं बीज सौः शक्तिः क्लीं कीलकं चतुर्वर्गसाधने विनियोगः । दक्षिणामूर्तिऋषये नमः शिरसि , पङ्क्तिच्छन्दसे नमो मुखे , बालासुन्दरीदेवतायै नमो हृदि , ऐंबीजाय नमो गुह्ये , सौः शक्तये नमो नाभौ , क्लींबीजाय नमः पादयोः , विनियोगाय नमः सर्वाङ्गेषु । ऐं अङ्गुष्ठाभ्यां नमः । क्लीं तर्जनीभ्यां नमः । सौः मध्यमाभ्यां नमः । ऐं अनामिकाभ्यां नमः । क्लीं कनिष्ठिकाभ्यां० । सौः करतलपृष्ठाभ्यां० । एवं हृदयादिन्यासः । ध्यानम् -

मुक्ताशेखरकुण्डलाङ्गदमणिग्रैवेयहारोर्मिका-
विद्योतद्वलयादिकङ्कणकटिसूत्रा स्फुरन्नूपुराम् ।
माणिक्योदरबन्धकम्बुकबरीमिन्दोः कलां बिभ्रतीं
पाशं चाङ्कुशपुस्तकाक्षवलयं दक्षोर्ध्वबाह्वादितः ॥ ४ ॥

ऐं वाग्भवं पातु शीर्षे क्लीं कामस्तु तथा हृदि ।
सौःशक्तिबीजं च पातु नाभौ गुह्ये च पादयोः ॥ ५ ॥
ऐक्लींसौः वदने पातु बाला मां सर्वसिद्धये ।
हसकलह्रीं सौः पातु भैरवी कण्ठदेशतः ॥ ६ ॥
सुन्दरी नाभिदेशेऽव्याच्छ्रीर्पिका सकला सदा ।
भ्रूनासयोरन्तराले महात्रिपुरसुन्दरी ॥ ७ ॥
ललाटे सुभगा पातु भगा मां कण्ठदेशतः ।
भगोदेवी तु हृदये उदरे भगसर्पिणी ॥ ८ ॥
भगमाला नाभिदेशे लिङ्गे पातु मनोभवा ।
गुह्ये पातु महादेवी राजराजेश्वरी शिवा ॥ ९ ॥
चैतन्यरूपिणी पातु पादयोर्जगदम्बिका ।
नारायणी सर्वरात्रे सर्वकार्ये शुभङ्करी ॥ १० ॥
ब्रह्माणी पातु मां पूर्वे दक्षिणे वैष्णवी तथा ।
पश्चिमे पातु वाराही उत्तरे तु महेश्वरी ॥ ११ ॥
आग्नेय्यां पातु कौमारी महालक्ष्मीश्च नैर्ऋते ।
वायव्यां पातु चामुण्डा इन्द्राणी पातु चेशके ॥ १२ ॥
जले पातु महामाया पृथिव्यां सर्वमङ्गला ।
आकाशे पातु वरदा सर्वतो भुवनेश्वरी ॥ १३ ॥
इदं तु कवचं नाम देवानामपि दुर्लभम् ।
पठेत् प्रातः समुत्थाय शुचिः प्रयतमानसः ॥ १४ ॥
नामयो व्याधयस्तस्य न भयं च क्वचिद्भवेत् ।
न च मारीभयं तस्य पातकानां भयं तथा ॥ १५ ॥
न दारिद्र्यवशं गच्छेच्चिरञ्जीवी भवेन्नरः ।
गच्छेच्छिवपुरे देवि सत्यं सत्यं वदाम्यहम् ॥ १६ ॥
इदं कवचमज्ञात्वा श्रीविद्यां यो जपेच्छिवे ।

स नाप्नोति फलं तस्य प्राप्नुयाच्छक्रघातकम् ॥ १७ ॥

इति श्रीरुद्रयामले तन्त्रे भैरवीभैरवसंवादे
श्रीबालात्रिपुरसुन्दरीकवचम् ॥ २ ॥

अथ

बालासहस्रनामकम् ।

समाप्युपरतं काले कदाचिद्विजने मुदा ।
परमानन्दसन्दोहमुदितं[1] प्राह पार्वती ॥ १ ॥

श्रीदेवी ।

श्रीमन्नाथ तवानन्दकारणं ब्रूहि शङ्कर ।
योगीन्द्रप्राप्यं देवीशं[2] प्रेमपूर्णं सुधानिधे ।
कृपया यदि मे शम्भो सुगोप्यमपि कथ्यताम् ॥ २ ॥

श्रीभैरवः ।

निर्भरानन्दसन्दोहः शक्तिभावेन जायते ।
लावण्यसिन्धुस्तत्रास्ति बालाया रमकन्दर[3]ः ॥ ३ ॥
तामेवानुक्षणं देवीं चिन्तयामि ततः शिवाम् ।
तस्या नामसहस्राणि[4] कथयामि तव प्रिये ॥ ४ ॥
सुगोप्यान्यपि रम्भोरु गम्भीरस्नेहविभ्रमात् ।
तामेव स्तुवतो देवि ध्यायतोऽनुक्षणं मम ।

---

१ 'शुभे' ग. पाठः । २ 'मुदिता' ख ग पाठः । ३ 'देवेश' ख. ग पाठः ।
४ 'कन्दा' क. ग. पाठ । ५ 'सहस्र ते' ग पाठः ।

सुखसन्दोहसंभावो ज्ञानानन्दस्य कारणम् ॥ ५ ॥

अस्य श्रीबालात्रिपुरसुन्दरी सहस्रनामस्तोत्रस्य भार्गवऋषिः अनुष्टुप् छन्दः श्रीबालात्रिपुरा देवता ऐं बी० सौ. शा० क्लीं की० समस्तपुरुषार्थे सम्पन्नयंसामर्थ्ये पाठे विनियोग । भार्गवऋषये नमः शिरसि । अनुष्टुप्छन्दसे नमो मुखे । श्रीबालादेवतायै नमो हृदि । ऐं बीजाय नमो गुह्ये । सौः शक्तये नमः पादयो । क्लीं कीलकाय नमो नाभौ । विनियोगाय नमः सर्वाङ्गेषु । ऐं अङ्गुष्ठाभ्यां नमः । क्लीं तर्जनीभ्यां० । सौः मध्यमाभ्यां० । ऐं अनामिकाभ्यां० । क्लीं कनिष्ठिकाभ्यां० । सौः करतलपृष्ठाभ्यां० । एव हृदयादिन्यासः । ध्यानम् ।

रक्ताम्बरां चद्रकलावतंसां समुद्यदादित्यनिभां त्रिनेत्राम् ।
विद्याक्षमालाभयदानहस्तां ध्यायामि बालामरुणाम्बुजस्थाम् ॥
आनन्दासिन्धुरानन्दाऽऽनन्दमूर्तिर्विनोदिनी ।
त्रिपुरासुन्दरी प्रेमपाथोनिधिरनुत्तमा ॥ १ ॥
वामार्धगह्वरा भूतिर्विभूतिः शाङ्करी शिवा ।
शृङ्गारमूर्तिर्वरदा रमा च शुभगोचरा ॥ २ ॥
परमानन्दलहरी रती रङ्गवती गतिः ।
रङ्गमालानङ्गकला केली कैवल्यदा कला ॥ ३ ॥
रसकल्पा कल्पलता कुतूहलवती गतिः ।
विनोददिग्धा सुस्निग्धा मुग्धामूर्तिर्मनोरमा ॥ ४ ॥
बालार्ककोटिकिरणा चन्द्रकोटिसुशीतला ।
द्वैपत्पीयूषदिग्धाङ्गी स्वर्गार्थपारिकल्पिता ॥ ५ ॥
कुरङ्गनयना कान्ता सुगतिः सुखसन्ततिः ।
राजराजेश्वरी राज्ञी सदेन्द्रपरिवन्दिता ॥ ६ ॥
प्रपञ्चगतिरीशानी प्रपञ्चगतिरुत्तमा ।

---

१ 'यमादय' ग घ ङ । २ 'सवत' क, ख पाठ । ३ धा' च छ पाठ ।
४ 'ना' त पाठ ।

दुर्वासा दुःसहाशक्तिः शिञ्जत्कनकनूपुरा ॥ ७ ॥
मेरुमन्दरवक्षोजा मणिपाशवरायुधा ।
शरकोदण्डसंसक्तपाणिद्वयविराजिता ॥ ८ ॥
चन्द्रबिम्बानना चारुमुकुटोत्तंसचन्द्रिका ।
सिन्दूरतिलका चारुधम्मिल्लामलमालिका ॥ ९ ॥
मन्दारदाममुदिता रत्नमालाविभूषिता ।
सुवर्णाभरणप्रीता मुक्ताधाममनोरमा ॥ १० ॥
ताम्बूलपूर्णवदना मदनानन्दमानसा ।
सुखाराध्या तपःसारा कृपापारा [3]विधीश्वरी ॥ ११ ॥
वक्षःस्थललसद्रत्नप्रभा मधुरसोन्मदा ।
बिन्दुनादात्मकोच्चाररहिता तुर्यरूपिणी ॥ १२ ॥
कमनीयाकृतिर्धन्या शाङ्करी प्रीतिमञ्जरी ।
प्रपञ्चा पञ्चमी पूर्णा पूर्णपीठनिवासिनी ॥ १३ ॥
राज्यलक्ष्मीश्च श्रीलक्ष्मीर्महालक्ष्मीः सुराम्बिका ।
सन्तोषसीमा संपत्तिः शातकौम्भी तथा द्युतिः ॥ १४ ॥
परिपूर्णा जगद्धात्री विधात्री बलवर्धिनी ।
सार्वभौमनृपश्रीश्च साम्राज्यगतिरम्बिका ॥ १५ ॥
सरोजाक्षी दीर्घदृष्टिः साचीक्षणविचक्षणा ।
रङ्गवन्ती रसिका (१००) प्रधाना रसरूपिणी ॥ १६ ॥
रससिन्धुः सुगात्री च धूमरी मैथुनोन्मुखा ।
निरन्तरगुणासक्ता शक्तिर्निधुवनात्मिका ॥ १७ ॥
कामाक्षा कमनीया च कामेशी भगमङ्गला ।
सुभगा भोगिनी भोग्या भाग्यदा सुभगा भगा ॥ १८ ॥

---

१ 'मन्दार' क पाठ २ 'संयुक्त' ग पाठ । ३ 'निधी' ख. पाठः ।
४ 'रमणा' क पाठ ।

भगलिङ्गानन्दकला भगमध्यनिवासिनी ।
भगरूपा भगमयी भगयन्त्रा भगोत्तमा ॥ १९ ॥
योनिमुद्रा कामकला कुलामृतपरायणा ।
कुलकुण्डालया सूक्ष्मा जीवात्मा लिङ्गरूपिणी ॥ २० ॥
मूलक्रिया मूलरूपा मूलाकृतिस्वरूपिणी ।
सोत्सुका कमलानन्दा चिद्भावाऽऽत्मगतिः शिवा ॥ २१ ॥
श्वेतारुणा बिन्दुरूपा वेदयोनिर्ध्वनिस्वनी ।
षण्टाकोटिरवा रावा रविबिम्बोत्थिताऽद्भुता ॥ २२ ॥
नादान्तलीना संपूर्णा पूर्णस्था बहुरूपिका ।
भृङ्गारावा वंशगतिर्वादित्रा मुरजध्वनिः ॥ २३ ॥
वर्णमाला सिद्धिकला षट्चक्रक्रमवासिनी ।
मूलकेलीरता स्वाधिष्ठाना तुर्यनिवासिनी ॥ २४ ॥
मणिपूरस्थितिः स्निग्धा कूर्मचक्रपरायणा ।
अनाहतगतिर्दीपशिखा मणिमयाकृतिः ॥ २५ ॥
विशुद्धा शब्दसंशुद्धा जीवबोधस्थली रवा ।
आज्ञाचक्राब्जसंस्था च स्फुरन्ती निपुणा विभूः ॥ २६ ॥
चन्द्रिका चन्द्रकोटिश्रीः सूर्यकोटिप्रभामयी ।
पद्मरागारुणच्छाया नित्याऽऽह्लादमयी प्रभा ॥ २७ ॥
पानश्रीश्च प्रियामात्या निश्चलाऽमृतनन्दिनी ।
कान्ताङ्गसङ्गमुदिता सुधामाधुर्यसंभृता ॥ २८ ॥
महामञ्चस्थिताऽलिप्ता दृप्ता दृप्ता सुसंभृतिः ।
सवत्सीयूषसंसिक्ता रक्तार्णवविवर्धिनी ॥ २९

---

१ 'जीवसुलिङ्ग' ग. पाठ. । २ 'विश्वपणा' ख पाठ । ३ 'द्रुता' ग. पाठः ।
४ 'मुक्तकथी' क. पाठ. । ५ 'ता' ग. पाठ. । ६ 'नन्दमया श्रुतिः' ख. ग. पाठ० ।
७ 'त्रयी' ख. पाठ० ।

सुरक्ता प्रियसंसिक्ता शश्वत्कुण्डालयाऽभया (२००) ।
श्रेयःश्रुतिश्च प्रत्येकानवकेशिफलावली ॥ ३० ॥
प्रीता शिवा शिवप्रिया शाङ्करी शाम्भवी विभा ।
स्वयंभूः स्वप्रिया स्वीया स्वकीया जनमातृका ॥ ३१ ॥
स्वारामा स्वाश्रया साध्वी सुधाधाराऽधिकाधिका ।
मङ्गलोज्जयिनी मान्या सर्वमङ्गलसङ्गिनी ॥ ३२ ॥
भद्रा भद्रावली कन्या कलितार्धेन्दुबिम्बभाक् ।
कल्याणलतिका[2] काम्या कुकर्मा कुमतिर्मनुः ॥ ३३ ॥
कुरङ्गाक्षी क्षीवनेत्रा क्षारा रसमदोन्मदा ।
वारुणीपानमुदिता मदिरा[3]राचिताश्रया ॥ ३४ ॥
कादम्बरीपानरुचिर्विपाशा पाशभीतिनुत् ।
मुदिता मुदितापाङ्गा दरदोलितदीर्घदृक् ॥ ३५ ॥
दैत्यकुलानलशिखा मनोरथसुधाद्युतिः ।
सुवासिनी पीनगात्री पीनश्रोणिपयोधरा ॥ ३६ ॥
सुचारुकबरी दन्तदीधितिर्दीप्रमौक्तिका ।
बिम्बाधरा द्युतिमुखा प्रवालोत्तमदीधितिः ॥ ३७ ॥
तिलप्रसूननासाग्रा हेमकक्षोलभालका ।
निष्कलङ्केन्दुवदना बालेन्दुमुकुटोज्ज्वला ॥ ३८ ॥
नृत्यत्खञ्जननेत्रश्रीर्विस्फुरत्कर्णशष्कुली ।
बालचन्द्रातपत्रार्धा मणिसूर्यकिरीटिनी ॥ ३९ ॥
हेममाणिक्यताटङ्का मरिकाश्चनकुण्डला ।
सुचारुचिबुका कम्बुकण्ठी मणिमनोरमा ॥ ४० ॥
गङ्गातरङ्गहारोर्मिर्मत्तकोकिलनिःस्वना ।

---

१ 'बिन्दु' क. पाठ. । २ 'ललिता' ख पाठ· । ३ 'मन्दिरा' क. पाठः ।
४ 'पाप' क पाठ. । ५ 'बलिमनोरमा' क. ग. पाठ. ।

मृणालविलसद्बाहुः पाशाङ्कुशधनुर्धरा ॥ ४१ ॥
केयूरकटकाच्छन्ना नानारत्नमनोरमा ।
ताम्रपङ्कजपाणिश्रीर्नखरत्नप्रभावती ॥ ४२ ॥
अङ्गुलीयमणिश्रेणिचञ्चदङ्कुलिसन्ततिः ।
मन्दारद्वन्द्वसुकुचा रोमराजीभुजङ्गका ॥ ४३ ॥
गम्भीरनाभिस्त्रिवलीवलया च सुमध्यमा ।
रणत्काञ्चीगुणोच्चद्धा पट्टांशुकसुनीविका ॥ ४४ ॥
मेरुगुर्वीनितम्बाढ्या गजगण्डोरुयुग्मयुक् ।
सुजानुमन्दरासक्तलसज्जङ्घाद्वयान्विता ॥ ४५ ॥
गूढगुल्फा मञ्जुशिञ्जन्मणिनूपुरमण्डिता ।
योगिध्येयपदद्वन्द्वा सुधाम्भोऽमृतसारिणी ॥ ४६ ॥
लावण्यसिन्धुः सिन्दूरतिलका कुटिलालका ।
साधुसिद्धा सुबुद्धा च बुधा वृन्दारकोदया ॥ ४७ ॥
बालार्ककिरणश्रेणीशोणा श्रीप्रेमकामधुक् ।
रसगम्भीरसरसीपद्मिनी [३००] रससारसा ॥ ४८ ॥
प्रसन्नाऽऽसन्नवरदा शारदा च सुभाग्यदा ।
नटराजप्रिया विश्वनाट्या नर्तकनर्तकी ॥ ४९ ॥
विचित्रयन्त्रा चित्तस्था विद्यावल्ली गतिः शुभा ।
कूटाराकूटा कूटस्था पञ्चकूटा च पञ्चमी ॥ ५० ॥
चतुष्कूटा त्रिकूटाद्या षट्कूटा वेदपूजिता ।
कूटषोडशसंपन्ना तुरीया परमाकला ॥ ५१ ॥
षोडशी मन्त्रयन्त्राणामीश्वरी मेरुमण्डला ।

---

१ ' मणि ' ख. ग. पाठः । २ ' गण्डा ' ख. ग. पाठः । ३ ' गजगण्डोरुयुग्मका ' ख. पाठः । ४ ' सुन्दरी ' ख. पाठः । ५ ' चायुधा च ' ज. पाठः ।

षोडशार्णा त्रिवर्णा च बिन्दुनादस्वरूपिणी ॥ ५२ ॥
वर्णातीता वर्णमाता शब्दब्रह्ममहासुखा ।
चैतन्यवल्ली कूटात्मा कामेशी स्वप्नदृश्यगा ॥ ५३ ॥
स्वप्नावती बोधकरी जागृतिर्जागराश्रया ।
स्वप्नाश्रया सुषुप्तिश्च तन्द्रामुक्ता च माधवी ॥ ५४ ॥
लोपामुद्रा कामराज्ञी मानवी वित्तपार्चिता ।
शाकम्भरी नन्दिविद्या भास्वद्द्योतमालिनी ॥ ५५ ॥
माहेन्द्री स्वर्गसंपत्तिर्दुर्वासःसेविता श्रुतिः ।
साधकेन्द्रगतिः साध्वी सुलभा सिद्धिकन्दरा ॥ ५६ ॥
पुरत्रयेशी पुराजिदर्चिता पुरदेवता ।
पुष्टिर्विघ्नहरी भूतिर्विगुणा पूज्यकामधुक् ॥ ५७ ॥
हिरण्यमाता गणपा गुहमाता नितम्बिनी ।
सर्वसीमन्विनी मोक्षा दीक्षा दीक्षितमातृका ॥ ५८ ॥
साधकाम्बा सिद्धमाता साधकेन्द्रा मनोरमा ।
यौवनोन्मादिनी तुङ्गा सुश्रोणिर्मदमन्थरा ॥ ५९ ॥
पद्मरक्तोत्पलवती रक्तमाल्यानुलेपना ।
रक्तमालारुचिः शिखाशिखण्डिन्यतिसुन्दरी ॥ ६० ॥
शिखण्डिनृत्तसन्तुष्टा सौरभेयी वसुन्धरा ।
सुरभी कामदा काम्या कमनीयार्थकामदा ॥ ६१ ॥
नन्दिनी लक्षणवती वसिष्ठालयदेवता ।
गोलोकदेवी (४००) लोकश्रीर्गोलोकपरिपालिका ॥ ६२ ॥
हविर्धानी देवमाता वृन्दारकवरानुयुक् ।

---

१ 'तन्त्रा' क पाठ । २ गरुमाता क. पाठः । ३ तु वसुगा ख. पाठः ।
४ 'विशिष्ठा' ख. पाठः । ५ 'वेदमाता' ख. पाठः । ६ 'वरान्व' ख पाठः ।

रुद्रपत्नी भद्रमाता सुधाधाराऽम्बुविग्रहा ॥ ६३ ॥
दक्षिणा यज्ञसंभूर्तिः सुबाला धीरनन्दिनी ।
धीरपूर्णार्घवगतिः सुधायोनिः सुलोचना ॥ ६४ ॥
रामानुगा सुसेव्या च सुगन्धालयवासंगा ।
सुचारित्रा सुनिपुरा सुस्तनी स्तनवत्सला ॥ ६५ ॥
रजस्वला रजोयुक्ता रङ्गिका रङ्गमालिका ।
रङ्गप्रिया सुरङ्गा च रतिरङ्गस्वरूपिणी ॥ ६६ ॥
रजःशुक्राम्बिका निष्ठा रतिनिष्ठा रतिस्पृहा ।
हावभावा कामकेलिसर्वस्वा सुरजीविका ॥ ६७ ॥
स्वयम्भूकुसुमानन्दा स्वयम्भूकुसुमप्रिया ।
स्वयम्भूप्रीतिसन्तुष्टा स्वयम्भूनिन्दकान्तकृत् ॥ ६८ ॥
स्वयम्भूस्था शक्तिपुटी रतिसर्वस्वपीठिका ।
अत्यन्तसंभिका दूती विदग्धा प्रीतिपूजिता ॥ ६९ ॥
कुब्जिका यन्त्रनिलया योगपीठाधिवासिनी ।
सुलक्षणा रसरूपा सर्वलक्षणलक्षिता ॥ ७० ॥
नानालङ्कारसुभगा पञ्चबाणसमर्चिता ।
ऊर्ध्वत्रिकोणनिलया बाला कामेश्वरी तथा ॥ ७१ ॥
गणाध्यक्षा कुलाध्यक्षा लक्ष्मीश्चैव सरस्वती ।
वसन्तसमयप्रीता प्रीतिः कुचभरानता ॥ ७२ ॥
कलाधरमुखाऽमूर्धा पादवृद्धिः कलावती ।
पुष्पप्रिया धृतिश्चैव रतिकण्ठी मनोरमा ॥ ७३ ॥
मदनोन्मादिनी चैव मोहिनी पार्वणीकला ।
शोषिणी वशिनी राज्ञिन्यत्यन्तसुभगा भगा ॥ ७४ ॥
पूषा वशा च सुमना रविः प्रीतिर्धृतिस्तथा ।

१ 'दासुगा' ग पाठ । २ 'मानसो ख. पाठ ।

ऋद्धिः सौम्या मरीच्यंशुमाला प्रत्यङ्गिरा तथा ॥ ७५ ॥
शशिनी चैव सुच्छाया संपूर्णमण्डलोदया ।
तुष्टा चामृतपूर्णा च भगयन्त्रनिवासिनी ॥ ७६ ॥
लिङ्गयन्त्रालया (५००) शम्भुरूपा सयोगयोगिनी ।
द्राविणी बीजरूपा च अक्षुब्धा साधकप्रिया ॥ ७७ ॥
राजबीजमयी राज्यसुखदा वाञ्छितप्रदा ।
रजःसंवीर्यशक्तिश्च शुक्रविच्छिन्नरूपिणी ॥ ७८ ॥
सर्वसारा सारमया शिवशक्तिमयी प्रभा ।
संयोगानन्दनिलया संयोगप्रीतिमातृका ॥ ७९ ॥
संयोगकुसुमानन्दा संयोगा योगवर्धिनी ।
संयोगसुखदास्था चिदानन्दैकसेविता ॥ ८० ॥
अर्घ्यपूजकसंपत्तिरर्घ्यद्रव्यस्वरूपिणी ।
सामरस्या परा प्रीता प्रियसङ्गमरूपिणी ॥ ८१ ॥
ज्ञानदूती ज्ञानगम्या ज्ञानयोनिः शिवालया ।
चित्कला ज्ञानसकला सकुला सकुलात्मिका ॥ ८२ ॥
कलाचतुष्टया पद्मिन्यतिसूक्ष्मा परात्मिका ।
हंसकेलिस्थली च्छाया हंसद्वयविकासिनी ॥ ८३ ॥
विरागता मोक्षकला परमात्मकलावती ।
विद्याकलान्तरात्मस्था चतुष्टयकलावती ॥ ८४ ॥
विद्यासन्तोषणा तृप्तिः परब्रह्मप्रकाशिका ।
परमात्मपरा वस्तुलीना शक्तिचतुष्टया ॥ ८५ ॥
शान्तिर्बोधकलावाप्तिः परज्ञानात्मिकाकला ।
पश्यन्ती परमात्मस्था चान्तरात्मकलाऽकुला ॥ ८६ ॥
मध्यमा वैखरी चात्मकलानन्दा कलावती ।
तारिणी तरणी तारा शिवलिङ्गालयाऽऽत्मवित् ॥ ८७ ॥

परस्परशुभाचारा ब्रह्मानन्दविनोदिनी ।
रसात्तसा दृतरासा सार्था सार्थप्रिया द्युमा ॥ ८८ ॥
जात्यादिरहिता योगियोगिन्यानन्दवर्धिनी ।
वीरभावप्रदा दिव्या वीरस्थवीरभावदा ॥ ८९ ॥
पशुत्वाभिवीरगतिर्वीरसङ्गमहोदया ।
मूर्धाभिषिक्ता राजश्रीः क्षत्रियोत्तममातृका ॥ ९० ॥
शस्त्रास्त्रकुशला शोभा रसस्था युद्धजीविका ।
विजया योगिनी यात्रा परसैन्यविमर्दिनी ॥ ९१ ॥
पूर्णा [६००] वित्तैषिणी वित्ता वित्तसञ्चयशालिनी ।
भाण्डागारस्थिता रक्षा रत्नश्रेण्यधिवासिनी ॥ ९२ ॥
महिषी राजभोग्या च गणिका गणभोगभृत् ।
करिणी वडवा योग्या मल्लसेना पदातिका ॥ ९३ ॥
सैन्यश्रेणी शौर्यरता पताका ध्वजवासिनी ।
सुच्छत्रा चाम्बिका चाम्रा प्रजापालनसद्गतिः ॥ ९४ ॥
सुरभिः पूजकाचारा राजकार्यपरायणा ।
ब्रह्मचक्रमयी सोमसूर्यान्तर्यामिनी स्थितिः ॥ ९५ ॥
पौरोहित्यप्रिया साध्वी ब्रह्माणी यज्ञसन्ततिः ।
सोमपानपरा प्रीता जनाढ्या तपना क्षमा ॥ ९६ ॥
प्रतिग्रहपरा दात्री सृष्टा जातिः सतांगतिः ।
गायत्री वेदलभ्या च दीक्षा सन्ध्यापरायणा ॥ ९७ ॥
रत्नसद्दीधितिर्विश्ववासना विश्वजीविका ।
कृषिवाणिज्यभूतिश्च वृद्धिर्धी च कुसीदिका ॥ ९८ ॥
कुलाधारा सुप्रसारा मनोन्मनी परायणा ।
शूद्रा विप्रगतिः कर्मकरी कौतुकपूजिका ॥ ९९ ॥
नानाविचारचतुरा बाला प्रौढा कलामयी ।

सुकर्णधारा नौः पारा सर्वाशा दुर्गमोचनी ॥ १०० ॥
दुर्गा विन्ध्यवनस्था च कन्दर्पनयपूरणी ।
भूभारशमनी कृष्णा रक्षाराध्या रसोल्लसा ॥ १०१ ॥
त्रिविधोत्पातशमनी समग्रसुखशेवधिः ।
पञ्चावयववाक्यश्रीः प्रपञ्चोद्यानचन्द्रिका ॥ १०२ ॥
सिद्धसन्दोहसुखिता योगिनीवृन्दवन्दिता ।
नित्यषोडशरूपा च कामेशी भगमालिनी ॥ १०३ ॥
नित्यक्लिन्ना च भेरुण्डा वह्निमण्डलवासिनी ।
महाविद्येश्वरीनित्या शिवदूतीतिविश्रुता ॥ १०४ ॥
त्वरिता ग्रथिता ख्याता विख्याता कुलसुन्दरी ।
नित्या-नीलपताका च विजया सर्वमङ्गला ॥ १०५ ॥
ज्वालामाला (७००) विचित्रा च महात्रिपुरसुन्दरी ।
गुरुवृन्दा परगुरुः प्रकाशानन्दनाथिनी ॥ १०६ ॥
शिवानन्दानाथरूपा शक्त्यानन्दस्वरूपिणी ।
देव्यानन्दानाथमयी कौलेशानन्दनाथिनी ॥ १०७ ॥
दिव्यौघगुरुरूपा च समयानन्दनाथिनी ।
शुक्रदेव्यानन्दनाथा कुलेशानन्दनाथिनी ॥ १०८ ॥
क्लिन्नाज्ञानन्दरूपा च समयानन्दनाथिनी ।
वेदानन्दनाथमयी सहजानन्दनाथिनी ॥ १०९ ॥
सिद्धौघगुरुरूपा च अपरागुरुरूपिणी ।
गगनानन्दनाथा च विश्वानन्दस्वनाथिनी ॥ ११० ॥
विमलानन्दनाथा च मदनानन्दनाथिनी ।
भुवनाद्या च लीलाद्या नन्दनानन्दनाथिनी ॥ १११ ॥
स्वात्मानन्दानन्दरूपा प्रियाद्यानन्दनाथिनी ।
मानवौघगुरुश्रेष्ठा परमेष्ठिगुरुप्रभा ॥ ११२ ॥

परगुह्या गुरुशक्तिः स्वगुरुकीर्तनप्रिया ।
त्रैलोक्यमोहनख्याता सर्वाशापरिपूरका ॥ ११३ ॥
सर्वसंक्षोभिणी पूर्वाम्नायप्रथितवैभवा ।
शिवाशक्तिः शिवशक्तिः शिवचक्रत्रयालया ॥ ११४ ॥
सर्वसौभाग्यदाख्या च सर्वार्थसाधिकाह्वया ।
सर्वरक्षाकराख्या च दक्षिणाम्नायदेवता ॥ ११५ ॥
मध्यार्कचक्रनिलया पश्चिमाम्नायदेवता ।
नवचक्रकृतावासा कौबेराम्नायदेवता ॥ ११६ ॥
कुबेरपूज्या कुलजा कुलाम्नायप्रवर्तिनी ।
बिन्दुचक्रकृतावासा मध्यसिंहासनेश्वरी ॥ ११७ ॥
श्रीविद्या च महालक्ष्मीः लक्ष्मीः शक्तित्रयात्मिका ।
सर्वसाम्राज्यलक्ष्मीश्च पञ्चलक्ष्मीतिविश्रुता ॥ ११८ ॥
श्रीविद्या च परज्योतिः परानिष्कलशाम्भवी ।
मातृका पञ्चकोशी च श्रीविद्या त्वरिता तथा ॥ ११९ ॥
पारिजातेश्वरी चैव त्रिकूटा पञ्चबाणगा ।
पञ्चकन्थलता पञ्चविद्या चामृतपीठिका ॥ १२० ॥
सुधासू रमणेशाना चान्नपूर्णा च कामधुक् ।
श्रीविद्या सिद्धलक्ष्मीश्च मातङ्गी भुवनेश्वरी ॥ १२१ ॥
वाराही पञ्चरत्नानामीश्वरी मातृवर्णगा ।
पराज्योतिः कोशरूपा ऐन्दवी कलया युता ॥ १२२ ॥
परितः स्वामिनी शक्तिदर्शना रविबिन्दुयुक् ।
ब्रह्मदर्शनरूपा च शिवदर्शनरूपिणी ॥ १२३ ॥
विष्णुदर्शनरूपा च सृष्टिचक्रनिवासिनी ।
सौरदर्शनरूपा च स्थितिचक्रकृतालया ॥ १२४ ॥
शैवदर्शनरूपा च महात्रिपुरसुन्दरी ।

तत्त्वमुद्रास्वरूपा च प्रसन्ना (८००) ज्ञानमुद्रिका ॥ १२५ ॥
सर्वोपचारसन्तुष्टा दृन्मयी शीर्षदेवता ।
शिखास्थिता व्रह्ममयी नेत्रत्रयविलासिनी ॥ १२६ ॥
अस्त्रस्था चतुरस्रा च द्वारका द्वारवासिनी ।
अणिमा पश्चिमस्था च लघिमोत्तरदेवता ॥ १२७ ॥
पूर्वस्था महिमेशित्वा दक्षिणद्वारदेवता ।
वशित्वा वायुकोणस्था प्राकाम्येशानदेवता ॥ १२८ ॥
अग्निकोणस्थिता भुक्तिरिच्छा नैर्ऋतवासिनी ।
प्राप्तिसिद्धिरवस्था च प्राकाम्यार्धविलासिनी ॥ १२९ ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराह्यैन्द्री च चामुण्डा महालक्ष्मीर्दिशांगतिः ॥ १३० ॥
क्षोभिणी द्राविणीमुद्राऽऽकर्षोन्मादनकारिणी ।
महाङ्कुशा खेचरी च बीजाख्या योनिमुद्रिका ॥ १३१ ॥
सर्वाशापूरचक्रस्था कार्यसिद्धिकरी तथा ।
कामाकर्षिणिकाशक्तिर्बुध्याकर्षणरूपिणी ॥ १३२ ॥
अहङ्काराकर्षिणी च शब्दाकर्षणरूपिणी ।
स्पर्शाकर्षणरूपा च रूपाकर्षणरूपिणी ॥ १३३ ॥
रसाकर्षणरूपा च गन्धाकर्षणरूपिणी ।
चित्ताकर्षणरूपा च धैर्याकर्षणरूपिणी ॥ १३४ ॥
स्मृत्याकर्षणरूपा च बीजाकर्षणरूपिणी ।
अमृताकर्षिणी चैव नामाकर्षणरूपिणी ॥ १३५ ॥
शरीराकर्षिणीदेवी आत्माकर्षणरूपिणी ।
षोडशस्वररूपा च स्रवत्पीयूषमन्दिरा ॥ १३६ ॥
त्रिपुरेशी सिद्धरूपा कलादलनिवासिनी ।
सर्वसंक्षोभचक्रेशी शक्तिर्गुप्ततराभिधा ॥ १३७ ॥

अनङ्गकुसुमाशक्तिरनङ्गकटिमेखला ।
अनङ्गमदनाऽनङ्गमदनातुररूपिणी ॥ १३८ ॥
अनङ्गरेखा चानङ्गवेगानङ्गाङ्कुशाभिधा ।
अनङ्गमालिनी शक्तिरष्टवर्गादिगन्विता ॥ १३९ ॥
वसुपत्रकृतावासा श्रीमत्त्रिपुरसुन्दरी ।
सर्वसाम्राज्यसुखदा सर्वसौभाग्यदेश्वरी ॥ १४० ॥
संप्रदायेश्वरी सर्वसंक्षोभणकरी तथा ।
सर्वविद्राविणी सर्वाकर्षणोपप्रकारिणी ॥ १४१ ॥
सर्वाह्लादनशक्तिश्च सर्वजृम्भणकारिणी ।
सर्वस्तम्भनशक्तिश्च सर्वसंमोहिनी तथा ॥ १४२ ॥
सर्ववश्यकरीशक्तिः सर्वसर्वानुरञ्जिनी ।
सर्वोन्मादनशक्तिश्च सर्वार्थसाधकारिणी ॥ १४३ ॥
सर्वसम्पत्तिदाशक्तिः सर्वमन्त्रमयी तथा ।
सर्वद्वन्द्वक्षयकरी (९००) सिद्धित्रिपुरवासिनी ॥ १४४ ॥
सर्वार्थसाधकेशी च सर्वकार्यार्थसिद्धिदा ।
चतुर्दशारचक्रेशी कलायागसमन्विता ॥ १४५ ॥
सर्वसिद्धिप्रदादेवी सर्वसंपत्प्रदा तथा ।
सर्वप्रियङ्करीशक्तिः सर्वमङ्गलकारिणी ॥ १४६ ॥
सर्वकामप्रपूर्णा च सर्वदुःखप्रमोचिनी ।
सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी ॥ १४७ ॥
सर्वाङ्गसुन्दरीदेवी सर्वसौभाग्यदायिनी ।
त्रिपुरेशी सर्वसिद्धिप्रदा च दशकोणगा ॥ १४८ ॥
सर्वरक्षाकरेशी च निगर्भायोगिनी तथा ।
सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्यप्रदा तथा ॥ १४९ ॥
सर्वज्ञानमयीदेवी सर्वव्याधिविनाशिनी ।

सर्वाधारस्वरूपा च सर्वपापहरा तथा ॥ १५० ॥
सर्वानन्दमयीदेवी सर्वरक्षास्वरूपिणी ।
महिमाद्याकृतिदेवी च देवीसर्वसमृद्धिदा ॥ १५१ ॥
अन्तर्दशारचक्रेशी देवीत्रिपुरमालिनी ।
सर्वरोगहरेशी च रहस्ययोगिनी तथा ॥ १५२ ॥
वाग्देवी वशिनी चैव देवीकामेश्वरी तथा ।
मोदिनी विमला चैव अरुणा जयिनी तथा ॥ १५३ ॥
सर्वेश्वरी कौलिनी च भक्तारसर्वसिद्धिदा ।
सर्वकामप्रदेशी च परापररहस्यवित् ॥ १५४ ॥
त्रिकोणचतुरस्रा[1] च सर्वैश्वर्याऽऽयुधात्मिका ।
कामेश्वरी बाणरूपा कामेशी चापरूपिणी ॥ १५५ ॥
कामेशी पाशरूपा च कामेश्यङ्कुशरूपिणी ।
कामेश्वरीन्द्रशक्तिश्च अग्निचक्रकृतालया ॥ १५६ ॥
कामगिर्यधिदेवी च त्रिकोणस्याऽग्रकोणगा ।
दक्षकोणेश्वरी विष्णुशक्तिर्जालन्धराश्रया ॥ १५७ ॥
सूर्यचक्रालया रुद्रशक्तिर्वामाङ्गकोणगा ।
सोमचक्रब्रह्मशक्तिः पूर्णगिर्यनुरागिणी ॥ १५८ ॥
श्रीमत्त्रिकोणभुवना त्रिपुरात्ममहेश्वरी ।
सर्वानन्दमयेशी च बिन्दुगतिरहस्यभृत् ॥ १५९ ॥
परब्रह्मस्वरूपा च महात्रिपुरसुन्दरी ।
सर्वचक्रान्तरस्था[2] च ममत्वचक्रनायिका ॥ १६० ॥
सर्वचक्रेश्वरी सर्वमन्त्राणामीश्वरी तथा ।
सर्वविद्येश्वरी चैव सर्वयागीश्वरी तथा ॥ १६१ ॥
सर्वयोगीश्वरी चैव पीठेश्वर्य्यखिलेश्वरी ।

---

१ 'चतुरस्रा' ख. पाठ । २ 'रहस्याङ्गान्तरस्था' ख पाठः ।

सर्वकामेश्वरी सर्वतत्त्वैश्वर्यागमेश्वरी ॥ १६२ ॥
शक्तिः शक्तिदृगुल्लासा निर्द्वन्द्वा द्वैतगर्भिणी ।
निष्प्रपञ्चा महामाया सप्रपञ्चा स्वरासिनी ॥ १६३ ॥
सर्वविश्वोत्पत्तिधात्री परमानन्दसुन्दरी (१०००)।
इत्येतत्कथितं दिव्यं परमानन्दकारणम् ॥ १६४ ॥
लावण्यसिन्धुलहरीबालायास्तोपमन्दिरम् ।
सहस्रनाम तत्राणां सारमाकृष्य पार्वति ॥ १६५ ॥
अनेन स्तुवतो नित्यमर्धरात्रे निशामुखे ।
प्रातःकाले च पूजायां सर्वकालमतः शिवे ॥ १६६ ॥
सर्वसाम्राज्यसुखदा बाला च परितुष्यति ।
रत्नानि विविधान्यस्य वित्तानि प्रचुराणि च ॥ १६७ ॥
मनोरथपथस्थानि ददाति परमेश्वरी ।
पुत्राः पौत्राश्च वर्धन्ते सन्ततिः सर्वकालिकी ॥ १६८ ॥
शत्रवस्तस्य नश्यन्ति वर्धन्तेऽस्य बलानि च ।
व्याधयस्तस्य दूरस्थाः सकलान्यौषधानि च ॥ १६९ ॥
मन्दिराणि विचित्राणि राजन्ते तस्य सर्वदा ।
कृषिः फलवती तस्य भूमिः कामदुघाव्यया ॥ १७० ॥
स्फीतो जनपदस्तस्य राज्यं तस्य निरीतिकम् ।
मातङ्गाः पर्वणस्तुङ्गाः सिञ्चन्तो मदवारिभिः ॥ १७१ ॥
द्वारे तस्य विराजन्ते हृष्टा नागतुरङ्गमाः ।
प्रजास्तस्य विराजन्ते निर्विवादाश्च मन्त्रिणः ॥ १७२ ॥
ज्ञातयस्तस्य तुष्यन्ति शीलं तस्यातिसुन्दरम् ।
लक्ष्मीस्तस्य यशो नित्यं स्वासना च मनोरमा ॥ १७३ ॥
गद्यपद्यमयी वाणी तस्य गङ्गातरङ्गवत् ।

' एतेन ' ख. पाठः ।

नानापदपदार्थानां वादचातुर्यसंभृता ॥ १७४ ॥
समग्ररससंपत्तिशालिनी लास्यमालिनी ।
अदृष्टान्यपि शास्त्राणि प्रकारयन्ते निरन्तरम् ॥ १७५ ॥
निग्रहः परवाक्यानां सभायां तस्य जायते ।
स्तुवन्ति वन्दिनस्तं वै राजानो दासवत्तथा ॥ १७६ ॥
शस्त्रापदस्त्राणि तदङ्गे जनयन्ति रुजां नहि ।
महिलास्तस्य वशगाः सर्वास्ता भवन्ति वै ॥ १७७ ॥
विषं निर्विषतां याति पानीयममृतं भवेत् ।
परपक्षस्तम्भनं च प्रतिपक्षस्य जृम्भणम् ॥ १७८ ॥
नवरात्रेण जायेत स तदभ्यासयोगवित् ।
अहोरात्रं पठेद्यस्तु निस्तन्द्रः शान्तमानसः ॥ १७९ ॥
वशे तस्य प्रजा याति सर्वे लोकाः सुनिश्चितम् ।
षण्मासाभ्यासयोगेन योगमायाति निश्चितम् ॥ १८० ॥
नित्यं कामकलांध्यायन् यः पठेत् स्तोत्रमुत्तमम् ।
मदनोन्मादकलिताः पुरन्ध्यस्तद्वशानुगाः ॥ १८१ ॥
लावण्यमदनाः साक्षाद्वैदग्ध्यमुदितेक्षणाः ।
प्रेमपूर्णापि वशे शुर्वशीं स हि विन्दति ॥ १८२ ॥
भूर्जपत्रे रोचनया कुङ्कुमेन शुभे दिने ।
लाक्षारसद्रवेणापि यावकैर्वा विशेषतः ॥ १८३ ॥
धातुरागेण वा देवि लिखितं यन्त्रमञ्चितम् ।
सुवर्णरौप्यगर्भस्थं सुसंपूतं सुसाधितम् ॥ १८४ ॥
बालामुद्ध्या पूजितं च प्रतिष्ठितसमीरणम् ।
धारयेन्मस्तके कण्ठे बाहुमूले तथा हृदि ॥ १८५ ॥
नाभौ वापि धृतं धन्यं जयदं सर्वकामदम् ।
रक्षणं नापरं किञ्चिद्विद्यते भुवनत्रये ॥ १८६ ॥

ग्रहरोगादिभयहृत् सुखकृत्यविवर्धनम् ।
बलवीर्यकरं शूरभूतशत्रुविनाशनम् ॥ १८७ ॥
पुत्रपौत्रान् गुणगणैर्वर्धनं धनधान्यकृत् ।
धरण्यां सा पुरी धन्या यत्रायं साधकोत्तमः ॥ १८८ ॥
यद्गृहे लिखितं तिष्ठेत् स्तोत्रमेतद्वरानने ।
तत्र चाहं शिवे नित्यं हरिश्च कमला तथा ॥ १८९ ॥
वसामः सर्वतीर्थानामुत्पत्तिस्तस्य आयते ।
यो वापि पाठयेद् भक्त्या पठेद्वै साधकोत्तमः ॥ १९० ॥
ज्ञानानन्दकलायोगादैक्यपूर्त्तिं स विन्दति ।
स्तोत्रेणानेन देवेशि तव पूजाफलं लभेत् ॥ १९१ ॥
पोडान्यासतनुर्भूत्वा पठितव्यं प्रयत्नतः ।
उत्तमा सर्वतन्त्राणां बालायाः पूजनस्थितिः ॥ १९२॥
तत्रोत्तमा षोडशार्णा तत्रेदं स्तोत्रमुत्तमम् ।
नाशिष्याय प्रदातव्यमशुद्धाय शठाय च ॥ १९३ ॥
अलसायामयुक्तायाशिवाभक्ताय सुन्दरि ।
भक्तिहीनाय मलिने गुरुनिन्दापराय च ॥ १९४ ॥
विष्णुभक्तिविहीनाय विकल्पाकृतबुद्धये ।
देयं भक्तवरे मुक्तेः कारणं भक्तिवर्धनम् ॥ १९५ ॥
लतायोगे पठेद्यस्तु स्तोत्रमेतद्वरानने ।
सैव कल्पलता तस्य वाञ्छाफलकरी तथा ॥ १९६ ॥
पुष्पितायां लतायोगे कुरङ्गमुखि साधकः ।
अक्षुब्धः सन् पठेद्यस्तु शतयज्ञस्य पुण्यभाक् ॥ १९७ ॥
ब्रह्मादयोऽपि देवेशि प्रार्थयन्ति पदद्वयम् ।
स्वयं शिवः स विज्ञेयो यो बालाभावलम्पटः ॥ १९८ ॥
ब्रह्मानन्दमयी ज्योत्स्ना सदाशिवविभूदिता ।

आनन्दो योऽपि यं वेदा वदन्त्यस्या वशे स्थिताः ॥ १९९ ॥
आह्लादनं बालाध्यानाद्बालाया नामकीर्तनात् ।
सदानन्दाभ्यासयोगात् सदानन्दः प्रजायते ॥ २०० ॥

इति श्रीरुद्रयामले तन्त्रे भैरवभैरवीसंवादे
श्रीबालात्रिपुरसुन्दरीसहस्रनामकम् ॥ ४ ॥

अथ

श्रीबालास्तोत्रम् ।

अरुणकिरणजाले रञ्जितायावकाभा
विधृतजपवटीका पुस्तकाभीतिहस्ता ।
इतरकरवराढ्या कुङ्कुमक्षारसक्ता
निवसतु हृदि बाला नित्यकन्यारूपा ॥ २ ॥
बालां जपेद् यस्त्रिपुरे भवान्या
बीजं त्रिशीर्षे जडभावलीनः ।
भवेत् स गीर्वाणगुरोर्गरीयान्
गिरीशपत्नि प्रभुतादि तस्य ॥ ३ ॥
कामेश्वरि श्यघरीकामराज
जपेद् दिनान्ते[1] तव मन्त्रराजम् ।
रम्भादि जृम्भारिसभा विहाय
भूमौ भजेत् त कुलदीक्षित च ॥ ४ ॥
वाग्भवकं बीजमिदं जपेद् य
स्त्रैलोक्यमातस्त्रिपुरे पुरस्तात् ।
विधाय लीला भुवने तथान्ते
निरामय ब्रह्मपदं प्रयाति ॥ ५ ॥
धरामधस्त्रिपुराष्ट-पत्रपद्मकोणनागरे
विन्दुपीठेऽर्चयेद्बालां योऽसौ प्रान्ते शिवो भवेत् ॥ ६ ॥
इति मन्त्रमय स्तव पठेद् य-
स्त्रिपुराया निशि वा निशावसाने ।
स भवेद् भुवि सार्वभौममौलि-
स्त्रिदिवे शक्रसमानशौर्यलक्ष्मीः ॥ ७ ॥
इतीद देवि बालायास्तोत्र मन्त्रमय परम् ।

---

१ 'परमेश्वरमयार्चितस्य' क पाठ । २ 'प्रदान्त' ख पाठ ।

अदातव्यमभक्तेभ्यो गोपनीयं स्वयोनिवत् ॥ ८ ॥

इति श्रीरुद्रयामले तन्त्रे भैरवभैरवीसंवादे
श्रीबालात्रिपुरसुन्दरीस्तोत्रम् ॥ ५ ॥

समाप्तं श्रीबालापञ्चाङ्गम् ॥

अथ

उद्धारकोशः ।

एकदा स्फाटिकोर्वीभृत्सानौ वनसमाकुले ।
संस्थितौ पार्वतीशम्भू लोकरक्षणतत्परौ ॥ १ ॥
पार्वती परमेशानं प्रोवाच परमं[1] हितम् ।
देवदेव सुरश्रेष्ठ दयात्रैगुण्यमानस ॥ २ ॥
देवी भगवती देव महात्रिपुरसुन्दरी ।
अस्मिंश्चराचरे व्यक्ते क्रूरे केन प्रकाशिता ॥ ३ ॥

श्रीईश्वरः ।

शृणु देवि प्रवक्ष्यामि गोप्यं तव कुतूहलात् ।
रेवातटे महापुण्ये श्रीगर्भा नाम सत्पुरी ॥ ४ ॥
अस्ति त्रैलोक्यविख्याता सर्वभूतलशेखरा ।
तस्यां बभूव विप्रेन्द्रदेवगन्धर्वसेवितम् ॥ ५ ॥

---

१ 'वसन' ग पाठ ।

पुण्यं तपोवनपदं नानावृक्षसमाकुलम् ।
तस्मिंस्तपोवने पुण्ये सेविते ऽपि सुरेश्वरैः ॥ ६ ॥
ऋषिस्तु दक्षिणामूर्तिस्तदाराधनतत्परः ।
नानाशास्त्राब्धिपोतोऽपि सर्वागमनिधिरभूत् ॥ ७ ॥
एकदा स्नातुमायातो रेवा पुण्यजलान्विताम् ।
प्राक्पुण्यकर्मणा तस्मै तुष्टा त्रिपुरसुन्दरी ॥ ८ ॥
जलमध्ये स्थिता गोप्त्री महात्रिपुरसुन्दरी ।
मूलं च शिक्षितो देव्याः शुद्धमन्त्रस्वरूपकम् ॥ ९ ॥
सत्वरं फलदं गोप्यं स मुनीन्द्रशिरोमणिः ।
तदा प्रभृति तन्मन्त्रं ध्यायन् स्तोत्रं जपन् हृदि ॥ १० ॥
तत्प्रभावान्महादेवि ग्रन्थं कर्तुमियेष सः ।
तदनुग्रहमात्रेण स मुनीश्वरपूजितः ॥ ११ ॥
ग्रन्थमुद्धारकोशाख्यं चकार मन्त्रसागरम् ।
अन्यान् नानाविधान् ग्रन्थान् प्रेक्ष्य त्रैलोक्यपूजिते ॥ १२ ॥
तदा प्रभृति देवेशि प्रसिद्धं भूमिमण्डले ।
ग्रन्थमुद्धारकोशाख्यं सर्वागमविनिश्चितम् ॥ १३ ॥

श्रीदेव्युवाच ।

देवदेव जगन्नाथ भक्तानुग्रहकारक ।
श्रोतुमुद्धारकोशाख्यं नानागमविनिश्चितम् ॥ १४ ॥
इच्छामि परया प्रीत्या वक्तुमर्हसि धूर्जटे ।

श्रीईश्वरः ।

शृणु देवि प्रवक्ष्यामि ह्युद्धारं त्रिपुरादितः ।
देवीनां दशविद्यानां मन्त्रोद्धारमनुत्तमम् ॥ १५ ॥
ग्रन्थमुद्धारकोशाख्यं सर्वागमविनिश्चितम् ।

---

१ दवदृष्ट ग पाठ । २ ऋषिः स्याद् ख पाठ । ३ 'जना ख पाठ । ४ स्वरूपक ग पाठ ॥

सर्वग्रन्थाद्यपूज्यं च तच्छृणुष्व ब्रवीम्यहम् ॥ १६ ॥
तदनुग्रहमात्रेण सर्वानुद्धारसञ्चयान् ।
अब्रवीद् दक्षिणामूर्तिः शिष्यमक्षोभ्यनामकम् ॥ १७ ॥
शृणु छात्र महाभाग देवीभक्तिसमन्वित ।
रहस्यं सर्वलोकानां देवानामपि दुर्लभम् ॥ १८ ॥
देवि तस्मिन्नवसरे शिष्याय प्रियवादिने ।
मुनीन्द्रो दक्षिणामूर्तिरब्रवीद् ग्रन्थमुत्तमम् ॥ १९ ॥
भाषितं यत्पुरा तेन तत्प्रभावान्महेश्वरि ।
देवानां देवतानां च तच्छृणुष्व ब्रवीम्यहम् ॥ २० ॥

तत्रादौ त्रिपुरामन्त्रोद्धारः । तदुक्तं वामकेश्वरतन्त्रे—

१) लक्ष्मीः परा मदनवाग्भवशक्तियुक्ता
तारं च भूतिकमला कथितापि विद्या ।
शक्त्यादिकं तु विपरीततया च प्रोक्तं
श्रीषोडशाक्षरविधिः शुभदोऽस्तु पूर्णः ॥ १ ॥

इति । उड्डामरे च—

क्षीरोदसम्भवा भूतिः कामं वाग्भवमेव च ।
शक्तिः प्रणवलग्ने तु लक्ष्मीः शक्त्यादिकं ततः ॥ १ ॥
विपरीततया प्रोक्ता विद्या श्रीषोडशाक्षरी ।
(त्रिकूटा सकला भद्रे विद्येयं षोडशाक्षरी) ॥ २ ॥

इति । रुद्रयामलेऽपि—

हरिणाक्षी तथा माया कामराजश्च वासना ।
शरत् त्र्यक्षं तथा चामा लक्ष्मीः शक्त्यादिकं तथा ॥ १ ॥
विपरीततया प्रोक्ता विद्या श्रीषोडशाक्षरी ।

तत्र लक्ष्मीबीजनामानि, उक्तं च च्छिन्नारहस्ये—

लक्ष्मीः पद्मा हरिणाक्षी सरोरुहनिवासिनी ।

---

१ 'छात्र' ख.पाठः । २ 'ततः' ख.पाठः । ३ तत्राप्यस्मिन्नुद्धारकोशादि अधिकः ख. पाठः ॥

कमला रुक्मिणी चैव नारायणप्रिया प्रिये ।
लक्ष्मीबीजानि सप्तैव कृत्रिमाण्यपराणि तु ॥ १ ॥
(वान्तं वह्निसमायुक्तं रतिबिन्दुविभूषितम् ।
लक्ष्मीबीजमिति प्रोक्तं सर्वकामार्थसिद्धिदम् ॥ २ ॥)

अपरं च त्रिपुरातिलके —

इमे द्वे कमला पद्मा हरिकान्ता तथैव च ।
श्रियो बीजानि पञ्चैवमनृतान्यपराणि तु ॥ १ ॥

श्रीं-इति लक्ष्मीबीजम् । अथ परबीजनामानि, उक्तं वागमालङ्कारे—

परा भूतिस्तथा लज्जा मायापि सकला कृशा ।
समस्तापि तथा वामा देवीप्रणवबीरकौ ॥ १ ॥
वारुणार्णे सुधाबीजं कृत्रिमाण्यपराणि तु ।
(वामाद्विवह्निसंयुक्तं बिन्दुनादविभूषितम् ।
शिवबीजं महेशानि लज्जाबीजमुदाहृतम् ॥ २ ॥

ईशानमुद्धृत्य पुरारिबीजं
सबिन्दुकं नादविभूषितं च ।
सवामकर्णं परितः प्रकल्प्य
मायां वदन्तीह मनीषिणस्ताम् ॥ ३ ॥)

ह्रीं-इति परबीजम् । ततो मदनबीजनामानि, उक्तं च भैरवतन्त्रे—

कामः पञ्चेषुरेवं च मदनो मन्मथस्तथा ।
मारः प्रद्युम्नकन्दर्पावनृतान्यपराणि तु ॥ १ ॥

क्लीं-इति मदनबीजम् । ततो वाग्भवबीजनामानि, उक्तं च त्रिपुरासारसर्वस्वे-

वाग्भवमूर्ध्वबीजं च चारुणं चण्डकेश्वरः ।
चन्द्रोऽपि चर्मवसनं वासनापि तथैव च ॥ १ ॥
चार्वङ्गयपि च चर्माणमसत्यान्यपराणि तु ।

---

१ 'ह्रीं' ख. पाठः । २ 'वह्नि' ख. 'वह्नि' ग. पाठः । ३ 'चण्डोऽपि वर्म' ख. पाठः ।

(द्वादशस्वरवर्णं स्याच्चादबिन्दुविभूषितम् ।
वाग्भवं बीजमित्युक्तं सर्ववाक्यविशुद्धये ॥ २ ॥)

ऐं-इति वाग्भवबीजम् । वाग्देवीबीजौ द्वौ, ऐं क्लीं च । अथ शक्तिबीजनामानि, उक्तं च छिन्नमस्तिशिरोमणौ—

शक्तिः शर्मापि विज्ञेये शरच्चन्द्रे तथैव च ।
शक्तिबीजानि चत्वारि कृत्रिमाण्यपराणि तु ॥ १ ॥

सौः-इति शक्तिबीजम् । शर्मबीजौ द्वौ, सौः शं च । ततस्तारबीजनामानि, तत्रैव—

प्रणवं च धनुस्तारं व्यक्तं तोमापि त्र्यम्बकः ।
त्रासस्तारक एतानि बीजानि प्रणवस्य च ॥ १ ॥
अपराणि ह्यसत्यानि मया प्रोक्तानि पार्वति ।
विपरीततया प्रोक्ता विद्या श्रीषोडशाक्षरी ॥ २ ॥

ओं-इति तारबीजम् प्रकाश्यम्।—श्रीं ह्रीं क्लीं ऐं सौः ओं ह्रीं श्रीं कएईलह्रीं, ह्रसकहलह्रीं, सकलह्रीं, सौः ऐं क्लीं ह्रीं श्रीं। इति श्रीत्रिपुरामन्त्रोद्धारः ॥ अथ दश विद्या। उक्तं चागमलह्र्याम्—

त्रिपुरा श्रीश्च वाग्देवी तारापि भुवनेश्वरी ।
मातङ्गी शारिका राज्ञी भीडा ज्वालामुखी तथा ॥ १ ॥
दश विद्याः स्वयं चैता भाषिताः कृत्तिवाससा ।
एता दशैव षडन्या योजिता षोडशाक्षरी ॥ २ ॥
दशविद्या भद्रकाली तुरी च छिन्नमस्तका ।
दक्षिणाकालिका श्यामा कालराज्ञपि सुन्दरि ॥ ३ ॥
एतासां मूलमन्त्रेण योजितैकाक्षरेण च ।
ब्रह्मादिदेवतैः पूज्या विद्या श्रीषोडशाक्षरी ॥ ४ ॥

वामकेश्वरे षोडशाक्षरी विद्या, इति ।

---

१ 'सः' ख. पुस्तके पाठः ।

ततो लक्ष्मीमन्त्रोद्धारः। उक्तं च रुद्रयामले—

(२) हरिणाक्षी परा त्र्यर्णं लक्ष्मीबीजत्रयं त्विदम् ।
विपरीततया प्रोक्तं सत्वरं फलदायकम् ॥ १ ॥
चामा शङ्कापि नीरं तदन्ते प्रोक्तं शिष्योत्तम ।

तत्र नीरबीजनामानि, यदुक्तमुड्डामरे—

आपो वनं तथा नीरं ठद्वयं च पयस्तथा ।
जलबीजानि प्रोक्तानि ह्रसत्यानि पराणि तु ॥ १ ॥

स्वाहा-इति नीरबीजम् । ॐ ह्रीं श्रीं लक्ष्मि महालक्ष्मि सर्वकामप्रदे सर्वसौभाग्यदायिनि अभिमतं प्रयच्छ सर्वे सर्वगते सर्वस्वरूपे सर्वदुर्जनविमोचिनि ह्रींसोः[1] स्वाहा, इति मूलम्। शारदायाम्—

वाग्भवं शम्भुवनिता रमा मकरकेतनः ।
तार्तीयं च जगत्पार्श्वो वह्निबीजसमुज्ज्वलः ॥ १ ॥
उ—दीर्घाढ्यो भृगुस्त्यै हृन्मन्त्रोऽयं द्वादशाक्षरः ।

ऐं ह्रीं श्रीं क्लीं सौः जगत्प्रसूत्यै नमः इति ॥ ततः सरस्वतीमन्त्रोद्धारः यदुक्तं शारदापटले—

(३) तारं लज्जा वाग्भवं च परा प्रणवमेव च ।
बीजं पञ्चशिरो ज्ञेयमन्ते प्रोक्तं नम इति ॥ १ ॥

प्रकाशम्—ॐ ह्रीं ऐं ह्रीं ॐ वाग्देव्यै नमः ॥ (शारदायाम्—

तारं पराऽधरो बिन्दुः शक्तिस्तारं सरस्वती ।
ङेन्ता नत्यन्तिको मन्त्रः प्रोक्त एकादशाक्षरः ॥ १ ॥

प्रकाशम्—ॐ ह्रीं ऐं ह्रीं ॐ सरस्वत्यै नमः।) नमोबीजनामानि, उक्तं वागमालङ्कारे—

नमो विश्वं तथा स्तम्भमौरमकं चाश्मरी तथा ।
अन्यानि कृत्रिमाण्येव सुरासुरनमस्कृते ॥ १ ॥

इति ॥ ततस्तारामन्त्रोद्धारः। उक्तं च भैरवसर्वस्वे—

(४) तार व्योमं तथा कान्ता माया वाग्भवमेव च ।

---

१ 'स.' इ पाठ ।

कूर्चं चैव महेशानि ह्यन्ते फट् ठद्वयं तथा ॥ १ ॥

तत्र व्योमबीजनामानि, उक्तं वागमसिन्धौ—

स्कन्दं व्योमं च डिम्भं च संयोज्य हरमित्यतः ।

ह्रां-बीजोद्धारमेतद्धि चान्यदनृतमावदेत् ॥ १ ॥

ह्रां-इति व्योमबीजम् । ततः कान्तावीजनामानि, उक्तं च वामकेश्वरे—

कान्ता च कमलाक्षी च प्रियापि परमापि च ।

लम्भापि ललना लज्जा ह्यसत्यन्यपराणि तु ॥ १ ॥

(षोडशव्यञ्जनं वह्निवामाक्षिबिन्दुसंयुतम् ।

चन्द्रबीजे समारूढं वधूबीजमिदं स्मृतम् ॥ २ ॥)

स्त्रीं-इति कान्तावीजम् । एकाक्षीबीजञ्च । ततः कूर्चबीजनामानि, उक्तं च च्छिन्नारहस्ये—

कूर्चं कूलं तटं तीरमसत्यान्यपराणि तु ।

हूं-इति कूर्चबीजम् । ततः फट्बीजनामानि, च्छिन्नारहस्ये—

हरं फट् तुरगं चान्यदसत्यं तु महेश्वरि ।

ॐ ह्रां स्त्रीं ह्रीं पैं हूं उग्रतारे फट् स्वाहा इति ॥ अथ भुवनेश्वरी-मन्त्रोद्धारः । उक्तं च कुब्जिकासर्वस्वे—

[५] प्रणवं तु तथा माया कमला मन्मथस्तथा ।

अन्ते विश्वं नाम मध्ये प्रोक्तं वै तु[1] सुरेश्वरि ॥ १ ॥

प्रोक्तोऽयं भुवनेश्वर्या मनुस्तुर्याक्षराभिधः ।

तत्र मनुबीजनामानि, उक्तं च स्वतन्त्रे त्रिपुराटीकायाम्—

मन्त्रो मनुर्हरश्चैव हनुर्वालं विदुर्बुधाः ।

बीजान्येतानि मन्त्रस्य कृत्रिमान्यपराणि तु ॥ १ ॥

हरबीजौ द्वौ, मन्त्रः फट् च । प्रकाशं—ॐ ह्रीं श्रीं क्लीं भुवनेश्वर्यै नमः इति ॥ ततो मातङ्गीमन्त्रोद्धारः । उक्तं हि कुलसिद्धासन्ताने—

[६] रोमा काली तथा लक्ष्मीर्वागुराद्वयमेव च ।

चारुकं रसबीजानि ह्यादौ प्रोक्तानि शम्भुना ॥ १ ॥

---

१ 'तुन्य' ख. पाठः ।

अन्ते जिह्वा तथा पद्मं लज्जा नीरजमेव च ।
वासना पङ्कजं चैव वर्म प्रोक्तं च शूलिना ॥ २ ॥

इति । तत्र जिह्वाबीजनामानि, कालीबीजोद्धाराणि च कुलचूडामणौ—

काली कुन्ती रसज्ञापि जिह्वापि रसना तथा ।
क्रीं-बीजानि च ह्येतानि कृत्रिमाण्यपराणि च ॥ २ ॥

क्रीं-इति जिह्वाबीजम् । अथ वागुराबीजनामानि—

वागुरा वायुपूज्यापि वातुर्दास्य त्रिबीजकम् ।
श्रीं-बीजानि तु प्रोक्तानि ह्यसत्यान्यपराणि तु ॥ १ ॥

श्रीं-इति वागुराबीजम् । अथ चारुकबीजनामानि, मुण्डमालातन्त्रे—

चारुकं चैव चार्वङ्गी चारुतोच्छूनबीजकम् ।
चतुष्टयं च च्छ्रीं-बीजे असत्यान्यपराणि च ॥ १ ॥

चार्वङ्गीबीजौ द्वौ च्छ्रीं यें च ॥ ततः पद्मबीजनामानि, उक्तं च वामकेश्वरे—

पद्मं पङ्कजपयोजे नीरजमम्बुजं तथा ।
पञ्च ठकारबीजानि ह्यसत्यान्यपराणि च ॥ १ ॥

ठः इति पद्मबीजम् । प्रकाशम्—ॐक्रींह्रींश्रींप्रींच्छ्रीं उच्छिष्टचण्डालिनि देवि महापिशाचिनि मातङ्गीदेवि क्रींठः ह्रींठः यें ठः स्वाहा । इति मातङ्गीमूलम् ॥ अथ शारिकामन्त्रोद्धारः, उक्तं स्वकृतौ त्रिपुराशिरोमणौ—

(७) तारं मायां श्रियं कूर्चं सिन्धुरं शून्यमेव च ।
कन्याणं शारिकादेव्या बीजं सप्ताक्षरं स्मृतम् ॥ १ ॥
अन्ते स्तम्भं च विज्ञेयं शारिकामन्त्रमुत्तमम् ।

तत्र सिन्धुरबीजनामानि, उक्तं च वामकेश्वरे—

सिन्धुरं च गणं[3]घोणाहस्तिनं[4] द्विरदं तथा ।
क्रांबीजानि चें चत्वारि कृत्रिमाण्यपराणि च ॥ १ ॥

क्रां-इति सिन्धुरबीजम् ॥ ततः शून्यबीजनामानि, उक्तं च भैरवतन्त्रे—

शून्यं खमम्बरं व्योम क्रांबीजे च चतुष्टयम् ।

---

१ 'बान्त' ख. 'वार्तु' ग. पाठः । २ 'तटवं' ख. पाठः । ३ 'हस्तं' ख. पाठः । ४ 'हि' ख. पाठः ।

हकारं चापि विज्ञेयमुक्तं तद्रुद्रयामले ॥ १ ॥
असत्यमपरं ज्ञेयं ताराभक्तिसमन्विते ।

आमिति (ह च) शून्यबीजम् ॥ तत कल्याणबीजनामानि, तत्रैव—

कल्याणं चैव शर्मापि शं शुभं च चतुष्टयम् ।
अपरमनृतं ज्ञेयं पर्वतेश्वरनन्दिनि ॥ १ ॥

शर्मबीजे द्वे सो श च । प्रकाशं—ॐ ह्रीं श्रीं ह्रः फ्रा आ शा शारिकायै नम । इति ॥ ततो राज्ञीमन्त्रोद्धार, श्यामातन्त्रे—

(८) तारं लज्जा श्रियमग्निः कामः शक्तिः पडक्षरः ।
बीज च पदशिरो ज्ञेयं ततः पल्लवमुद्धरेत् ॥ १ ॥
भगवत्यै तथा राज्ञ्यै ह्यन्ते माया च ठद्वयम् ।
एभिः सह मनुः प्रोक्तो राज्ञ्याः पञ्चदशाक्षरः ॥ २ ॥

इति । तत्र अग्निबीजनामानि, श्यामातन्त्रे —

अग्नी रेफश्च वह्निश्च हुतभुग् हव्यवाहनः ।
र-बीजोद्धारमेतद्धि कृत्रिममपरं स्मृतम् ॥ १ ॥

र-इत्यग्निबीजम्। प्रकाशम् — ॐ ह्रीं श्रीं रा क्लीं सौ. भगवत्यै राज्ञ्यै ह्रीं स्वाहा । इति ॥ अथ भीडामन्त्रोद्धार, कुलचूडामणौ—

(९) प्रणवं च विभूतिश्च हरिकान्ता तथैव च ।
वियच्छक्त्यग्निबीजानि संयोज्य वाग्भवं तथा ॥ १ ॥
मदनं च तथा शङ्कबीज सप्ताक्षर वदेत् ।
ठद्वयेन समायुक्तः प्रोक्तो विंशाक्षरो मनुः ॥ २ ॥
(तार परा रमा वेदी चन्द्रमन्मथशक्तयः ।
भीडाभगवतीत्येव हृदयरूपिणि ठद्वयम् ॥ ३ ॥)

प्रकाशम्— ॐ ह्रीं श्रीं ह्स्रा ऐं क्लीं सौ भीडाभगवति हृदयरूपिणि स्वाहा। इति ॥ अथ ज्वालामुखीमन्त्रोद्धार, शारदातिलकटीकायां—

(१०) तार लज्जा श्रिय चैवमन्ते कूर्चं हर[3] पयः ।

---

१ 'च' ख पाठ । २ 'श्रिय चाग्नि ग पाठ । ३ 'पुर' ख पाठ ।

बीजं च त्र्यक्षरं देव्या ज्वालामुख्याः सुरेश्वरि ॥ १ ॥
(तारं लज्जा श्रियं चैव ज्वालामुखि ममेति च ।
सर्वशत्रून् भक्षय—द्वितन्ते कूर्चं हृदं पयः ॥ २ ॥)

प्रकाशम्—ॐ ह्रीं श्रीं ज्वालामुखि मम सर्वशत्रून् भक्षय २ हूं फट् स्वाहा। इति ॥

दशविद्या मयाख्याता यथागमविनिश्चिताः ।
साधकेष्टप्रदा देव्यो नानारत्नविभूषिताः ॥ १ ॥
एतासां दशविद्याना गुणान् वक्ष्यामि त्वं शृणु ।

दक्षिणामूर्तिः।

मुक्तिं ददाति त्रिपुरा लक्ष्मीं लक्ष्मीर्ददाति च ।
विद्या ददाति वाग्देवी प्रत्येक जन्मनिश्चलाम् ॥ २ ॥
तारा ज्ञानं तथा मोक्ष[1]ैश्वर्यं भुवनेश्वरी ।
मातङ्गी राक्षसीशत्रुभीतिं हरति नित्यशः ॥ ३ ॥
शारिका शं ददात्येव राज्ञी राज्य प्रयच्छति ।
भीडादेवी ददात्येव सन्ततिं विश्वव्यापिनीम् ॥ ४ ॥
धनं ज्वालामुखी देवी भक्तेभ्यः संप्रयच्छति ।
दशविद्या यथा एता भक्तेभ्यः फलमिष्टदम् ।
प्रयच्छन्ति महादेव्यः पूजाहोमजपादिभिः ॥ ५ ॥

इति श्रीदक्षिणामूर्तिमुनिविरचिते उद्धारकोशे सर्वागमसारे दशविद्यामन्त्रोद्धारकोशाख्यान प्रथम कल्प ॥ १ ॥

---

१ [1]षट्पर ख पाठः। २ [1]तारपत्र सिन्धु ख ग पाठः।

अथ

द्वितीयः कल्पः ।

श्रीईश्वरः ।

शृणु देवि प्रवक्ष्यामि त्रिपुरां परिवारिताम् ।
षट्सखीभिरहं तासा मन्त्रोद्धारं ब्रवीमि ते ॥ १ ॥

अघोऽभ्य उवाच ।

गुरो विधातृसंभूत नानाशास्त्रविशारद ।
श्रोतुमिच्छाम्यहं मन्त्रान् सर्वान् संमुक्तिहेतवे ॥ २ ॥

दक्षिणामूर्तिः ।

शृण्वघोऽभ्य महाभाग सर्वं वक्ष्यामि तत्त्वतः ।
दशविद्या भद्रकाली तुरी च च्छिन्नमस्तका ॥ ३ ॥
दक्षिणाकालिका श्यामा कालरात्रीति सुन्दर ।
षट्सखीनामहं तासा मन्त्रोद्धारं ब्रवीमि ते ॥ ४ ॥

तत्रादौ भद्रकालीमन्त्रोद्धार । श्यामातन्त्रे–

(१) कालीत्रयं फूर्चयुगे लज्जायुग्मं च भद्रिका ।
भद्रकालिपदं ब्रूयाद् बीजानि प्रतिलोमतः ॥ १ ॥
ठद्वयेन समायुक्तो भद्रकाल्या[1] महामनुः ।

तत्र भद्रिकाबीजनामानि, मुण्डमालातन्त्रे

भद्रिका भास्वती भीमा भैंबीजे त्रितय स्मृतम् ।
अनृतमपरं ज्ञेय ब्रह्मान्वयसमुद्भव ॥ १ ॥

प्रकाशम्—क्रीं २ ह्रूं २ ह्रीं २ भ भद्रकालि भ ह्रीं २ ह्रूं २ क्रीं २ स्वाहा । इति ॥

---

१ 'कालीमहा' ख पाठः ।

अथ तुरीयमन्त्रोद्धारः। स्वतन्त्रे—

(२) प्रणवं तारका ज्योतिस्तारा ह्यन्ते नम इति ।
तुर्या मूलमिदं प्रोक्तं स्वतन्त्रे शम्भुना स्वयम् ॥ १ ॥

अथ तारकाज्योतिस्तारायाबीजोद्धारादीनि, कामेश्वरे तन्त्रे—

ऋचं भं तारका ज्योतिस्तारा बीजानि पञ्च च ।

ॐ ह्रीं त्रीं श्रीं महातुर्यै नमः। इति प्रकाशम् ॥ अथ छिन्नमस्तामन्त्रोद्धारः। छिन्नशिरोमणौ—

(३) त्र्यम्बकैः सकला पद्मा चारुकं च सुरेश्वरि ।
अन्ते उच्छूनबीजं फट् ठद्वयेन समायुतम् ॥ १ ॥

प्रकाशम्— ॐ ह्रीं श्रीं क्लीं छिन्नमस्तके क्लीं फट् स्वाहा। इति ॥ द्वितीयो भेदः, आगमलहर्याम्—

लक्ष्मीं लज्जां तथा मायां मात्रां द्वादशिकामथ ।
वज्रवैरोचनीये द्वे माये फट्स्वाहया युते ॥ १ ॥

प्रकाशम्— श्रीं ह्रीं ह्रीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा। इति ॥

अथ दक्षिणाकालीमन्त्रोद्धारः, श्यामारहस्ये—

(४) कुन्तीत्रयं तीरयुग्मं क्षामायुग्मं ततोऽभिधाम् ।
दक्षिणे-कालिकेत्येवमन्ते कालीत्रयं पुनः ॥ १ ॥
कूर्चयुग्मं परायुग्मं पयश्चैव सुरेश्वरि ।
दक्षिणायाः कालिकाया मनुर्द्वाविंशदक्षरः ॥ २ ॥

प्रकाशम्— क्रीं ३ हुं २ ह्रीं २ दक्षिणे कालिके क्रीं ३ हुं २ ह्रीं २ स्वाहा। इति ॥ अथ श्यामामन्त्रोद्धार। तत्र श्यामातन्त्रे—

(५) हरिणाक्षी तथा लज्जा काली जिह्वाचतुष्टयम् ।
ततः सुधारसे श्यामे कृष्णशापं विमोचय ॥ १ ॥
अमृतं स्रावय स्वाहा श्यामामन्त्रमुदाहृतम् ।

प्रकाशम्— श्रीं ह्रीं क्रीं क्रीं क्रीं क्रीं क्रीं सुधारसे श्यामे कृष्णशापं विमोचय अमृतं स्रावय स्वाहा। इति ॥ अथ कालरात्रीमन्त्रोद्धारः। उक्तं च

---

१ 'तुरामुख' ख पाठ। २ 'तुरात्रीं' ग पाठ। ३ 'श्यामिका' ख पाठः।

कालरात्रीकल्पे—

(६) प्रणवं वासना माया मन्मथः कमलोद्भवम् ।
बीजं पञ्चशिरो ज्ञेयं ततः[1] पल्लवमुद्धरेत् ॥ १ ॥
ततो मध्येऽभिधां त्यक्त्वा ह्यन्ते सर्वं वशं कुरु ।
नीरो[2] देहि-युगं मध्ये त्यक्त्वाभिधां च कामिनि ॥ २ ॥
गणेश्वर्यै तथा चान्ते विश्वं च समुदाहृतम् ।

प्रकाशम्— ॐ प ह्रीं क्लीं श्रीं कालिके सर्वजनमनोहरि सर्वमुखस्तम्भिनि सर्वराजवशङ्करि सर्वदुष्टनिर्दलिनि सर्वस्त्रीपुरुषकर्षिणि वन्दी ग्रह्वलाखोटय २ सर्वशत्रून् भञ्जय २ द्वेष्यान् निर्दलय २ सर्वास्तम्भय २ मोहनास्त्रेण द्विषमुच्चाटय २ सर्वं वश कुरु स्वाहा देहि २ सर्वकालरात्रि कामिनि गणेश्वर्यै नमः । अथ भेदाः—

देवेशि त्रिपुराबालं विज्ञेयं द्वादशात्मकम् ॥ ३ ॥

उक्तं च मुण्डमालातन्त्रे—

द्वादशात्मकं विज्ञेयं देवि तत्त्रिपुराह्वयम् ।
केवलं मुक्तये देवि यत्प्रोक्तं नच्छुभं स्मृतम् ॥ १ ॥

उड्डामरे—

अष्टात्मिका च विज्ञेया विद्या श्रीषोडशाक्षरी ।
परं यत् सूचितं देवि सद्यो मुक्तिप्रदं स्मृतम् ॥ १ ॥

तथा स्वकृतौ त्रिपुराशिरोमणौ—

अष्टात्मकमिदं बीजं त्रिपुरायाः स्मृतं तथा ।
अष्टभिर्वस्मरैर्वापि मारैरष्टभिरेव च ॥ १ ॥
अष्टभिर्दिक्पतिर्वापि जानीयान्मुक्तिलक्षणम् ।
लक्ष्मीभेदद्वयं ज्ञेयं भाषितं कृत्तिवाससा ॥ २ ॥
लक्ष्मी च रुक्मिणी चैव त्रिभिर्वर्षैः फलं लभेत् ।

अथ सरस्वतीभेदा, कामिनीकल्पे—

---

[1] "कमला तथा" ख पाठः । [2] 'नाथ' ख पाठः ।

वाग्देवी च तथा वाणी सरस्वत्यनलप्रिया ।
भेदास्तेते तु विख्याताः फलं वर्षचतुष्टये ॥ १ ॥

ततस्तारामेदाः, भैरवतन्त्रे—

तारापि तारिणी चैवमेकजटा तथैव च ।
नीलसरस्वती चैवमुग्रतारा प्रकीर्तिता ॥ १ ॥
ताराभेदास्तु पञ्चैवमचोभ्येण प्रकाशिताः ।

अथ भुवनेश्वरीभेदाः, भैरवतन्त्रे—

भैरवी भीमरूपा च भीमापि भुवनेश्वरी ।
भक्त्या फलप्रदा देवी नित्यं वर्षचतुष्टये ॥ १ ॥

अथ मातङ्गीभेदाः, रुद्रयामले—

मातङ्गीसुमुख्योरैक्यं मतङ्गमुनिना स्मृतम् ।
मातङ्गी चक्रिणी देवी कुञ्जिका शाम्बरी तथा ॥ १ ॥
देव्या भेदानि चत्वारि फलं वर्षचतुष्टये ।

अथ शारिकाभेदद्वयम्—

शारिकापि तथाऽपर्णा फलदापि द्विवर्षिके ।

अथ राज्ञीभेदाः—

राज्ञीभेदद्वयं प्रोक्तं राज्ञी च खगगामिनी ।
द्विवर्षमध्ये भक्त्या च राज्ञी राज्यं प्रयच्छति ॥ १ ॥

कुलिकार्णवे—

भीडा भेदविहीना च प्रजाभाग्यविवर्धिनी ।

अथ ज्वालामुख्याः, ज्वालाशिरोमणौ—

ततो ज्वालामुखी चैवमम्बिका भगरूपिणी ।
यथेष्टफलदं प्रोक्तं ज्वालाभेदत्रयमिदम् ॥ १ ॥
एतासां दशविद्यानां नानाभेदमुदाहृतम् ।

तत्रादौ त्रिपुराभेदाः, त्रिपुरातिलके मुण्डमालातन्त्रे च—

---

१ 'च' ग. पाठः । २ 'तत्र' ग. पाठः । ३ 'तारा' क. पाठः ।

त्रिपुरा भैरवीविद्या हिङ्गुला चण्डिका तथा ।
चामुण्डा नारसिंही च ह्यैन्द्री हैमवतीश्वरी ॥ १ ॥
मृडानी वारुणी दुर्गा महात्रिपुरसुन्दरी ।
देव्या द्वादशभेदास्तु प्रोक्ता ह्येते त्रिशूलिना ॥ २ ॥

श्रीं ह्रीं सौः त्रिपुरेऽपि चन्द्रवसने[1] कामः शरद्भैरवि
ऊँ ह्रीं श्रीं हिङ्गुले तथैव कमला चामः ङ्यचं चण्डिके ।
चामुण्डे हसकलह्रीं च सकलह्रीं श्रीनारसिंहि तथा
ह्यैन्द्रि चारणमेव ह्रीं च मदनः कामं परा रुक्मिणी ॥ ३ ॥
देवी हैमवतीश्वर्यपि कमला लज्जा तथा मन्मथ-
श्चन्द्रो वारुणि वा कएईलपरा दुर्गे स्मृता शम्भुना ।
श्रीं ह्रीं क्रीं चारण शारदपि तथा ङ्यचं परा रुक्मिणी
विद्याश्रीर्विपरीतभावसहिता स्यात् षोडशात्माविधिः ॥ ४ ॥

इति षोडशाक्षरीभेदाः ॥ प्रकाशम्-श्रीं ह्रीं सौः त्रिपुरे ॥ ऐं क्लीं सौ भैरवि ॥ ऊँ ह्रीं सौं हिङ्गुले ॥ श्रीं ह्रीं ऊँ चण्डिके ॥ हसकलह्रीं चामुण्डे ॥ सकलह्रीं श्री नारसिंहि ॥ ऊँ ह्रीं क्लीं ऐन्द्रि ॥ क्लीं ह्रीं श्रीं देवि हैमवतीश्वरि ॥ श्रीं ह्रीं क्लीं मृडानि ॥ ऐं वारुणि ॥ कएईलह्रीं दुर्गे ॥ श्रीं ह्रीं क्लीं ऐं सौ ऊँ ह्रीं श्रीं, कएईलह्रीं, हसकहलह्रीं, सकलह्रीं, सौः ऐं क्लीं ह्रीं श्रीं महात्रिपुरसुन्दरि । इति ॥

श्रीदेव्युवाच ।

महेश्वर त्रिकालज्ञ शरणागतवत्सल ।
भेदैर्युतानां देवीनां मन्त्रं[2] त्वं वक्तुमर्हसि ॥ १ ॥

ईश्वर उवाच ।

दयया तव देवेशि तद्वक्ष्यामि समासतः ।

अथ श्रिया मन्त्राद्धार यद्भुत भैरवतन्त्रे—

ऊँ ह्रीं श्रीं हरिणाक्षीबीजद्वय फलप्रद सद्यः ।

---

१ 'वसन' ख पाठ । २ मन्त्र ग पाठ ।

त्र्यक्षं ह्रीं शक्तिनीरमन्ते प्रोक्तमथापि धूर्जटिना ॥ १ ॥

अथ रुक्मिण्या मन्त्रोद्धारः—

ओं ह्रीं चैवं तु रुक्मिण्यास्तारं लक्ष्मीरपस्तथा ।
अन्ते प्रोक्तं महेशानि लक्ष्मीमेदं द्वयं त्विदम् ॥ २ ॥

प्रकाशम्—ओं ह्रीं श्रीं लक्ष्मि ओं ह्रीं स स्वाहा । ओं ह्रीं रुक्मिणि ओं श्रीं स्वाहा ॥ अथ सरस्वतीभेदाः—

तोमा परा वाग्भवमेव कामा तारं च प्रोक्तं परमेश्वरेण ।
वाग्देवतायाः फलदं हि बालं नृणां परो मुक्तिपरायणानाम् ॥ ४ ॥

प्रकाशम्—ओंह्रींऐंह्रींओं वाग्देवतायै नमः ॥ अथ वाणीभगवत्या मन्त्रः—

तारं लज्जोर्ध्ववीजं च ह्यन्ते स्तम्भमुदाहृतम् ।

प्रकाशम्—ओंह्रींऐं वाणीभगवत्यै नमः ॥ अथ सरस्वतीमन्त्रः—

चार्वङ्ग्यपि विभूतिश्च त्र्यक्षं सरस्वत्यै ततः ।
नमोऽन्ते परमेशानि मया प्रोक्तं नगात्मजे ॥ ५ ॥

प्रकाशम्—ऐं ह्रीं ओं सरस्वत्यै नमः ॥ अथानलप्रियामन्त्रः—

तारे लज्जा वाग्भवं च मध्येऽनलप्रिये ततः ।
त्र्यक्षं विश्व तथान्ते च पर्वतेश्वरनन्दिनि ॥ ६ ॥
देव्याश्चत्वारि भेदानि सरस्वत्या वरानने ।

प्रकाशम्—ओं ह्रीं ऐं अनलप्रिये ओं नमः ॥

अथ ताराभेदाः, प्रकाशम्—ओंऐंह्रींऐंह्रूं तारे फट् स्वाहा । ओंह्रींऐंह्रूं उग्रतारे फट् स्वाहा । ओंस्त्रींऐंह्रूं एकजटे फट् स्वाहा । ओंह्रींऐंह्रूं नीलसरस्वति फट् स्वाहा । ओंह्रांस्त्रींह्रींऐंह्रूं उग्रतारे फट् स्वाहा । इति ताराभेदाः ॥

अथ भुवनेश्वर्या भेदाः, ओं भैरवे नमः । ओंह्रीं भीमरूपाये नमः । ओंह्रींश्रीं भीमाये नमः । ओंह्रींश्रींक्लीं भुवनेश्वर्यै नमः । इति ॥

अथ मातङ्गीभेदाः, प्रकाशम्—ओंक्लींश्रींह्रींह्रूं उच्छिष्टचण्डालिनि देवि मदोन्मत्तमातङ्गि देवि सौः ठः ठः ऐंः स्वाहा ॥ द्वात्रिंशाक्षरो मन्त्रः सुमुख्या व्याख्याता वा । ओं उच्छिष्टचण्डालिनि सुमुखि

---

१ 'नमो भवि' ग पाठ । २ 'तारिणि ग पाठ ।

देवि महापिशाचिनि ह्रीं ठः (२२) ॥ अथ चक्रिण्याः—ॐ क्रीं च्छ्रीं महाचक्रिणि वेंठः स्वाहा ॥ अथ कुब्जिकायाः—ॐ श्रीं श्रीं कुब्जिके देवि ह्रीं ठः स्वाहा ॥ अथ शाम्बर्याः—ॐ ह्रीं देवि शाम्बरि क्रीं ठः स्वाहा ॥ अथ शारिकाभेदद्वयम्—तत्राऽपर्णामूलम्, ॐ हुं च्छ्रां भांशं देव्यै अपर्णायै नमः ॥ (अथ हैमवतीश्वरीमूलम्—ॐ ह्रीं श्रीं हैमवतीश्वरि ह्रीं स्वाहा) ॥ भीडा भेदविहीना इत्यलम् ॥

ज्वालामुखीभेदाः, तत्राम्बिकामूलम्—ॐ ह्रीं मातरम्बिके हू फट् स्वाहा ॥ अथ भगरूपिण्याः—ॐ श्रीं देवि भगरूपिणि हूं फट् स्वाहा ॥

एतानि भेदमन्त्राणि[1] मया प्रोक्तानि पार्वति ।
एतासां दशविद्यानामन्यासां शृणु वच्म्यहम् ॥ ७ ॥
भद्रकाली यथा देवी दक्षिणा कालिका तथा ।
तुरी भेदविहीनास्ति यथेष्टफलदायिनी ॥ ८ ॥

प्रकाशम्—क्रीं ३ हू २ ह्रीं २ भे भद्रकालि भे ह्रीं २ हूं २ क्रीं ३ स्वाहा ॥ क्रीं ३ हूं २ ह्रीं २ दक्षिणे कालिके क्रीं ३ हूं २ ह्रीं २ स्वाहा (२२) ॥ अथ च्छिन्नमस्ता द्विविधा-ॐ ह्रीं श्रीं च्छ्रीं च्छ्रीं छिन्नमस्तके ल्रीं फट् स्वाहा । द्वितीया—ॐ ह्रीं श्रीं वेंं वज्रवैरोचनि ह्रीं ह्रीं फट् स्वाहा ॥

दक्षिणा कालिका श्यामा कालरात्री सुरेश्वरि ।
एता भेदविहीनाश्च यथाकामफलप्रदाः ॥ ९ ॥

इति श्रीदक्षिणामूर्तिमुनिविरचिते उद्धारकोशे सर्वागमसारे षड्देवीमन्त्रोद्धारकोशभेदसूचको द्वितीयः कल्पः ॥ २ ॥

---

१ 'रूपाणि' ग. पाठः ।

अथ

तृतीयः कल्पः ।

ईश्वर उवाच ।

अथो देवि प्रवक्ष्यामि देवीनां मन्त्रमुत्तमम् ।
शृणुष्वैकाग्रमनसा ब्रवीमि त्वत्कुतूहलात् ॥ १ ॥
दक्षिणामूर्तिना तस्मिन् कालेऽन्तेवासिने तथा ।
भाषिता षोडशीविद्या ननन्दाचोभ्यको मुनिः ॥ २ ॥
तस्मिन्-काले मुनेस्तस्य चाश्रमं मुनिसेवितम् ।
आययुर्मुनयः सर्वे सोत्सुका मन्त्रकाङ्क्षिणः ॥ ३ ॥
लोहितोद्दालकौ शङ्खमातङ्कौ पुण्डरीकजौ ।
शाण्डिल्यगालवौ चैवमेते तस्याश्रमं ययुः ॥ ४ ॥
सर्वे मिलित्वा मुनिपुङ्गवं ते
श्रीदक्षिणामूर्तिमिदं तमूचुः ।
परस्परं वै स्वकुलेष्टदेवी-
मन्त्रांश्च वन्यान् शुभदान् पप्रच्छुः ॥ ५ ॥

श्रीदक्षिणामूर्तिरुवाच ।

शृणुध्वं मुनयः सर्वे वक्ष्याम्याश्चर्यमुत्तमम् ।
चराचरेऽस्मिञ्जगति देवी त्रिपुरसुन्दरी ॥ ६ ॥
नैव तादृक् क्वचिदास्ति देवीसीमन्तशेखरा ।
तस्याश्च वदनाम्भोजात् सप्त देव्यः श्रुता मया ॥ ७ ।
यथेष्टफलदायिन्यः सर्वरोगभयापहाः ।

अचिरेणैव कालेन फलदास्तन्मुखाच्छ्रुताः ॥ ८ ॥

ऋषय ऊचुः ।

का देव्यः कानि नामानि कीदृशानि मनूनि हि ।
प्रसाद कुरु विप्रर्षे चेदस्मासु दया तव ॥ ९ ॥

मुनिरुवाच ।

देवीना परया प्रीत्या मन्त्रान् शृणुध्वमग्रतः ।
येन श्रवणमात्रेण हयमेधफल लभेत् ॥ १० ॥

ईश्वर उवाच ।

मुनीश्वरान् पुनर्देवो दक्षिणामूर्तिरब्रवीत् ।
सप्त विद्याः पुरा प्रोक्ता वज्रयोगिन्यादिदेवताः ॥ ११ ॥
तासा वक्ष्यामि नामानि पर्वतेश्वरनन्दिनि ।
दक्षिणामूर्तिना तेपा प्रकाशितानि तत्त्वतः ॥ १२ ॥
श्रीवज्रयोगिनी देवी वाराही शारदा तथा ।
कामेश्वरी तथा गौरी ह्यन्नपूर्णा तथैव च ॥ १३ ॥
कुलवागीश्वरी ह्येताः सप्त देव्यः श्रुता मया ।
दक्षिणामूर्तिना तेपा सप्त विद्याः प्रकीर्तिताः ॥ १४ ॥
एतासा वलमाश्रित्य देवी त्रिपुरसुन्दरी ।
सृजे जगदेतच्च पाल्यते च सुरेश्वरि ॥ १५ ॥
हरतेऽपि तथा विश्व चराचरसमन्वितम् ।

ऋषिरुवाच ।

एतद्भावयामृत तस्या मुखाम्भोजाच्छ्रुत मया ।
तासा वक्ष्यामि मन्त्राणि शृणुध्व मुनिपुङ्गवाः ॥ १६ ॥

अथ मन्त्रोद्धारा तत्रादौ वज्रयोगिनीमन्त्रान्द्धार उक्त च स्वतन्त्रे—

(१) प्रणव सरला चैव बीजौ द्वौ फलदायकौ ।

---

१ 'मनून्' ख पाठ । २ ऽम्बधात् ग पाठ । ३ पुन ग पाठ ।

मध्येऽपि वज्रयोगिन्यै ह्यन्ते नीरमुदाहृतम् ॥ १ ॥

प्रकाशम् — ओं ह्रीं वज्रयोगिन्यै स्वाहा ॥

अस्या मन्त्र समुच्चार्य यः संग्रामं प्रविशति ।
स निर्जित्य रिपून् सर्वान् कल्याणी गृहमाविशेत् ॥ १७ ॥
अस्या बीजद्वयं देवि जपते यदि मानवः ।
द्वादशाब्दिवसं तावत्सिद्धिर्भवति वाञ्छिता ॥ १८ ॥
अस्या बीजावुपादिश्य ह्येकान्ते प्रजपेन्नरः ।
ऋतुस्नाताया भार्याया मैथुन कुरुते नरः ॥ १९ ॥
शुक्रेण सह देवेशि सप्तभिरौषधैर्लिखेत् ।
लिखित्वा स भवेद्राजा अस्या यन्त्रं समन्त्रकम् ॥ २० ॥
लिखित्वा धारयेन्मूर्ध्नि त्रैलोक्यविजयी भवेत् ।
अस्याः संभोगकाले तु मन्त्रं जपेत् सुरेश्वरि ॥ २१ ॥
कान्तायां मैथुन कुर्याद् बहुपुत्रयुतो भवेत् ।
अस्या यन्त्र समन्त्र च बाहौ यो धारयेन्नरः ॥ २२ ॥
यावज्जन्म भवेत्तस्य तावच्छत्रुर्न जीवति ।
अस्या यन्त्रं समन्त्र च हृदि यो धारयेन्नरः ॥ २३ ॥
यावज्जन्म भवेत्तस्य तावल्लक्ष्मीर्भविष्यति ।
अस्या यन्त्र समन्त्र च कुक्षौ यो धारयेन्नरः ॥ २४ ॥
अनुवादे स शत्रूणा वाक्यस्तः सहसा भवेत् ।
तस्यास्त्रिपुरसुन्दर्या मुखाम्भोजान्मया श्रुतम् ॥ २५ ॥
फलमेतन्महाश्चर्यकारक मुनिपुङ्गवाः ।

इति वज्रयोगिनी ॥ अथ वाराहीमन्त्रोद्धार उक्तश्च स्वकृतौ त्रिपुरातिलके—

(२) वासना चैव वाल्हीक तमोबीजसमन्वितम् ।
वाग्भव सौरमकं चैव ततः पल्लवमुद्धरेत् ॥ १ ॥
भगवति च वार्ताली तथा वाराहि देवते ।

वराहमुखि चैवं तु वासना च मठं तथा ॥ २ ॥
ततः पङ्कजपयोजौ हरं नीरं महेश्वरि ।
भगवत्यास्तु वाराह्या एकत्रिंशाक्षरो मनुः ॥ ३ ॥

तत्र वाल्हीकबीजनामानि, मुण्डमालातन्त्रे—

वाल्हीकं मठसंज्ञं च हिङ्गुबीजं मुनीश्वराः ।
ग्लौं-बीजोद्धारमेतद्धि चान्यदनृतमावदेत् ॥ १ ॥

अथ तमोबीजनामानि, स्वतन्त्रे—

तमोबीजं तथा ध्वान्तं मोहं तिमिरमेव च ।
लं-बीजोद्धाराण्येतानि कृत्रिमाण्यपराणि तु ॥ १ ॥

प्रकाशम्—ऐंग्लौंलपें नमो भगवति वार्ताली वाराहि देवते वराहमुखि ऐंग्लौंठ.ठः फट् स्वाहा, इति वाराही ॥ अथ शारदामन्त्रोद्धारः, उक्तं च शारदापटले—

(३) तारं माया च मदनं शरद्विज्ञेयमौरमकम् ।
मन्त्रं च पट्-शिरो ज्ञेयं ततः पल्लवमुद्धरेत् ॥ १ ॥
भगवत्यै-शारदायै चान्ते लज्जा च ठद्वयम् ।

प्रकाशम्—ॐह्रींक्लींसौ. नमो भगवत्यै शारदायै ह्रीं स्वाहा ॥ अथ कामेश्वरीमन्त्रोद्धार., भैरवपटले—

(४) माया च हरिणाक्षी च चन्द्रः शीतांशुरेव च ।
मदनमूर्मिध्वान्तौ द्वौ संयोज्य स्तनबीजकम् ॥ १ ॥
मनुः सप्तशिरो ज्ञेयस्ततः पल्लवमुद्धरेत् ।
जृम्भणाख्ये ततो देवि कामेश्वरि तथैव च ॥ २ ॥
ततो बाणदेवतेऽपि ह्यन्ते नीरमुदाहृतम् ।
कामेश्वर्या महादेव्या द्वाविंशदक्षरो मनुः ॥ ३ ॥

तत्र चन्द्रबीजनामानि, कालीसर्वस्वे—

चन्द्रः शीतांशुरिन्दुश्च शर्वरीपतिरेव च ।

---

१ 'रामठ चैव' ख पाठः । २ 'जम्भ' ग पाठ. ।

ताराधिपः सुधारश्मिः कृत्रिमाण्यपराणि च ॥ १ ॥

चन्द्रबीजौ द्वौ पें द्रां च । अथोर्मिबीजनामानि, तत्रैव—

ऊर्मिर्वीचिस्तथा चैव तरङ्गस्त्रितयं स्मृतम् ।

ब्लूं-बीजोद्धारनामानि कृत्रिमाण्यपराणि च ॥ २ ॥

अथ स्तनबीजनामानि, उक्तं वागमालङ्कारे—

स्तनबीजं कुचं चैवमुरोजो दृज्जमेव च ।

ऊं-बीजनामान्येतानि कृत्रिमाण्यपराणि च ॥ १ ॥

प्रकाशम्—ह्रौंश्रीं द्रांद्रीं क्लीं ब्लूं ऊर्ध्वे कामेश्वरि वाणेश्वरि स्वाहा । इति भैरवपटलोक्तम् । अथ गौरीमन्त्रोद्धारः, त्रिपुरार्णवतन्त्रे—

(५) प्रणवं कमला चैव माया वान्हीकमेव च ।

शिवबीजं तथा देवि गौरि शर्वश्च ठद्वयम् ॥ १ ॥

भगवत्या महागौर्या बालस्तु द्वादशाक्षरः ।

इति । तत्र शिवबीजनामानि, उक्तं च कुलचूडामणौ—

शिवबीजं च शम्भुश्च शर्वः शङ्कर एव च ।

गं-बीजानि च चत्वारि कृत्रिमाण्यपराणि च ॥ १ ॥

प्रकाशम्—ॐश्रीह्रींग्लौंगं देवि गौरि गौं स्वाहा (१२) ॥ अथान्नपूर्णामन्त्रोद्धारः, कामेश्वरीतन्त्रे—

(६) तारं परापि कमला मीनकेतन एव च ।

विश्वं ततो भगवति माहेश्वरि ततः पुनः ॥ १ ॥

अन्नपूर्णे ठद्वयं मनुर्विंशाक्षरः स्मृतः ।

मीनकेतन इति वीजम् । उक्तं च स्वकृतौ त्रिपुरसुन्दरीसर्वस्वे—

त्र्यं मायापि पद्मा च कामं विश्वमुदाहृतम् ।

बीजं तु पदशिरो ज्ञेयं विश्वेन सह भामिनि ॥ १ ॥

इत्युद्धारः । प्रकाशम्— ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ॥ अथ कुलवागीश्वरीमन्त्रोद्धारः, उक्तं च मुण्डमालातन्त्रे—

(७) प्रणवं मदनं चैव स्कन्दं नारायणप्रियाम् ।

---

१ 'अन्य' ग, घ, ङ, च ।

तटं तथेच्छाबीजं च ततः पल्लवमुद्धरेत् ॥ १ ॥
झषहस्ते ततः पश्चात् कुलवागीश्वरि तथा ।
अन्ते च वासनाबीजं पद्मं काङ्क्षापि नीरजम् ॥ २ ॥
नर्तकीबीजमम्भोजं पयश्चैव सुरेश्वरि ।
कुलवागीश्वरीदेव्यास्तुर्यविंशाक्षरो मनुः ॥ ३ ॥

तत्रेच्छाबीजनामानि, वामकेश्वरे —

इच्छाबीजं स्पृहा काङ्क्षा लिप्सा बीजचतुष्टयम् ।
झं-बीजस्यैव नामानि कृत्रिमाण्यपराणि च ॥ १ ॥

अथ नर्तकीबीजनामानि, च्छिन्नारहस्ये —

नर्तकीबीजमत्युग्रं वेश्यापि गणिका तथा ।
पण्यस्त्री पञ्च नामानि श्रीं-बीजस्यानृतं परम् ॥ १ ॥

अम्बुजाम्भोजयोरैक्यमिति दोष. । प्रकाशम् — ओं क्रीं ह्रा श्रीं हूं झ झषहस्ते कुलवागीश्वरि वेंठ झठः क्रींठ स्वाहा (२४) ॥

एता मया महेशानि सप्त विद्याः प्रकीर्तिताः ।
अद्याहं तव भक्त्या ते हृदि यद्रोचते प्रियम् ॥ २६ ॥
वद मे सत्वरं देवि तद्वक्ष्यामि सुविस्तरम् ।

श्रीदेव्युवाच ।

पञ्चाना बालकाख्यानां कीदृशास्ते मनूत्तमाः ।
कृपयापि पुरा मह्यं सूचिता न प्रकाशिताः ॥ २७ ॥

मुनय ऊचुः ।

ब्रह्मर्षे सर्वशास्त्रज्ञ त्वन्मुखात्सकलं श्रुतम् ।
मनून् पञ्चकुमाराणामस्माकं वक्तुमर्हसि ॥ २८ ॥

दक्षिणामूर्तिर्मुनीन् प्रति, ईश्वर. पार्वतीं प्रति ब्रवीति ।

श्रीईश्वर उवाच ।

शृणु पार्वति देवेशि महर्षीणा पुरा शिवे ।
दक्षिणामूर्तिनोक्तं यत् तत्ते वक्ष्यामि तत्त्वतः ॥ २९ ॥

हेरम्बशरजन्मानौ कार्तवीर्यार्जुनस्तथा ।
हनुमद्भैरवावेते भाषिताः पञ्च बालकाः ॥ ३० ॥

इति । भैरवीतन्त्रे वामकेश्वरे च—

हेरम्बशरजन्मानौ महामृत्युञ्जयस्तथा ।
कार्तवीर्यार्जुनश्चैव हनुमद्भैरवौ तथा ॥ १ ॥
स्वयं मया च तत्रोक्ता भाषिताः षट् कुमारकाः ।

रुद्रयामलेऽपि—

गणेशो वटुकश्चैव स्कन्दो मृत्युञ्जयस्तथा ।
कार्तवीर्यार्जुनोऽप्येवं सुग्रीवो हनुमांस्तथा ॥ १ ॥
यामले रुद्रशब्दादौ भाषिताः सप्त बालकाः ।

तत्रादौ गणेशमन्त्रोद्धारः, रुद्रयामले —

[१] प्रणवं कमलां लज्जा कन्दर्पं मठबीजकम् ।
शङ्करं पद्-शिरोमन्त्रं ततः पल्लवमुद्धरेत् ॥ १ ॥
गणपतये नमः पश्चाद् वर-वरद एव च ।
सर्वजनं ततः पश्चान्मे वशमानयेति च ॥ २ ॥
अन्तेऽपि ठद्वयं ज्ञेयमष्टाविंशाक्षरो मनुः ।

प्रकाशम्—ॐ श्रीं ह्रीं क्लीं ग्लौं ग गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा । इति ॥ अथ कुमारस्य मन्त्रोद्धारः, कुलचूडामणौ—

[२] प्रणवं छविबीजं च मन्त्रं तु द्विशिरः स्मृतम् ।
मध्ये कुमाराय नमो ह्यन्ते नीरमुदाहृतम् ॥ १ ॥

तत्र च्छविबीजनामानि, सिद्धसारस्वते—

छविबीजं कान्तिबीजं शोभाऽपि सुषमा तथा ।
ह्रा-बीजानि च चत्वारि कृत्रिमाण्यपराणि च ॥ १ ॥

प्रकाशम् — ॐ ह्रा कुमाराय नमः स्वाहा, इति ॥ अथ कार्तवीर्यार्जुनमन्त्रोद्धारः, उक्त षोढ्डामरतन्त्रे —

[३] प्रणवं वायुपूज्यापि चारुकं मन्मथस्तथा ।

शुक्रबीजं तथा शून्यं कमला रसना तथा ॥ १ ॥
चन्द्रं डिम्बं च कूर्चं च तुरगं च सुरेश्वरि ।
मध्ये तन्नाम विज्ञेयं कार्तवीर्यार्जुनाय च ॥ २ ॥
अन्ते पयो मनुः प्रोक्त एकविंशाक्षरः शिवे ।

तत्र शुक्रबीजनामानि, छिन्नाशिरोमणौ —

शुक्रबीजं तथा काव्यो भार्गवः कविबीजकम् ।
दैत्यमान्यो[1] महेशानि सुरासुरनमस्कृते ॥ १ ॥
द्रौं-बीजानि च पञ्चैव कृत्रिमाण्यपराणि च ।

शुक्रबीजौ द्वौ, द्रौं लृ च । प्रकाशम् — ॐ श्रीं च्छ्रीं क्लीं ब्लों आं श्रीं क्रीं ऐं ह्रीं हूं फट् कार्तवीर्यार्जुनाय स्वाहा ॥ अथ हनुमतो मन्त्रोद्धारः, कुलचूडामणौ —

[४] प्रणवमूर्ध्वबीजं च विभूतिस्तदनन्तरम् ।
हनुमते ततः पश्चाद्रामदूताय वै पुनः ॥ १ ॥
लङ्काविध्वंसनायैवमञ्जनीगर्भसं ततः ।
भूताय शाकिनी चैव डाकिनी तदनन्तरम् ॥ २ ॥
विध्वंसनाय किलि-द्वौं बुबुकारेण वै पुनः ।
विभीषणाय हनुमद्देवाय तदनन्तरम् ॥ ३ ॥
व्यचं माया हरिणाक्षी व्योमं स्कन्दं तथैव च ।
हरमाप्तस्तथान्तेऽपि सप्तपञ्चवरो मनुः ॥ ४ ॥

प्रकाशम् — ॐ ऐं ह्रीं हनुमते रामदूताय लङ्काविध्वंसनाय अञ्जनीगर्भसंभूताय शाकिनीडाकिनीविध्वंसनाय किलि २ बुबुकारेण विभीषणाय हनुमद्देवाय ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा, इति ॥ अथ वटुकभैरवस्य मन्त्रोद्धारः, रुद्रयामले—

[५] प्रणवं मन्मथं चैवमभ्रबीजसमन्वितम् ।
अब्धिबीजं कल्पबीजं शतह्रीबीजसंयुतम् ॥ १ ॥
मया मध्येऽपि वटुक-भैरवायार्चरी तथा ॥

---

१ 'दैत्यामात्यो' ख पाठः ।

अन्तेऽपो भैरवसायं मनुरष्टादशाक्षरः ॥ २ ॥

तथाभ्रबीजनामानि, यामकेश्वरे—

अभ्रबीजं च जीमूतमम्बुदं जलदं घनम् ।
वीं-बीजानि च पञ्चैवमनृतानि पराणि च ॥ १ ॥

अथान्धबीजनामानि, त्रिपुरातिलके—

अन्धबीजं तथा सिन्धुः सांवरं सागरस्तथा ।
रुं-बीजानि च चत्वारि (कृत्रिमाण्यपराणि च) ॥ १ ॥

रंकार—रकारेयोर्भेदेन रमग्निबीजं रुमित्यन्धबीजम् । अग्नयब्ध्योरन्तरादन्तरमिति निर्दोषः । अथ कल्पबीजनामानि, आगमालङ्कारे—

कल्पबीजं च संवर्तं प्रलयं क्षयबीजकम् ।
घातिकं क्षुरकं चौद्रं तथा कल्पान्तबीजकम् ॥ १ ॥
धुं-बीजान्येवमष्टौ च कृत्रिमाण्यपराणि च ।

अथ शतघ्नीबीजनामानि, आगमलहर्याम्—

शतघ्नी श्यालिका श्यामा शाद्वला शुष्कला तथा ।
मीं-बीजानि तु पञ्चैवमसत्यान्यपराणि च ॥ १ ॥

प्रकाशम्—ॐ क्रीं वीं रुं धुं म्नीं ह्रीं वटुकभैरवाय नमः स्वाहा ॥

[1] अथ महामृत्युञ्जयस्य मन्त्रोद्धारः, आगमलहर्याम्—

[६] त्र्यक्षं हृज्जं शक्तिशोभेऽपि शङ्का
मां तस्माद्वै पालय-द्वौ तथैव ।
तस्माच्छक्तिः खं शरद् हृज्जतारौ
मन्त्रोद्धारो देवि मृत्युञ्जयस्य ॥ १ ॥

प्रकाशम्—ॐ जुंसः हसः मां पालय २ सोऽहंसः जुं ॐ ॥ अथ सुग्रीवस्य मन्त्रोद्धारः, आगमशिरोमणौ—

[७] तारं माया वाग्भवं मन्मथं च
शक्तिर्मध्ये नाम त्यक्त्वा तथान्ते ।

---

१ 'रकार—रकारयोर्भेदे' ग. पाठः । २ 'शालिका' ग. पाठः ।

कालीपद्मौ कूर्चपद्मौ समस्ता-
पद्मौ नीरमेष सुग्रीवमन्त्रः ॥ १ ॥

प्रकाश्यम् — ओं ह्रीं ऐं क्रीं सः सुग्रीवाय क्रींठः ठंठ॰ ह्रींठः स्वाहा ॥

मयाख्याता महेशानि शेते वै सप्त बालकाः ।
दक्षिणामूर्तिरुवाच ।
शृणुध्वमृषयः किञ्चिद्युष्माकमस्ति यद्धृदि ।
ब्रवीमि भवतां प्रीत्या आज्ञापयितुमर्हथ ॥ ३१ ॥

इति श्रीदक्षिणामूर्तिमुनिविरचिते उद्धारकोशे सर्वागमसारे सप्तदेवी सप्तकुमारकोशाख्यान तृतीय॰ कल्प ॥ ३ ॥

अथ

चतुर्थः कल्पः ।

ऋषय ऊचुः ।

ब्रह्मर्षे सर्वतत्त्वज्ञ शास्त्राम्भोनिधिपारग ।
नवग्रहाणामस्माक मन्त्रांस्त्व वक्तुमर्हसि ॥ १ ॥
ईश्वर उवाच ।
तस्मिन् काले महर्षीणा यदुक्त धातृसनुना[1] ।
नवग्रहाणा मन्त्राश्च तान् वक्ष्यामि समासतः ॥ २ ॥
आदित्येन्दुजशुक्राश्च गुर्विन्दू परमेश्वरि ।

---

१ 'मनूस्त्व' ख पाठः ।

एते पञ्च महेशानि पञ्चेषोर्बाणदेवताः ॥ ३ ॥
सौमार्किराहवश्चैव त्रय एते मुनीश्वराः ।
देवस्य खण्डपरशोर्लोचनत्रयदेवताः ॥ ४ ॥
केतुश्च परमेशानि भूमेर्देवः प्रकीर्तितः ।
एते नव ग्रहाः प्रोक्ताः शम्भुना रुद्रयामले ॥ ५ ॥

अथादौ पञ्चग्रहमन्त्रोद्धारः । तत्रादावादित्यस्य मन्त्रोद्धारः, विश्वसारोद्धारे—

(१) प्रणवं चाम्बरं लक्ष्मीन्यैंपबीजं तथैव च ।
बीजं तुर्यशिरो ज्ञेयं ततः पल्लवमुद्धरेत् ॥ १ ॥
ग्रहाधिराजाय तत आदित्याय तथैव च ।
अन्ते पयस्तु विज्ञेयं मनुर्द्वर्यष्टाक्षरः स्मृतः ॥ २ ॥

तत्राम्बरबीजनामानि, भैरवतन्त्रे—

अम्बरं वस्त्रबीज च शून्यं शक्तिरिति त्रयम् ।
हरितं हरिणीबीज हरिद्राबीजमेव च ॥ १ ॥
द्रसौः—बीजानि सप्तैव कृत्रिमाण्यपराणि च ।

अम्बरबीजौ द्वौ द्रसौः आ च । प्रकाशम् — ॐ द्रसौः श्रीं आ ग्रहाधिराजाय आदित्याय स्वाहा । अथ बुधस्य मन्त्रोद्धारः, स्वतन्त्रे—

[२] प्रणव च तथा स्कन्दं रसज्ञा च षडाननः ।
मध्येऽपि ग्रहनाथाय बुधायान्ते च ठद्वयम् ॥ १ ॥
बुधस्य ग्रहनाथस्य मनुश्चतुर्दशाक्षरः ।

तत्र षडाननबीजनामानि, कुब्जिकासर्वस्वे—

षडाननः शरजन्मा स्कन्दः कुमारबीजकम् ।
शाम्भवः शालिनीबीजं तथा षण्मुखबीजकम् ॥ १ ॥
ट—बीजानि च सप्तैवमनृतान्यपराणि च ।

प्रकाशम् — ॐ ह्रा क्रौं ट ग्रहनाथाय बुधाय स्वाहा ॥ अथ शुक्रस्य

---

१ 'श्याम, ज ग पाठः ।

मन्त्रोद्धारः, आगमशिरोमणौ—

[३] प्रणवमूर्ध्वबीजं च स्तनबीजसमन्वितम् ।
शिवबीजं ततो मध्ये ग्रहेश्वराय वै पुनः ॥ १ ॥
शुक्रायान्तेऽग्निरी चैव वालश्चतुर्दशाक्षरः ।

प्रकाशम्—ॐ ऐं जं गं ग्रहेश्वराय शुक्राय नमः ॥ अथ बृहस्पतेर्मन्त्रोद्धारः, त्रिपुरातिलके—

[४] त्र्यक्षं मायापि सौभाग्या सुरासुरनमस्कृते ।
तरङ्गवेदये संयोज्य चार्वङ्गी हिङ्कुबीजकम् ॥ १ ॥
ऊर्ध्वं च षट्शिरोबीजं ततः पल्लवमुद्धरेत् ।
ततो ग्रहाधिपतये बृहस्पतय एव च ॥ २ ॥
पुनर्वारिवहं चैव पद्मं लक्ष्मीस्तु नीरजम् ।
वासना पङ्कजं चैवमन्ते प्रोक्तं वनं शिवे ॥ ३ ॥

इत्युद्धारः । सौभाग्येति दोषः । दक्षिणामूर्तिस्तु—"तस्य धिगस्तु मुनयः स्वयं यस्य न धीर्भवेत् । क्व रुक्मिणी क्व सौभाग्यं बाहुवोरन्तरं महत् ॥" इति दोषः । उक्तं च स्वकृतौ सुन्दरीसर्वस्वे—"प्रणव सकला चैव देवेशि रुक्मिणी तथा ।" ततो वारिवहमिति दोषः । वामकेश्वरे—

प्रणवं च परा लक्ष्मीर्वीचिवेश्येऽपि योजयेत् ।
चन्द्रो मठं ततः पश्चाद् ग्रहाधिपतये नमः ॥ १ ॥
ततो बृहस्पतयेऽपि ततो जीमूतबीजकम् ।
पद्मं लक्ष्मीर्नीरजं च वासना पङ्कजं तथा ।
अन्ते नीरं समाख्यातं पञ्चविंशाक्षरो मनुः ।

प्रकाशम्—ॐ ह्रीं श्रीं क्लीं ऐं ग्लौं ग्रहाधिपतये बृहस्पतये क्रौंठः ऐंठः क्रींठः स्वाहा ॥ अथ चन्द्रस्य मन्त्रोद्धारः, 'कालीपटले—

[५] त्र्यक्षं च हरिणाक्षी च कुन्तीबीजसमन्वितम् ।
हरेतिशब्दं संयोज्य शून्यानुस्वारसंयुतम् ॥ १ ॥
नाट्यबीजं ततो मध्ये चन्द्रायान्तेऽग्निरी स्मृता ।

तत्र नाट्यबीजनामानि भैरवतन्त्रे,

नाट्यबीजं च नटनं ताण्डवं नृत्तबीजकम् ।
चं-बीजानि च चत्वारि कृत्रिमाण्यपराणि च ॥ १ ॥

प्रकाशम्—ॐ श्रीं क्रीं ह्रां चं चन्द्राय नमः ॥

एते वै पञ्चबाणानां ग्रहाः पञ्च प्रकीर्तिताः ।

अथ भिग्रहमन्त्रोद्धारः । तत्रादौ भौमस्य मन्त्रोद्धारः, शारदाटीकायाम्

[६] चारणं हरिणीबीजं रुक्मिणी शर्वरीपतिः ।
वेधोबीजं ततो मध्ये ग्रहाधिपतये ततः ॥ १ ॥
भौमायान्ते पदं प्रोक्तो मनुः पञ्चदशाक्षरः ।

तत्र वेधोबीजनामानि, च्छिन्नारहस्ये —

वेधोबीजं विधिर्ब्रह्मा स्वयम्भूबीजमेव च ।
कं-बीजान्यपि चत्वारि कृत्रिमाण्यपराणि च ॥ १ ॥

प्रकाशम्—ऐं ह्सौः श्रीं ह्रां कं ग्रहाधिपतये भौमाय स्वाहा ॥

अथ शनैश्चरस्य मन्त्रोद्धारः, आगमलहर्याम्—

[७] तारं लज्जां श्रियं चैव बीजं त्रिशिरे ऊर्ध्वगः ।
ग्रहचक्रवर्तिनेऽपि शनैश्चराय वै ततः ॥ १ ॥
मदनं वासना शक्तिरन्ते नीरमुदाहृतम् ।
शनैश्चरस्य देवस्य मनुर्विंशाक्षरः स्मृतः ॥ २ ॥

प्रकाशम्—ॐ ह्रीं श्रीं ग्रहचक्रवर्तिने शनैश्चराय क्लीं वेंसः स्वाहा ॥ अथ राहोर्मन्त्रोद्धारः, तत्रैव —

[८] प्रणवं रसनायुग्मं तटयुग्मं च गर्जितम् ।
ततष्टङ्कधारिणे च राहवे हव्यवाहनः ॥ १ ॥
लज्जा लक्ष्मीस्तथा भीमा ह्यन्ते वनमुदाहृतम् ।
राहोर्विंशाक्षरो बालो यक्षभोष्टफलप्रदः ॥ २ ॥

तत्र गर्जितबीजनामानि, स्वतन्त्रे —

---

१ 'मया' क. ख. पाठः । २ 'त्रिशूल' क. ख. पाठः ।

गर्जितं स्तनबीजं च स्तनितं रसितं तथा ।
टं-बीजानि च चत्वारि कृत्रिमाण्यपराणि च ॥ १ ॥

प्रकाशम्—ॐ क्रीं क्रीं हुं हू ट टङ्कधारिणे राहवे रं ह्रीं श्रीं मैं स्वाहा । इति

शम्भोर्नेत्रत्रयाणां च देवता भाषिता मया ।
सुदिने साधको मन्त्रान् ग्रहाणां साधयेच्छिवे ॥ १ ॥

अथ केतुमन्त्रोद्धारः, मन्त्रमुक्तावल्याम्—

[६] प्रणवं सकला वृष्टिस्ततोऽपि क्रूररूपिणे ।
केतवेऽपि ततः पश्चाच्चन्द्रः शङ्का पयस्तथा ॥ १ ॥
केतोरयं मनुः प्रोक्तो देवि पञ्चदशाक्षरः ।

तत्र वृष्टिबीजनामानि, मुण्डमालातन्त्रे—

वृष्टिबीजं च करकं वर्षोपलस्तु वार्षिकैः ।
क्रूं-बीजानि च चत्वारि कृत्रिमाण्यपराणि तु ॥ १ ॥

प्रकाशम्—ॐ ह्रीं क्रूं क्रूररूपिणे केतवे ,यें सौः स्वाहा ॥ इति ,

एतेषां नवग्रहाणां मनवो भाषिता मया ।
अथाहं तव देवेशि वर्णानां वच्मि वै मनून् ॥ १ ॥
कोशं लोकोपकारार्थं गोप्याद्गोप्यतमं कुरु ।
येन विज्ञानमात्रेण मान्त्रिकः साधको भवेत् ॥ २ ॥

इति श्रीदक्षिणामूर्तिमुनिविरचिते उद्धारकोशे सर्वागमसारे
नवग्रहमन्त्रोद्धारकोशाख्यानं चतुर्थः कल्पः ॥ ४ ॥

अथ

पञ्चमः कल्पः ।



ऋषय ऊचुः ।

ब्रह्मर्षे ब्रह्मपुत्रस्त्वमागमार्णवपारग ।
प्रसन्नोऽसि महाभागिब्रूह्यास्मासु कृपया प्रभो ॥ १ ॥
नानाशास्त्राणि चास्माभिः श्रुतानि त्वन्मुखाम्बुजात् ।
वर्णानां श्रोतुमिच्छामो मन्त्रकोशानि च वयम् ॥ २ ॥

श्रीदक्षिणामूर्तिः ।

शृणु देवि प्रवक्ष्यामि मत्तो यूय यथाविधि[1] ।
वर्णानां मन्त्रकोशं च निःसृत त्रिपुरामुखात् ॥ ३ ॥
शृणुध्वमृषयः सर्वे मन्त्रकोश सुविस्तरम् ।
मुनीनां सूचितं यच्च दक्षिणामूर्तिना पुरा ॥ ४ ॥

त्रिपुरातिलके—

(अ) आत्मबीजमकार च स्वान्त हृद्बीजमेव च ।
मानसं च मनोबीज पैतामहमिति स्मृतम् ॥ ५ ॥
अपरमनृत ज्ञेयमकारस्य सुरेश्वरि ।
(आ) शून्य खमम्बर व्योम वैष्णव चेति भाषितम् ॥ ६ ॥
आकारस्यानृतमन्यदुक्त भैरवतन्त्रके ।
(इ) इन्द्रबीज तथा जिष्णुर्मरुत्वान् मघमा हरिः ॥ ७ ॥

---

१ 'मन्त्रकाप सुविस्तरम्' क ग पाठ ।

शैवमिकारवर्णस्य कृत्रिममपरं वदेत् ।
मया प्रोक्तं सुरेशानि ग्रन्थे भैरवतन्त्रके ॥ ८ ॥
(ई) बुद्धिबीजं तथा मेधा धीबीजं च मतिस्तथा ।
ऐन्द्रं तथैव विज्ञेयमीकारस्यानृतं परम् ॥ ९ ॥
मया प्रोक्तं सुरेशानि त्रिपुरातिलके शिवे ।
इन्द्रबीजौ द्वौ इं ईं च ।
(उ) रतिबीजं तथा नन्दा वामनं वीतुंबीजकम् ॥ १० ॥
सौर्यमुकारबीजानि कृत्रिमाण्यपराणि च ।
मयाख्यातानि सर्वस्वे कुब्जिकायाः सुरेश्वरि ॥ ११ ॥
(ऊ) कचबीजं तथा केशं शिरोरुहं च मूर्धजम् ।
ऐन्दवमनृतमन्यदूकारस्य सुरेश्वरि ॥ १२ ॥
शिरोमणौ मया प्रोक्ताः सुन्दर्याः परमेश्वरि ।
(ऋ) पाप्मबीजं तथा पापं किल्बिषं कल्मषं तथा ॥ १३ ॥
किङ्करीबीजमेवं च मङ्गलमनृतं परम् ।
ऋकारस्य रहस्येऽस्मिन् कान्याः प्रोक्तं मया शिवे ॥ १४ ॥
(ॠ) कृपाबीजं दयाबीजं करुणा कार्पिकं तथा ।
ॠकारस्यानृतमन्यद् भाषितं विष्णुयामले ॥ १५ ॥
(ऌ) विश्वबीजद्वयं ज्ञेयं ऌकारं च नम इति ।
व्यक्तबीजं जगद्बीजं गौर्वे प्रोक्तं मया शिवे ॥ १६ ॥
ऌकारस्यानृतमन्यदुक्तं च रुद्रयामले ।
(ॡ) गङ्गाबीजं सुनंदी च नाकवापी च स्वर्धुनी ॥ १७ ॥
शाक्रमन्यदनृतं च ऌकारस्य मया स्मृतम् ।
ग्रन्थे च स्वकृतौ देवि मन्त्रसागरतन्त्रके ॥ १८ ॥
(ए) एकादशी मात्रिका च लताबीजं तथैव च

---

१ 'बातु' ग. पाठः । २ 'वधा' 'वधा' ग. पाठः ।

वह्नीबीजं च वाराकी चान्यदनृतमावदेत् ॥ १६ ॥
अपरं च मयाख्यातमेकारस्य सुरेश्वरि ।
कुलचूडामणौ ग्रन्थे रचिते मात्रिकोत्तमैः ॥ २० ॥
(ऐ) वाग्भवमूर्ध्वबीजं च चारुणं चण्डिकेश्वरः ।
चण्डोऽपि चर्म वसनं वासना च तथैव च ॥ २१ ॥
चार्वङ्ग्यपि च चर्माणं मात्रां द्वादशिकामथ ।
राहु ख्यातं मया देवि ऐकारस्यानृतं परम् ॥ २२ ॥
त्रिपुरासारसर्वस्वे दक्षिणामूर्तिना कृते ।
(ओ) प्रणवं च ततस्तारं ज्यक्षं तोमापि त्र्यम्बकः ॥ २३ ॥
त्रासस्तारकं देवेशि कैतवं च मया स्मृतम् ।
छिन्नाशिरोमणौ ग्रन्थे रचिते वै मया स्वयम् ॥ २४ ॥
(औ) मोक्षबीजं तथा मुक्तिर्ज्ञानं निर्वाणबीजकम् ।
आगस्त्यं च मया ख्यातं ग्रन्थे भैरवतन्त्रके ॥ २५ ॥
(अ) अंबीजं वृक्षबीजं च पादपं धरणीरुहम् ।
भूरुह च मयाख्यातमनृतमपरं वदेत् ॥ २६ ॥
सिद्धसारस्वते ग्रन्थे अक्षरैव प्रकाशितम् ।
(अः) नागबीजं भूधरं च भार्गवबीजं च भानवम् ॥ २७ ॥
धौवं ख्यातं मया देवि अःशब्दस्यानृतं परम् ।
ग्रन्थे त्रिपुरसुन्दर्याः सर्वस्वे विश्वदुर्लभे ॥ २८ ॥
(क) ककारं च शिरोबीज मूर्धबीजं च चारुणम् ।
वेधोबीजं विधिर्ब्रह्मा स्वयम्भूबीजमेव च ॥ २९ ॥
ककारस्य मया ख्यातमनृतमपरं वदेत् ।
ग्रन्थे छिन्नारहस्येऽस्मिन् पर्वतेश्वरनन्दिनि ॥ ३० ॥

---

१ 'चन्द्रोऽवि' ब. पाठः । २ 'धनुस्ता' ग. पाठः । ३ तारं च' ग. पाठः ।
४ 'वर्ण' ख. पाठः । ५ 'वह्नि' ग. पाठः । ६ 'चारुणं' ग 'चारुण' ख पाठः ।

(ख) नभोबीजं पुष्करं च द्यौबीजं चक्रवालकम् ।
वैष्टरश्रवबीजं च प्रोक्तं त्रिपुरया स्वयम् ॥ ३१ ॥
आगमामृतमञ्जर्यां दुर्लभायां मयापि च ।
(ग) शिवबीजं च शम्भुश्च शर्वः शङ्कर एव च ॥ ३२ ॥
गकारस्यानृतमन्यद् भाषितं च मया शिवे ।
कुलचूडामणौ ग्रन्थे दुर्लभे त्रिदिवे प्रिये ॥ ३३ ॥
(घ) जिनबीजं षडभिज्ञं मारजिद्बीजमेव च ।
मायात्मजोऽर्कबन्धुश्च गौतममनृतं परम् ॥ ३४ ॥
घकारस्य मयाख्यातं ग्रन्थे वै रुद्रयामले ।
(ङ) षडाननः शरजन्मा स्कन्दः कुमारबीजकम् ॥ ३५ ॥
शाम्भवः शालिनीबीजमनृतमपरं स्मृतम् ।
कुब्जिकासर्वस्वे ख्यातं मया त्रैलोक्यपूजिते ॥ ३६ ॥
(च) नाट्यबीजं च नटनं ताण्डवं नृत्तबीजकम् ।
चकारस्य मया ख्यातं ग्रन्थे भैरवतन्त्रके ॥ ३७ ॥
(छ) शनिबीजमर्कजं च पङ्गुबीजं तथैव च ।
कालं च सौरबीजं च सृतिः सुन्दरबीजकम् ॥ ३८ ॥
छकारस्य मया प्रोक्तं ग्रन्थे कामेश्वरे शिवे ।
शनिबीजौ द्वौ छं शं च ।
(ज) स्तनबीजं कुचं चैवमुरोजो हृज्जमेव च ॥ ३९ ॥
जकारस्य मयाख्यातमन्यदनृतमावदेत् ।
आगमालङ्कारजे च ग्रन्थे भैरवनिर्मिते ॥ ४० ॥
(झ) इच्छाबीजं स्पृहा काङ्क्षा लिप्साबीजं चतुष्टयम् ।
झकारस्य मया ख्यातमसत्यमपरं स्मृतम् ॥ ४१ ॥
त्रैलोक्यप्रार्थिते ग्रन्थे देवि वै वामकेश्वरे ।
(ञ) यमबीजं कालबीजं कृतान्तसमवर्तिनौ ॥ ४२ ॥

कीनाशं मृत्युबीजं च अकारस्य मया स्मृतम् ।
त्रिपुरासर्वस्वे ग्रन्थे त्रिजगद्दुर्लभे प्रिये ॥ ४३ ॥
कालबीजौ द्वौ झं छं च ।
(ट) गर्जितं स्वनबीजं च स्तनितं रसितं तथा ।
टकारस्य मया ख्यातं स्वतन्त्रे देववन्दिते ॥ ४४ ॥
(ठ) पद्मं पङ्कजपयोजौ नीरजमम्बुजं तथा ।
पञ्च ठकारबीजानि कृत्रिमाण्यपराणि च ॥ ४५ ॥
मया ख्यातानि देवेशि तन्त्रे वै वामकेश्वरे ।
(ड) सिंहिका सरसीबीज रेणुकाबीजमेव च ॥ ४६ ॥
अञ्जनीबीजकं ख्यातमनृतमपरं स्मृतम् ।
डकारस्य मया देवि ग्रन्थे वै रुद्रयामले ॥ ४७ ॥
(ढ) वायुबीजं चानिलं च समीरणं मरुत्तथा ।
समीरं चाशुगं ज्ञेय वातं श्वसनबीजकम् ॥ ४८ ॥
ढकारस्य मया ख्यातमन्यदनृतमावदेत् ।
वायुबीजौ द्वौ ढं य च ।
(ण) बाणबीजं मार्गणं च पत्रिणमाशुगं तथा ॥ ४९ ॥
णकारस्यानृतमन्यद् ग्रन्थे भैरवतन्त्रके ।
आशुगबीजौ द्वौ ढ ण च ।
(त) रात्रिबीजं तमीबीजं तामसीबीजमेव च ॥ ५० ॥
चपा च क्षणदाबीजमन्यदनृतमावदेत् ।
कुब्जिकासर्वस्वे ग्रन्थे तंबीजं च मया स्मृतम् ॥ ५१ ॥
(थ) बिलबीजं च बिवरं सुषिरं च नागलोककम् ।
थकारस्य मया ख्यातं तन्त्रे वै कुलिकार्णवे[2] ॥ ५२ ॥
(द) चक्रिबीजं व्यालबीजं सर्पः काकोदरोरगौ ।
भोगिबीजं भुजङ्गं च भुजङ्गनमिति स्मृतम् ॥ ५३ ॥

---

१ 'तामसी च निशा मया' ग' पाठः । २ 'कुब्जिका' ग. पाठः ।

दकारस्य मया ख्यातमनृतमपरं स्मृतम् ।
स्वतन्त्रे देवदेवेशि दक्षिणामूर्तिना कृते ॥ ५४ ॥
(ध) पुष्पबीजं प्रसूनं च प्रसूतिः सुप्रजास्तथा ।
धकारस्यानृतमन्यत् त्रिपुरातिलके स्मृतम् ॥ ५५ ॥
(न) क्षारबीजं च लवणं सैन्धवं सूकरं वृकम् ।
वाराहमनृतमन्यन्मया ख्यातं सुरेश्वरि ॥ ५६ ॥
त्रैलोक्यप्रथिते ग्रन्थे त्रिपुरायाः शिरोमणौ ।
(प) कूर्ममीनपदन्यासौ बीजार्णे सदृशं प्रिये ॥ ५७ ॥
फकारस्य पकारस्य भेदो नास्ति परस्परम् ।
भाषणोद्धारविषये लिखने प्रकृतिः पृथक् ॥ ५८ ॥
मत्स्यं च मीनबीजं च शफरीबीजमेव च ।
झषबीजं मयाख्यातं ग्रन्थे छिन्नाशिरोमणौ ॥ ५९ ॥
(फ) कूर्मबीजं च कमठं कर्कटोऽपि कुलीरकम् ।
कच्छपमनृतमन्यन्मयाख्यातं च भामिनि ॥ ६० ॥
शारदापटले ग्रन्थे त्रैलोक्यग्रथिते शिवे ।
(व) ऊर्मिर्वीचिस्तथा चैवं तरङ्गस्त्रितयं स्मृतम् ॥ ६१ ॥
असत्यमपरं ज्ञेयं मयाख्यातं सुरेश्वरि ।
कालिकाकुलसर्वस्वे ब्रह्मणैव प्रकाशिते ॥ ६२ ॥
(भ) भद्रिका भास्वती भीमा भकारस्यानृतं परम् ।
तन्त्रे वै मुण्डमालायां मयाख्यातं सुरेश्वरि ॥ ६३ ॥
(म) डुलिबीजं शिलीबीजं मण्डूकं दर्दुरं तथा ।
भेकीबीजं मयाख्यातमसत्यमपरं स्मृतम् ॥ ६४ ॥
आगमामृतमञ्जर्यां पर्वतेश्वरनन्दिनि ।
(य) वायुबीज तथा वाग्मि यच्चालं वरयबीजकम् । ६५ ॥
वीराणार्णे[1] तथा वापी मयाख्यातं स्वतन्त्रके ।

---

१ '।"ब्बीज' ग. पाठः ।

(र) अग्नी रेफश्च वह्निश्च हुतभुग् हव्यवाहनः ॥ ६६ ॥
रकारस्य मयाख्यातं श्यामातन्त्रे सुरेश्वरि ।
(ल) तमोबीजं तथा ध्वान्तं मोहं तिमिरमेव च ॥ ६७ ॥
लकारस्य मयाख्यातं स्वतन्त्रे मुनिवन्दिते ।
भूबीजं धरणीबीजं लकारं भाषितं मया ॥ ६८ ॥
(व) अभ्रं मेघं च जीमूतमम्बुभृदम्बुदं घनम् ।
वकारस्य मयाख्यातं तन्त्रे वै वामकेश्वरे ॥ ६९ ॥
(श) कल्याणं चैव शर्मापि शं शुभं च चतुष्टयम् ।
शकारस्य मयाख्यातं ग्रन्थे भैरवतन्त्रके ॥ ७० ॥
(ष) शम्पाबीजं तडिद्बीजं विद्युच्चतड्दा तथा ।
द्रादिनीबीजकं चैवमसत्यमपरं स्मृतम् ॥ ७१ ॥
मयाख्यातं सुरेशानि ग्रन्थे वै रुद्रयामले ।
(स) शक्तिः शर्मापि विज्ञेये शरच्छङ्के तथैव च ॥ ७२ ॥
सकारस्य मयाख्यात ग्रन्थे छिन्नाशिरोमणौ ।
(ह) छविबीजं कान्तिबीजं शोभा भा सुषमा तथा ॥ ७३ ॥
आकाशं च हकारस्यानृतमन्यन्मयोदितम् ।
सिद्धसारस्वते ग्रन्थे नित्य माम्बिकपूजिते ॥ ७४ ॥
(क्ष) देवबीजं निर्जरं च त्रिदशं त्रिदिवेशकम् ।
सुरबीज च गीर्वाण लेखममरबीजकम् ॥ ७५ ॥
क्षकारस्य मया प्रोक्तं कुलचूडामणौ प्रिये ।
वर्णाना देवदेवेशि कोश प्रोक्तं मया शिवे ।
नानामन्त्रयुत देवि सर्वागमविनिश्चितम ॥ ७६ ॥

अथ

षष्ठः कल्पः

श्रीईश्वरः ।

द्व्यक्षराणां पृथङ्नाम क्रींप्रींश्रींह्रींद्रौंः तथा ।
पृथङ्नाम सुरेशानि सकलागमनिश्चितम् ॥ १ ॥
अद्य वक्ष्यामि ते देवि तिस्रो भुवनदेवताः ।
दक्षिणामूर्तिना पूर्वमृषीणां भाषिताः स्वयम् ॥ २ ॥
भवानी देवदेवेशि द्वितीया बगलामुखी ।
इन्द्राक्षी सा तृतीया च तिस्रो भुवनदेवताः ॥ ३ ॥
आसामहं ते मन्त्राणि वक्ष्यामि शृणु पार्वति ।
यस्य कस्य न वक्तव्यं न वक्तव्यं वरानने ॥ ४ ॥

तत्रादौ भवानीमन्त्रोद्धारः, मुण्डमालातन्त्रे—

(१) प्रणवं चैव द्वे पद्मे व्यक्षयुग्मं परा पुनः ।
हरिणाक्षी-द्वयं कूर्चं हरं ठद्वयसंयुतम् ॥ १ ॥

प्रकाशम् — ॐ श्रीं श्रीं ॐ ॐ ह्रीं श्रीं श्रीं हूं फट् स्वाहा, इति ॥

अथ बगलामुख्या मन्त्रोद्धारः, आगमलहर्याम्—

(२) तारकं चैव मृद्वीजं व्यक्षरं समुदाहृतम् ।
मन्त्रं च द्वि-शिरो ज्ञेयं ततः पल्लवमुद्धरेत् ॥ १ ॥
भगवति बगला च मुखि देवि ततः पुनः ।
ततोऽपि सर्वदुष्टानां वाचं मुखं पदं तथा ॥ २ ॥
स्तम्भय द्विस्तथा जिह्वां कीलय द्विर्बुद्धिं तथा ।
विनाशय द्विवारं च मृत्तिकाबीजकं तथा ॥ ३ ॥

त्र्यक्षमन्ते पयो ज्ञेयं द्विपञ्चाशाक्षरो मनुः ।

तत्र मृद्बीजनामानि, भैरवतन्त्रे—

मृद्बीजं मृत्तिकाबीजं मृत्स्नाबीजं प्रशस्तिका ।
मृत्साऽमृतं परं ज्ञेयं पर्वतेश्वरनन्दिनि ॥ १ ॥

ह्रीं इति मृद्बीजम् । प्रकाशम्—ॐ ह्रीं भगवति बगलामुखि देवि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय २ जिह्वां कीलय २ बुद्धिं विनाशय २ ह्रीं ॐ स्वाहा [५२] इति ॥ अथेन्द्राद्या मन्त्रोद्धारः, रुद्रयामले—

(२) त्र्यक्षं कुन्तीद्वयं देवि कूर्चयुग्मं तथैव च ।
प्रस्थबीजं परां पद्मां चर्माणं च ततोऽभिधाम् ॥ १ ॥
इन्द्राक्षि वज्रहस्तेऽन्ते लक्ष्मीं लज्जां च पुष्करम् ।
वीरयुग्मं रसने द्वे त्रासयन्द्वौ हरं वनम् ॥ २ ॥
इन्द्राद्या देवदेव्याश्च ह्यष्टाविंशाक्षरो मनुः ।

तत्र प्रस्थबीजनामानि, शारदापटले—

प्रस्थबीजं सानुबीजं शिखरं पुष्करं तथा ।
म्लौं-बीजोद्धारमेतद्धि चान्यदनृतमावदेत् ॥ १ ॥

प्रकाशम् — ॐ क्रीं क्रीं हुं हु म्लौं ह्रीं श्रीं ये इन्द्राक्षि वज्रहस्ते श्रीं ह्रीं म्लौं हुं हु क्रीं क्रीं ॐ ये फट् स्वाहा [२८] इति ॥

श्रीईश्वरः ।

विद्या एता मया ख्याता देवि भुवनदेवताः ।
दक्षिणामूर्तिना भक्त्या संसारेऽस्मिन् प्रकाशिताः ॥ १ ॥
अथाहं देवदेवेशि खेचर्या वच्मि वै मनुम् ।
यमाश्रित्य लभेद्योगी खेचरीं सिद्धिदां कलाम् ॥ २ ॥

विश्वयामले, खेचरीमन्त्रोद्धारः—

(१) गीर्वाणदशमं वर्णं चोद्धरेत् प्रतिलोमतः ।
तमोबीजं ततो दद्यान्मायाबीजं ततः परम् ॥ १ ॥
ततो दद्याच्छ्रद्धाबीजं कूटोऽयं परिकीर्तितः ।

मन्त्रं (बीजं) तुर्यशिरो ज्ञेयं योगी दद्यात्ततोऽभिधाम् ॥ २ ॥
खेचर्यै च ततो दद्यादन्ते ह्रौरमकमेव च ।

प्रकाशम्—मूलहींसौः खेचर्यै नमः, इति ॥

इति श्रीदक्षिणामूर्तिमुनिविरचिते उद्धारकोशे सर्वागमसारे त्रिदेवीनां खेचर्याश्च कोशाख्याने षष्ठः कल्पः ॥ ६ ॥

अथ

सप्तमः कल्पः

श्रीईश्वरः ।

अथ वक्ष्यामि ते देवि ध्यानानागमनिश्चितान् ।
एतासां देवतानां त्वं शृणु पार्वति तत्त्वतः ॥ १ ॥
तत्रादौ दशविद्यानां ध्यानं वक्ष्यामि त्वं शृणु ।
वामकेश्वर-तन्त्रोक्तं त्रिपुरायाः सुरेश्वरि ॥ २ ॥

दिव्याम्बराङ्कितततुं मिहिराग्निचन्द्र-
नेत्रां सुधांशुमुकुटां हिमसन्निभाभाम् ।
सिंहासनां परशुखड्गधरां भुजाभ्यां
ब्रह्मेन्द्रविष्णुनमितां त्रिपुरां भजेऽहम् ॥ ३ ॥

अथ वक्ष्ये श्रियो ध्यानं भाषितं रुद्रयामले ।
मुनिसाधकगीर्वाण—विघ्नवर्गैः[1] सुपूजितम् ॥ ४ ॥
लक्ष्मीं पद्मासनगतकटिं सूर्यशीतांशुनेत्रा-
मुद्यद्भास्वत्कनकरुचिभिः पद्मशङ्खासिपाणिम् ।

---

१ 'विघ्नवर्गैः' ख. पाठः ।

नानामुक्तामणिसुकलशा भूषिताङ्गीं द्विबाहुं
नित्यं लोकत्रितयफलदां नौम्यहं भक्तिपूर्वम् ॥ ५ ॥
अथ वक्ष्यामि वाग्देव्या ध्यानं विद्याप्रदं शिवे ।
तन्त्रमुक्तावलौ ग्रन्थे दुर्लभे त्रिदिवेऽपि च ॥ ६ ॥
वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां
चन्द्रार्धाङ्कितमस्तकां निजकरैः सम्बिभ्रतीमादरात् ।
वीणामक्षगुणं सुधाढ्यकलशं विद्यां च तुङ्गस्तनीं
दिव्यैराभरणैर्विभूषिततनुं सिंहाधिरूढां भजे ॥ ७ ॥
अथ वक्ष्यामि तारायाः ध्यानं भैरवतन्त्रके ।
देव्या भेदविहीनाया मुनिसाधकपूजिते ॥ ८ ॥
देवीं पन्नगभूषितां हिमरुचिं शीताशुशङ्खप्रभां
मुक्तारत्नपरीतकण्ठवलयां रक्ताम्बरं बिभ्रतीम् ।
शूलाब्जासिगदाधरां सुरगणैर्ब्रह्मेशविष्ण्वादिभिः स्तुतां
नित्यं लोकत्रयैकरक्षणपरां तारां त्रिनेत्रां भजे ॥ ९ ॥
अथाहं भुवनेश्वर्या ध्यानं वक्ष्यामि तच्छृणु ।
साधकेष्टप्रदे ग्रन्थे निःसृते रुद्रयामले ॥ १० ॥
उद्यद्भानुसहस्रसन्निभमुखीं पीनस्तनीं पद्मगां
दोर्भिरङ्कुशपाशपुस्तकजपान् सम्बिभ्रतीं सादरम् ।
ब्रह्मोपेन्द्रमहेश्वरेन्द्रमुनिभिर्नित्यं स्तुतां वन्दनैः
स्तोत्राद्यैर्भुवनेश्वरीं त्रिनयनां हृत्पङ्कजेऽहं भजे ॥ ११ ॥
अथ वक्ष्यामि मातङ्ग्याः ध्यानं पर्वतनन्दिनि ।
कुब्जिकासर्वस्वे ग्रन्थे ममाप्यत्यन्तदुर्लभे ॥ १२ ॥
चन्द्रार्धाङ्कितशेखरां त्रिनयनां कोटीन्दुसूर्यप्रभां
नानारत्नसहस्रबद्धरशनां प्रेतासने संस्थिताम् ।

---

१ अथवा ख पाठः ।

शङ्खं तोमरपट्टिसाब्जयुगलान् दोर्भिर्वहन्तीं मुदा
ध्यायेऽहं हृदये सदा भगवतीं मातङ्गिनीं हारिणीम् ॥ १३ ॥
अथ वक्ष्ये महेशानि शारिकाध्यानमुत्तमम् ।
आगमामृतमञ्जर्यां निःसृतं दुर्लभं जनैः ॥ १४ ॥
श्रीशङ्खचक्रमुसलाम्बुजयुग्महस्तां
नागेन्द्रहारवलयाङ्कितकण्ठमालाम् ।
सिन्दूरकुङ्कुमसहस्रमरीचिदीप्तिं
श्रीशारिकां त्रिनयनां हृदये स्मरामि ॥ १५ ॥
अथ वक्ष्यामि देवेशि राज्ञीध्यानमनुत्तमम् ।
वामकेश्वरतन्त्रोक्तं पर्वतेश्वरनन्दिनि ॥ १६ ॥
शीतांशुबालार्ककृशानुनेत्रां
चतुर्भुजामेणखगासनस्थाम् ।
शङ्खाब्जशूलासिधरां महेशीं
राज्ञीं भजेऽहं तुहिनाद्रिरूपाम् ॥ १७ ॥
अथ वक्ष्यामि भीडाया ध्यानमिच्छाफलप्रदम् ।
निःसृतमागमोद्द्योते मया विरचिते स्वयम् ॥ १८ ॥
उद्यच्छीतांशुरश्मिद्युतिचयसदृशीं फुल्लपद्मोपविष्टां
वीणानागेन्द्रशङ्खायुधपरशुधरां दोर्भिरीड्यैश्चतुर्भिः ।
मुक्ताहारांशुनानामणियुतहृदयां शीधुपात्रं वहन्तीं
वन्दे भीडां भवानीं प्रहसितवदनां साधकेष्टप्रदात्रीम् ॥१९॥
अथ वक्ष्यामि देवेशि ज्वालामुख्या अनुत्तमम् ।
ध्यानं मया विरचिते ग्रन्थे ज्वालाशिरोमणौ ॥ २० ॥
ज्वालापरीतास्यशिरोरुहां तां
सरोजशङ्खासिगदाधरां च ।

---

१ 'शङ्खाब्जयुग्मह' ग. घ. ङ. ।

सिंहासनस्थापितपादयुग्मां
ज्वालामुखीं सद्धृदये स्मरामि ॥ २१ ॥
अथाहं भद्रकाल्याश्च ध्यानं वक्ष्यामि निःसृतम् ।
स्वयं मया विरचिते तन्त्रे वै वामकेश्वरे ॥ २२ ॥
मुण्डं विश्वस्य कर्तुः करकमलतले धारयन्तीं हसन्तीं
नाहं दृष्ट्वा वदन्तीं सकलजनमिदं भक्षयन्तीं सदैव ।
श्यामां विष्णुं गिरीशं भुजनिवहबलाच्छूलप्रोतं वहन्तीं
ध्यायेऽहं भद्रकालीं नवजलदनिभां प्रेतमध्यासनस्थाम् ॥२३॥
तुरीध्यानमहं वक्ष्ये निःसृतमागमामृते ।
अस्मिंश्चराचरे ख्याते ब्रह्मणैव प्रकाशिते ॥ २४ ॥
नानारत्ननिबद्धचन्द्रशकला मौलौ जटाभिर्वृते
पाशाम्भोजधरां हिमांशुधवलां दोर्भ्यां द्विबाहुं शिवाम् ।
सूर्येन्द्वग्निविलोचनां स्मितमुखीं प्रेतासने संस्थितां
ब्रह्मोपेन्द्रमहेश्वरैश्च नमितां देवीं भजेऽहं तुरीम् ॥ २५ ॥
अथाहं[1] छिन्नमस्ताया ध्यानं वक्ष्यामि निःसृतम् ।
स्वकृते त्रिपुरायाश्च ग्रन्थे देवि शिरोमणौ ॥ २६ ॥
प्रणाङ्कांशुपरीतभालफलका बालार्ककोटिप्रभां
ज्वालाबद्धमहार्घरत्ननिचया कन्दर्पदर्पोज्ज्वलाम् ।
शूलास्यङ्कुशपाशवेणुमुसलाम्भोजाभयान् बिभ्रतीं
भक्तेष्टां छिन्नमस्तका भगवतीं ध्याये हृदब्जे सदा ॥ २७ ॥
दक्षिणाकालिकायाश्च ध्यानं वक्ष्यामि निःसृतम् ।
ग्रन्थे कालीरहस्येऽस्मिन् पर्वतेश्वरनन्दिनि ॥ २८ ॥
ब्रह्मोपेन्द्रशिवास्यमुण्डरशना ताम्बूलरक्ताधरा
वर्षामेघनिभा त्रिशूलमुसले पद्मासिपाशाङ्कुशान् ।

---

१ 'अथारी' ग. पाठः । २ 'अके पूजितगादपद्मयुगला श्रीछिन्नमस्तां भजे' ग. पाठः ।

शङ्खं साहियुगं वरं दशभुजैः संबिभ्रतीं प्रेतगां
देवीं दक्षिणकालिकां भगवतीं रक्ताम्बरां तां स्मरे ॥ २९

अथ वक्ष्यामि श्यामाया ध्यानं पर्वतनन्दिनि ।
श्यामातन्त्रे मयाख्यातं सकलागमसागरे ॥ ३० ॥

त्रैलोक्यपूजितपदाम्बुरुहद्वयां तां
कृष्णाम्बुभृत्सदृशरूपधरां त्रिनेत्राम् ।
शूलासिशङ्खमहतीश्च भुजैर्वहन्तीं
श्यामां भजे शवशरीरकृतासनस्थाम् ॥ ३१ ॥

अथाहं कालरात्र्यास्ते ध्यानं वक्ष्यामि निःसृतम् ।
मया विरचिते देवि तन्त्रे वै वामकेश्वरे ॥ ३२ ॥

शूलाब्जपाशाङ्कुशपद्महस्तां
चतुर्भुजां धूम्रनिभां त्रिनेत्राम् ।
सिंहासनस्थां धृतपीतवस्त्रां
ध्याये महेशीं हृदि कालरात्रीम् ॥ ३३ ॥

नानाभरणसंयुक्ते देवि वक्ष्यामि तं शृणु ।
श्रीवज्रयोगिनीध्यानं निःसृतं कुलिकार्णवे ॥ ३४ ॥

इन्द्राग्निसूर्यनयनां पाशाङ्कुशधरां शिवाम्[1] ।
द्विभुजां सिंहमध्यस्थां भजेऽहं वज्रयोगिनीम्[2] ॥ ३५ ॥

अथ वक्ष्यामि वाराह्या ध्यानं तन्त्रविनिश्चितम् ।
यथाभीष्टप्रदं देवि कुलचूडामणौ प्रिये ॥ ३६ ॥

चन्द्रार्धचूडां द्विभुजां भुजाभ्या
शूलाङ्कुशौ श्याममुखीं वहन्तीम् ।
सूर्याग्निचन्द्रीकृतनेत्रपद्मौ[3]
ध्याये हृदब्जे विमलां वराहीम् ॥ ३७ ॥

---

१ 'परां' क. 'शुभां' ग पाठः । २ 'अभयदाम्' क ग घ. पाठ । ३ 'दृष्टिगता' क पाठः ।

अथ वक्ष्यामि देवेशि शारदाध्यानमुत्तमम् ।
शारदापटले ग्रन्थे रचितेऽपि मया स्वयम् ॥ ३८ ॥
षड्भुजा त्रिनयनां स्मितानना
शाणिडन्यर्पितपादपङ्कजाम् ।
पर्वतस्थितवतीं धृतशूला
शारदा भगवतीं हृदि ध्याये ॥ ३९ ॥
अथ वक्ष्यामि देवेशि त्व शृणु ध्यानमुत्तमम् ।
कामेश्वर्यास्त्रिपुरायाः सर्वस्वे तन्त्रकोत्तमे ॥ ४० ॥
त्रिलोचना सूर्यसहस्रशोभा
सिंहासनस्था द्विभुजा धृतासिम् ।
पीताम्बरा विष्णुमहेशसेव्या
कामेश्वरीं तां हृदये स्मरामि ॥ ४१ ॥
अथ वक्ष्यामि गौर्यास्ते ध्यान भैरवतन्त्रके ।
ग्रन्थे मया विरचिते पर्वतेश्वरनन्दिनि ॥ ४२ ॥
गौराङ्गीं धृतपङ्कजा त्रिनयना श्वेताम्बरा सिंहगा
चन्द्रोद्भासितशेखरा स्मितमुखीं दोर्भ्यां वहन्तीं गदाम् ।
विष्णिवन्द्राम्बुजयोनिशम्भुत्रिदशैः सपूजिताङ्घ्रिद्वया
गौरीं मानसपङ्कजे भगवतीं भक्तेष्टदा तां भजे ॥ ४३ ॥
अथाऽन्नपूर्णाया ध्यान वक्ष्यामि त्व शृणु ।
निःसृत भैरवीतन्त्रे मया देवि प्रकाशिते ॥ ४४ ॥
चन्द्रार्धमौलिं द्विभुजा त्रिनेत्रा
शूलाक्षमाले द्विभुजे वहन्तीम् ।
एणासनस्था भुजगोपवीता
तामन्नपूर्णां हृदये स्मरामि ॥ ४५ ॥
कुलयोगीश्वरी-ध्यान वक्ष्यामि त्व शृणु प्रिये ।

आगमामृतमञ्जर्यां दुर्लभायां ममापि च ॥ ४६ ॥
त्रिशूलासिधरां दोर्भ्यां रक्तास्यां वह्निसन्निभाम् ।
त्र्यक्षां सिंहासनगतां कुलवागीश्वरीं भजे ॥ ४७ ॥
अथ वक्ष्ये गणेशस्य ध्यानं गीर्वाणपूजिते ।
आगमामृतपीयूषे दुर्लभे भुवनेऽम्बिके ॥ ४८ ॥
द्विचतुर्दशवर्णभूषिताङ्गं
मुसलाम्भोजधरोरगोपवीतम् ।
द्विमृगाधिपगामिनं त्रिनेत्रं
शिवपुत्रं द्विरदाननं भजेऽहम् ॥ ४९ ॥
अथ ध्यानं कुमारस्य वक्ष्यामि शृणु पार्वति ।
निःसृतमागमोद्द्योते मया विरचिते स्वयम् ॥ ५० ॥
हिमाद्रिगौरं[2] द्विभुजं भुजङ्गैः
परीतगात्रं शिखिविष्टरस्थम् ।
नगेन्द्रकन्याप्रियपुत्रमाद्यं
हृदि स्मरेऽभीष्टप्रदं कुमारम् ॥ ५१ ॥
हैहयस्य ब्रवीम्येवं ध्यानं तव कुतूहलात् ।
यथाभीष्टप्रदं नृणामुड्डामरविनिश्चितम् ॥ ५२ ॥
सहस्रभुजमण्डलीनिततमीचरेशाधिपं
हिमांशुसदृशाननं धृतसहस्रतूणीरकम् ।
सिताम्बरधरं सदा तुरगराजमध्यस्थितं
स्मरामि भुवनाधिपं हृदि तु कार्तवीर्यार्जुनम् ॥ ५३ ॥
अथ वक्ष्यामि देवेशि ध्यानं तस्य विनिःसृतम् ।
मृत्युञ्जयस्य देवस्य ग्रन्थे कुब्जाशिरोमणौ ॥ ५४ ॥

---

१ 'स्मेर' ग. पाठ. । २ 'श्वेत' ग. पाठः ।

चन्द्रोद्भासितमूर्धजं सुरपतिं पीयूषपात्रं वृहद्
हस्ताब्जेन सुधांशुकोटिविमलं हस्तस्थपङ्केरुहम् ।
सूर्याग्नीन्दुविलोचनं करवलैः पाशाक्षसूत्राङ्कुशा-
म्भोजान्बिभ्रतमक्षयं पशुपतिं मृत्युञ्जयं तं स्मरे ॥ ५५ ॥
सुग्रीवस्याथ वक्ष्येऽहं ध्यानं पर्वतनन्दिनि ।
कुलचूडामणौ ग्रन्थे निर्मिते मन्त्रसागरे ॥ ५६ ॥
बालं षोडशहायनं कपिपतिं वह्निप्रभाभास्वरं
दोर्भिर्बिभ्रतगदाधनुःशरचयान् संबिभ्रतं चादरात्[2] ।
सीतामार्गणसक्तवानरबलैराराध्यमानं भजे
काकुत्स्थं भजमानमर्कतनयं सुग्रीवदेवं हृदि ॥ ५७ ॥
अथाहं ते हनुमतो ध्यानं वक्ष्यामि निःसृतम् ।
कुलचूडामणौ ग्रन्थे पर्वतेश्वरनन्दिनि ॥ ५८ ॥
रामेष्टमित्रं जगदेकवीरं
सुवज्ररावेन्द्रकृतप्रणामम् ।
सुमेरुशृङ्गाभमचिन्त्यमाद्यं
हृदि स्मरेऽहं हनुमन्तमीड्यम् ॥ ५९ ॥
अथ ते भैरवस्याहं ध्यान वक्ष्यामि पार्वति ।
निःसृतं भैरवे तन्त्रे यथाभीष्टफलप्रदम् ॥ ६० ॥
कपालहस्तं भुजगोपवीतं
कृष्णच्छविं दण्डधरं त्रिनेत्रम् ।
अचिन्त्यमाद्य मधुपानसक्त
हृदि स्मरे भैरवमिष्टद तम् ॥ ६१ ॥
अथ वक्ष्यामि सूर्यस्य ध्यानं तन्त्रविनिश्चितम् ।

---

[1] 'चन्द्रोद्भासितमूर्धजं' ग. पाठः । २ 'सादरात्' ग. पाठः । ३ 'वक्ष्य इत्यवधिय रघुपतिमाराधयन्त मुदा ध्यायेऽहं भगवन्तमर्कतनय' ख. पाठ. ।

त्रिपुरासर्वस्वे ग्रन्थे दक्षिणामूर्तिना कृते ॥ ६२ ॥

प्रत्यक्षदेवं विशदं सहस्र-
मरीचिभिः शोभितभूमिदेशम् ।
सप्ताश्वगं सद्ध्वजहस्तमाद्यं
देवं भजेऽहं मिहिरं हृदब्जे ॥ ६३ ॥

अथ वक्ष्यामि सौम्यस्य ध्यानं भैरवतन्त्रके ।
यथाभीष्टप्रदं सत्यं सुरासुरनमस्कृते ॥ ६४ ॥

सोमात्मजं हंसगतं द्विबाहुं
शङ्खेन्दुरूपं ह्यसिपाशहस्तम् ।
दयानिधिं भूषणभूषिताङ्गं
बुधं स्मरे मानसपङ्कजेऽहम् ॥ ६५ ॥

अथ वक्ष्यामि शुक्रस्य ध्यानं तन्त्रविनिश्चितम् ।
कुब्जिकासर्वस्वे ग्रन्थे ब्रह्मणैव प्रकाशिते ॥ ६६ ॥

सन्तप्तकाञ्चननिभं द्विभुजं दयालुं
पीताम्बरं धृतसरोरुहद्वन्द्वशूलम् ।
कौशासनं ह्यसुरसेवितपादपद्मं
शुक्रं स्मरे द्विनयनं हृदि पङ्कजेऽहम् ॥ ६७ ॥

अथ वक्ष्यामि जीवस्य शृणु पार्वति तत्त्वतः ।
ध्यानं भैरवतन्त्रोक्तं सकलार्थप्रदं नृणाम् ॥ ६८ ॥

तेजोमयं शक्तित्रिशूलहस्तं
सुरेन्द्रज्येष्ठैः स्तुतपादपद्मम् ।
मेधानिधिं हस्तिगतं द्विबाहुं
गुरुं स्मरे मानसपङ्कजेऽहम् ॥ ६९ ॥

---

१ 'मरुत्प' ग, पाठः ।

अथ वक्ष्यामि चन्द्रस्य ध्यानं देवि शृणु प्रिये ।
निःसृतमागमोद्द्योते नानाध्यानसरित्पतौ ॥ ७० ॥
शङ्खप्रभमेणप्रियं शशाङ्क-
मीशानमौलिस्थितमीड्यमूर्त्तम् ।
तमीपतिं नीरजयुग्महस्तं
ध्याये हृदब्जे शशिनं ग्रहेशम् ॥ ७१ ॥
अथ वक्ष्यामि भौमस्य ध्यानं तत्त्वविनिश्चितम् ।
आगमामृतमञ्जर्यां शृणुष्वैकमनाः प्रिये ॥ ७२ ॥
प्रतप्तगाङ्गेयनिभं ग्रहेशं
सिंहासनस्थं कमलासिहस्तम् ।
सुरासुरैः पूजितपादपद्मं
भौमं दयालुं हृदये स्मरामि ॥ ७३ ॥
अथ वक्ष्ये शनेर्ध्यानं यथाभीष्टफलप्रदम् ।
निःसृतं च महेशानि शुभदमागमामृते ॥ ७४ ॥
नीलाञ्जनाभं सिंहिरेष्टपुत्रं
ग्रहेश्वरं पाशभुजङ्गपाणिम् ।
सुरासुराणां भयदं द्विबाहुं
शनिं स्मरे मानसपङ्कजेऽहम् ॥ ७५ ॥
अथाहं सैंहिकेयस्य ध्यानं वक्ष्यामि तं शृणु ।
निःसृतं फलदं नृणां तन्त्रे वै वामकेश्वरे ॥ ७६ ॥
शीतांशुमित्रान्तकमीड्यरूपं
घोरं च वैडूर्यनिभं विबाहुम् ।
त्रैलोक्यरक्षापरमिष्टदं च
राहुं ग्रहेन्द्रं हृदये स्मरामि ॥ ७७ ॥

---

१ 'रूपम्' ग. पाठः । २ 'मन्वुज' क पाठः । ३ 'प्रदं' ग. पाठः ।

अथ वक्ष्यामि केतोश्च ध्यानमागमनिश्चितम् ।
निःसृतमागमोद्द्योते ग्रन्थे वै तंत्रसागरे ॥ ७८ ॥

लाङ्गूलयुक्तं भयदं जनानां
कृष्णाम्बुभृत्सन्निभमेकवीरम् ।
कृष्णाम्बरं शक्तित्रिशूलहस्तं
केतुं भजे मानसपङ्कजेऽहम् ॥ ७९ ॥

अथ वक्ष्यामि देवेशि भवानीध्यानमुत्तमम् ।
कुलचूडामणौ ग्रन्थे निःसृतं भुवनेश्वरि ॥ ८० ॥

अरिशङ्खकृपाणखेटबाणान्
सुधनुःशूलकतर्जनीर्दधानाम्[1] ।
भयदां महिषोत्तमाङ्गसंस्थां
नवदूर्वासदृशीं भजे भवानीम् ॥ ८१ ॥

अथाहं बगलामुख्या ध्यानं वक्ष्यामि निःसृतम् ।
आगमामृतमञ्जर्यां सुरासुरनमस्कृते ॥ ८२ ॥

नानारत्ननिबद्धरम्यमुकुटां पीताम्बरां भाग्यदां
घर्मांश्वग्निशशाङ्करश्मिनयनां सिंहासनस्थां शिवाम् ।
सचण्डोशरता[2] महार्घमणिभिरुद्भासिताङ्गीं सदा
देवीं श्रीबगलामुखीं हृदि भजे भक्तेष्टदां मुक्तिदाम् ॥ ८३ ॥

अथ वक्ष्ये शृणोषि त्वमिन्द्राणीध्यानमुत्तमम् ।
निःसृतं जगदीशानि ग्रन्थे वै रुद्रयामले ॥ ८४ ॥

---

१ 'मन्त्र' ख. पाठः । २ 'र्दधाना । भवतां महिषोत्तमाङ्गसस्था नवदूर्वासदृशी श्रियेऽस्तु दुर्गा' क. पाठः । ३ 'सचण्डांशुनिभा' क. सदृगाग्नेयनिभा ग. पाठः ।

मालास्वङ्कुशपद्मयुग्मकधरां चक्षुःसहस्राङ्कितां[1]
मत्तैरावणपृष्ठगां शशिमुखीं त्रैलोक्यरक्षापराम् ।
दोर्भिर्गानरतां स्फुटाम्बुजनिभां ब्रह्मादिदेवैः स्तुता-
मिन्द्राचीं जनमातरं हृदि भजे कारुण्यरूपां पराम् ॥ ८५ ॥
अथ वक्ष्ये महेशानि खेचरीध्यानमुत्तमम् ।
यां ध्यात्वा खेचरीं योगी जीवन्मुक्तो भवेत् कलौ ।
ग्रन्थे भैरवतन्त्राख्ये निःसृतं त्रिदशार्चिते ॥ ८६ ॥
विनिन्द्रकमलोत्पलैर्मुनिभिरर्चितांघ्द्वयां
सितां सितकराम्बुजां सितकरोज्ज्वलच्चेखराम् ।
रवीन्दुशिखिलोचनामभयपुस्तकौ बिभ्रतीं
स्मरामि हृदि खेचरीं भुवनमातरं सिद्धिदाम् ॥ ८७ ॥
एतासां देवदेवेशि मन्त्रध्यानचयं स्मृतम् ।
यस्य कस्य न दातव्यं ग्रन्थमुद्धारकोशकम् ॥ ८८ ॥

ऋषय ऊचुः ।

धन्यः स यस्य पुत्रस्त्वं सकलागमपारगः ।
जय त्वं स्वगृहं गन्तुमाज्ञापयितुमर्हसि ॥ ८९ ॥

दक्षिणामूर्तिः ।

गच्छध्वं मुनयः सर्वे क्षमध्वं कृपया मम ।
इत्युक्ता मुनयो जग्मुः स्वगृहं मन्त्रलालसाः ॥ ९० ॥

श्रीईश्वर उवाच ।

दक्षिणामूर्तिना तेन दृष्ट्वा तत्रान्मनोरमान् ।
कृतमुद्धारकोशाख्यं ग्रन्थं गोप्यतमं कुरु ॥ ९१ ॥

---

१ 'साद्भुतनेत्रां शिवां' ग. पाठः ।

श्रीदेव्युवाच ।

क्रीतासि भवतानेन ग्रन्थेनाहं सुरेश्वर ।
इत्युक्त्वा सुमहाकुम्भं कैलासाद्रेश्च जग्मतुः ।
उभौ तावम्बिका देवी देवश्च चन्द्रशेखरः ॥ ९२ ॥

इति श्रीदक्षिणामूर्तिमुनिविरचिते उद्धारकोशे सर्वागमसारे षोडशदेवी—सतेदवी—सप्तकुमार—नवग्रह-त्रिदेवी—खेचरीध्यानकोशनिरूपण सप्तमः कल्प ॥ ७ ।

JAMNADAS THAKKAR
18, ,263,SION-W
BOMBAY 400 022 INDIA

समाप्तश्चायमुद्धारकोश इति शिवम् ।

